नं: १२८ - घ

महाभाष्यम् टीका

कैय्यट द्वितीयचरण

द्वितीया ह्निकम्

पत्राणि १६४

नं० १२८-घ

महाभाष्यटीका

कैय्यटकृत रथचरण-

रयाह्निकम्

पत्राणि १६४

भाष्यकैयटप्रथमाध्यायचतुर्थचरणप्रथमाह्निक

1

भा॰कै॰

॥:५॥६॥

श्रीगणेशाय नमः॥ यू स्त्र्याख्यौ नदी॥ यू इति किमर्थमिति। स्त्र्याख्यं नदीत्येतावदेवास्तु ज्ञापकादापो न भविष्यतीति प्रश्नः। एष स्वर इति। पूर्वपदप्रकृतिस्वरं बाधित्वा पूर्वपदान्तोदात्तत्वमित्यर्थः। इष्यते च पूर्वपदप्रकृतिस्वरेणाद्युदात्तत्वं। खट्वाशब्दस्य नित्स्वरेणाद्युदात्तत्वात्। मातुरिति। मातृशब्दः संबन्धिवचनः स्त्रीविषय एवेति नाख्याग्रहणेन निवर्त्यते। परिच्छेत्तृवाचीत्वन्य एव मातृशब्दः। नद्यृतश्चेति। ऋग्रहणमस्य धर्मे स्यात्त्व कुपितकः इत्येतज्ज्ञापकमकारान्तानां नदीसंज्ञाभावस्य। किं पुनरिति। ननु समानधर्मानुपपत्त्या संदेहाभावात् प्रश्नानुपपत्तिः। न हि दीर्घ

श्रीः॥ यू स्त्र्याख्यौ नदी॥ यू इति किमर्थं। खट्वामाला। किं च स्यात्। खट्वाबन्धुः मालाबन्धुः नदी बन्धुनीत्येष स्वरः प्रसज्येत। इह च बहुखट्वक इति। नद्यृतश्चेति नित्यं कप् प्रसज्येत। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नापो नदीसंज्ञा भवतीति। यदयं ङेराम्नद्याम्नीभ्य इति पृथगाब्ग्रहणं करोति। इह तर्हि मात्रे मातुरित्याण्नद्या वृद्धात् प्रसज्येत। किं पुनरिदं दीर्घयोर्ग्रहणमाहोस्विद्ध्रस्वयोः। किं चातः। यदि दीर्घयोर्ग्रहणं यू इति निर्देशो नोपपद्यते। दीर्घाद्धि पूर्वसवर्णदीर्घः प्रतिषिध्यते। उत्तरत्र च संज्ञिविशेषणं न प्रकल्पेत। यू स्त्र्याख्यावितीयदि ने ह्रस्वौ यू ह्रस्वौ यू च इति विप्रतिषिद्धं। अथ ह्रस्वयोः। हशकटे। अत्रापि प्रसज्येत। नैष दोषः॥

अथह्रस्वौन १

निर्देशस्य इति निर्देशोपपत्तिः। एवं तर्हि युक्तायुक्तत्वनिरूपणाय प्रश्नः। उत्तरत्रेति। ह्रस्वनिर्देशे ह्रस्व इत्येकत्वस्याविवक्षितत्वात् यू ह्रस्वाविति विशेषणविशेष्यभावोपपत्तिः। असति तु विशेषणे [illegible] मात्रे मातुरित्यत्रापि प्रसंगः। अथ ह्रस्वयोरिति। दीर्घयोरप्यणः सवर्णान् गृह्णातीति सिध्यति। ननु चोकालइत्यत्रोक्तं अणुदित्सवर्णस्येत्यत्राप्राप्तसंज्ञाग्रहणमनुवर्त्तते। तत्र सवर्णग्रहणेन न भाव्यं। नैष दोषः। नेयङुवङ्स्थानावस्त्रीति प्रतिषेधात्सवर्णग्रहणं भविष्यतीति। न हि ह्रस्व इयङुवङ्स्थानः

शिवः

१

अवश्यमत्रेति। तत्र दीर्घग्रहणपक्षे शकटिशब्दस्याप्राप्तौ पक्षे नदीसंज्ञा विधेया। ह्रस्वपक्षे तु नित्यप्राप्तौ पक्षे बाध्येति नास्ति विशे
षः। अथ तु बह्वादिषु शकटिशब्दो विभाषा ङीषर्थः पठ्यते तदा दीर्घनिर्देशपक्षेऽपास्ति केऽङीषि हे शकटि इति भवति। शकटिशब्द
स्य हे शकटे इति। ह्रस्वनिर्देशे तु ङीषि सत्यपि हे केशटीति प्राप्नोतीत्यस्ति भेदः। एष स्वर इति। पूर्वपदान्तोदात्तत्वं। पूर्वपदप्रकृति

अवश्यमत्र विभाषा नदीसंज्ञैषितव्या। उभयं हीष्यते। हे शकटि हे शकटे इति च। इह तर्हि शकटिबं
धुरिति नदी बन्धुनीत्येष स्वरः प्राप्नोति। इह च बहुशकटिरिति नद्यृतश्चेति कप्प्रसज्येत। नैष दोषः।
ङिति ह्रस्वश्चेत्ययं नियमार्थो भविष्यति। ङित्येव यू ह्रस्वौ नदीसंज्ञौ भवतः नान्यत्रेति। केमप्योनि
यमो भवति विधेयं नास्तीति कृत्वा। इह चास्ति विधेयं। किं। नित्या नदीसंज्ञा प्राप्ता सा विभाषा विधेया। त
त्रापूर्वो विधिरस्तु नियमो मास्त्विति वा। अपूर्व एव विधिर्भविष्यति न नियमः। अथायं नित्यो योगः
स्यात्तत्र प्रकल्प्येत नियमः। बाढं प्रकल्प्येत। नित्यस्तु हि भविष्यति। कैतेपं। योगविभागः करिष्यते
इदमस्ति यू स्त्र्याख्यौ नदी। नेयङुवङ्स्थानावस्त्री। वामि। ततः ङिति। ङिति च नेयङुवङ्स्थानौ यू
वामस्त्री नदीसंज्ञौ न भवतः। ततो ह्रस्वौ। ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसंज्ञौ भवतः। इयङुवङ्स्था

स्वरेण तु शकटिशब्दे त्रयोऽप्यचः पर्यायेणोदात्ता भवन्ति। शकटिशकट्योरक्षरमक्षरं पर्यायेणेति वचनात्। इह चेति। शेषाद्विभाषे
ति विभाषा कब्विधास्यते नित्यश्च प्राप्नोति। कैमर्थ्यादिति। कोऽर्थोऽस्येति किमर्थस्तस्य भावः कैमर्थ्यं। प्रश्नविषययोः संबंधाभावप्रसये

भा॰कै॰

यद्येवं शकटय इति । नित्यया नदीसंज्ञया घिसंज्ञाया बाधितत्वात् ततो घीति । एकविषयत्वाच्च घिनदीसंज्ञयोरेकसंज्ञाधिकाराच्च प
र्याये णाप्रवृत्तौ शकध्ये शकटये इति च सिध्यति । अविशेषेणेति । ह्रस्वयोर्दीर्घयोश्चेत्यर्थः । बाध्यत्वादुत्सर्गसामान्यादुत्सर्ग इत्युक्तं । प

यद्येवं शकटये अत्र गुणो न प्राप्नोति । द्वितीयो योगविभागः करिष्यते । शेषग्रहणं न करिष्यते । कथं इ
दमस्ति । यू स्त्र्याख्यौ नदी । नेयङुवङ्स्थानावस्त्री । वामि । ततः ङिति । ङिति चेयङुवङ्स्थानौ यू वा अस्त्री
2 नदीसंज्ञौ न भवतः । ततः ह्रस्वौ । ह्रस्वौ च यू स्त्र्याख्यौ ङिति नदीसंज्ञौ भवतः । इयङुवङ्स्थानौ वा नेति निवृ
त्तं । ततो घि । घिसंज्ञौ भवतः स्त्र्याख्यौ यू ह्रस्वौ ङिति । ततो ऽसखि । सखिवर्जितौ च यू ह्रस्वौ घिसंज्ञौ भव
तः । स्त्र्याख्यौ ङितीति च निवृत्तं । यदि तर्हि शेषग्रहणं न क्रियते नार्थ एकेनापि योगविभागेन । अविशेषे
ण नदीसंज्ञोत्सर्गः । तस्याः ह्रस्वयोर्घिसंज्ञा बाधिका । तस्यां नित्यं प्राप्तायां ङ्यां ङिति विभाषा ऽऽरभ्यते
अथवा पुनरस्तु दीर्घयोः । ननु चोक्तं निर्देशो नोपपद्यते इति । दीर्घाज्जसि पूर्वसवर्णदीर्घः प्रतिषिध्यत
इति । वा छन्दसीत्येवं भविष्यति । छन्दसि स्युच्यते न चेदं छन्दः । छन्दोवत्सूत्राणि भवन्तीति यदप्युच्यते
उत्तरत्र विशेषणं न प्रकल्पेत यू ह्रस्वाविति । यदि यू न ह्रस्वौ अथ ह्रस्वौ न यू यू ह्रस्वाविति च विप्रतिषिद्धं ।

परत्वात्तु पुल्लपुंसकयोः कृतार्था घिसंज्ञा नदीसंज्ञाया ति । नैतद्विप्रतिषिद्धं । आत्तपदं ह्रस्वाविति । यदि पूनः ह्रस्वौ अथ ह्रस्वौ न यू त
बाधिका । तस्यामिति । आङिति कशकटि बन्धुर्बन्धु शकटिरित्यादौ घिसंज्ञया नदीसंज्ञाया बाधितत्वाद्दोषाभावः । छन्दोवदिति । तादर्थ्यात्सो
ऽपि छंदःशब्दो वर्तत इति छंदोविषयं कार्यं सूत्रेष्वपि प्रवर्तते गौणमुख्यन्यायस्त्वछंदःप्रदेशेषु निर्दे 2

शिव

७×कृत्स्त्रियाधातुस्त्रियाश्च न सिध्यति। तं श्रीलक्ष्मी श्रियै भुवै। एवं तर्हि बहुव्रीहिर्भविष्यति। स्त्रियामाख्या अनयोः स्म्याख्यौ। एवमपि×१

अथेति। यथार्थे निप्रतत्साध्यानशब्दसंस्कारोऽस्तीति प्रश्नः। अनुपसर्गे हीति। यस्मात् श्च्वोपसर्ग इति कः सपरत्वात् कर्मण्यणित्यण् बाध्यते
न तर्हीति। शिष्टप्रयोगादस्मिन्विषये कप्रत्ययस्य साधुत्वमेष्टव्यमिति भावः। छन्दोवत्कवय इति। ते न च्छान्दसत्वाद्भविष्यति। न ह्येषेति। अ
साधव एवेवमादयः नलुतत्प्रामाण्यात्साधुत्वमवस्य आख्यायेत इति। घञर्थे कविधानमिति कप्रत्ययः। साधनं कृतेति स

अथ स्म्याख्याविति कोऽयं शब्दः। स्त्रियमाचष्टाते स्म्याख्यौ। यद्येवं स्म्याख्यायाविति प्राप्नोति। अनुपसर्गे हि को
विधीयते। न तर्हीदानीमिदं भवति। यस्मिन्दश सहस्राणि पुत्रे जाते गवां ददौ। ब्राह्मणेभ्यः प्रियाख्येभ्यः सो
ऽयमुञ्छेन जीवति। छन्दोवत्कवयः कुर्वन्ति। न ह्येषा इष्टिः। एवं तर्हि कर्मसाधनो भविष्यति। स्त्रियामाख्यातौ
स्म्याख्यौ। यदि कर्मसाधनः कृत्स्त्रियाधातुस्त्रियाश्च न सिध्यति। तं श्रीलक्ष्मी श्रियै भुवै। एवं तर्हि विच्
भविष्यति। अथवा पुनरस्तु क एव स्त्रियमाचष्टाते स्म्याख्याविति। ननु चोक्तं स्म्याख्यायाविति प्राप्नोति
अनुपसर्गे हि को विधीयत इति। एवं च कृत्वा सोऽप्यदोषो भवति। यदुक्तं। यस्मिन्दश सहस्राणि पुत्रे जा
ते गवां ददौ। ब्राह्मणेभ्यः प्रियाख्येभ्यः सोऽयमुञ्छेन जीवतीति। अथाख्याग्रहणं किमर्थम्॥ ॥श्रीः॥ ॥

स्मी समासः। कृत्स्त्रियाइति। न हि तयोरीकारोकारौ स्त्रियां विहितौ यथाग्भुकाविति भावः। एवं तर्हीति। आख्यानमाख्या आतश्चो
पसर्ग इत्यङ्। स्त्रियामाख्यानमनयोरिति [redacted] बहुव्रीहिः। अत्र पक्षे सत्रेणैव प्रत्ययः समासश्च सिध्यतीति भावः। स्त्रियां स्त्रीविषये
आख्या प्रतिपादनमित्यर्थः। एवमपीति। न हि तस्याः स्त्रियां विधानमित्यर्थः। एवं तर्हीति। असरूपत्वाद् णापक्षे विजन बाध्यते स
मुदायधर्मस्यावयवआरोपात्। कृत्स्त्रियाश्चाप्यत्र पक्षे संज्ञा सिध्यति। आख्याग्रहणमिति। विच्पक्षे आख्याग्रहणे एवायं कप्रत्ययपक्षे तु

भा·के·

स्त्रीविषयार्थमिति। आख्याग्रहणसामर्थ्यान्नियम आश्रीयते। स्त्रियमेवाचक्षाते न तु लिङ्गान्तरयुक्तमपीत्यर्थः। ग्रामण्ये इति। ग्रामणीशब्दः क्रियाविषयत्वात् त्रिलिङ्गत्वात् स्त्रीविषयो न भवतीति स्त्रियामपि वर्त्तमानो नदीसंज्ञो न भवति। यद्येवमिषप्रभृतीनामुभयलिङ्गानामपि द्वादीनां च गुणवचनत्वात् सर्वलिङ्गानां स्त्रीविषयत्वाभावात् स्त्रियां वर्त्तौ ङिति ह्रस्वश्चेति नदीसंज्ञा न प्राप्नोति। एवं तर्हि ङिति ह्रस्वश्चेत्यत्रैव विधानाश्रीयते। केवलस्य स्त्रीशब्दस्यानुवर्त्तनात् तद्दोषः। प्रथमलिङ्गग्रहणमिति। यः शब्दः प्रथमं स्त्रीत्वविशिष्टार्थमाह पश्चात्तु प्रकारां

3 नदीसंज्ञायामाख्याग्रहणं स्त्रीविषयार्थं। नदीसंज्ञायामाख्याग्रहणं स्त्रीविषयार्थं। स्त्रीविषयावेव यौ नित्यं तयोरेव नदीसंज्ञा यथा स्यात्। इह मा भूत्। ग्रामण्ये सेनान्ये ×क्रियते× स्त्रियै इति। प्रथमलिङ्गग्रहणं च। प्रथमलिङ्गग्रहणं च कर्त्तव्यं। प्रथमलिङ्गे यौ स्त्र्याख्यौ इति वक्तव्यं। किं प्रयोजनं। प्रयोजनं क्विब्लुप्समासाः। क्विप्। कुमार्यै ब्राह्मणाय। लुप्। खरकुट्यै ब्राह्मणाय। समासः। अतितन्त्र्यै ब्राह्मणाय। अतितन्त्र्यै ब्राह्मणाय। तत्तर्हि वक्तव्यं। न वक्तव्यं। अवयवस्त्रीविषयत्वात् सिद्धं। अवयवोऽत्र स्त्रीविषयः। तदाश्रया नदीसंज्ञा भविष्यति। अथ एवं अवयवस्त्रीविषयत्वात् सिद्धमिति चेत् इयङुवङ्स्थानप्रतिषेधे प्रसङ्गः। अवयवस्येय

×यण्स्थानप्रतिषेधे

तरेणापर्यान्तरं लिङ्गान्तरयुक्तं स्यात तदानीं अस्त्र्याख्यत्वादप्राप्ता नदीसंज्ञानेन वचनेन विधीयते। किं विति। इयङुवङ्स्थानत्वात्॥ शिवः

कुमारीमिच्छत्यात्मनः कुमारीयति। ततः कर्त्तरि क्विप्। अथवा कुमारीवाचरतीत्याचारे क्विपं विधाय कर्त्तरि क्विब् विधेयः। खरकुट्यै इति। खरकुटीवेतीवार्थे संज्ञायां कन्। लुम्मनुष्ये इति लुप्। यद्यप्यत्र युक्तवद्भावात् स्त्रीत्वमस्ति तथापि स्वाश्रयस्य पुंस्त्वस्यानिवर्त्तनात्वायं स्त्रियामेव वर्त्तते किं तर्हि पुंस्यपीत्याख्याग्रहणान्नियमादप्राप्ता नदीसंज्ञा विधीयते। अतितन्त्र्यै इति। तन्त्रीमतिक्रान्त इति तत्पुरुषः। ३

अवयवस्त्रीविषयत्वादिति। अन्तरङ्गत्वात् पूर्वमेवस्त्र्याख्यत्वात् प्रवृत्ता नदीसंज्ञा पश्चादुपजायमाने लिङ्गान्तरयोगे बहिरङ्गेन निवर्त्तत इति भावः॥

आध्ये इति। आध्यायतीति ध्यायतेः संप्रसारणं क्विप्चेति क्विप् संप्रसारणं च। अत्रावयवो धीशब्द इयङ्स्थानः समुदायस्य तु एरनेकाच इति यणा
बाधितत्वादियङ्स्थानत्वाभावः। नन्वाधीप्रधीशब्दौ क्रियाविषयत्वात्त्रिलिंगत्वात्स्त्रीविषयौ न भवतः यथैव ग्रामणीसेनानीशब्दाविति नदीसं
ज्ञयानभावामिति पूर्वपक्षाघातदर्शनाच्चिन्त्यमेतत्। सिद्धं त्विति। अचिश्नुधात्विति सनेन अंगस्य यङुवङ्विधानात्सामर्थ्यात्सिद्धमसंगतेन यस्यां

अवयवस्त्रीविषयत्वात्सिद्धमिति चेदियङुवङ्स्थानप्रतिषेधप्रसंगे यण्स्थानयोरपि स्यात्प्रतिषेधः प्रसज्येत
आध्यै ब्राह्मण्यै। किं कारणं। अवयवस्य इयङ्स्थानत्वात्। अवयवोऽत्र इयङ्स्थानः। सिद्धं तु गुरूपग्रहणात्तद
स्यांगस्य युवोस्तत्प्रतिषेधात्। सिद्धमेतत्। कथं। अंगरूपं गृह्यते यस्यांगस्य इयुवौ भवतस्तस्येदं ग्रहणं। न चै
तस्यांगस्य इयुवौ भवतः। ह्रस्वे युवस्थाने प्रवृत्तौ च स्त्रीवचने। ह्रस्वौ च इयुवस्थानौ च प्रवृत्तौ च प्राकृत
प्रवृत्तेः स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यं। शकट्यै अतिशकट्यै ब्राह्मण्यै। इह मा भूत्। शकटये अ
तिशकटये ब्राह्मणाय। धेन्वै अतिधेन्वै ब्राह्मण्यै। इह मा भूत्। धेनवे अतिधेनवे ब्राह्मणाय। श्रियै अतिश्रि
यै ब्राह्मण्यै। श्रिये अतिश्रिये ब्राह्मणाय। भ्रुवै अतिभ्रुवै ब्राह्मण्यै। इह मा भूत्। भ्रुवे अतिभ्रुवे ब्राह्मणाय॥ ॥

अंगस्य च
गस्य यङुवङौ निर्दिश्येते तस्य नदीसंज्ञानिषेधः। आध्यै इत्यत्रावयवस्यांगत्वं नास्ति। एरनेकाच इति यण्विधानात् इयङुवङ्स्थानत्वाभावात्
तन्निषेधाभावः। एतदर्थमेव स्थानग्रहणं कृतं। इयङुवङोर्यदा स्थितिस्तदा प्रतिषेधो यथा स्यात् यदा त्वपवादेन बाधस्तदा मा भूत्। ह्रस्वे
ति। अवयवग्रहणात्सिद्धमित्यस्यापवादः। ह्रस्वे यङुवङ्स्थानानां प्रवृत्तिरर्थान्तरसंक्रान्तिः। तस्यां सत्यां स्त्रीवचने एव संज्ञा भवति न लिं
गान्तरवचने। चशब्दात् प्रवृत्तौ चेति ज्ञेयं। एतदेव प्राक्पदस्तेरिति भाष्ये स्पष्टीकृतं॥

अपर आह इति। चशब्दोऽत्र न पठ्यत इति पूर्वस्माद्विशेषः। नहि प्राक् प्रवृत्तेः किंचिदनिष्टमापद्यते यदर्थः समुच्चयः क्रियते। पठ्यमानोऽपि चशब्दः स्त्रीवचनशब्देन संबध्यते स च नियमार्थः। क्वचिन्नाप्यपठ्यते अस्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यं। शकध्वै अतिशकध्वै आलण्यापाक्रमान्तत्। [illegible] शकटये अतिशकटये आलएयैदुत्यादि। एषत्वपपाठः। उपसंहारस्यान्यथाभिधानात्॥ ॥षष्ठीयु

अपर आह। ह्रस्वौ च इयुवस्थानौ च प्रवृत्तावपि स्त्रीवचनावेव नदीसंज्ञौ भवत इति वक्तव्यं। किं प्रयोजनं। शकध्यै अतिशकध्यै आलएयैक्रमाभूत्। शकटये अतिशकटये आलण्याय। धेन्वै अतिधेन्वै आलएयै। क्रमाभूत्। धेनवे अतिधेनवे आलण्याय। श्रियै अतिश्रियै आलएयै। क्रमाभूत्। श्रिये अतिश्रिये आलण्याय। भ्रुवै अतिभ्रुवै आलएयै क्रमाभूत्। भ्रुवे अतिभ्रुवे आलण्याय। किमर्थं पुनरिदमुच्यते। प्रथमलिंगग्रहणं चोदितं। तद्रूप्यं विजानीयात् सर्वमेतद्विकल्प्यत इति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे ह्रस्वौ च इयुवस्थानौ च प्राक् च प्रवृत्तेः स्त्रीवचनावेवेति॥ ॥षष्ठीयुक्तश्छंदसि वा॥ ॥योगविभागः कर्त्तव्यः। षष्ठीयुक्तश्छंदसि। षष्ठीयुक्तः पतिशब्दश्छंदसि घिसंज्ञो भवति। ततो वा। वा छंदसि सर्वे विधयो भवंति। सुपां व्यत्ययः। तिङां व्यत्ययः। वर्णव्यत्ययः। लिंगव्यत्ययः। कालव्यत्ययः। पुरुषव्यत्ययः। आत्मनेपदव्यत्ययः। परस्मैपदव्यत्ययः। सुपां। युक्ता माता सीधुरिदक्षिणायाः। दक्षिणायामिति प्राप्ते। तिङां व्यत्ययः। चषालं ये अश्वयू

कः॥ ॥योगविभाग इति। तेन परिभाषा संपद्यते। यावदिह शास्त्रकार्यं तच्छंदसि वा भवतीति। तत्रानयैव सिद्धत्वाद्बहुलं छंदसीत्यादि न वक्तव्यं। एतदर्थश्च व्यत्ययो बहुलमित्यत्र योगविभागो न व्याख्येयः। उभयत्राधिभाषा चेयं विज्ञेया। सुपामिति। कर्मणि द्वितीयेत्यादेर्नियमस्य विकल्पनादनियमोऽपि छंदसि भवतीति सुपां

शिवः

४

यव्यत्ययः

कालव्यत्यय इति। कालविहितप्रत्ययस्य इत्यर्थः॥ ॥यस्मात्प्रत्ययविधिः॥ ॥यस्मादिति व्यपदेशाय इति। संज्ञिन इति शेषः। तदिति यस्मादिति सिंस्त
दादीत्यनेन संज्ञी निर्दिष्टः शक्यते नान्यथा। परात्प्रत्ययस्य संज्ञानिर्देशे तदादिति परामर्शाभावात् तदादीत्यसंबद्धमेव स्यात्। स्त्रीयतीति। स्त्रीशब्दात्
शब्दस्य तल्लोपस्य च विधिरस्तीत्यंग संज्ञा स्यात् संज्ञा चेत् संज्ञाद्वयनिमित्तो यस्येति लोपः। प्रसज्येत। ईश ऋदमादेशस्य यस्येति लोपस्या

वर्णव्यत्ययः। त्रिष्टुभौजः शुम्भित मुग्रवीरं। शुहितमिति प्राप्ते। लिंगव्यत्ययः। मधोस्तृप्ताइवासते। मधोर्तृप्ता
ति। मधुन इति प्राप्ते। कालव्यत्ययः। श्वोग्नीनाधास्यमानेन। श्वः सोमेन यक्ष्यमाणेन। श्व आधाता श्वो यष्टेति
प्राप्ते। पुरुषव्यत्ययः। अधा स वीरैर्दशभिर्वियूयाः। वियूयादिति प्राप्ते। आत्मनेपदव्यत्ययः। ब्रह्मचारिण
मिच्छते। इच्छतीति प्राप्ते। परस्मैपदव्यत्ययः। प्रतीपमन्य ऊर्मिर्युध्यति। अन्वीपमन्य ऊर्मिर्युध्यति। यु
ध्यत इति प्राप्ते॥ ॥यस्मात्प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गं॥ ॥यस्मादिति व्यपदेशाय। अथ प्रत्ययग्रह
णं किमर्थं। यस्माद्विधिस्तदादि प्रत्ययेऽङ्गमित्युच्यमाने स्त्री इयती स्त्रीयती। सत्रापि प्रसज्येत। प्रत्यय
ग्रहणे पुनः क्रियमाणे न दोषो भवति। अथ विधिग्रहणं किमर्थं। यस्मात्प्रत्ययस्तदादि प्रत्ययेऽङ्ग
मितीयत्युच्यमाने दधि अधुना मधु अधुना अत्रापि प्रसज्येत। विधिग्रहणे पुनः क्रियमाणे न दोषो भ

क्रिद्धवदत्राभादित्यसिद्धत्वं नास्ति। प्राग्भावसिद्धत्वमिति केषांचिदभ्युपगमात्। पदांतरनिरपेक्षपदसंस्कारपक्षे स्थानिवद्भावो नास्ति। नांनादिष्टादच
पूर्वस्य स्थानिवद्भावनिषेध इति। अयेति। यस्मात्प्रत्यय इत्यत्र विधीयत इत्यध्याहर्तव्यत इति प्रश्नः। दधि अधुनेति। असति विधिग्रहणे परशब्दस्या
प्यध्याहारः स्या ... त। इदमो यदा अधुना प्रत्ययो निपात्यते इदमादेशस्य च शेषयस्येति लोपस्तदेवं प्रत्युदाहरणं। यदा त्विदमोऽश्भावः धुनाच

प्रत्ययः तदादेस्तु प्रत्ययग्रहणे यस्मात् स तदादेर्ग्रहणं॥

मा॰के॰

[illegible]

ननु क्रियमाणेपि विधिग्रहणेऽङ्गसंज्ञा प्राप्नोति। अस्तिहि दधि शश्वाल्लु प्रत्ययविधिः अधुना प्रत्ययश्च परः ततश्चाङ्गसंज्ञायां न संज्ञायां व सत्यां यस्येति लोपः प्राप्नोतीत्याह। तदेतदिति। प्रत्यासत्तिन्यायाश्रयणाद्यस्माद्यः प्रत्ययो विहितस्तस्मिन्नेव प्रत्यये परतस्तदाद्यङ्गमिस पर्थः। करिष्याव इति। विकरणान्तस्याङ्गसंज्ञायां सत्यां तन्निबन्धनमतो दीर्घो यञीति दीर्घत्वं भवति। अन्यथा जापाव इत्यादावेव स्यात्। पयु धातोर्यङ्लुगन्तस्य वसि लोपो व्योर्वलीति यलोपे दीर्घत्वे च रूपं। कुं ऽनीति। यदानुम्परादिस्तदात्र सुपि चेति दीर्घत्वं सिध्यति। दधीनी त्यादौ तु अजन्नकारान्तत्वान्न सिध्यति। पूर्वात्तपसे सामानी त्यादिवात्सि ध्यति। यदा त्वनकवपक्षस्तदेदं प्रयोजनमादिग्रहणस्याह। एवं

तदेतत्प्रत्ययग्रहणे न विधिग्रहणेन च समुदिते न क्रियते सति योगः। यस्माद्यः प्रत्ययो विधीयते तदादि तस्मिन्नङ्गसंज्ञं भवतीति। अथ तदादिग्रहणं किमर्थं। अङ्गसंज्ञायां तदादिग्रहणं स्यादिनुमर्थं। अङ्गसंज्ञायां तदादिग्रहणं क्रियते स्याद्यर्थं नुमर्थं च। स्याद्यर्थं तावत्। करिष्यावः करिष्यामः। नुमर्थं। कुंडानि वनानि। भिनत्तेरुपसंख्यानं। भिन्नतः सुट्‌त ख्योपसंख्यानं कर्त्तव्यं। भिन्नतः। भिनत्ति छिनत्ति। अभिनत् अच्छिनत्। सुट्। संचस्करतुः संचस्करुः। किं पुनः कारणं न सिध्यति। इह तस्यवाग्रहणं तदादेर्वा। न चेदं

नपक्षस्तु स्यापि तद्वत्प्रयोजनमेतत्। भिन्नत्तेरिति। भिन्नतेः कृतयोरित्यर्थः। भाष्यकारस्तु वस्तुतोऽर्थं व्याचष्टे। तत्तनापि तदादि। भिनत्तु इति। भिनत्तीति। रूपोदाहरणमेतत्। कार्योदाहरणं च अभिनदिति। नित्यत्वात्त्वमपि कृतेऽङ्ग संज्ञायां असत्यां अडागमोन स्यात्। इत्यङ्गसंज्ञोपसंख्यायते। संचस्करतुरिति। द्विर्वचने कृतेऽड्‌भ्यासव्यवायेपीति सुट् चानङ्गत्वादृतश्च संयोगादेरिति गुणो न स्यात्। यदा तु पूर्वं धातुरुपसर्गेण युज्यते इति पक्षस्तदान्तरङ्गत्वात्सुट् कृते तत्र तस्य तद्ग्रहणेन ग्रहणं स्कृशब्दाद्वप्रत्यय विधिरित्यङ्गसंज्ञा सिध्यत्येव। स्कृशब्दस्य द्विर्वचने कृते शर्पूर्वाः खय इति खयः शेषे संचस्करतुरिति सिध्यति। किं तु संस्कषीष्ट संस्क्रियतइ त्यादौ गुणनिवृत्तये कास्य वर्णग्रहणेनाम

किं पुनः कारणं न सिध्यति। [illegible] वहिरङ्गः सुट्। अन्तरङ्गो गुणः। [illegible] गे संयोगोपधग्रहणं [illegible]

तां कर्त्तव्यं। यदि तं योगोपधग्रहणं क्रियते नार्थः संयोगादिग्रहणेन। इऋषि स स्तरतुः सस्वरुरिति संयोगोपधस्यैव सिद्धं। भवेदेवमर्थेन नार्थः। इदं तु न सिध्यति संचस्करतुः संचस्करुरिति। अपमपपाठः प्रायेण

शि॰व॰ 5

तस्यादिरिति। भिदन्नादिर्भकारः स भादिर्भिन्नादिस्तस्येति भवत्यंगसंज्ञा। एवं करोतेर्द्विवचनेकृते चस्कृशब्दे स्थितेयस्मात्तच्छब्दात्प्रत्ययविधिस्तस्यादिश्चकारः सएवादिश्चस्कृशब्दस्य। उष्ट्रमुखवइति। यथागतार्थत्वान्मुखशब्दस्य पाद्वेवं प्रतिपादितं। इहापि प्रतीतिलक्षणं लक्षणभेदात्तदवयवेतच्छब्दो वर्त्ततइति तद ॥

सिद्धंतु तदाद्यादिवचनात्। सिद्धमेतत्। कथं। तदाद्याद्यंगसंज्ञंभवतीति वक्तव्यं। किमिदं तदाद्यादीति। तस्यादिस्तदादि स्तदादिरादिर्यस्य तदिदं तदाद्यादीति। सतर्हि तथा निर्द्देशः कर्त्तव्यः। न कर्त्तव्यः। उत्तरपदलोपोत्र द्रष्टव्यः। तद्यथा। उष्ट्र मुखमिव मुखमस्य उष्ट्रमुखः खरमुखः। एवं तदाद्यादिलदादीति। नदेकदेशविज्ञानाद्वासिद्धं। नदेकदेशविज्ञाना द्वासिद्धमेतत्। तदेकदेशभूतस्तद्ग्रहणेन गृह्यते। तद्यथा। गंगायमुनादेवदत्तेति। अनेकानदीं गंगायमुनां प्रवि ष्टागंगायमुनाग्रहणेन गृह्यते। तथा। देवदत्तास्थोगर्भोदेवदत्ताग्रहणेन गृह्यते। विषमउपन्यासः। इहकेचिच्छ ब्दाअकृपरिमाणानामर्थानां वाचका भवंति। य एते संख्याशब्दाः परिमाणशब्दाश्च। पंच सप्तेति। तएकेनाप्य पायेन भवंति। द्रोणःखारीआढकमिति। नैवाधिके भवंतिनचन्यूने। केचिद्यावदेव तद्भवंति तावदेवाहुः। यथैते जा तिशब्दागुणशब्दाश्च तैलंघृतमिति खार्यामपि भवतिद्रोणेपि। शुक्लोनीलःकृष्णइतिहिमवत्यपि भवति वटक णिकामात्रेपि द्रव्ये। अंगसंज्ञाचाप्यकृपरिमाणानां क्रियते साकेनाधिकस्यस्यात्। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति तदेकदेशभूतं तद्ग्रहणेन गृह्यतइति। यदयं नेदमदसोरकोरितिसककारयोः प्रतिषेधंशास्ति। कथं कृत्वा ज्ञापकं। इदमदसोः कार्यमुच्यमानं कः प्र

वयवत्वान्निमित्तसुटोः कृतयोरंगसंज्ञा सिध्यति। एकेनाप्यपायेइति। अपायेतस्यरूपस्यापगमे। संगोपलक्षककारयोः स्यात्तत्प्रत्तिपतिलाच्चार्यः तदेकदेशभूतं एकेनकरणेन एकाभावेनेसर्वः। यथावर्षकृतंदुर्भिक्षं इति वर्षमभवत्करणं संपद्यते। अंगसंज्ञाचापीति। यस्मात्प्रत्ययविधिस्तदादीति विशिष्टरू पपरिग्रहात्। तदेकदेशभूतमिति। तन्मध्यपतितत्वात्तदेकदेशत्वावसायः॥

(6)

स्यार्थमिति। असति द्वितीये प्रत्ययग्रहणे प्रत्यय विधानमात्रप्रतिबद्धांगसंज्ञा स्त्रीशब्दस्य प्राप्नोति। ततश्च तदर्थो विधानात् तत्रश्चांगाश्र
यइयङ् स्यात्। पुनः प्रत्ययग्रहणे तु यस्माद्यः प्रत्ययो विहितः स एवायं यदि परो भवति तदांगसंज्ञा भवति यश्चात्र प्रत्ययो विहितः नासौ परः लु
प्तत्वात्। न च प्रत्ययलक्षणं भवति। न लुमतांगस्येति निषेधादियङादेश कार्यस्यांगत्वात्तस्मिन्कर्त्तव्ये निमे च प्रवर्त्तनात्। परिमाण
र्थं चेति। अन्यथा देवदत्त आदम पाक्षी इदि देवदत्तशब्दात् प्रत्ययविधिरिति तदादेः संघातस्यांगसंज्ञायां सत्यां देवदत्तशब्दात्

6 अथ द्वितीयं प्रत्ययग्रहणं किमर्थं। प्रत्ययग्रहणं पदादाव प्रसंगार्थं। प्रत्ययग्रहणं क्रियते पदादावंग
संज्ञा मा भूदिति। किं च स्यात्। स्त्रम् अर्थं अश्चर्यं अंगस्येयङुवङौ स्यातां। परिमाणार्थं च। परिमाणार्थं च द्वि
तीयप्रत्ययग्रहणं [redacted] क्रियते। यस्मात्प्रत्ययविधिस्तदाद्यंगमिति। यस्तु च्यमाने दाशत यस्याप्यंगसंज्ञा
प्रसज्येत। नन्त तर्हि कर्त्तव्यं। न कर्त्तव्यं। केनेदानीमंगकार्यं भविष्यति। प्रत्यय इति कृत्स्नांगकार्यं भविष्यति। यदि
प्रत्यय इति कृत्स्नांगकार्यं भविष्यत् आकरोत् उपोहिष्ट उपसर्गात्पूर्वौ वडाटौ प्राप्नुतः। सिद्धं तु प्रत्ययग्रहणे
यस्मात्स [redacted] तदादि तदंतविज्ञानात्। सिद्धमेतत्। कथं। प्रत्ययग्रहणे यस्मात्प्रत्ययो विहितस्तदादेस्तदं
तोगागमः स्यात्। प्रत्ययग्रहणे तु सति यस्माद्यः प्रत्ययो विहितस्तस्मिन्नेव परतस्य च ग्रहणं भवतीत्येषा परिभाषा कर्त्तव्या॥
तत्स्तदाद्यंगमिति विज्ञायमाने भवत्यतिप्रसंगदोषः। दाशतयस्येति। दश अवयवा येषां ते दशतयः। तेषु भवो दाशतयः। एतच्चानि
यमप्रतिपादनार्थं न तु तत्र दशसंख्या विवक्षिता। अवयवान्विचार्य सूत्रमाक्षेप्तुं प्रश्नं करोति। तन्न तर्हीति। सूत्रमिसर्पः। प्रत्यय इ
ति प्रकृत्येति। तेन ब्राह्मणेभिस्साकि मि णपप्रये सादावैसर्ही घाद्यभावः। आकरोदिति। लङि परतः पूर्वस्याव धेः नियताः रडागमो वि
धीयमान उपसर्गादेः स्यात्। सिद्धं त्विति। यत्र पूर्वः कार्यित्वेनाश्रीयते तत्र तदादेः कार्यं भवति। यत्र तु प्रत्य शि॰ ६

प्रत्ययग्रहणं वेति। प्रत्ययो गृह्यते यस्मिन्सूत्रे न तु अंगसंज्ञास्तत्र भिसर्पः। अवश्यमिति। किमो येन स्मिन्सूत्रे परिभाषा वश्यं कर्त्तव्ये। नित्यपि बाल्य
रिभाषे वाश्रयणीया न तु स्तत्र भिसर्पः। संघातस्येति। ततश्च वस्तु लुक् प्राप्नोति। महांतं पुत्रमिति। समुदायस्यांते सुपूर्व्व वर्ण स्तु बंतत्वात्
सत्यां तु परिभाषायां समुदायस्यासुबंतत्वात् [redacted] अवयवस्य सापेक्षत्वादसामर्थ्यान्न भवति प्रत्ययः। कृदु

कः पुनरत्र विशेषः एषा परिभाषा क्रियेत प्रत्ययग्रहणं वा। अवश्यमेषा परिभाषा कर्त्तव्या। बहून्येतस्याः प
रिभाषायाः प्रयोजनानि। प्रयोजनं धातुप्रातिपदिकप्रत्ययसमासतद्धितविधिस्वराः। धातु। देवदत्तश्चि
कीर्षति। संघातस्य धातुसंज्ञा प्राप्नोति। प्रातिपदिक। देवदत्तो गार्ग्यः। संघातस्य प्रातिपदिकसंज्ञा प्राप्नोति
प्रत्यय। महांतं पुत्रमिच्छति। संघातात्प्रत्ययोत्पत्तिः प्राप्नोति। [redacted] समास। ऋद्धस्य राज्ञः पुरुषः। संघातस्य स
माससंज्ञा प्राप्नोति। तद्धितविधि। देवदत्तो गार्ग्यायणः। संघातात्तद्धितोत्पत्तिः प्राप्नोति। स्वर। देवदत्तो गा
र्ग्यः। संघातस्य नित्यादिर्नित्यमित्याद्युदात्तत्वं प्राप्नोति। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेर्ग्रहणं भवतीति
नदोषो भवति। सा तर्ह्येषा परिभाषा कर्त्तव्या। न कर्त्तव्या। एवं वक्ष्यामि यस्मात्प्रत्ययविधिस्तदादिप्र
त्यये ग्रहणमाणे गृह्यते। ततः अंगं। अंगसंज्ञं च भवति यस्मात्प्रत्ययविधिस्तदादि प्रत्यये॥

स्येति। सुप्सुपेति विवक्षितायामपि संख्यायां समुदायस्य सुबंतत्वात्समासप्रसंगः परिभाषायां तु सत्यां समुदायस्यासुबंतत्वात्सुबंत
समुदायस्य च संख्याविवक्षायां समासाप्रसंगात्। अवयवस्य च सापेक्षत्वात्समासाभावः। संघातात्तद्धितोत्पत्तिरिति। ततश्च वृद्ध्यादिस्व
रो स्यातां पूर्वस्य च सुपो लुक्। एवं वक्ष्यामीति। योगविभागोऽत्र क्रियते। यस्मात्प्रत्ययविधिस्तदादि प्रत्यये एकं सूत्रं। अत्र सोपस्कारत्वात्
ग्रहणं ग्रहमाणे गृह्यते इति वाक्यशेषः समर्थ्यते। प्रत्यये ग्रह

भा॰कै॰

सांकुटिनमिति। अभिविधौ भाव इनुण् यदि कुटिन्निति स्यात् तस्मात् कृते तद्धिते तस्यैवादिवृद्धिः स्यात्। इरादागत इति। आगम्यते स्मेति कर्मणि क्तः। तत्राग
तिस्वरेणाद्युदात्त आगतशब्दः। ततो इराशब्दस्य स्तोकांतिकेति समासः। पंचम्याः स्तोकादिभ्य इत्यलुक्। अत्र समासांतोदात्तत्वे प्राप्ते तदप
वादकत्वस्वरेणाद्युदात्त आगतशब्दे प्राप्ते सगतेरपि क्तांतत्वात् स्यानांतरप्राप्तत्वात् कृतिस्वरस्य बाधकस्यापि बाधकत्वात् थाथघञ्क्तेति सि

षिद्धमस्य यग्रहणे यस्मात् स तदादिग्रहणं भवतीत्युच्यते। अवतप्तेनकुलस्थितं त एतत् उदकेविशीर्णं त ए
तत् सगतिकेन सनकुलेन च समासो न प्राप्नोति। एवं तर्हि प्रत्ययग्रहणे यस्मात् स तदादेर्ग्रहणं भवतीत्यु
क्तात् ततो वक्ष्यामि कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीत्येषा परिभाषा कर्तव्या। कान्येतस्याः प
रिभाषायाः प्रयोजनानि। प्रयोजनं समासतद्धितविधिस्वराः। समासः। अवतप्तेनकुलस्थितं त एतत्
उदकेविशीर्णं त एतत् सगतिकेन सनकुलेन च समासः सिद्धो भवति। समासः। तद्धितः। सांकुटिनं व्या
वक्रोशी। संघातात् तद्धितोत्पत्तिः सिद्धा भवति। तद्धितविधिः। स्वरः। इरादागतः। इरापातः। इति। अंतथा
थघञ्क्ताजबित्रकाणामित्येषः स्वरः सिद्धो भवति। कृद्ग्रहणे गतिकारकपूर्वस्यापि ग्रहणं भवतीति। ह्रदसे
सा तर्ह्येषा परिभाषा कर्तव्या। न कर्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति। यदयं गतिरनंत

अनंतोदात्तत्वं यदयमिति। अनंतरग्रहणस्य प्रयोजनमभ्युह्य तमिति सत्राभिशब्दस्य व्यव र इत्यनंतरग्रहणं करोति॥ ॥श्रीः॥ शिवः
हितस्य प्रकृतिस्वरो माभूदिति। यदि चैषा परिभाषा न स्यात् तत उद्धृतशब्दस्य अक्तांतत्वात् क्तांत उत्तरपदे ऽनंतरे परतो गति
स्वरो विधीयमानो नैव प्राप्नोतीति किमनंतरग्रहणेन। तत् क्रियमाणमस्याः परिभाषायाः सद्भावं ज्ञापयतीत्यर्थः॥ ॥समकसोज्यतः॥ 6

आख्यातोपयोगे॥ उपयोगो व्यापारः स चात्र विशिष्टेन रोपाध्यायप्रयोरिति मत्वा पृच्छति। उपयोग इति किमर्थमिति। आरंभकारंगं गच्छतीति। रंगं सामाजिकस्थानं। आरंभकाय त्वेन प्रवर्तितमं तो गच्छंतात्यर्थः प्रकर्षगतिरिति। व्यापारमात्रेऽत्र न चेदुपयोगग्रहणं विशिष्टव्यापारपरिग्रहार्थं।

आख्यातोपयोगे॥ ॥उपयोग इति किमर्थं। नटस्य शृणोति ग्रंथिकस्य शृणोति। उपयोग इत्युच्यमानेऽत्र प्राप्नोति। एषो पि ह्युपयोगः। आतश्चोपयोगः। पदारंभकारंगं गच्छति नटस्य श्लोकाध्यायः। ग्रंथिकस्य श्लोकाध्याय इति। एवं तर्ह्युपयोग इत्युच्यते सर्वश्चोपयोगः। तत्र प्रकर्षगतिर्विज्ञास्यते साधीयोपयउपयोग इति। कश्च साधी यः। योग्यार्थयोः। अथ वा उपयोगः का भवितुमर्हति यो [redacted] नियमपूर्वकः। तद्यथा। उपयुक्तामाणकाद्युच्यते य एते नियमपूर्वकमधीतवंतो भवंति। किं पुनराख्यातानुपयोगे कारकमाहोस्विदकारकं। कश्चात्र विशेषः। आख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसंज्ञाप्रसंगः। आख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्म प्राप्नोति। अस्तु तर्ह्यकारकं। अकारकमिति चेदुपयोगवचनानर्थक्यं। यद्यकारकं उपयोगवचनमनर्थकं। अस्तु तर्हि कारकं। ननु चोक्तमाख्यातानुपयोगे कारकमिति चेदकथितत्वात्कर्मसंज्ञाप्रसंग इति। नैष दोषः। परिगणनं तत्र क्रियते। दुह्याचिरुधिप्रच्छिभिक्षिचिञामिति। अयमपि योगः शक्यो

तेन ग्रंथार्थधारणार्थमग्रहणं स उपयोगः। अथ वेति। वक्तुं। कथमनुपाध्यायादधीत इति। अपक्रामति तत्तस्मादध्ययनं। यद्यपक्रामति उपयोगग्रहणस्यैवायमर्थः। नियमपूर्वकं विद्याग्रहणं। किं पुनरिति। उभयथासंभवाद्दोषदर्शनाच्च प्रश्नः। यद्यपक्रामतीति यथाफलं दृष्ट्वा दपक्रांतं न पुनरर्हतद्भवति एवं शब्दे [illegible] पि प्रसंग इत्यर्थः॥ ॥श्रीः॥ राम॥ श्रीः

संततत्वादिति। शब्दव्यंजकाध्वनय उपाध्यायेनोत्पाद्यमाना भिन्ना अपि सादृश्यात्तत्त्वेनाध्यवसीयमानाः श्रोतुः पुनः पुनः श्रोत्रप्रदेशं गच्छंतो व्य
क्तिस्फोटरूपं जातिस्फोटरूपं वा शब्दमभिव्यंजयंतीत्यर्थः। अथवेति। ज्ञानरूपं ज्योतिरविच्छेदेनोत्पाद्यमानं सादृश्यात्तत्त्वेनाध्यवसीयमा
नं संततं तथैवोपाध्यायज्ञानानि भिन्नानि शब्दरूपतामापद्यमानानि संततान्युच्यंते। ज्ञानस्य शब्दस्वरूपापत्तिरिति दर्शनमत्र भाष्यकारस्य।
तथा चोक्तं। वायोरणूनां ज्ञानस्य शब्दत्वापत्तिरिष्यते। केचिद्दर्शनभेदो हि प्रवादेष्वनवस्थित इति।। ।।जनिकर्त्तुः।। ।।अपक्रामंति ता इति।
लोकप्रसिद्ध्याश्रयेणैतदुच्यते। लोके हि यदस्माज्जायते तत्तस्मान्निर्गच्छतीत्युच्यते। तर्काश्रयास्तु प्रक्रिया भिद्यंते। वैशेषिकदर्शने परमा

संततत्वात्। अथवा ज्योतिर्वज्ज्ञानानि भवंति।। ।।जनिकर्त्तुः प्रकृतिः।। अयमपि योगः शक्योऽवक्तुं। कथं गो
मयाद्वृश्चिको जायते। गोलोमाविलोमभ्यो दूर्वा जायंत इति। अपक्रामंति तास्तेभ्यः। यद्यपक्रामंति। किं
नात्यंतायापक्रामंति। संततत्वात्। अथवान्याश्चान्याश्च प्रादुर्भवंति।। ।।भुवः प्रभवः।। ।।अयमपि योगः
शक्योऽवक्तुं। कथं हिमवतो गंगा प्रभवतीति। अपक्रामंति तास्तस्मादापः। यद्यपक्रामंति। किं नात्यंता
यापक्रामंति। संततत्वात्। अथवान्याश्चान्याश्च प्रादुर्भवंति।। ।।

8

ण्वादिसमवेतं कारणेभ्योऽपगच्छत् कार्यमित्युच्य
त इति नास्ति कार्यस्यापक्रमः। सांख्यदर्शने त्वाविर्भावतिरोभावलक्षणजन्मनाशरूपपरिणामाभ्युपगमान्नास्त्यपक्रमः। यदि
ति। यद्यतोऽपक्रामति तत्पुनस्तत्र न दृश्यत इति प्रसिद्धं। इह तु तत्रास्तिदर्शनमिति प्रश्नः। संततत्वादिति। अविच्छेदादित्यर्थः। यथा
बिलाद्दीर्घो भोगी भोगी निःक्रामन्नप्यविच्छेदात्तत्रोपलभ्यते तथा दूर्वापात्यर्थः। अथवेति। क्षणिकपक्षं प्रत्यारंभपक्षं च परिणामप शिवः
क्षं चाश्रित्यैतदुक्तमित्याहुः। ननु सतो जन्मायोगादसतश्च कर्तृत्वासंभवात्पक्षांतराभावाच्च कथमंकुरो जायत इति प्रयोगः। नैषदो
षः। बुद्धिस्थव[illegible]स्यार्थस्य क्रियायां कारकरूपोपगमात्।। ।।भुवः प्र।। संततत्वादिति। सादृश्यनिबंधनतत्त्वाध्यवसायादविच्छेदेन तासा
मुपलंभादित्यर्थः। अथवेति। वस्तुतोऽत्र भेद एवापामिति भावः।।

गोरिति। अत्र स्वादिष्विति पदसंज्ञायां सत्यां पूर्वस्यार्द्ध [redacted] स्यादुत्तरे सेदुताविति प्रसज्येत। वाक्यपदयोरिति। वाक्यस्य चात्र विसर्जनीयोऽत्येन लोका
रः। नुवद्भ्य इति। लसोऽमत्वर्थ इति भसंज्ञाप्राप्तौ तौ इति पदसंज्ञाविधिः॥ ॥यचि भं॥ षडिक इति। षडङ्गुलिशब्दादनुकम्पायां बह्वचो मनुष्यनाम्नष्ठजिति
ठिकृते ठाजादावूर्ध्वं द्वितीयादिति अङ्गुलिशब्दस्य लोपे यस्येति चेत्यकारलोपे च कृते तुल्यावधिकया भसंज्ञया प्रत्ययलक्षणेन प्राप्तायाः सुबन्तमिति पदसं
ज्ञायाः बाधनाज्जश्त्वं न स्यादिति वचनं। सिद्धं च इति। अल्लोपोपस्येत्यर्थः। तत्र भसंज्ञायां विधीयमानायां अकारलोपस्य स्थानिवत्त्वादकारान्त

यदि तर्हि सावपि पदं भवति एवं सति लुप्तविकारे पदान्तयत्वं चोदितं। इष्यते त। अष्टंकरोऽपि गोरिति। तस्मिन् क्रियमाणे
पि प्राप्नोति। वाक्यपदयोरन्त्यस्येत्येवं तत्। नुवत्सु अमो धारयत्सु अमः पदसंज्ञा। एतयोः पदसंज्ञा वक्तव्या। नुवद्भ्यः धा
रयद्भ्यः॥ ॥यचि भं॥ भसंज्ञायामुत्तरपदलोपे षषः प्रतिषेधः। भसंज्ञायामुत्तरपदलोपे षषः प्रतिषेधो वक्तव्यः।
अनुकम्पितः षडङ्गुलिः षडिकः। सिद्धं च स्थानिवत्त्वात्। सिद्धमेतत्। कथं। अचः स्थानिवद्भावाद्भसंज्ञा न भवि
ष्यति। इहापि तर्हि प्राप्नोति। वागाशीर्दत्तः वाचिक इति। वक्ष्यत्येतत्। सिद्धमेकाक्षरपूर्वपदानामुत्तरपदलोपव
चनादिति। इहापि तर्हि प्राप्नोति। षडङ्गुलिः षडिक इति। वक्ष्यत्येतत्। षषष्ठाजादिवचनात्सिद्धमिति। नभोङ्गिरोम
नुषां वत्युपसंख्यानं। नभोङ्गिरोमनुषां वत्युपसंख्यानं कर्त्तव्यं। नभस्वत्। अङ्गिरस्वत्। मनुष्वत्॥ ॥

मेतन्भसंज्ञां प्रतीति भिन्नावधिविषयत्वात्पदसंज्ञाया बाध्यबाधकभावाभावः। न पदान्तेति स्थानिवत्त्वनिषेधोऽत्र न भवति। यत्र पदान्ते वि
धीयते तत्रासौ निषेधः [illegible] यथा कौ स्तः कानि सन्तीति। अत्र हि वकारो यकारश्च पदान्ते विधेयः। इह तु पूर्वमेव जश्त्वं पश्चात्तत्त्विदानीं
विधेयं। सिद्धमिति। उत्तरपदलोपस्य हलजादेशत्वान्नास्ति स्थानिवत्त्वमिति तुल्यावधिकया भसंज्ञया पदसंज्ञा बाध्यते। मनुष्वदिति। स
त्वं पदसंज्ञायां रुत्वं स्यात् न तु षत्वं अपदान्तस्येति वचनात्॥

भा॰के॰ वृषण्वस्विति। पदत्वे सति पदान्तस्येति निषेधाभावे णत्वं न स्यात्। नलोपश्च प्रसज्येत। भत्वे सति नलोपो न इत्यकारलोपो च न भवति। अंगसंज्ञायाः अ
भावात् अंगस्येति च तत्राधिकारात्। उपसंख्यानान्येतानि छंदोविषयाणीत्याहुः॥ ॥ तसौ मत्वर्थे॥ ॥ मत्वर्थग्रहणमिति। स्वादिष्विति वर्त्तते तत्रैवं
संबंधः क्रियते। मतौ यः स्वादिर्वर्त्तत इति। शेषे च वृत्तसंभवात् तदर्थवृत्तिर्विज्ञास्यते इ[illegible]ति प्रश्नः। इहैव स्वादिरिति। मतौ स्वादाविति सामा
नाधिकरण्येन मुख्यकल्पनया संबंधे संभवति अर्थग्रहणं न लभ्यत इति भावः। पयस्वानिति। मत्वर्थीयप्रकरणेऽन्यतरस्यां ग्रहणानु

वृषण्वस्वश्वयोश्च। वृषण् इत्येतस्य वस्वश्वयोर्भसंज्ञा वक्तव्या। वृषण्वसुः। वृषणश्वस्य मुष्कुरः। मेषो वृषण
श्वस्य मेने॥ ॥ तसौ मत्वर्थे॥ ॥ मत्वर्थग्रहणं किमर्थं। न तसौ मतावित्येवोच्येत। तसौ मतावितीयत्युच्यमाने इ
हैव स्यात् पयस्वान् यशस्वान्। इह न स्यात्। पयस्वी यशस्वी। अर्थग्रहणे पुनः क्रियमाणे मतुपि च सिद्धं
भवति यश्चान्यस्तेन समानार्थस्तस्मिंश्च। यद्यर्थग्रहणं क्रियते पयस्वान् अत्र न प्राप्नोति। किं कार
णं। न हि मतुप् मतुबर्थे वर्त्तते। मतुबपि मतुबर्थे वर्त्तते। तद्यथा देवदत्तशालायां ब्राह्मणा आनीयं
तामित्युक्ते यदि देवदत्तोपि ब्राह्मणो भवति सोप्यानीयते॥

वर्त्तनात् तद्वितिनाम मतुप् न बाध्यते। न हि मतुबिति। उपलक्षणस्यान्योपलक्षणे चरितार्थत्वात् स्वतः कार्यप्रतिनिमित्तत्वाभावात्। शि॰व॰
मतुबपीति। अस्यायमर्थः। स च विन्नादीनामिव मतुपोपीति भावः। तद्यथेति। अयमभिप्रायः। यत्र रूपान्तरेणोपलक्षणं
रूपान्तरेण च कार्ययोगः प्रतिपाद्यते तत्रोपलक्षणस्याप्युपलक्ष्यरूपसद्भावे सति कार्ययोगो भवति। तद्यथा देवदत्तशालायां ब्राह्मणा २
आनीयन्तामित्युक्ते सति ब्राह्मणे देवदत्तस्याप्यानयनं भवति। कार्यनिमित्तरूपान्तरानायेतु न भवत्युपलक्षणस्य कार्ययोगः। यथा देवदत्त
शालानीयतामिति।

अयस्मयादीनि॥ आनंतर्यादिसंज्ञाद्वारेणैव निपातनं प्राप्तमित्याह उभयसंज्ञान्यपीति। ऋक्कृतेति। पदत्वात्कुत्वं भत्वाज्जश्त्वं न भवति। उभयविधानार्थं
परसंज्ञाबाधनाय भसंज्ञाप्रवर्तनात्तन्निबंधनकार्याभावः॥ ॥बहुषु बहुवचनं॥ केषु बहुष्विति। जातिवादीप्रत्यवतिष्ठते। जातेः प्रातिपदिका
र्थत्वे तस्या एकत्वाद्बहुत्वासंभवा[illegible] तत्समवेतद्रव्यगतं बहुत्वमाश्रयणीयं। तत्र स्वदृष्टइत्यत्रावयवबहुत्वसद्भावात्स्याद्बहुव
चनमिति भावः। अन्योत्तरं। अर्थेष्विति। अस्यायं भावः। द्रव्यं पदार्थः तत्राभिधेयगतमेव बहुत्वमाश्रीयते वृक्षशब्दस्य चावयवी वाच्यः न
त्ववयवाः। आकृतिपक्षेपि प्रत्यासत्त्या तदाधारद्रव्यगतं बहुत्वमाश्रीयते न त्ववयवगतं। दारादिसादौ त्ववयवावयव्यभेदविवक्षाणां

अयस्मयादीनि छंदसि॥ उभयसंज्ञान्यपीति वक्तव्यं। स सुष्टुभा स ऋक्कता गणेन॥ ॥बहुषु बहुवचनं॥ ब
हुषु बहुवचनमित्युच्यते। केषु बहुषु। अर्थेषु। यद्येवं वृक्षः प्लक्षः अत्रापि प्राप्नोति। बहवस्तेर्थाः मूलं स्कन्धः
फलं पलाशमिति। एवं तर्हि एकवचनं द्विवचनं बहुवचनमिति शब्दसंज्ञा एताः। येष्वर्थेषु स्वादयो वि

बहुत्वमाकृत्साधारणगतमेव बहुवचनवाच्यमिति प्रदोषः। इतरोऽग्रहीनापि धीयंते तेषु बहुषु केषु च स्वादयो विधीयन्ते। कर्मादिषु॥

प्राय आह। यद्येवमिति। अर्थशब्दो भवता वस्तुपर्यायः प्रयुक्तः मूलादीनि च बहू[illegible]नि वस्तूनि भूतिमन्यते। एवं तर्हीति। अयमर्थः। नेदं स्वातंत्र्ये
ण विधायकं किं तर्हि विहितानामनेन नियमः क्रियते। बहुवचनादिभिर्निर्दिष्टत्वशब्दसंज्ञाभिः सुप्तिङोऽपप्रत्याय्यंते। ते पांचदशास्त्रांतरेण स्थिते
विधाने इदमारभ्यमाणं नियमाय भवति। नत्विदमेव विशिष्टार्थानुवादेन सुप्तिङो विधायकमित्येतत्बहुत्वसंज्ञा एता इत्यनेन प्रदर्श्यते। येष्वर्थे
ष्विति। क्वचित्तु पाठः। एवं तर्हि येष्वर्थेष्विति। एकवचनमित्यादि तु भाष्ये नास्त्येव। अयमर्थः। पंचकः प्रातिपदिकार्थः। तथा हि। दधि पश्येत्यादौ
विभक्तिश्रवणमंतरेणापि[illegible] पंचार्थाः प्रतीयंते स्वार्थादयः। विभक्तयस्तु कश्चिद्घोतकत्वेनापेक्ष्यंते। तत्रानिर्दिष्टार्थाः प्रत्ययाः स्वार्थे भवंतीति संख्या
यां कर्मादिषु च सिद्ध एव स्वादयः। अनेन तु नियम्यंते। तत्र कर्माद्यर्थशक्तेः कार्ये समवेतएव बहुवचनं भवति न त्ववयवगते॥

भा.के. नवैकर्मादयइति। अनभिहितइतिसूत्रारंभसामर्थ्यात्कर्मादीनांनैवविभक्तिवाच्यत्वमितिमन्यते। तेषांहिविभक्त्यर्थत्वेतिङ्कृत्तद्धितसमासैरेवो
क्तेषुगतार्थत्वाद्द्वितीयादीनामप्रसंगएवनास्तिकिमनभिहिताधिकारेण। एकत्वादिष्वपीति। वाक्यैकवाक्यत्वेसतिभवत्यवाकांसंपद्यते। कर्म
एष्वनभिहितेयदेकत्वंतत्रैकवचनमित्यादिसंततहीति। बहुत्वइत्येवमपिसर्वः। एकेमन्यन्तइति। प्रातिपदिकार्थएकत्वमत्रास्ति

नवैकर्मादयोविभक्त्यर्थाः। केतर्हि। एकत्वादयः। एकत्वादिष्वपिवैविभक्त्यर्थेष्ववश्यंकर्मादयोनिमित्तत्वे
नोपादेयाः। कर्मण्येकत्वेकर्मणिद्वित्वेकर्मणिबहुत्वइति। सतर्हितथानिर्देशःकर्त्तव्यः। नह्यन्तरेणभा
वप्रत्ययंगुणप्रधानोभवतिनिर्देशः। इहचबहुष्वेकमन्यन्तेतेनदैकमन्यन्तइतिपरत्वादेकवचनंप्रा
प्नोति। बहुषुबहुवचनमित्यस्ययोगःपरःकरिष्यते। सूत्रविपर्यासःकृतोभवति। इहचबहुरोद
नोबहुःसूपइतिपरत्वाद्बहुवचनंप्राप्नोति। नैषदोषः। यत्तावदुच्यतेनह्यन्तरेणभावप्रत्ययंगुणप्रधा
नोभवतिनिर्देशइति। अन्तरेणापिभावप्रत्ययंगुणप्रधानोभवतिनिर्देशः। कथं। इहकदाचिद्गु
णोगुणिविशेषकोभवति। तद्यथाशुक्लःपटइति। कदाचिच्चगुणिनागुणोव्यपदिश्यतेपटस्यशुक्लइति।

बहुत्वंचैकयोरित्यत्रचविशेषानुपादानाद्यावत्क्वचिदेकशब्दार्थःतस्यग्रहणेनभाव्यं। तत्रचपरत्वादेकवचनप्रसंगः। इहचेति। इह शिवः
यद्येकयोरितियोगात्परोऽयंयोगःक्रियतेतदाविशेषाभावाद्वैपुल्यरूपस्यापिबहुत्वस्यग्रहणेसतिपरत्वाद्बहुवचनप्रसंगः।
गुणिविशेषकइति। अतएववचनान्नित्यःषष्ठीसमासप्रतिषेधः। शेषषष्ठ्यावासमासः॥

सामानाधिकरण्यमिति। अनुकूलोपादभेदोपचाराद्। तदानान्तरेणेति। गुणवाचिनः शुक्लशब्दाद्भावप्रत्यये कृते गुणः प्रतीयते नान्यथेत्यर्थः
द्रव्ये षष्ठीति। षष्ठीग्रहणं व्यतिरेकविभक्तिरूपलक्षणार्थं। गुणिनो ह्याधारत्वविवक्षायां सप्तम्यपि भवति। यथा वेदे कर्माणि यास्वंस्वेति। कथ

तथा दानात् बहुलेन गुणिविशेषको भवति पटः शुक्ल इति तदा सामानाधिकरण्यं गुणगुणिनोः। तदानान्तरेण भाव
प्रत्ययं गुणप्रधानो भवतीति निर्देशः। यदा तु गुणिना गुणो व्यपदिश्यते पटस्य शुक्ल इति। स्वप्रधानस्तदा गुणो भव
ति। तदा द्रव्ये षष्ठी। तदन्तरेण भावप्रत्ययं गुणप्रधानो भवतीति निर्देशः। न चेद्द्रव्यमेकत्वादिभिः कर्मादीन्वि
शेषयिष्यामः। किं तर्हि कर्मादिभिरेकत्वादीन् विशेषयिष्यामः। कथं। एकस्मिन्नेकवचनं। कस्यैकस्य। कर्म
णः। द्वयोर्द्विवचनं। कयोर्द्वयोः। कर्मणोः। बहुषु बहुवचनं। केषां बहूनां। कर्मणामिति। कथं बहुषु बहुव
चनमिति। एतदेव ज्ञापयत्याचार्यः। नानाधिकरणवाचीयो बहुशब्दस्तस्येदं ग्रहणं न वैपुल्यवा
चिन इति। किमेतस्य ज्ञापने प्रयोजनं। यदुक्तं बहुरोदनो बहुः सूप इति परत्वाद्बहुवचनं प्रा
प्नोतीति न स दोषो भवति। यद्यप्युच्यते इत्येकपन्थ्यं तेन देकेपन्थ्यं तेइनि परत्वाद्बहुवचनं प्राप्नोतीति।

मिति। बहुत्वस्यैकत्वाद्वृत्ताविति भाष्यमिति प्रश्नः। एतदेवेति। भाष्यगतं बहुत्वं बहुत्वे गुणे आरोप्य निर्देशः कृतः। तस्यैतज्ज्ञापनं भिन्नव
स्त्वाधारस्य बहुत्वस्य संख्यारूपस्य ग्रहणं यथा स्यात्। एकाश्रयवर्तिनो वैपुल्यरूपस्य माभूदिति।

एकशब्दोयमिति। अकयोरित्यत्र संख्यापदेन द्विशब्देन साहचर्यादेकशब्दस्यापि संख्यावाचिनो ग्रहणं। द्वित्वैकयोश्च येकशब्दो वर्त्तते इति अकयोरिति द्विव चनेन निर्देशः। अन्यथा बहुवचनं स्यात्। प्रसिध्या च संख्येयार्थत्वमेकादीनामष्टादशान्तानामुच्यते। किमर्थमिति। लौकिकादेव प्रयोगाद्बहुत्वादिषु बहुवचनादीनां व्यवस्था भविष्यतीति प्रश्नः। सुप्तिङामिति। सुप्तिङ्विधानवाक्ये संख्याविशेषानिर्देशात्तद्विशेषानुपादानेन तेषां विधानमित्यर्थः।

नैष दोषः। एकशब्दोयं बह्वर्थः। अस्त्येव संख्यावाची। तद्यथा। एको द्वौ बहव इति। अस्त्यसहायवाची। तद्यथा। एकाग्नयः। एकहलानि। एकाकिभिः क्षुद्रकैर्जितमिति। अस्त्यन्यार्थे वर्त्तते। तद्यथा। सधमादो द्युम्न एकास्ताः। अन्या इत्यर्थः। तत्र योऽन्यार्थे वर्त्तते तस्यैष प्रयोगः। किमर्थं पुनरिदमुच्यते। सुप्तिङामविशेषेण विधानाद्दृष्टविप्रयोगाच्च नियमार्थं वचनं। सुपश्चाविशेषेण प्रातिपदिकमात्राद्विधीयंते तिङश्चाविशेषेण धातुमात्राद्विधीयंते तत्रैतत्स्याद्यद्यविशेषेण विधीयंते नैव विप्रयोगो लप्स्यत इति। दृष्टविप्रयोगाच्च। दृश्यते खल्वपि विप्रयोगः। तद्यथा। अक्षीणि मे दर्शनीयानि पादा मे सुकुमारा इति। सुप्तिङोरविशेषविधानाद्दृष्टविप्रयोगाच्च व्यतिकरः प्राप्नोति। इष्यते चाव्यतिकरः स्यादिति तच्चांतरेण यत्नं न सिध्यतीति नियमार्थं वचनं। एवमर्थमिदमुच्यते॥

यद्यपीति। शास्त्रेऽनुपात्तोप्यर्थः प्रयोगादेव व्यवस्थाप्यत इत्यर्थः। सुपस्तावत्स्वार्थे विधीयमानाः स्वार्थद्रव्यलिंगसंख्याकर्मादिलक्षणः पंचकः प्रातिपदिकार्थ इति दर्शने संख्यां मा सिद्धाः॥ संख्याविशेषायगतिः स्युर्लौकाल्लिङ्। तिङोपि कर्तृकर्मणोर्विधीयमानाः संख्यायुक्तयोरेव तयोर्वाचका भविष्यंति। स्वभावतः संख्याविशेषः प्रयोगदर्शनादवगम्यत इति भावः। अक्षीणीति। द्वित्वेपि लोके बहुवचनं दृश्यत इत्यर्थः। विरुद्धः प्रयोगो विप्रयोगः। शिवः ११

92

तत्रप्रत्ययनियम इति। प्रत्यया विशिष्टायां संख्यायां नियता इति निःसंख्येभ्योऽव्ययेभ्यस्तेषामनुत्पादात्पदत्वाभावाच्चान्निबंधनरुत्वाद्यभावप्रसंगः। अ
र्थनियम इति। अर्था नियताः इति तेषु वचनांतराभावः। प्रत्ययास्त्वनियतत्वादव्ययेभ्योपि सिध्यंतीत्यर्थः। सुपामिति। कर्मणि द्वितीयेत्यादेः प्रकरण
स्य बहुषु बहुवचनमित्यादेश्च स्वादिसूत्रेण सहैकवाक्यता। तिङर्थं त्विदं तस्मादिदं न सूत्रद्वयमुपात्तं। तत्रैकस्मिन्कर्मणीत्येवं गुणगुणिनोः सामा

अथैतस्मिन्नियमार्थे सति किं पुनरयं प्रत्ययनियमः एकस्मिन्नेवैकवचनं द्वयोरेव द्विवचनं बहुष्वेव बहुवचन
मिति। आहोस्विदर्थनियमः। एकस्मिन्नेकवचनमेव। द्वयोर्द्विवचनमेव बहुषु बहुवचनमेवेति। कश्चात्र वि
12 शेषः। तत्र प्रत्ययनियमेऽव्ययानां पदसंज्ञाभावोऽसुबंतत्वात्। तत्र प्रत्ययनियमेऽव्ययानां पदसंज्ञा न प्राप्नो
ति। उच्चैः। नीचैरिति। किं कारणं। असुबंतत्वात्। अर्थनियमे सिद्धं। अर्थनियमे सिद्धं भवति। अस्त्वर्थनियमः।
अथवा पुनरस्तु प्रत्ययनियमः। ननु चोक्तं तत्र प्रत्ययनियमेऽव्ययानां पदसंज्ञाभावोऽसुबंतत्वादिति। नैष दो
षः। सुपां कर्मादयोप्यर्थाः संख्या चैव तथा तिङां। सुपां संख्यास्त्वैवार्थः कर्मादयश्च तथा तिङां। प्रसिद्धो नियमस्तत्र
प्रसिद्धस्तत्र नियमः। नियमः प्रकृतेषु वा। अथवा प्रकृतानर्थानपेक्ष्य नियमः। के च प्रकृताः। एकत्वादयः। एकस्मिन्ने
वैकवचनं न द्वयोर्न बहुषु। द्वयोरेव द्विवचनं नैकस्मिन्न बहुषु। बहुष्वेव बहुवचनं न द्वयोर्नैकस्मिन्निति। अथवाचा
चार्यप्रवृत्तिर्ज्ञापयति उत्पद्यंतेऽव्ययेभ्यः स्वादय इति। यदयमव्ययादाप्सुपः इत्यव्यया शिवः

नाधिकरण्येन संबंधे सति संख्या कर्मादयश्च सु
पामर्था भवंति। प्रसिद्धो नियम इति। अर्थनियम इत्यर्थः। नियमः प्रकृतेषु चेति। तत्प्रयुक्तानीयस्यानियमेन व्यावृत्तिः। केवल इत्यव्ययेभ्यः स्वादीनामव्याप्
त्तिः। अथवेति। न खलु प्रत्ययानां सामान्येन नियमस्तथापि ज्ञापकादव्ययेभ्यः स्वादिसिद्धिरित्यर्थः॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्य १२
प्रदीपे प्रथमस्याध्यायस्य चतुर्थपादे द्वितीयमाह्निकं॥ ॥श्रीः॥



भा.कै.प्र.च.पा९

भाष्यकैयटप्रथमाध्यायचतुर्थचरण



भा॰के॰

श्रीगणेशाय नमः॥ आकडारादेका संज्ञा॥ किमर्थमिति। आकडारात्स्वरादिनिरवकाशान्व संज्ञेष्यते। तत्रान्तरेणापि यत्नं विप्रतिषेधे परमि
ति वचनात्परा भविष्यति न पूर्वा। निरवकाशापि हि सावकाशां विशेषविहितत्वादेव बाधित्वा भविष्यति। कोऽयं दोषो यदनेन नियत
त्ववचनेनेति प्रश्नः॥ अन्यत्रेति। विप्रतिषेधे परं कार्यमुच्यते। न च संज्ञानां विरोधः। युगपत्प्रवृत्तिसंभवात्। न च बाध्यबाधकभावः
भिन्नफलत्वाद्विरोधाभावाच्च। दधितक्रयोरभिन्नफलं भोदनसेक इति तयोर्बाध्यबाधकभावः। अष्टाश्रिर्यूपो भवति वाजपेयस्य
चतुरश्रिरित्यष्टाश्रित्वचतुरश्रित्वयोस्तु विरोधात्। इन्द्रः शक्र इति यद्यप्यत्र फलभेदो नास्ति तथापि समावेशोऽस्तीति प्रतिपादना

श्रीः॥ आकडारादेका संज्ञा॥ ॥किमर्थमिदमुच्यते। अन्यत्र संज्ञासमावेशान्नियमार्थं वचनं। अ
न्यत्र संज्ञासमावेशो भवति। क्वान्यत्र। लोके व्याकरणे च। लोके तावत्। इन्द्रः शक्रः पुरुहूतः पुरंदरः। कंदुः को
ष्ठः कुसूल इति। एकस्य द्रव्यस्य बह्व्यः संज्ञा भवंति। व्याकरणेऽपि कर्त्तव्यं हर्त्तव्यमिति प्रत्ययकृत्कृत्य
संज्ञानां समावेशो भवति। पांचालः वैदेहः वैदर्भ इति प्रत्ययतद्धिततद्राजसंज्ञानां समावेशो
भवति। अन्यत्र संज्ञासमावेशादेतस्मात्कारणात् आकडारादपि संज्ञानां समावेशः प्राप्नो
ति। इष्यते चैक एवैकसंज्ञा स्यादिति। तच्चांतरेण यत्नं न सिध्यतीति नियमार्थं। एवमर्थमिदमु
च्यते। अस्ति प्रयोजनमेतत्। किं

योदाहरणेऽपन्यासः॥ कर्त्तव्यमिति। प्रत्ययसंज्ञायाः प्रयोजनं धातोरंगसंज्ञा कृत्संज्ञायाः
प्रयोजनं प्रातिपदिकत्वं। कृत्यसंज्ञायास्तयोरेतिकर्मेति

शि॰ व॰ १

वचनं १३

[redacted] उभ
यथेति। तत्र गुणदोषविचारः कर्त्तव्य इत्यर्थः। तत्रैका संज्ञेत्यस्मिन्पाठे क्वचित्संज्ञासमावेशार्थो यत्नः कर्त्तव्यः। परं कार्यमित्यस्मिंस्तु पाठे समावेशः
सिध्यति। अत्र द्विपाठे अयमर्थः। प्राक्कडारात्संज्ञारब्धं कार्यं परं भवतीति। संज्ञाप्रकरणात्संज्ञैवात्र स्वतन्त्रे कार्यशब्देन विवक्षिता। तत्र यस्याः

कथं चैतत्सूत्रं पठितव्यं किमाकडारादेका संज्ञेति आहोस्वित्प्राक्कडारात्परं कार्यमिति। कुतः पुनरयं
संदेहः। उभयथा ह्याचार्येण शिष्याः सूत्रं प्रतिपादिताः। केचिदाकडारादेका संज्ञेति। केचित्प्राक्कडा
रात्परं कार्यमिति। कश्चात्र विशेषः। तत्रैकसंज्ञाधिकारे तद्वचनं। तत्रैकसंज्ञाधिकारे तद्वक्त
व्यं। किं। एका संज्ञा भवतीति। ननु च यस्यापि परं कार्यं तेनापि परग्रहणं कर्त्तव्यं। परार्थं मम
भविष्यति विप्रतिषेधे चेति। मम त्वेकग्रहणं परार्थं भविष्यति। सरूपाणामेकशेष एकविभ
क्ताविति। संज्ञाधिकारश्चायं। तत्र किमन्यच्छक्यं विज्ञातुमन्यदतः संज्ञायाः॥ तत्रैतावदुच्यं [redacted]

संज्ञायाः परस्याः पूर्वया बाधः प्राप्नोति सा परानेन भाव्यत इति विध्य [redacted]॥
र्थसूत्रं भवति न नियमार्थं। एतदेव च परसंज्ञाविधानं ज्ञापकमत्र प्रकरणे संज्ञानां बाध्यबाधकभावस्य। तेन परयानवकाशया सा
वकाशा पूर्वा बाध्यते द्वयोर्विप्रतिषेधे परया पूर्वा बाध्यत इत्येतदत्र वक्तव्यं।
सावकाशयोः।

आकडारादेकेति। संज्ञाप्रकरणादेकेति स्त्रीलिंगनिर्देशः संज्ञाशब्दानुच्चारणेपि न विरुद्धः। अस्माच्च सूत्रात्परं सरूपाणामेकशेष एक
विभक्ताविति प्रकरणं कर्त्तव्यं। तत्रैकस्य स्यशब्दस्य स्वरितत्वादनुवृत्तौ लिंगविपरिणामेन संबंधे सत्येकग्रहणं पुनर्न कर्त्तव्यं भवति।
सर्पः। सार्पिष्क इति। असत्यामंगसंज्ञायामंगस्योच्यमाना वृद्धिर्न स्यात्। अंगसंज्ञा च कर्त्तव्या मित्यादिषु सावकाशा यत्र पूर्वस्य
॥१।४।१॥

आकडारादेका। किमेकासंज्ञा भवतीति। अंगसंज्ञया भपदसंज्ञयोरसमावेशः। अंगसं
२ ज्ञया भपदसंज्ञयोश्च समावेशः प्राप्नोति। सार्पिष्कः। बार्हिष्कः। पाञ्चुष्कः। धानुष्कः। बाभ्रव्यः। मां
डव्य इति। अनवकाशे भपदसंज्ञे अंगसंज्ञां बाधेयातां। परवचने हि नियमानुपपत्तेरुभ
यसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं
पूर्वं तस्य भपदसंज्ञे परा अंगसंज्ञा। कथं। एवं संवक्ष्यति। यस्मात्प्रत्ययविधिस्तदादि। सु
प्तिङंतं पदं। नः क्ये। सिति च। स्वादिष्वसर्वनामस्थाने। यचि भं। तस्यां ते प्रत्ययेंगमिति ता शिवः

भपदसंज्ञे न स्तः। ननु तद्धितेष्वचामादेः किति चेत्यंगस्य वृद्धिविधानसामर्थ्यात्समावेशो भविष्यति। नैतदस्ति। वचनादनंगस्यापि वृ
द्धिः स्यात्। ततश्च देवदत्तो गार्ग्य इत्यत्रापि यञि परतो देवदत्तादेः समुदायस्यापि वृद्धिः प्रसज्येत। यथा डित्त्वभस्याप्यनुबंधकरणसाम २
र्थ्यात् कुमुद्वानित्यादौ टिलोपः। परं कार्यत्वमिति परं कार्यत्वमित्यत्रैकदेशस्यानुकरणं परं कार्यशब्दस्तस्यानुकार्येणार्थवत्त्वात्प्रातिपदि

अनुवृत्तिः क्रियत इति। ततस्तत्पूर्वकत्वं लभ्यते। अंगं सद्भसंज्ञमपि स्यर्थः। अत्रोत्तरमाह। पर्यायः प्रसज्येतेति। एकासंज्ञेतिवचना[redacted]दंग
संज्ञाया नित्यबाधे प्राप्ते पर्यायार्थानुवृत्तिः [redacted] स्यात्। एवं नियमेन बाधितो भवति। अनुवृत्तिश्च सफला भवति। ननु नपदांते त्यत्र
सूत्रे भाष्यकारेणोक्तं वेतस्वानित्यस्य सिद्धये। यथैवान्यानि पदकार्याण्युपलभ्यंते रुत्वं जश्त्वं च। एवमिदमप्युपलभ्यते भसंज्ञा नास्तीति
तत्र च पदं सद्भसंज्ञं भवतीति विज्ञायते। भसंज्ञायां पदसंज्ञानुवृत्तावपि भसंज्ञया पदसंज्ञाया बाधः पदकार्यनिवृत्तये ऽभ्युपगंतव्यः
इत्यंगसंज्ञानुवृत्तौ पर्याय उक्त इति विरोधः। नैष दोषः। अंगसंज्ञानुवृत्तेः प्रयोजनांतराभावात् पर्याय इत्युक्तः। पदसंज्ञानुवृत्तेस्तु

ननु च यस्याप्येकसंज्ञाधिकारस्तस्याप्यंगभसंज्ञापूर्विके भपदसंज्ञे। कथं अनुवृत्तिः क्रियते। पर्या
यः प्रसज्येत। एकासंज्ञेतिवचनान्नास्ति योगपद्येन संभवः। [redacted]
कर्मधारयत्वे तत्पुरुषग्रहणं कर्मधारयत्वे तत्पुरुषग्रहणं कर्त्तव्यं। तत्पुरुषः समानाधिकरणः
र्मधारय इति। एकसंज्ञाधिकार इति चोदितं। आक्षिप्यमाणो हि तत्पुरुषग्रहणे ह्यनवकाशा कर्मधा

भसंज्ञायां प्रयोजनं पदकार्यत्वं भसंज्ञायाम् यथा स्यादिति। ततश्च न पदांतेति स्थानिवत्त्वनि रयसंज्ञा तत्पुरुषसंज्ञां बाधेत।।
षेधाद् कारलोपस्य तसौ मत्वर्थ इति भसंज्ञायां सत्यां पदत्वप्रयुक्तरुत्वाभावे वेतस्वानिति सिध्यति। कथमिति चेदुच्यते। भसंज्ञा
विधौ पदमिति निवर्त्तते। तत्रानुवृत्तिसामर्थ्यात्पूर्वं पदसंज्ञा प्रवर्त्तते। तेन पदकार्यं भसंज्ञा भवति। नान्यथा। एतावदेव चानुवृत्तेः प्रयोजनं। ततः
प्रवृत्तया भसंज्ञया पदसंज्ञा बाध्यते। एकासंज्ञेति नियमात्। कर्मधारयत्व इति। एकसंज्ञावादिनं प्रत्युच्यते त्वया कर्मधारयसंज्ञायामेकसंज्ञाधि

कारे अन्यत्र वा क्रियमाणायां तत्पुरुषग्रहणं कर्तव्यं। एकसंज्ञाधिकारे संज्ञासमावेशार्थं प्रदेशान्तरे तु समासान्तरस्य कर्मधारयसंज्ञाया
निवृत्त्यर्थं मया त्वस्मिन्नेव प्रकरणे कर्मधारयसंज्ञा क्रियते समावेशश्च सिध्यतीति तत्पुरुषग्रहणं न कर्तव्यं भवतीति लाघवं भवति।
तस्यान्ते इति यद्येवं समानाधिकरणस्य कथं तत्पुरुषसंज्ञा सिध्यति। उच्यते। पाठक्रमादर्थक्रमो बलीयानिति पूर्वं तत्पुरुष इति कर्त

परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेः स
सोभयोः संज्ञयोर्भावः सिद्धः। कथं पूर्वा तस्य कर्मधारयसंज्ञा परा तत्पुरुषसंज्ञा। कथं। एवं
3 स वक्ष्यति। पूर्वकालैकसर्वजरत्पुराणनवकेवलाः समानाधिकरणेन कर्मधारयश्चेति
एवं सर्वं कर्मधारयप्रकरणमनुक्रम्य तस्यान्ते श्रितादिस्तत्पुरुषः इति। तत्रारंभसामर्थ्या
च्च कर्मधारयसंज्ञा परं कार्यत्वाच्च तत्पुरुषसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिका
रस्तस्यापि तत्पुरुषसंज्ञापूर्विका कर्मधारयसंज्ञा। कथं। अनुवृत्तिः क्रियते पर्यायः प्रसज्ये
त। एका संज्ञेति वचनान्नास्ति योगपद्येन सं शिवः

ज्ञा। ततो द्वितीया श्रितेति। तत्पुरुष इत्यत्र च पूर्वकालेत्यादिसूत्र एवानुवर्त्य तत्पुरु
षसंज्ञा विधीयते। ननु च यस्यापीति। व्यधिकरणानां तत्पुरुषसंज्ञां विधाय समानाधिकरणस्य तत्पुरुषसंज्ञानुवृत्ता सा तत्पूर्विका कर्मधा 3
रयसंज्ञा विधायिष्यते इत्यर्थः। समावेशस्य च कारकग्रवीति पुंवद्भावसमासान्तौ प्रयोजनं॥ ॥रामजी सहाय॥ श्रीकमलजी सहाय॥ रामः

द्विगुचग्रहणमिति। द्विगोः संबंधिनश्चशब्दस्य ग्रहणं कर्त्तव्यमित्यर्थः। नन्वेकसंज्ञापक्षे द्विगुश्चेति सर्वमेव सूत्रं कर्त्तव्यं तत्र किं चशब्द एव चो
द्यते। तत्राहुः। द्विगुश्चेति सूत्रं द्वयोरपि पक्षयोर्न कर्त्तव्यं। एकसंज्ञापक्षे तत् संख्यापूर्वो द्विगुश्चेति चशब्दः समावेशार्थः कर्त्तव्यः। नपक्षांत

तत्पुरुषत्वे द्विगुचग्रहणं। तत्पुरुषत्वे द्विगुचग्रहणं कर्त्तव्यं। तत्पुरुषः द्विगुश्चेति चकारः कर्त्तव्यः
अक्रियमाणे हि चकारग्रहणे ऽनवकाशा द्विगुसंज्ञा तत्पुरुषसंज्ञां बाधेत। परवचने हि निय
मानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेरुभयोः संज्ञयोर्भा
वः सिद्धः। कथं। पूर्वा तस्य द्विगुसंज्ञा परा तत्पुरुषसंज्ञा। कथं। एवं स वक्ष्यति। तद्धितार्थोत्तर
पदसमाहारे च संख्यापूर्वो द्विगुरिति। एवं सर्वं द्विगुप्रकरणमनुक्रम्य तस्यान्ते श्रि
तादिस्तत्पुरुषः इति। तत्रारंभसामर्थ्याद् द्विगु[illegible]संज्ञा परं कार्यत्वाच्च तत्पुरुषसंज्ञा भवि
ननु च स्योऽयं येप्येकसंज्ञाधिकारस्तस्यापि तत्पुरुषसंज्ञापूर्विका द्विगुसंज्ञा। कथं। भनुवर्त्तिः
क्षिपते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति योगपद्येन सं

रसमावेशार्थ इत्यनेन वार्त्तिककारस्य विवक्षि
तं। भाष्यमप्येवं व्याख्याय तेन तत्पुरुषः द्विगुश्चेति चकारः कर्त्तव्य इति। तद्धितार्थ इत्यनेन यः संख्यापूर्वः समासस्तत्पुरुषो द्विगुश्च भवतीति संज्ञा
द्वयं। तस्मात् इति यावत्। एतदर्थश्चकारः कर्त्तव्य इति। अयमेवार्थः परस्तात्स्फुटी भविष्यति। तस्यां तद्धि स्यादि

भाष्यं सर्वं व क्रम विपर्ययेण व्याख्येयं।।

गतिसंज्ञामिति। ऊर्यादिषु सावकाशामिति भावः॥ प्रादीनां या गतिसंज्ञेति। गतिश्चेत्यत्रासत्यपि चकारे समावेशः सिध्यति। गतिरित्य-
त्र योगे प्रादीनामनुवृत्त्या गतिसंज्ञा विधीयते। तत्र वचनसामर्थ्यात् पर्याये लब्धे सति उपसर्गसंज्ञानुवृत्तिः समावेशार्था इति

गतिदिवः कर्महेतुमत्सु च ग्रहणं। गतिदिवः कर्महेतुमत्सु च ग्रहणं कर्त्तव्यं। उपसर्गाः क्रिया
४ योगे गतिश्चेति चकारः कर्त्तव्यः। अक्रियमाणे हि चकारे अनवकाशा उपसर्गसंज्ञा गति
संज्ञां बाधेत। परवचने हि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नि
यमानुपपत्तेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं पूर्वा तस्योपसर्गसंज्ञा पराग
तिसंज्ञा। तत्रारंभसामर्थ्याच्चोपसर्गसंज्ञा परं कार्यत्वाच्च गतिसंज्ञा भविष्यति। ननु
द्विका गतिसंज्ञा॥२ च यस्याप्येकसंज्ञाधिकारस्तस्याप्युपसर्गसंज्ञा परे। कथं अनुवृत्तिः क्रियते। पर्यायः प्रसज्ये
त। एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः। गतिसंज्ञाप्यनवकाशा वचनाद् भविष्यति।
सावकाशा गतिसंज्ञा। कोऽवकाशः। ऊर्यादीन्यवकाशः। प्रादीनां या गतिसंज्ञा सानवकाशा। गति। शिवः

घ्नतीत्यर्थः॥ समावेशस्य च प्रतीतमभिषिक्तमित्यत्र गतिस्वरेण षत्वे च प्रयोजनं॥ ॥श्रीः॥ ॥कृष्णः॥ ॥वासुदेवाय नमः॥ ॥रामः॥

दिवः कर्म चेति। समावेशस्य च प्रयोजनं मध्ये दे वयते देवदत्तो यज्ञदत्तेनेति प्रयोज्यकर्म तिबुद्धीति नियमात् कर्मसंज्ञा निवृत्तिः अणावकर्मका
दिति परस्मैपदभावश्चाप्यत्रैव मध्यान्दीयतीति द्वितीया न प्राप्नोतीति तृतीयापापरत्वाद्बाधितत्वात्। विभक्तिद्वयं चेष्यते। कर्मसंज्ञा च सावका

दिवः कर्म साधकतमं करणं। दिवः कर्म चेत्यत्र चकारः कर्त्तव्यः। अक्रियमाणे हि चकारे ऽनवकाशा कर्मसंज्ञा
करणसंज्ञां बाधेत। परवचनेन हि नियमानुपपत्तेः नयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानु
पपत्तेस्तस्यामयोर्भावः सिद्धः। कथं। पूर्वा तस्य कर्मसंज्ञा परा करणसंज्ञा। कथं। एवं संवक्ष्यति।
दिवः साधकतमं कर्म। ततः करणं। करणसंज्ञं च भवति साधकतमं। दिव इति निवृत्तं। तत्रारंभ
सामर्थ्याच्च कर्मसंज्ञा परं कार्यत्वाच्च करणसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिका
रस्तस्या [redacted] पि करणसंज्ञापूर्विका कर्मसंज्ञा। कथं। अनुवृत्तिः क्रियते। पर्यायः प्रस
ज्येत। एका संज्ञेति वचनान्नास्ति योगपद्येन संभवः। दिवः कर्म। हेतुमत्। स्वतंत्रः कर्त्ता। तत्प्रयो
जको हेतुश्च। चकारः कर्त्तव्यः। अक्रियमाणे हि चकारे ऽनव
शाप्यकर्मकव्यपदेशाद्याप्तत्यर्थत्वात् करणसंज्ञापि देवना
अक्षाद्भिरिति ल्युडर्था। अत्राकुः। कार्यकालं संज्ञापरिभाषमिति पक्षो चाश्रीयते। तेन कर्मणि द्वितीये त्यत्र कार्ये यत्कर्मसंज्ञायाउपस्थानं तद
नवकाशमिति द्वितीया भविष्यति। अक्षाणां दीव्यतेः सा दोषु त्वप्रयोगे षष्ठ्या द्वितीयापवादत्वाद्बाध्यते तृतीया तु परत्वात्। हेतुमदिति। हेतुसंज्ञा

5

भा.के.

गुरुलघुसंज्ञे इति। यद्यपि घिनदीसंज्ञे वर्णमात्रस्य क्रियेते तेन दायं दोषः। यदा तु तदंतस्य तदा भिन्नविषयत्वात् सिद्धः समावेशः। तस्य तु प्रयो
जनं वात्सीबंधुरित्यत्र नदीबंधुनीति पूर्वपदांतोदात्तत्वं नदीसंज्ञानिबंधनं भवति। वात्सीबंधो इति गुरोरनृत इति प्लुतो गुरुसंज्ञा

परवचने हि नियमानुपपत्ते रुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः
संज्ञयोर्भावः सिद्धः। कथं। पूर्वा तस्य हेतुसंज्ञा परा कर्तृसंज्ञा। कथं। एवं स वक्ष्यति। स्वतंत्रः प्रयोजको हे
तुरिति। ततः कर्त्ता। कर्तृसंज्ञा च भवति स्वतंत्रः प्रयोजक इति निवृत्तं। तत्रारंभसामर्थ्याच्च हेतुसंज्ञा प
रं कार्यत्वाच्च कर्तृसंज्ञा भविष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि कर्तृसंज्ञा पूर्विका हेतु
संज्ञा। कथं। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति यौगपद्येन संभवः। गुरु
लघुसंज्ञे नदीघिसंज्ञे। गुरुलघुसंज्ञे नदीघिसंज्ञे बाधेयातां। गार्गीबंधुः वात्सीबंधुः। वैन्नं विविनय्य
परवचने हि नियमानुपपत्ते रुभयसंज्ञाभावः। यस्य पुनः परं कार्यत्वं नियमानुपपत्तेस्तस्योभयोः सं
ज्ञयोर्भावः सिद्धः। कथं। पूर्वे तस्य नदीघिसंज्ञे परे गुरुलघुसंज्ञे तत्रारंभसामर्थ्याच्च नदीघिसंज्ञे परं कार्यत्वाच्च शिवः
गुरुलघुसंज्ञे भविष्यतः।

निबंधनः। घिलघुसंज्ञासमावेशस्य च प्रयोजनं विभ्वना च वितरा विति घिलक्षणः पूर्वनिपातः। विनो भावि
वैन्नमिति इगंताच्च लघुपूर्वादित्यण्। इह मनोज्ञादित्वाद्वुञ् प्राप्तः तदभावश्चिंत्यः। विनशावाचष्टे इति णिचि टिलोपे च कृते विविनय्येति ल्य ५
पि लघुपूर्वादित्ययादेशः॥ श्रीः

नदीघिसंज्ञापूर्विके इति। ननु विशेषविषयेन नदीघिसंज्ञे गुरुलघुसंज्ञे तु सामान्यविषये ते कथं नदीघिसंज्ञापूर्विके युज्येते। एवं मन्यते। वाक्यभेदे
न संबंधः करिष्यते। ह्रस्वमक्षरं लघुसंज्ञं भवति। ततो घि। घिसंज्ञं च लघुसंज्ञमिति। एवं दीर्घं गुरुसंज्ञं। ततो नदी। नदीसंज्ञं च गुरुसंज्ञमिति। पर्याय
इति। नदीघिसंज्ञाभ्यां गुरुलघुसंज्ञयोर्निरवकाशे प्राप्ते तयोरनुवृत्तिः पर्यायार्थैव स्या[illegible]दित्यर्थः। परस्मैपदसंज्ञामिति। ततश्च कापतीत्या ॥

ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि [illegible] नदीघिसंज्ञापूर्विके गुरुलघुसंज्ञे। कथं। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति योगपद्येन संभवः। परस्मैपदसंज्ञा पुरुषसंज्ञा। परस्मैपदसंज्ञा पुरुषसंज्ञाबाधेन। परवचनेऽपि नियमानुपपत्तेरुभयसंज्ञाभावः। यस्य पुनः परं कार्यं त्वं नियमानुपपन्नेस्तस्योभयोः संज्ञयोर्भावः सिद्धः। कथं। पूर्वात्तस्य पुरुषसंज्ञा परस्य परस्मैपदसंज्ञा। कथं। एवं सवक्ष्यति। तिङस्त्रीणि त्रीणि प्रथममध्यमोत्तमाः इति। एवं सर्वं पुरुषनियममनुक्रम्य तस्यां तेलः परस्मैपदमिति। तत्रारंभसामर्थ्याच्च पुरुषसंज्ञा परं कार्यत्वाच्च परस्मैपदसंज्ञा न विष्यति। ननु च यस्याप्येकसंज्ञाधिकारस्तस्यापि [illegible] संज्ञापूर्विका पुरुषसंज्ञा। कथं। अनुवृत्तिः क्रियते। पर्यायः प्रसज्येत। एका संज्ञेति वचनान्नास्ति योगपद्येन संभवः। परस्मैपदसंज्ञाप्यनवका

[illegible]

हो दीर्घत्वं न स्यात्। अन्तर्यं च स्यात्। ननु च वास्तिचि
वृद्धिरिति ज्ञापकात्समावेशो भविष्यति। नैतदस्ति। अस्माद्वचनाद्दस्मि[illegible]न्कार्यपर्यायः स्यान्न समावेशः। ततश्च पाक्षिकी वृद्धिः स्यात्। परस्मै
पदसंज्ञापीति। ततश्च पर्याये लब्धे अनुवृत्तिः समावेशार्थो भविष्यतीति भावः॥ ॥श्रीकलः॥

भा॰कै॰

कृत्विय इति। भसंज्ञायां सत्यामोर्गुणः स्यात् पदसंज्ञात्वबग्रतार्थं स्यात्। गतिबुध्यादीनामिति। एकसंज्ञाधिकारे गत्यादिसूत्रं कर्मसंज्ञायां नियमार्थं
तथाहि। प्रयोज्यः स्वव्यापारे स्वतन्त्रः प्रयोजकव्यापारेण चाप्यत इति संज्ञाद्वयप्रसंगे एकसंज्ञाधिकारादन्यतरस्याभावे प्राप्ते तत्र प्रत्ययार्थप्राधान्यात्त
त्प्रयुक्तया कर्मसंज्ञया प्रवर्त्यं। गुणप्रधानसन्निधौ प्रधानस्य प्रयोजकत्वे संभवति एव गुणास्तद्विरुद्धं स्वकार्यं न प्रयुंजते तत्तस्यां सिद्धायां
प्रयोज्यस्य कर्मसंज्ञायां गत्यर्थादीनामेवाण्यन्तानां कर्ता कर्मसंज्ञो भवति नान्येषामिति नियमः क्रियते। तेन पाचयत्योदनं देवदत्तो यज्ञदत्ते

परवचने सिति पदं भं। परवचने सिति पदं भसंज्ञमपि प्राप्नोति। अयं ते योनिरृत्वियः। प्रजां विन्दाम ऋ
त्वियः। आरंभसामर्थ्याच्च पदसंज्ञा परं कार्यत्वाच्च भसंज्ञा प्राप्नोपि। गतिबुध्यादीनां ण्यंतानां कर्मकर्तृसंज्ञा।
गतिबुध्यादीनां ण्यंतानां कर्मकर्तृसंज्ञमपि प्राप्नोति। आरंभसामर्थ्याच्च कर्मसंज्ञा परं कार्यत्वाच्च। नैष कर्तृसंज्ञा प्राप्नोति २
दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न कर्मसंज्ञायां कर्तृसंज्ञा भवतीति। यदयं हृक्रोरन्यतरस्यामित्यन्यतर
स्यांग्रहणं करोति। शेषवचनं च घिसंज्ञानिवृत्त्यर्थं। शेषवचनं च कर्तव्यं। शेषो घ्यसखि। किं प्रयोजनं।
घिसंज्ञानिवृत्त्यर्थं नदीसंज्ञायां घिसंज्ञा माभूदिति। शकट्यै पद्धत्यै बुध्यै धेन्वै इतरथा हि परं कार्यत्वाच्च घिसं
आरंभसामर्थ्याच्च ङिति ह्रस्वश्चेति नदीसंज्ञा॥

नेति कर्मसंज्ञा न भवति। प्रधानप्रयुक्तकर्मसंज्ञाभावेन गुणक्रियानिमित्ता कर्तृसंज्ञा प्रवर्त्त
ते। यदा तु परं कार्यमिति पाठस्तदाह विरोधात् सर्वत्र संज्ञाद्वयप्रसंगे गत्यादीनामेवेति नियमेन लभ्यं तद्व्यावृत्तं तु प्रयोज्यात् कर्मसंज्ञा व्या
वर्त्यते गत्यर्थादि प्रयोज्यस्य तु संज्ञाद्वयप्रसंगकृत्स्नार्थः। यदयमिति। यदि तु गत्यर्थादिप्रयोज्यस्य संज्ञाद्वयं प्राप्नुवत् तदा तत्रैव सूत्रे हृक्रोर्वा करि
ष्यते नान्यतरस्यां ग्रहणमिति सर्वं। शकट्यै इति। शकटिशब्दान्ङे प्रत्यये कृते परत्वान्नदीसंज्ञानिमित्ते आण्कृते ततस्याडि ह्रस्वत्वाद् घेर्ङिती
तिगुणः प्राप्नोति॥ शिवः ६

6

नवासंभवादिति। अयंभावः। यद्यत्र घिसंज्ञाप्रवर्त्तेत तदान्तरंगत्वात्पूर्वमेव तस्याः प्रवृत्तिः स्यात्। नदी संज्ञा तु ङित्प्रत्ययापेक्षत्वाद्बहिरंगा। तत्र घिलक्षणेगु
णे कृते ह्रस्वाभावादल्विधित्वाच्च स्थानिवत्त्वाभावान्नदी संज्ञा नैव प्रवर्त्तेतेति नदी संज्ञा विधानं ह्रस्वस्यानर्थकमेव स्यात्। तस्मान्नदी संज्ञाविधा
नसामर्थ्यादत्र घिसंज्ञा न भवतीत्यर्थः। नद्याश्रयत्वादिति। यं विधिं प्रत्युपदेशोऽनर्थकः स विधिर्बाध्यते यस्य तु विधेर्निमित्तमेव नासौ बाध्य

नवासंभवात्। नवाकार्यं नदी संज्ञायां घिसंज्ञाकस्मान्न भवति। असंभवात्। कोऽसावसंभवः। ह्रस्वलक्ष
णा हि नदी संज्ञा घिसंज्ञायां च गुणः। ह्रस्वलक्षणा हि नदी संज्ञा घिसंज्ञायां च गुणेन भवितव्यं। तत्र वचनप्रा
माण्यान्नदी संज्ञायां घिसंज्ञाभावः। तत्र वचनप्रामाण्यान्नदी संज्ञायां घिसंज्ञा न भविष्यति। किं कारणं। आ
श्रयाभावात्। आश्रयाभावान्नदी संज्ञायां घिसंज्ञानिवृत्तिरिति चेद्यणादेशाभावः। आश्रयाभावान्नदीसं
ज्ञायां घिसंज्ञा निवृत्तिरिति चेदेवमुच्यते यणादेशोऽपि न प्राप्नोति। नैष दोषः। नद्याश्रयत्वाद्यणादेशस्य ह्र
स्वस्य नदी संज्ञाभावः। नद्याश्रयो यणादेशः। यदा नदी संज्ञया [illegible] घिसंज्ञा बाधिता ततस्तदुत्तरका
लं यणादेशेन भवितव्यं। नद्याश्रयत्वाद्यणादेशस्य ह्रस्वस्य नदी संज्ञा भविष्यति। बहुव्रीहौ पर्यन्तु ब
हुव्रीहि प्रतिषेधार्थं तु शेषग्रहणं कर्त्तव्यं। शेषो बहुव्रीहिरिति। किं प्रयोजनं। प्रयोजनमव्ययीभावोपमा
ने इति भावः। उन्मत्तगंगमिति। अत्र बहुव्रीहि संज्ञायां स(नद्यृतश्च)हिगुकल्पो पेषु। अव्ययीभावे उन्मत्तगंगं। लोहितगंगं। उपमान।
स्यां पूर्वपदप्रकृतिस्वरः पाक्षिकश्च कप्समासान्तः प्राप्नोति। शस्त्रीश्यामेति। यदाप्ययमाशङ्कः। शस्त्रामेव वर्त्तते उपमेयं तु समासवा
च्यं तदान्यपदार्थवृत्तित्वाद्बहुव्रीहि संज्ञाप्रसंगात्तन्निबंधनः पाक्षिककप्प्रसंगः। स्वरस्तु तत्पुरुषेऽप्यन्यायेति विधीयते तत्र नास्ति विशेषः॥

७

पंचगवमिति। यथा समाहारे भावरूपो वाच्यः तदान्यपदार्थसद्भावात्। समाह्रियमाणार्थविलुप्तदभावः। बहुव्रीहिसंज्ञायां सत्यां तन्निबंधनस्वरप्रसंगः
कपस्त्वशेषत्वात्प्रसंगाभावः। नन्वत्र टचश्चित्करणाद्बहुव्रीहिस्वरे न भविष्यति। एवं तर्ह्युदाहरणादिगियं इदं त्वत्रोदाहरणं पंचपात्रमिति। निष्कौ
शांबिरिति। क्रांतस्यान्यपदार्थस्य समासवाच्यत्वे बहुव्रीहिसंज्ञायां तन्निबंधनो नदीलक्षणः कप्प्रसंगः। पदात्तु पूर्वमेव क्रांताद्यर्थस्य नितरान्य
पदार्थाभावः। क्रियमाणे विशेषग्रहणे दोषांतरप्रसंगमाह। तत्रेति। एकसंज्ञावादीनु शेषग्रहणं न करोति अनवकाशाभिरव्ययीभावादि

द्विगु। पंचगवं दशगवं। कृल्लोपे। निष्कौशांबिः। निर्वाराणसिः। तत्र शेषवचनाद्दोषः संख्यासमानाधिकरणन
ञ्समासेषु बहुव्रीहिप्रतिषेधः। तत्र शेषवचनाद्दोषो भवति। संख्यासमानाधिकरणनञ्समासेषु बहुव्रीहेः प्र
तिषेधः प्राप्नोति। संख्या। द्वीरावतीको देशः। त्रीरावतीको देशः। समानाधिकरण। वीरपुरुषको ग्रामः। नञ्समासे।
अब्राह्मणको देशः। अवृषलको देशः। कृल्लोपे च शेषवचनात्प्रादिभिर्न बहुव्रीहिः। कृल्लोपे च शेषवचना
त्प्रादिभिर्बहुव्रीहिर्न प्राप्नोति। प्र पतितपर्णः प्रपर्णकः। प्रपतितपलाशः प्रपलाशक इति। अपि एकसंज्ञा
धिकारे कथं सिध्यति। एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिः। एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिर्न

संज्ञाभिर्बहुव्रीहिसंज्ञाभावस्यासिद्धत्वात्। द्वीरावतीकादिषु तत्पुरुषत्वाद्बहुव्रीहिर्भविष्यति। द्वीरावतीक इति। नदीभिश्चेत्यव्ययीभावः प्राप्नोति। शि॰व॰
तस्यानवकाशः पंचनदमिति यथा समाह्रियमाणोऽर्थो वाच्यः। प्रपतितपर्णः प्रपर्णक इति। प्रपर्णक इत्युदाहरणं। कृल्लोपप्रदर्शनार्थं तु प्रप ७
तितपर्णक इत्युक्तं। यथा निष्कौशांबिरिति तत्पुरुषसंज्ञा भवति एवं प्रपर्णक इत्यत्रापि स्यादिमर्थः॥ ॥श्रीः॥ रामकृष्णो जयतस्तरां।

तत्पुरुषोत्रेति। परिगणनं मन्तासिद्धत्वाद्। इतरो विशेषमप्रतिपद्यात्। तत्पुरुष इतीति। सिद्धं त्विति। कार्यो यत्र समासार्थस्तत्र तत्पुरुषसंज्ञा प्रपर्णादि
इत्यत्र तु कार्यः पर्णविशेषणं समासार्थस्त्वन्य एवेति बहुव्रीहिर्भवति। कानि पुनरिति। अस्मिन्प्रकरणे पठितानां संज्ञानां यासां समावेशो नेष्यते
ताः प्रयोजनं। प्रकरणान्तरविहिताऽप्यनिष्यमाणासमावेश उपसंख्यातत्वेन प्रयोजना[illegible]नि भवंतीति प्रश्नपूर्वकं दर्शयितुमाह। ह्रस्वसंज्ञादि
कालो ह्रस्वसंज्ञः। ह्रस्वं उकारं व्याप्नुवन्त्याः द्विमात्रत्रिमात्रयोर्ग्रहणं इति तयोरपि ह्रस्वसंज्ञाप्राप्ता दीर्घप्लुतसंज्ञाभ्यां बाध्यते। सर्वबाधस्तत्रैव

एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत्कार्यप्रतिषेधः। एकसंज्ञाधिकारे विप्रतिषेधाद्बहुव्रीहिरिति चेत्कार्यप्रतिषेधो वक्तव्यः। निष्कौशाम्बिः। निर्वाराणसिः। तत्पुरुषोऽत्र बाधको भविष्यति। तत्पुरुष इति चेदन्यत्र कार्यात्प्रतिषेधः। तत्पुरुष इति चेदन्यत्र कार्यात्प्रतिषेधो वक्तव्यः। प्रतिपर्णः। प्रपर्णकं [illegible] प्रपतितपलाशः। अपलाशक इति। सिद्धं तु प्रादीनां कार्ये तत्पुरुषवचनात्। सिद्धमेतत्। कथं। प्रादीनां कार्ये तत्पुरुषो भवतीति वक्तव्यं। कानि पुनरस्य योगस्य प्रयोजनानि। प्रयोजनं ह्रस्वसंज्ञां दीर्घप्लुतौ। ह्रस्वसंज्ञां दीर्घप्लुतसंज्ञे बाधेते। तिङ्शित्सार्वधातुकं लिङ्लिटोरार्धधातुकं। तिङ्शित्सार्वधातुकसंज्ञां लिङ्लिटोरार्धधातुकसंज्ञा बाधते। अपस्पृधेथां।

वस्त्रेव विस्तरेण प्रतिपादितं। तिङ्सार्वधातुकमिति। लिङ्लिटो
र्यस्य सार्वधातुकसंज्ञायां सत्यां तन्निबंधनाः शबादयः [illegible] प्राप्नुवंति। आर्धधातुकसंज्ञा तु तन्निबंधने डाघपरौ। छंदस्युभयथेति तु तिङामा-
र्धधातुकसंज्ञार्थे शेषस्यापि सार्वधातुकसंज्ञार्थं स्यादित्यज्ञापकमसमावेशस्य। अपस्पृधेथामिति। अत्र समावेशे सति श्नं के पेलस्य चर
नः छात्राः इति विवक्षिते गोत्रेऽलुगचीति फक्फिञोरलुकः सत्त्वेन फक्फिञोरन्य



सा०के० घिन्नदीति। शक्ये इत्यत्र घित्वप्रयुक्तगुणाभावः। लघ्विति। अतततक्षादिसादौ सन्वद्भावाभावः। धनुषा विध्यतीति। अपायविवक्षया विना धनुषो य

घिन्नदी। घिसंज्ञां नदीसंज्ञा बाधते। लघुगुरू। लघुसंज्ञां गुरुसंज्ञा बाधते। पदंभं। पदसंज्ञां भसंज्ञा बाधते। अपादानमुत्तराणि। अपादानसंज्ञामुत्तराणि कारकाणि बाधंते। क। धनुषा विध्यति। कंसपात्र्यां भुंक्ते। गां दोग्धि। धनुर्विध्यति। धनुषा विध्यतीत्यपाययुक्तत्वात् ध्रुवमपायेऽपादानमित्यपादानसंज्ञा प्राप्नोति साधकतमं करणमिति करणसंज्ञा। करणसंज्ञा सा परा भवति। कंसपात्र्यां भुंक्ते इत्यत्रापाययुक्तत्वात् ध्रुवमपायेऽपादानमित्यपादानसंज्ञा प्राप्नोति। आधारोऽधिकरणमिति चाधिकरणसंज्ञा। अधिकरणसंज्ञा सा परा भवति। गां दोग्धीत्यत्रापाययुक्तत्वाच्चापादानसंज्ञा कर्तुरीप्सिततमं कर्मेति कर्मसंज्ञा। कर्मसंज्ञा परा सा भवति। धनुर्विध्यतीत्यत्रापाययुक्तत्वाच्चापादानसंज्ञा प्राप्नोति स्वतंत्रः कर्तेति कर्तृसंज्ञा। कर्तृसंज्ञा सा परा भवति। क्रुधद्रुहेरुपसृष्टयोः कर्म संप्रदानं। क्रुधद्रुहोरुपसृष्टयोः कर्मसंज्ञा संप्रदानसंज्ञां बाधते। करणं पराणि। करणसंज्ञां पराणि कारकाणि बाधंते। क। धनुर्विध्यति। असिश्छिनत्तीति। अधिकरणं कर्म। अधिकरणसंज्ञां कर्मसंज्ञा बाधते। क। गेहं

धेः साधकतमत्वाभावान्न संज्ञाद्वयप्रसंगे परत्वात् करणसंज्ञा भवति॥ प्रविशतीति। अधिकरणं कर्ता। अधिकरणसंज्ञां कर्तृसं शिवः

8

नेपदं
परस्मैपदमात्म परस्मैपदसंज्ञामात्मनेपदसंज्ञा बाधते ॥ ४

गत्युपसर्गसंज्ञे इति। तेन स्मसिक्तमिस्यादौ षत्वं न भवति। स्तूयमानात् इति गतिसंज्ञकस्य एवाश्रयमन्तोदात्तत्वं चापूर्वपदप्रकृतिस्वर एव तत्र भवति
परस्मैपदसंज्ञामिति। तेनाघ्योष्टात्क्रमतेरित्यादौ वृद्धिदीर्घाद्यभावः। समाससंज्ञाश्चेति। तेन लोहितगंगमित्यव्ययीभाव एव द्वीरथतीक इति बहु
व्रीहिरेव भवति। गुणवचनंचेति। एकविषयत्वाच्च कारककरणाच्च गुणवचनप्रातिपदिकसंज्ञयोः समावेशो भवति। उत्तरास्तु च संज्ञास्तु प्रा

गत्युपसर्गसंज्ञे कर्मप्रवचनीयसंज्ञा। गत्युपसर्गसंज्ञे कर्मप्रवचनीयसंज्ञा बाधते। समाससंज्ञाश्च। स
माससंज्ञाश्च या या परा अनवकाशाश्च ताः ताः पूर्वाः सावकाशाश्च बाधन्ते। अर्थवत्प्रातिपदिकं। अर्थवत्प्रा
तिपदिकसंज्ञं भवति। गुणवचनं च। गुणवचनसंज्ञं च भवत्यर्थवत्। समासकृत्तद्धिताव्ययसर्वना
म। सर्वलिंगा जातिः। समासः। समाससंज्ञा वक्तव्या। कृत्। कृत्संज्ञा च वक्तव्या। तद्धितः। तद्धितसंज्ञा च वक्त
व्या। अव्ययं। अव्ययसंज्ञा च वक्तव्या। सर्वनाम। सर्वनामसंज्ञा च वक्तव्या। असर्वलिंगा जातिरिति। एतच्च व
क्तव्यं। संख्या। संख्यासंज्ञा च वक्तव्या। डु च। डुसंज्ञा च वक्तव्या। का पुनर्डुसंज्ञा। षट् संज्ञा। एकद्रव्योपनिवेशिनी सं
ज्ञा। एकद्रव्योपनिवेशिनी संज्ञा इत्येतच्च वक्तव्यं। किमर्थमिदमुच्यते। यथान्यास एव त्वपि षाः संज्ञाः क्रियन्ते।
सन्ति चैवात्र काश्चिदपूर्वा अपि। एतेनानुपूर्व्येण सन्निविष्टानां बाधनं यथा स्यात्। गुणवचनसंज्ञायाश्चैताभिः संज्ञा
भिर्बाधनं यथा स्यादिति।

तिपादिकमित्यनुवर्त्तनात्ताभिः प्रातिपदिकसंज्ञासमाविशति। गुणवचसंज्ञा तु ताभिर्बाध्यते तस्याश्च व्याप्तिविधिः
प्रयोजनं। ब्राह्मणादिष्यञ् एं तु समासादिसंज्ञाविषयार्थं प्राणजातित्यादिलक्षणप्रत्ययबाधनार्थं तु वाच्य एव समावेशार्थं च। असर्वलिंगा
जातिरिति। लिंगानां च न सर्वभागिति लक्षणलक्षितां जातिमाश्रयति। चित्रगुत्वं कारकत्वमौपगवत्वं उच्चैस्त्वं सर्वत्वं गोत्वं पंचत्वं डित्थत्वमिति गुणवचनसंज्ञायाः समासादिसंज्ञाभिर्बाधनात्स्यान्नभव

परिभाषितश्रुतिमत्वात् १

प्रति २

विप्रतिषेधे परं कार्यं॥ ॥आचार्यवचनानां प्रामाण्याभ्युपगमाल्लोकिकार्थस्य विरोधवाचिनो विप्रतिषेधशब्दस्येह ग्रहणं न संभवतीति मत्वा पृच्छति। विप्रतिषेध इति कोयं शब्द इति। इतरस्तु लोकिकार्थग्रहणे विरोधाभावात्तेन घस्याजात्यार्थः प्रसिद्ध इत्याह। विपूर्वाद्धिति। कर्मव्यतिहार इति। सिधेर्विशेषणं व्यतिहारविशिष्टक्रियावचनात्सेधतेर्भावे घञिति सर्वः। इतरेतरप्रतिषेधो न्योन्यप्रतिषेध इति। स एवार्थः पर्यायाभ्यां प्रदर्श्यते। यद्य

प्रति १

विप्रतिषेधे परं कार्यं॥ विप्रतिषेध इति कोयं शब्दः। विपूर्वात्सिधेः कर्मव्यतिहारे घञ्। इतरेतरप्रतिषेधो विप्रतिषेधः। अन्योन्यप्रतिषेधो विप्रतिषेधः। कः पुनर्विप्रतिषेधः। द्वौ प्रसंगावन्यार्थावेकस्मिन्स विप्रतिषेधः। द्वौ प्रसंगौ यदान्यार्थौ भवतः एकस्मिंश्च युगपत्प्राप्नुतः स विप्रतिषेधः। क्व पुनरन्यार्थौ क्व चैकस्मिन्युगपत्प्राप्नुतः। वृक्षाभ्यां वृक्षेष्विति अन्यार्थौ वृक्षेभ्य इत्यत्र युगपत्प्राप्नुतः। किं च स्यात्। एकस्मिन्युगपदसंभवात्पूर्वपरप्राप्तेरुभयप्रसंगः। एकस्मिन्युगपदसंभवात् पूर्व [redacted] स्याश्च परस्याश्च प्राप्तेरुभयप्रसंगः। इदं विप्रतिषिद्धं यदुच्यते एकस्मिन्युगपदसंभवात्पूर्वपरप्राप्तेरुभयप्रसंग इति। कथं ह्येकस्मिंश्च युगपदसंभवः स्यात् पूर्वस्याश्च परस्याश्च प्राप्तेरुभयप्रसंगश्च स्यात्। नैतद्विप्रतिषिद्धं यदुच्यते एकस्मिन्युगपदसंभवादिति। कार्ययोर्युगपदसंभवः शास्त्रयोरुभयप्रसंगः। तज्जादिभिस्तुल्यं तज्जादिभिस्तुल्यं पर्या

पर्यायार्थेन नेतीशब्दद्वयेन प्रदर्श्यते। विरोधं पूर्वोक्तेनन्यायेनासंभावयन्पुनः पृच्छति। कः पुनरिति। द्वौ प्रसंगाविति। सर्वस्याचार्यवचन शिवः
स्य प्रामाण्येपि तत्प्राप्यावकाशयोर्वचनयोरेकस्मिन्विषये विरुद्धकार्यद्वयसमर्पणाद्रस्सेव विरोधः। प्रसज्यते इति प्रसंगो विधिः। अ
न्यार्थाविति। अन्यत्र सावकाशौ। स विप्रतिषेध इति। युगपत्प्राप्तौ प्राप्तिः सा विरोधनिमित्तत्वाद्दोपचाराद्विप्रतिषेधशब्देनोक्ता। किं च
स्यादिति। यदीदं नारभ्येतेति भावः। इतरोयमिकपदप्राप्यायेण पर्यायमाह एकस्मिन्निति।

अनवयवंप्रसंगादिति। सर्वं वानुदेशेन शास्त्रस्य प्रवर्तनादित्यर्थः। प्रतिपदं विधेयश्चेति। अनेनोत्सर्गापवादवैधर्म्यं दर्शयति। नह्युत्सर्गः प्रतिपदं विधीय
ते। तत्र पर्यायप्रसंगेन नियमार्थमिदं परमेव भवति न पूर्वमिति। एतत्सूत्रारंभाच्च पूर्वस्य लक्षणस्य तदानारंभो नुमीयते। तदुच्यते सकृद्गतौ विप्रतिषेधे य
द्बाधितं तद्बाधितमेवेति। इदानीं ज्ञातिपक्षाश्रयेणाह। अप्रतिपत्तेर्वेति। अत्र पक्षे विप्रत्यर्थमिदं परं भवतीति। नास्मिन्कृते यदि पूर्वस्य प्राप्तिनिमित्तमस्ति त

किंपुनः कारणं तज्ज्ञादयः पर्यायेण भवंति। अनवयवप्रसंगात्प्रतिपदंविधेयत्वं भवेत्तत्प्रसज्यन्ते प्रतिपदं च विधी
यंते। अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वात्। अप्रतिपत्तिर्वा पुनरुभयोः शास्त्रयोः स्यात्। किंकारणं। तुल्यबलत्वात्। तु
ल्यबले ह्युभे शास्त्रे। तद्यथा। द्वयोस्तुल्यबलयोरेकः प्रेष्यो भवति स तयोः पर्यायेण कार्यं करोति। यदा तु तमुभौ युग
पत्प्रेषयतो नानादिक्षु च कार्ये भवतस्तदा यद्यसावविरोधार्थी भवति उभयोर्न करोति। किंपुनः कारणमुभयोर्न क
रोति। यौगपद्यासंभवात्। नास्ति यौगपद्येन संभवः। तत्र प्रतिपत्त्यर्थं वचनं। तत्र प्रतिपत्त्यर्थमिदं वक्तव्यं। तव्य
दादीनां त्वप्रसिद्धिः। तव्यदादीनां तु कार्यस्याप्रसिद्धिः। नहि किंचित्तव्यदादिषु नियमकारि शास्त्रमारभ्यते येन तत
व्यदादयः स्युः। यश्च भवता हेतुर्व्यपदिष्टः अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति तुल्यः स तव्यदादिषु। अपे
क्षः अनवकाशास्तव्यदादयः। उच्यंते च ते वचनाद्भविष्यंति। यश्च भवता हेतुर्व्यपदिष्टः तज्ज्ञादिभिस्तुल्यं पर्यायः
प्राप्नोतीति तुल्यः स तव्यदादिषु। एतावदिह सूत्रं विप्रतिषेधे परमिति। पठिष्यति ह्याचार्यः सकृद्गतौ विप्रति

तस्तदपि प्रवर्तते। तदुच्यते पुनः प्रसंगविज्ञानात्सिद्धमिति। तव्यदादीनां तु का षेधे यद्बाधितं तद्बाधितमेवेति। पुनश्च पठिष्यति। पु
र्वस्येति। परत्वादेः साधुत्वस्यैवेत्यर्थः। एकवाक्योपात्तत्वादनवकाशत्वाच्च नास्त्येषां परत्वेन व्यवस्था। तज्ज्ञादिभिरिति। आदिशब्दस्य प्रकारार्थत्वा
तज्ज्ञादिभ्यस्तव्यदादयो न भिन्ना इत्यर्थः॥ ॥श्रीः॥ ॥रामजी॥ ॥

सकृद्गताविति। यथा कुरुनात्तव्यमिति रेलुंकुञ्च धाप्नोतिनातङ्क्चेति। परत्वात्तातङ्नस्य स्थानिवद्भावाल्लुङ्न प्रवर्त्तते। द्वारमिति। अप्रतिपत्त्यपनयने
न परशास्त्रप्रवृत्तिर्द्वारमुपायः क्रियत इत्यर्थः। यावत् पुनःप्रसंगविज्ञानादिति। ईअन्त्विति परत्वात्संप्रसारणे कृते द्विर्वचनं भवति। लक्ष्यानुरोधेन च

किं पुनरियता सूत्रेण भवितव्यं। लभ्यमित्याह। कथं। इह भवता द्वौ हेतू व्यपदिष्टौ। तुल्यादिभिस्तुल्यं पर्यायः प्राप्नोतीति।
अप्रतिपत्तिर्वोभयोस्तुल्यबलत्वादिति च। तद्यदा तावदेष हेतुस्तुल्यादिभिस्तुल्यं पर्यायः प्राप्नोतीति। तदा विप्रतिषे
धे परमित्यनेन किं क्रियते। नियमः। विप्रतिषेधे परमेव भवतीति। तदेतदुपपन्नं भवति। सकृद्गतौ विप्रतिषेधे यद्बा
धितं तद्बाधितमेवेति। यदा त्वेष हेतुरप्रतिपत्तिरुभयोस्तुल्यबलत्वादिति। तदा विप्रतिषेधे परमित्यनेन किं
क्रियते। द्वारं। विप्रतिषेधे परं तावद्भवति। तस्मिन्कृते यदि पूर्वमपि प्राप्नोति तदपि भवति। तदेतदुपपन्नं भव
ति। पुनःप्रसंगविज्ञानात्सिद्धमिति। विप्रतिषेधे परमित्युक्त्वा नाधिकारे पूर्वमिति वक्तव्यं। किं कृतं भवति।
पूर्वविप्रतिषेधा न पठितव्या भवंति। गुणवृद्ध्यौत्वतृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषेधेन। नुमचिरतृज्वद्भावे
भ्यो नुडिति। कथं ये परविप्रतिषेधाः। इखोताभ्यां गुणवृद्धी भवतो विप्रतिषेधेनेति। सूत्रं च भिद्यते। यथान्यासमेवा
स्तु। कथं ये पूर्वविप्रतिषेधाः। विप्रतिषेधे परमित्येव सिद्धं। कथं। परशब्दोऽयं बह्वर्थः। अस्त्येव व्यवस्थायां वर्त्तते। तद्य
था। पूर्वः पर इति। अस्त्यन्यार्थे वर्त्तते। परपुत्रः परभार्या। अन्यपुत्रोऽन्यभार्येति गम्यते। अस्ति प्राधान्ये वर्त्तते। तद्यथा। पर
मियं ब्राह्मण्यस्मिन्कुटुम्बे। प्रधानमिति गम्यते। अस्तीष्टवाची परशब्दः। तद्यथा। परं धाम गताः। इष्टं धाम गता इति गम्यते। तद्य

त्वात्कृतिपदार्थोऽश्रयणादनयोः परिभाषयोर्विषयविभागोऽवसेयः। तत्र इष्टवाचीति। इष्टानिष्टविभागश्च व्याख्यानाद्बोध्यः॥

अंतरंगं चेति। अंतर्मध्ये अंगानि निमित्तानि [redacted] पारस्थ्यात्पस्य तदंतरंगमित्युच्यते। एवं बहिरंगानि यस्य तद्बहिरंगं। एतच्च न्यायसिद्धमेवानूदितं। कार्यमि
त्यत्रार्द्धकृत्सः। करणं हि कार्यं तुल्यबलं च करणं हि निमित्तं निमित्तानि स्योत्सर्गापवादांतरंगबहिरंगेष्वस्य सूत्रस्य व्यापारः। स्योन इति। सिवेर्बाहुलका
न्नप्रत्यये कृते ऽपवादत्वाद्धलोपं बाधित्वा गुणात्पूर्वमंतरंगत्वादूठ् भवति। तत्र कृतेंतरंगत्वाद्यणा गुणो बाध्यते। बहिरंगस्य पूर्वोठो यणादेशे कर्त्त
व्ये ऽसिद्धत्वं न भवति। नाजानंतर्य इति वचनात्। द्यौकामिरिति। ननु कृते यणादेशे तद्धितोत्पत्तौ द्व्याभावात् भितिनास्ति युगपद्यणवृद्ध्योः प्रा
प्तिः। एवं तर्हि कृतव्यूहाः पाणिनीया इति। दिउकाम इति स्थिते अत्र यणवृद्ध्योर्युगपत्प्रसंगः। अथवा द्यौकामिरिति पदं यदा विनञ्चात्वा

अंतरंगं च। अंतरंगं च बलीयो भवतीति वक्तव्यं। किं प्रयोजनं। प्रयोजनं यणेकादेशे लोवा नि गुणवृद्धि द्विर्वच
नाल्लोपस्वरेभ्यः। गुणाद्यणादेशः। स्योनः स्योना। गुणश्च प्राप्नोति यणादेशश्च। परत्वाद्गुणः स्यात् यणादेशो भव
त्यंतरंगतः। वृद्धेर्यणादेशः। द्यौकामिः स्योकामिः। वृद्धिश्च प्राप्नोति यणादेशश्च। परत्वाद्वृद्धिः स्यात्। यणादे
शो भवत्यंतरंगतः। द्विर्वचनाद्यणादेशः। दुद्यूषति। सुस्यूषति। द्विर्वचनं च प्राप्नोति यणादेशश्च। नित्यत्वा
द्द्विर्वचनं स्यात्। यणादेशो भवत्यंतरंगतः। अल्लोपस्य च यणादेशस्य च नास्ति संप्रधारणा॥ ॥श्रीः॥

रव्यायते दिवकाम इति तदा दिव उ दिस्युत्वे कृते यणवृद्धी प्राप्नुतः। दुद्यूषतीति। दिवेः सन्। सनीवंतर्ध इति पक्षे इडभावः। हलंताच्चेति कित्वं। ऊ
ठ देशः। तत्र यणश्च प्राप्नोति द्विर्वचनं च। नित्यत्वाद्द्विर्वचनं स्यात्। एतदुभयं इष्यतेति द्विः प्रयोगो द्विर्वचनं षाष्ठिकं यद्वेत्स्यापितं। तत्र श्रृं
तरप्राप्त्या द्विर्वचनमनित्यं यणस्तु नित्य इति वदन्ति। अल्लोपस्येति। ननु गांडीवधन्वनेत्यत्रास्ति संप्रधारणा। गांडीवधनुस्मन् आ ह
ति स्थिते यदि पूर्वं यणादेशः तदा न संयोगा[illegible] द्वमंतादित्यल्लोपनिषेधाद्रूपं सिध्यति। अथ परत्वादल्लोपः स्यात् लोपयणा स्या
त्। एवं तर्हि नित्यत्वात्पूर्वमत्र यण् भवतीति मन्यते। कृतेप्यल्लोपे तस्य स्थानिवत्त्वेन यणः प्राप्त्या नित्यत्वं। यणि कृते नास्त्यल्लोपः प्रतिषेधादिति
तस्यानित्यत्वं।

द्यौकामिरिति। दिउकाम इति स्थिते यत्यश्च प्राप्नोति ञ्नित्यादिर्नित्यमिति स्वरश्च। तत्र यदि पूर्वस्वरः स्यात्तदोदात्तस्वरितयोर्यणः इत्योकारः स्वरितः स्यात्। अनुदात्तश्चेष्यते। द्युकाम इति पूर्वपदप्रकृतिस्वरो विषयोऽस्यान्तरंगत्वाद्बाध्यते तेन पूर्वं दिवउदित्युत्वेन चौकारद्वयमिति। कद्रु शब्दात्संज्ञायां ञित्य्यूङि कृतेस्त्रीभ्यो ढक् च इति ढकि एयादेशे ढे लोपोऽकद्र्वा इति लोपप्राप्तिर्येधादो गुण इति गुणश्च प्राप्नोत्येकादेशश्च

स्वराद्यणादेशः। द्यौकामिः स्योकामिः। स्वरश्च प्राप्नोति यणादेशश्च। परत्वात्स्वरः स्याद्यणादेशो भवत्यंतरंगतः। गुणादेकादेशः। कार्द्रवेयो मंत्रमपश्यत्। गुणश्च प्राप्नोत्येकादेशश्च। परत्वाद्गुणः स्यात्। एकादेशो भवत्यंतरंगतः। वृद्धेरेकादेशः। वैक्षमाणिः सौत्थितिः। वृद्धिश्च प्राप्नोत्येकादेशश्च। परत्वाद्वृद्धिः स्यादेकादेशो भवत्यंतरंगतः। द्विर्वचनादेकादेशः। जाया आ ओदनः औदनः। औदनमिच्छति औदनीयति। औदनीयतेः सन् औदिदनीयिषति। द्विर्वचनं च प्राप्नोत्येकादेशश्च। नित्यत्वाद्द्विर्वचनं स्यादेकादेशो भवत्यंतरंगतः। अल्लोपादेकादेशः। श्वनाश्वने। अल्लोपश्च प्राप्नोत्येकादेशश्च। परत्वादल्लोपः स्यादेकादेशो भवत्यंतरंगतः। नैतदस्ति प्रयोजनं। नास्त्यत्र विशेषः। अल्लोपेन वा निवृत्तौ सत्यां पूर्वत्वेन वा। अयमस्ति विशेषः। अल्लोपेन
निवृत्तौ सत्यामनुदात्तनिवृत्तिस्वरः प्रसज्येत॥
नन्वकृतएकादेशेऽप्रसयइतिनिषेधात्प्रातिपदिकत्वाभावात्तद्धितएवनस्यात्। द्रु
तेत्वेकादेशे तस्यांतवद्भावात्प्रातिपदिकत्वात्तद्धितोत्पत्तिरिति तन्नापूर्वोसिद्धत्वादप्रयोजनमेतदित्याहुः। अत्रोच्यते। कृतेप्येकादेशे नोङ्धात्वोः शिवः
त्वोरिति ढे लोपोऽकद्र्वा इति निषेधाच्च द्वापकाद्भविष्यति तद्धितइत्सदोषः। श्वने इति। श्वयुवेति संप्रसारणे कृते तस्यासिद्ध[redacted]
त्वात्संयोगाद्यंतत्वादिति निषेधादल्लोपस्य नास्ति प्राप्तिः। एवं तर्हि यागभादित्वसिद्धत्वमाश्रित्यैतदुक्तं प्रयोजनं। प्रत्याख्यानवाद्याह नै
तदस्तीति। प्रयोजनवाद्याह। अयमस्तीति॥ ॥ प्या भ्री॥५॥

प्रत्याख्यानवाधार्थः। नात्रेति। प्रयोजनवाधार्थः। नैषदोष इति। सएवार्थः। यत्र तर्हीति। यत्र पुनरित्यर्थः। शुनः पश्येति। अत्र हि न गोश्वन् इति प्रतिषेधाभावाद्वल्लोपे सत्युदात्तनिवृत्तिस्वरप्रसंगः। तस्मात्पूर्वमेकादेश एष्टव्यः। प्रत्याख्यानवाधार्थः। एवं तर्हीति। प्रयोजनवाधार्थः। यत्र तर्हीति। बहुशुनीति। बहोर्नञ्वदुत्तरपदभूम्नी संतोदात्तः। तस्मान्ङीपि कृते ऽल्लोपे क्रियमाणे उदात्तनिवृत्तिस्वरः स्यात्। प्रत्याख्यानवाधार्थः। यदि पुनरिति। प्रयोजनवाधार्थः। नैवं शक्यमिति। कुमारशब्दः साववर्णान्त इति ङीपउदात्तस्वरेण न स्यात्। प्रत्याख्यानवाधार्थः। एवं तर्हीति। शुनी सत्र ङीपउदात्तनिवृत्तिस्वरस्य सिद्धत्वात् किं

नात्रोदात्तनिवृत्तिस्वरः प्राप्नोति। किं कारणं। न गोश्वन्साववर्ण इति प्रतिषेधात्। नैष उदात्तनिवृत्तिस्वरस्य प्रतिषेधः कस्य तर्हि। तृतीयादिस्वरस्य। यत्र तर्हि तृतीयादिस्वरो नास्ति। शुनः पश्येति। एवं तर्हि न लाक्षणिकस्य प्रतिषेधं शिष्मः। किं तर्हि येन केनचित्प्रा[redacted]पूस्य विभक्तिस्वरस्य प्रतिषेधः। यत्र तर्हि विभक्तिर्नास्ति बहुशुनीति। यदि पुनरयमुदात्तनिवृत्तिस्वरस्य प्रतिषेधो विज्ञायेत। नैवं शक्यं। इहापि प्रसज्येत कुमारीति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति नोदात्तनिवृत्तिस्वरः शुन्यवतरतीति। यदयंश्वन्शब्दं गौरादिषु पठति अंतोदात्तार्थं यत्नं करोति। सिद्धं हि स्यान्ङीपेव। स्वरादेकादेशः। सोस्थितिः वेक्ष्यमाणः। स्वरश्च प्राप्नोत्येकादेशश्चापरत्वात्स्वरः स्यादेकादेशः पूर्वविप्रतिषेधेनैसर्थः। तदेवमल्लोपादेकादेशस्य स्वरार्थत्वं दूषितं। प्रयोजनांतरं तस्य वाच्यं यत्राल्लोपो भवति तदाऽनङ पद्याल्लोपिन इति ङीपि सति बहुशुनीति भवति। यदा त्वेकादेशेनाल्लोपो बाध्यते तदोपधालोपिवा भावान्ङीबभावाद्बहुश्वेति। गौरादिलक्षणो ङीषू नास्ति। अनुपसर्जनादिस्याधिकारात्। भाष्ये तु बहुशुनी प्रत्याख्यानवादिना तेनोपन्यस्तं। तत्पक्षे किल ङीपाभाव्यमिति। न्यायमूलं चेदनंतरं गंबलीय इति। नन्यायस्यैकेनचिद्बाधोस्तीति बहुश्वेत्येव भाव्यमिति न्यायविदः आहुः। सोस्थितिरिति। सुडस्थित इति। स्येतेयस्यात्र पूर्वमुकारस्योदात्तत्वं स्यात्तदा स्वरितो वानुदात्तेपदादाविति पक्षे स्वरितत्वं प्रसज्येत। पूर्वत्वेकादेशे कृते नित्यमाद्युदात्तमेतद्भवति।

गुणस्येतिपरत्वाद्वृद्धिगुणेनभाव्यं। सोमिरिति। विभज्यान्वाख्याने स्मृत इति स्थितेः तरंगत्वादित्वं ततो वृद्धिः। स्वरइति। सोमिरितियदिपूर्वं स्वरः तत इत्वं तत्पाप्यांतरत्वाद्गुणस्तस्य सिध्यति। नचेति। दंडाग्रमित्याकुणः प्राप्नोति। कुमारी ईहते इत्यादौ यणादेशइत्यवश्यं सवर्णदीर्घत्वेन विध्यंतरं बाध्यं नेतदिति। एकनिमित्तप्राप्तविध्यंतरबाधनेन सावकाशः सवर्णदीर्घोंतरंगं बाधितुंनशक्नोतीतिभावः। निरवकाशेनतुविध्यंतरेणसा

गुणस्यचेत्वोत्वयोश्च नास्ति संप्रधारणा। वृद्धेरित्वोत्वे। सोमिः पोर्निः। वृद्धिश्च प्राप्नोति त्वोत्वे च। परत्वाद्वृद्धिः स्यादित्वोत्वे भवतोंतरंगतः। द्विर्वचनादित्वोत्वे। आतेस्तीर्यते। आपोपूर्यते। द्विर्वचनं च प्राप्नोतीत्वोत्वे च। नित्यत्वाद्द्विर्वचनं स्यादित्वोत्वे भवतोंतरंगतः। अल्लोपस्य चेत्वोत्वयोश्च नास्ति संप्रधारणा। स्वरे नास्ति विशेषः। इयङुवङ्भ्यां गुणः सवर्णदीर्घत्वात्। इयङुवङ्भ्यामाकुणः सवर्णदीर्घत्वात् प्रयोजनं। अयजइंद्रं अवयइंद्रं। वृक्षइंद्रं प्लक्षइंद्रं। लइंद्रं यइंद्रं। आकुणश्च प्राप्नोति सवर्णदीर्घत्वं च। परत्वात्सवर्णदीर्घत्वं स्यात्। आकुणो नवत्यंतरंगतः। नवा सवर्णदीर्घत्वस्यानवकाशत्वात्। नवा एतदंतरंगेणापि सिध्यति। किंकारणं। सवर्णदीर्घत्वस्यानवकाशत्वात्। अनवकाशं सवर्णदीर्घत्वमाकुणं बाधते। नैतदंतरंगेस्ति अनवकाशं परमिति। इहापि स्थानः स्थानेतिशङ्क्यं वकुं नवा परत्वाकुणस्येति। ऊङ्पोरेकादेशाईत्वलोपाभ्यां। ऊङ्पोरेकादेशईत्वलोपाभ्यां भवसंतरंगतः। प्रयोजनं ईत्वादेकादेशः। खट्वीयति मालीयति। ईत्वं च प्राप्नोत्येकादेशश्च। परत्वादीत्वं स्यादेकादे शिवः

वकाशोंतरंगोपिविधिर्बाध्यतेयथागोल्लैगचीसल्लुकालुकानवापरत्वादिति। यथात्वत्रपरत्वेननव्यवस्था अपित्वंतरंगत्वेनतथाआकुणोः समानकस्यो दीर्घेणबाध्यतेनत्वंतरंगइतिभावः। खट्वीयतीति। खट्वआयइतिस्थितेयदिपूर्वमीत्वंस्यात्ततआकुणः प्रसज्येतानन्वाकारस्यकृतेईत्वेयस्येतिलोपो भविष्यतिनेतदस्तिपूर्वंविधावितीत्वस्यस्थानिवद्भावात्॥ ॥श्रीः॥ १२

नलोपेवाभ्यामिति। ऊङ्[redacted]ईत्वासंभवादयंक्रमो। पुरुषभाभ्यायितुमितिभावः। पश्यपश्यताघदंतमितिईत्वशद्धस्यएवं निपातोत्याय्यः। तथापितस्गुणोप्रायेण
सोनाद्रियते। चोडिरिति। पूर्वमाकारलोपेसतितस्यस्थानिवत्वादसिद्धत्वाद्वाकारलोपाभावाद्वा ङुण इतिगुणस्यप्रसंगः। ग्लानीयमिति। विभज्यान्वा
ख्यानेग्लेअनीयइति। स्थितेऽनेमित्तिकत्वादात्वमंतरंगंभवति। ग्ला[?]छत्रमिति। ग्लान्तःइति क्विबंतं। अत्रापितथाविभज्यान्वाख्यानेग्ले

लोपादेकादेकादेशः। कामंडलेयः। भाद्रबाहेयः। लोपश्चप्राप्नोत्येकादेशश्च। परत्वाल्लोपः स्यादेकादेशोभवत्यंतरंगतः
अथकिमर्थमीत्वलोपाभ्यामित्युच्यते नलोपेत्वाभ्यामित्येवोच्येत। संख्यातानुदेशोमाभूदिति। आपोप्येकादेशोलोपे
प्रयोजयति। चोडिः। बालाकिः। आत्वनपुंसकोपसर्जनह्रस्वत्वानि। अयवायावेकादेशलुग्विधिभ्योभवंत्यंतरंग
तः। वेञ्‌वानीयं। शो। शानीयं। ग्ले। ग्लानीयं। म्ला। म्लानीयं। ग्ला छत्रं म्ला छत्रं। आत्वंचप्राप्नोत्येतेविधयः। परत्वादेते
विधयःस्युः। आत्वंभवत्यंतरंगतः। नपुंसकोपसर्जनह्रस्वत्वंचप्रयोजनं। अतिर्यत्र। अतिन्वत्र। अतिरिछ
त्रं। अतिनुछत्रं। आराशस्त्रीदं। धानाशष्कुलीदं। निःकौशांबीदं। निर्वारणसीदं। निष्कौशांबिछत्रं। निर्वाराणसि
छत्रं। नपुंसकोपसर्जनह्रस्वत्वंचप्राप्नोत्येतेविधयश्च। परत्वादेतेविधयःस्युः। नपुंसकोपसर्जनह्रस्व
त्वंभवत्यंतरंगतः। लुग्यणेकादेशगुणवृध्योत्वदीर्घत्वेत्वमुमेत्वरीविधिभ्यः। यणेकादेशगुणवृध्योत्वदीर्घत्वे
त्वमुमेत्वरीविधिभ्यः। लुग्[redacted]भवंत्यंतरंगतः।

छत्रंइतिस्थितेयदिपूर्वंलुक्स्यात्त
देजंतत्वाभावादात्वंनस्यात्। यथाके किंतेति। उपदेशग्रहणानपेक्षयाचैतदुदाहरणं। अतिर्यत्रेति। अतिरैमत्रइतिस्थितेयदिपूर्वंयणस्यात्तदा
तुङ्स्यात्। आराशस्त्रीदमिति। आराशस्त्रीइदमितिस्थितेयद्यत्रपूर्वमेकादेशःस्यात्तदात्तस्यांतवद्भावाद्ध्रस्वकृतेरूपंनसिध्येत्॥ ॥श्रीः॥



मा॰ के॰

अग्निचिदत्रेति। पदसमुदायस्य विभज्यान्वाख्याने अग्निचिभ्यत्र इति स्थिते यदि पूर्वं यणा स्यात्तदा लुङ् स्यात्। नपुंसकं चाग्निचिदिति इ
घ्यां पुंसि विभक्त्याव्यवधानात्। सुकृत् इः कृता विति। कथं पुनस्तत्र तङ् प्राप्नोति यावता विधायो निसंबन्धे वा चिताम् दन्तानां दं हे। सा विहितन्
ति विंससेत त। चियतीति धिया रणा। ति पिशे कृतेति बास्य यो गुणः प्राप्नोति। विकरणाश्च यङ्यङ् भवत्यन्तरंगत्वात्तु यणादेशश्चेति। एरनेका

यणादेशात्। अग्निचिदत्र। सोमसुदत्र। एकादेशात्। अग्निचिदिदं सोमसुदिदं। कं। गुणात्। अग्निचिते सोम
सुते। वृद्धेः। प्रत्कृच्छकः प्रार्छकः। मौत्वात्। अग्निचिति सोमसुति। दीर्घत्वात्। जगद्भ्यां जनगद्भ्यां। ईत्वात्। जग
त्सुति जनगत्सुति। मुमः। अग्निचिन्मन्यः सोमसुन्मन्यः। एत्वात्। जगद्भ्यः जनगद्भ्यः। री विधेः। सुकृत्स्यति पाप
कृत्स्यति। अङ्गानन्द्भ्यां चेति वक्तव्यं। सुकृ कृते। तुक् च प्राप्नोत्यते विधयश्च परत्वादेते विधयः स्युः तु
सुकृत॥ ४ ग्भवत्यन्तरंगतः। इयङादेशो गुणात्। इयङादेशो गुणाद्भवत्यन्तरंगतः। प्रयोजनं धियतिर्धियति। इयङादे
शः प्राप्नोति गुणश्च। परत्वाद्गुणः। इयङादेशो भवत्यन्तरंगतः। उवङादेशश्चेति वक्तव्यं। प्रादुद्भुवत् प्रास्नुव
त्। श्वेः संप्रसारणपूर्वत्वं यणादेशात्। श्वेः संप्रसारणपूर्वत्वं भवत्यन्तरंगतः। प्रयोजनं शुशुवतुः शुशुवुः
पूर्वत्वं च प्राप्नोति यणादेशश्च। परत्वाद्यणादेशः स्यात्। पूर्वयणादेशात्। पूर्वत्वं भवत्यन्तरंगतः। ह्वाकारलो
पात्। ह्वाकारलोपात् पूर्वत्वं भवत्यन्तरंगतः। प्रयोजनं जुहुवतुः जुहुवुः। पूर्वत्वं च प्राप्नोत्याकारलोपश्च परत्वा
दाकारलोपः स्यात् पूर्वत्वं भवत्यन्तरंगतः। स्वरे लोपात्। स्वरे लोपाद्भवत्यन्तरंगतः। प्रयोजनं भो शिवः

चङीति यणः। जुहुवतुरिति। ह्वाञ् लुस् ह्वः
संप्रसारणं अभ्यस्तस्य चेति संप्रसारणे कृते यद्याकारस्य लोपः स्यात्तदा स्थानिवद्भावे सिद्धत्वाच्चोवङ् न स्यात्। ओपगवीति। उपगोरियमित्यणि ङीपि च १३
कृते यदि प्रसंख्यात्पुदात्तत्वात्सिद्धं दात्तलात्पूर्वलोपः स्यात्तदोदात्त निवृत्तिस्वर ईकारस्य न स्यात्॥

अग्निरिंद्र इति। यद्यपि प्रत्ययरहितायाः प्रकृतेः प्रयोगो नास्ति तथापि वाक्यस्य विभज्यान्वाख्याने [illegible] क्रियते। यद्यपि प्रत्य
यस्यानित्यत्वं तथाप्यंतरंगत्वेनासिद्धत्वान्न तदाश्रितं पच्वत्वत्रेति यद्यत्र पूर्वं यणादेशः स्यात् तन्न निषेधा [illegible] विनिस्यान्नित्यत्वान्निषेधा
दुत्वं न स्यात्। पूर्वशालाप्रिय इति। पूर्वा शाला प्रिया अस्येति त्रिपदबहुव्रीहौ कृते तद्धितार्थे इति द्वयोः पदयोः तत्पुरुषः। तत आदिपदमाश्रय बहुव्रीहि इति

प्रत्ययविधिरेकादेशात्। प्रत्ययविधिरेकादेशाद्बलवान् अंतरंगतः। प्रयोजनं अग्निरिंद्र वायुरुदकं। प्रत्ययविधि-
श्च प्राप्नोत्येकादेशश्च। परत्वादेकादेशः स्यात् प्रत्ययविधिर्भवत्यंतरंगतः। यणादेशाच्च। यणादेशाच्चेति
वक्तव्यं। अग्निरत्र वायुरत्र। लादेशो वर्णविधेः। लादेशो वर्णविधेर्भवत्यंतरंगतः। प्रयोजनं पच्वत्र प-
ठत्वत्र। लादेशश्च प्राप्नोति यणादेशश्च। परत्वाद्यणादेशः स्यात् लादेशो भवत्यंतरंगतः। तत्पुरुषांतोदात्तत्वं
पूर्वपदप्रकृतिस्वरात्। तत्पुरुषांतोदात्तत्वं पूर्वपदप्रकृतिस्वराद्बलवदंतरंगतः। प्रयोजनं पूर्वशालाप्रियः
अपरशालाप्रियः। तत्पुरुषांतोदात्तत्वं च प्राप्नोति पूर्वपदप्रकृतिस्वरत्वं च। परत्वात्पूर्वपदप्रकृतिस्वरत्वं
स्यात् तत्पुरुषांतोदात्तत्वं भवत्यंतरंगतः। एतान्येतस्याः परिभाषायाः प्रयोजनानि यदर्थमेषा परिभाषा क-
र्तव्या। यदि संति प्रयोजनान्येषा क्रियते। ननु चेयं कर्तव्या असिद्धं बहिरंगलक्षणमंतरंगलक्षणे इति। किं
प्रयोजनं। पचावेदं पचामेदं। बहिरंगलक्षण [illegible] णस्यांतरंगलक्षणे भवत्याभाद् इति। उभे तर्हि कर्तव्ये। नेत्याह। अ-

मित्तः पूर्वपदप्रकृतिस्वरो बहिरंगत्वान्न प्रवर्तते। तेन तत्पुरुषसमासाश्रयं शालाशब्दस्यां नयैव सिद्धं इहापि स्यानः स्योनेति असिद्धता
तोदात्तत्वं भवति। पूर्वशब्दः स्वांगशिटामदं नानामित्याद्युदात्तः। पचावेदमिति। अंतरंगबलीयस्त्वेनैतन्न सिध्यति। बहिरंगकृतेत्र आद्गुणे एत्वे एदिति
प्राप्नोति। अनयैवेति। इयं हि व्यापिका। पूर्वोक्तप्रयोजननिष्पादात्। शास्त्रासिद्धताश्रयणाद्बहिरंगलक्षणानं तावत्प्रवर्तते। अंतरंगलक्षणेत्वप्र-
नेयत्रैव निमित्तसद्भावस्तत्र बहिरंगलक्षणप्रवृत्तिः॥



भा.के.

॥

नाज्ञानंतर्यइति। अचोरनंतर्यमाश्रित्य यत्र कार्यं विधीयते तत्रैषा परिभाषा नोपतिष्ठते। पदस्यामिति। कोसिचदधीयीति आदिरंगस्यैकादेश

स्यासिद्धत्वात्सत्वं न भविष्यति तु कत्वप्रवर्तिष्यते इति किमासिद्धवचनेन। यदयमिति। दिव्य [illegible] वाह् अस्य इति। स्पिनेवाहः संप्रसारणमेव क

र्त्तव्यं। तत्र कृते पूर्वैकादेशेच णा प्राप्ये गुणवृद्धिरेचीति रक्षौसिद्धिर्दिसैचोद्ह इति। अनकारांते चोपपदे वदेश्छन्दसि ण्वि र्नदृश्यते प्रयोग दर्शने

वासत्वकृतेः क्विपित्र योगो भविष्यति किमूठादेशविधानेनेति परिभाषाया ज्ञापक ऊठ् विधिः। तस्यां हि सत्यां वाहिरंगस्य संप्रसारणस्या

यद्यसिद्धं बहिरंगलक्षणमंतरंगलक्षण इत्युच्यते अक्षद्यूः हिरण्यपद्यूः आसिद्धत्वाद्बहिरंगलक्षणस्यौठांतरंगलक्ष

णेयणादेशो न प्राप्नोति। नैष दोषः। असिद्धं बहिरंगलक्षणं अंतरंगलक्षण इत्युक्त्वा ततो वक्ष्यामि नाज्ञानंतर्ये बहि

ष्ट्वप्रक्लृप्तिरिति। सा तर्ह्येषा परिभाषा कर्त्तव्या। न कर्त्तव्या। आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति। यदयं ष

त्वतुकोरसिद्ध इत्याह इयं तर्हि परिभाषा कर्त्तव्या असिद्धं बहिरंगलक्षणमंतरंगलक्षण इति। एषा च न कर्त्तव्या

आचार्यप्रवृत्तिर्ज्ञापयति भवत्येषा परिभाषेति। यदयं वाह ऊठ् इति ऊठं शास्ति। तस्य दोषः पूर्वपदोत्तरपदयो

र्वृद्धिस्वरावेकादेशात्। तस्य तस्य लक्षणस्य दोषः पूर्वोत्तरपदयोर्वृद्धिस्वरावेकाद [illegible] शादंतरंगलोगमिनिर्वृ

त्तात्प्राप्नुतः। पूर्वेषुकामशमः अपरेषुकामशमः गुडोदकं तिलोदकं उदके केवले इति पूर्वोत्तरपदयोर्व्यपवर्गाभावान्न

स्यात्। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति पूर्वोत्तरपदयोस्तावत्कार्यं भवति नैकादेश इति। यदयं नेंद्रस्य परस्येति प्रतिषेधं

शास्ति। कथं कृत्वा ज्ञापकं। इंद्रे द्वावचौ। तत्रैकाचस्य निलोपे नापक्रियते ऽपर एकादेशेन तत्तौ न चकइन्द्रः संप

सिद्धत्वादंतरंगो गुणो न स्यादित्यूठ्

विधीयते। पूर्वेषुकामशम इति। पूर्वेषुकाशमेभवो अञ् इति स्थिते। यद्यंतरंगत्वाद्गुणः स्यात्तदा पूर्वोत्तरपदयोर्व्यपवर्गाभावादुभयत आश्रयणां ता

दिवत्र्यावभिषे धात्त्वादिशोभद्राणां प्राचां ग्रामनगराणामित्युत्तरपद वृद्धिर्न स्यात्। उत्तरपदवृद्धौ सर्वं चेति च शब्दादिकृश आश्वेति तत्पवैव पूर्वपदांतोदात्त

त्वं न स्यात्। सावकाशं चैतदुभयं पूर्वकार्मृत्तिक इति। गुडोदकमिति। उदके केवल इति पूर्वपदांतोदात्तत्वं न स्यात्। उदग्धिपुदकमिति

शिवः

१८

श्री।

प्रसंगेन व्याकरणांतरेलक्षणं विचारयितुमाह। यणादेशादिति। लोपो भविष्यतीति। ननु बहिरंगत्वादियुवोरसिद्धत्वाल्लोपो न प्राप्नोति। अत्राह। समुदाय
स्यासिद्धत्वं नावयवस्येति। समुदायस्यासिद्धत्वे सामर्थ्यात्तदवयवस्याप्यसिद्धत्वमिति चिन्त्यमेतत्। पचेयुरिति। पचू अ या उस् इति स्थिते यद्यत्रांतरं
गत्वात्पररूपं क्रियेत तदा अपवर्गाभावादियादेशो न स्यात्। एकादेशस्यांतवत्वाद्भविष्यतीति चेत्। एवमपि रूपं न सिध्येत्। यासिसस्येति। सलोपापवाद

यणादेशादियुवौ। यणादेशादियुवौ अंतरंगतो भिनिर्वृत्तान्न प्राप्नुतः। वैय्याकरणः सौवश्वइति। लक्षणं भवति। स्वो
र्द्धिप्रसंगेइयुवौ भवत इति। नैषदोषः। अनवकाशाणवियुवौ। अचीत्युच्यते। किंपुनः कारणमचीत्युच्यते। इहमाभू
त्। ऐतिकायनः। औपगव इति। स्तामत्रयुवौ लोपोव्योर्वलीति लोपो भविष्यति। यत्र तर्हि लोपो नास्ति। प्रेयमेधः
प्रेयंगवइति। उसिपररूपात्त्वा। उसिपररूपाद्यांतरंगतो भिनिर्वृत्ताद्यियादेशो न प्राप्नोति। पचेयुः। यजेयुः। नैषदोषः।
[redacted] नैवं विज्ञायते याइसेतस्य इयू भवतीति। कथं तर्हि यासेत्येतस्य इयू भवतीति। लुकुलोपयणयवायाव
वेकादेशेभ्यः। लोपयणयवायावावेकादेशेभ्यः लुकूबलीयानिति वक्तव्यं। लोपात्। गोमान्प्रियो यस्य गोमत्प्रियः। गोमा
त्रिवाचरति गोमत्यते यवमत्यते। यणादेशात्। ग्रामण्यः कुलं ग्रामणि कुलं। सेनान्यः कुलं सेनानि कुलं। अयवाया
वेकादेशेभ्यः। गवेहितं गोहितं। रायः कुलं रैकुलं। नावः कुलं नौकुलं। एकादेश। यं लुकक नयं। लुकप्राप्नोत्येते विषयश्च
परत्वादेते विधयः स्युः। लुग्बलीयानिति वक्तव्यं। लुकूयथास्यात्॥ ॥इतिश्रीमद्भगवत्पतंजलिविरचिते व्याकरण
महाभाष्ये प्रथमस्याध्यायचतुर्थपादे प्रथममाह्निकं॥

इयादेशः। अकृते सलोपे नास्तिपररूपप्रसंगः। गोमत्प्रिय इति। यद्यत्र लोपः स्यात्तदप्रत्ययल
क्षणेन नुमादिः स्यात्। ग्रामणि कुलमिति। यणादिषु कृतेषु लुकि सति रूपं नासिध्येत्। एकादिति। एवमेकादेशे कृते तस्यादिवद्भावाल्लुकि सति रूपं न शिवः
सिध्येत्। अंतरंगानपि विधीन्बहिरंगो लुग्बाधत इति अस्य प्रत्ययोत्तरपदयोश्चेत्यत्र ज्ञापितत्वात्॥ शिवं॥ ॥इति श्रीकैयटपुत्रकैयटकृते महाभा
ष्यप्रदीपे प्रथमस्याध्यायस्य चतुर्थपादे प्रथममाह्निकं॥ ॥



भाष्येकैयटःप्रथमाध्यायचतुर्थचरणेप्रथमाह्निक।

प्रथमाध्यायतृतीयचरणद्वितीयाह्निकः॥



1

मा॰के॰

श्रीगणेशायनमः॥ अनुदात्तङितआत्मनेपदं॥ ॥विकरणेभ्यइति। लादेशेषुकृतेषु नियमार्थत्वे नित्यत्वाद्विकरणाः तेषां सार्वधातुकमपिद्वदिति ङि
त्वातिदेशादात्मनेपदनियमोनेन प्राप्नोतीति। ङकारइदिति। अन्यपदार्थापेक्षणाद्बहुव्रीहिः। तत्पुरुषस्तूत्तरपदार्थप्रधानत्वाद्
तरंगइतिसएवाश्रीयते। केवलाच्च ङकारादिति आत्मनेपदासंभवात्सामर्थ्यात्तदंतविधेर्वा ङिदंत आश्रीयते तेनाङिदंतादात्मने

श्री॥ अनुदात्तङितआत्मनेपदं॥ ॥विकरणेभ्यः प्रतिषेधोवक्तव्यः॥ चिनुतः सुनुतः लुनीतः पुनीतः।
ङितइत्यात्मनेपदं प्राप्नोति। नैषदोषः॥ नैवंविज्ञायते ङकार इद्यस्य सोयं ङित् ङितइति। कथं तर्हि
ङकार इत् ङित् ङितइति। अथवोपदेशइतिवर्त्तते। अथवोक्तमेतत्। सिद्धंतु पूर्वस्यकार्यातिदेशा
दिति। सर्वथा चङ्ङभ्यां प्राप्नोति। एवंतर्हि धातोरितिवर्त्तते। कःप्रकृतं। भूवादयोधातवइति। तद्वै प्र
थमानिर्द्दिष्टं पंचमीनिर्द्दिष्टेनचेहार्थः॥ अर्थाद्विभक्तिविपरिणामो भविष्यति। तद्यथा। उच्चानि देव
दत्तस्य गृहाणि आमंत्रयस्वैनं देवदत्तमितिगम्यते। देवदत्तस्य गावोश्वाहिरण्यंच आढ्योवैध
वेयः देवदत्तइतिगम्यते। पुरस्तात्षष्ठीनिर्द्दिष्टं सदर्थात्प्रथमानिर्द्दिष्टं द्वितीयानिर्द्दिष्टंच भवति। ए
वमिहापि पुरस्तात्प्रथमानिर्द्दिष्टं सदर्थात्पंचमीनिर्द्दिष्टं भवति। किमर्थं पुनरिदमुच्यते। आत्मने शिवः
पदवचनं नियमार्थम्॥

पदंनस्यातिदेशिकङित्वेभ्यः। एवंतर्हीति। अत्रापि पक्षे उच्चुकुकुटिषतीत्यतिप्रसंगनिवारणार्थं सिद्धंतु
पूर्वस्यकार्यातिदेशादित्याश्रयणीयं। किमर्थमिति। किं विहितानां लादेशानामनेन नियमः क्रियते अथवाकेवैकवाक्यतया विधिरितिप्रश्नः॥ १
पदमित्यर्थः। अथवेति। तेनोपदेशेयोङित्तस्मादात्मने २

नियमार्थ इति। एकवाक्यतायां भाविनी संज्ञाप्यपि णीयेति वाक्यभेद एवाश्रीयते तेन नियमोयं संपद्यते। परत्वादिति। विकरणानामनवकाशः
अलादेशाश्चानवकाशाः। नियमस्यावकाशः लिङ्लिटावार्द्धधातुकसंज्ञौ स्यईतड्लादेशवुभयप्रसंगे परत्वाद्विकरणाः तेन व्यवधानान्नि
यमाप्रसंगः। अनवकाश इति। सर्वत्र विकरणानां व्यवधायकत्वादिति भावः। यदि पुनरिति। आत्मनेपदपरस्मैपदाभ्यां लिंगाभ्यामिदं

नियमार्थोयमारंभः किमुच्यते नियमार्थोयमिति न पुनर्विध्यर्थोपि स्यात्। लविधानाद्धि हितं। लवि
धानाद्ध्यात्मनेपदं परस्मैपदं च विहितं। अस्ति प्रयोजनमेतत्। किं तर्हीति। विकरणेष्वविहितत्वान्नि
यमेन प्राप्नोति। इदमिह संप्रधार्यं विकरणाः क्रियंतां नियम इति किमत्र कर्त्तव्यं। परत्वाद्विकरणाः
नित्याः खल्वपि विकरणाः कृतेपि नियमे प्राप्नुवंत्यकृतेपि प्राप्नुवंति। नित्यत्वाच्च परत्वाच्च विकर
णेषु कृतेषु विकरणैर्व्यवहितत्वान्नियमेन प्राप्नोति। नैष दोषः। अनवकाशो नियमः। सावकाशः
कोऽवकाशः। य एते लुग्विकरणाश्च श्लुविकरणाश्च लिङ्लिटौ च। यदि पुनरियं परिभाषा विज्ञा
येत। किं कृतं भवति। कार्यकालं संज्ञापरिभाषं यत्र कार्यं तत्र द्रष्टव्यं। लस्य तिबादयो भवंती
सुपस्थितमिदं भवति अनुदात्तङित आत्मनेपदं शेषात्कर्त्तरि परस्मै

प्रकरणं लादेशविधावुपतिष्ठते। तत्र भ
वाक्येन विहितेषु लादेशेषु विकरणा इति दोषाभावः। स्यादिषु कथं नेति लावस्थायामेव विधीयंत इति तैर्व्यवधानान्नियमो न प्राप्नोति।
उच्यते। लमात्रापेक्षत्वादंतरंगत्वाल्लादेशेषु कृतेषु लकारविशेषापेक्षया बहिरंगाः स्यादयो भविष्यंति। येन नाप्राप्तिन्यायेन शबादी
न्बाधित्वा शबादिविधावनुवर्त्तनाद्वा।।॥

भा॰ के॰ एवमपीति। एकवाक्यतापक्षे विहितान् लादेशान् संतियन्ते तेषां सतामात्मनेपदपरस्मैपदसंज्ञे स्यातां। ततश्चैतत्परिभाषोपस्थानेऽसति संज्ञाश्रयं लादेशविधानं लादेशविधानाश्रया च संज्ञेति भावः। परस्मैपदानुक्रमणमिति। नन्वसति परस्मैपदानुक्रमणे परस्मै

2 एवमपीतरेतराश्रयं भवति। का इतरेतराश्रयता। अभिनिर्वृत्तानां लस्य स्थाने तिबादीनामात्म
नेपदपरस्मैपदसंज्ञया भवितव्यं। संज्ञया च तिबादयो भाव्यंते तदितरेतराश्रयं भवति। इत
रेतराश्रयाणि च कार्याणि न प्रकल्पंते। परस्मैपदेषु तावन्नेतरेतराश्रयं भवति। परस्मैपदा
नुक्रमणं न करिष्यते। अवश्यं कर्त्तव्यं। अनुपराभ्यां कृञ इत्येवमर्थं। ननु चैतदप्यात्मनेपदानु
क्रमणमेव करिष्यते। स्वरितञितः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति कर्त्र्यनुपरा
भ्यां कृञो नेति। आत्मनेपदेषु वापि नेतरेतराश्रयं भवति। कथं। भाविनी संज्ञा विज्ञास्यते सूत्र
शाटकवत्। तद्यथा। कश्चित्कंचित्तंतुवायमाह अस्य सूत्रस्य शाटकं वय। स पश्यति यदि शा
टको न वातव्यः अथ वातव्यो न शाटकः। शाटको वातव्यश्चेति विप्रतिषिद्धं। भाविनी खल्वस्य
संज्ञाभिप्रेता स मन्ये वातव्यो यस्मिन्नुते शाटक इत्येतद्भवतीति। एवमिहापि स लस्य स्थाने क
र्त्तव्यः यस्याभिनिर्वृत्तस्यात्मनेपदमित्येषा संज्ञा भविष्यति। अथवा पुनरस्तु नियमः॥ ननु चोक्तं शिवः

परस्मैपदविधायकं सूत्रं सम्यक्करिष्यत इति भावः॥

पदमनुप्राप्तं ङित्त्वान्न प्राप्नोति। नैष दोषः। आत्मनेपदसंबंधावगमेन तेषां परस्मैपदसंबंधबाधनाच्छेषादेव परस्मैपदं भविष्यतीति। अवश्य 2
मिति। आत्मनेपदबाधनार्थमित्यर्थः॥

यस्यमिति। कृतनियमानामसंकरेणास्थितानां हि निमित्तभावोपपत्तिः। अभिनिर्वृत्तानीति। प्रागपि नियमात्तेषां संभवमात्रेणाभि
निर्वृत्तत्वाविरोधात्। यत्तर्हीति। एतच्च लिङ्गिपूर्वलिडर्थस्यात्स्वचक्रमे चक्रमे क्रम्यात् क्रंसीष्टेति। तस्माज्ज्ञापकादिकप्रदर्शिता भाष्यकृ
ता। ज्ञापकं लुदृग्भ्यः स्यसनोरित्यत्र स्यविकल्पविधानं। किं पुनरिति। उभयनियमस्यावश्यसंभवात्। अनेकस्मिन्नर्थे वाक्यस्यै

नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति विकरणेभ्यो नियमो बलीयानिति। यदयं विकरणविधा
वात्मनेपदपरस्मैपदान्याश्रयति। पुषादिद्युताद्य्लृदितः परस्मैपदेषु आत्मनेपदेष्वन्यतरस्यामि
ति। नैतदस्ति ज्ञापकं। अनिनिर्वृत्तानि हि लस्य स्थाने आत्मनेपदानि परस्मैपदानि च। यत्तर्ह्य
नुपसर्गाद्वेति विभाषां शास्ति। किं पुनरयं प्रत्ययनियमः। अनुदात्तङित आत्मनेपदं भवतीति आ
व कर्मणोरात्मनेपदं भवतीति आहोस्वित्प्रकृत्यर्थनियमः। अनुदात्तङित आत्मनेपदमेव भाव
कर्मणोरात्मनेपदमेवेति। कश्चात्र विशेषः। तत्र प्रत्ययनियमे शेषवचनं परस्मैपदस्यानि
वृत्तत्वात्। तत्र प्रत्ययनियमे शेषग्रहणं कर्त्तव्यं परस्मैपदनियमार्थं शेषात्कर्त्तरि परस्मैपदमिति। किं
कारणं। परस्मैपदस्यानिवृत्तत्वात्। प्रत्ययो नियतः प्रकृत्यर्थावनियतौ तत्र परस्मैपदमपि प्राप्नोति। प्र
कस्यतात्पर्यायोगात्। तस्मादन्यतरनियमसंभवात्प्रश्नः। तत्र शेषग्रहणं कर्त्तव्यं परस्मैपदनियमार्थं। शेषादेव परस्मैपदं

नन्वप्राधान्यात्प्रत्ययानां तन्नियमो युक्तः। एवं तर्हि प्रधानोपरोधो मा भूदिति प्रकृत्यर्थनियमोऽपि संभवति। भावकर्मणोरेवेति। ननु पूर्वेणैव नियमार्थे
भावकर्मणोरिति सूत्रं विध्यर्थं स्यात्। एवं तर्हि नियमार्थं नैष दोषः। समस्तमात्मनेपदप्रकरणमेकं वाक्यमिति तदपेक्षयैतदुक्तं॥ ॥श्रीः॥ राम॥

मा॰के॰

कथमिति। वा कथमित्ति परस्मैपदे विकल्पिते आत्मनेपदस्यानुदात्तङितः इति नियतत्वादप्राप्तत्वाल्लकारस्य श्रवणप्रसंगः। उच्यते चेति। लकारे
तिबादिभिर्निर्वर्त्तिते नियमः प्रवर्त्तते तत्र परस्मैपदस्य सिद्धत्वाद्वचनेन तस्मिन्विकल्प्यमाने वचनमनर्थकं स्यात्। केवलायाः प्रकृते
रप्रयोगार्हत्वाच्छब्दान्तरेणार्थस्य प्रतिपादयितुमशक्यत्वात्प्रयोगविकल्पायोगात्। तस्मादात्मनेपदमेव विकल्पेन विधीयते

कथमात्मनेपदवचनं तस्यान्यत्र नियमात्। कथमात्मनेपदं वक्तव्यं। लोहितायति लोहितायते। किं
पुनः कारणं न सिध्यति। तस्यान्यत्र नियमात्। तद्ध्यन्यत्र नियम्यते। उच्यते न च प्राप्नोति तद्वचनाद्भविष्य
3 ति। अस्तु तर्हि प्रकृत्यर्थनियमः। प्रकृत्यर्थनियमेन्याभावः। प्रकृत्यर्थनियमे अन्येषां प्रत्ययानामभा
वः। अनुदात्तङितस्तङादयो न प्राप्नुवन्ति। नैष दोषः। अनवकाशास्तङादयः। उच्यन्ते च ते। वचनाद्भ
विष्यन्ति। सावकाशास्तङादयः। कोऽवकाशः। परस्मैपदिनोऽवकाशः। तत्रापि नियमान्न प्राप्नुवन्ति। त
व्यदादयस्तु भावकर्मणोर्नियमान्न प्राप्नुवन्ति। तव्यदादयोप्यनवकाशाः। ते च वचनाद्भविष्यन्ति। चि
ण् तर्हि भावकर्मणोर्नियमान्न प्राप्नोति। चिण्वचनाद्भविष्यति। घञ् तर्हि भावकर्मणोर्नियमान्न प्राप्नो
ति। तत्रापि प्रकृतं कर्मग्रहणमनुवर्त्तते। कथं प्रकृतं। अण्कर्म

तव्यदादयोपीति। यद्यपि स्नानीयं चूर्णमित्यादौ करणादौ
ण्यवकाशः तथापि तयोरेवेति चोदनया भावकर्मणोर्यद्विधानं तदनवकाशं। चिण् तर्हीति। ननु भावकर्मणोः सार्वधातुकस्याभावान्न चिणः शिवः
तत्कथमप्राप्तिश्चोद्यते। सत्यं विधानपक्षे चिण्यपि भावकर्मणोर्यथा विलयदोषः। घञ् तर्हीति। अकर्त्तरि विधीयमानोऽपादानादिषु घञ् सावकाशः॥ २

उपपदविशेषणमिति। सप्तमीस्थस्य सामान्यस्य कर्मणो योगेन विशेषस्य प्रतिपादनादुपपदविशेषणमुच्यते। एवमभिधेयविशेषणेनेतिव्या
ख्येयं। कर्त्तरि चेति। यद्यकर्मवदिंत्ययं शास्त्रातिदेशः तदा कर्मकर्त्तरि परत्वात् परस्मैपदं प्राप्नोति। भुज्यते कर्मकर्त्तरि उभयोरवकाशो। कार्या

तद्धेतत्रोपपदं विशेषणं। अभिधेयविशेषणे नचेदार्थः। नचान्यार्थं प्रकृतमन्यार्थं भवति। नखल्वप्य
न्यत्प्रकृतमनुवर्त्तनादन्यद्भवति। नह्रिगोधाप्रसर्प्पती सर्प्पणादहिर्भवति। यत्तावदुच्यते। नान्यार्थं प्र
कृतमन्यार्थं भवतीति। अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा। शाल्यर्थं कुल्याः प्रणीयंते ताभ्यः
पानीयं पीयते उपस्पृश्यते शालयश्च भाव्यंते। यदप्युच्यते नखल्वप्यन्यत्प्रकृतमनुवर्त्तनादन्यद्भव
तिनह्रिगोधाप्रसर्प्पती सर्प्पणादहिर्भवतीति। भवेद्द्रव्येषु एतदेवं स्यात्। शब्दस्तु खलु येन येनाभिसं
बध्यते तस्य तस्य विशेषको भवति। शेषचेवेनं चाशेषवचनं च कर्त्तव्यं। शेषात्कर्त्तरि परस्मैप
दमिति। किं प्रयोजनं। शेषनियमार्थं। प्रकृत्यर्थौ नियतौ प्रत्ययाअनियतास्ते शेषेपि प्राप्नुवंतिन
त्रशेषग्रहणं कर्त्तव्यं। शेषात्कर्त्तरि परस्मैपदमेव नान्यदिति। कर्त्तरि चात्मनेपदविषये परस्मै
पदप्रतिषेधार्थं द्वितीयं शेषग्रहणं कर्त्तव्यं। शेषात्कर्ष इति वक्तव्यं। इह मा भूत्। भिद्यते कुसूलः स्वय
मेवेति। कतरस्मिन्पक्षेऽयं दोषः। प्रकृत्यर्थनियमपक्षे। प्रकृत्यर्थनियमे तावन्न दोषः। प्रकृत्यर्थौ नि

तिदेशात् परत्वादात्मनेपदं सिध्यति। प्रकृत्यर्थौ नियताविति। भावकर्मणोरात्मनेपदमेवेति नियमादंतरेणापि कर्त्तृग्रहणं कर्त्तर्येव परस्मै
पदं लभ्यत इति नार्थः कर्त्तृग्रहणेन॥

भा॰कै॰

कर्तृग्रहणञ्चेति। पुरस्तात्तु परिहरिष्यते। परस्मैपदमिति। सिद्धे परस्मैपदे पुनर्विधानमात्मनेपदनिवृत्त्यर्थं संपद्यत इत्यर्थः। नास्य किंचिद्दिति
पीडारूपं भावस्य भावं वस्त्वित्यर्थः। यदि तर्हि कर्मणि कर्त्तर्यात्मनेपदं भवति हन्यमानो हंतीत्यत्र प्राप्नोति। नैष दोषः। प्रत्यासत्त्यैकधात्वविषयं कर्म

कर्तृग्रहणञ्चेयदोषः। प्रत्ययनियमे तर्ह्ययं दोषः। प्रत्ययानियताः प्रकृत्यर्था वनियतो तत्र कर्तृग्रहणं क
र्तव्यं भावकर्मणोर्निवृत्त्यर्थं। कर्तृग्रहणञ्चेयदोषः। प्रकृत्यर्थनियमे शेषग्रहणं शक्यमकर्तुं। कथं। प्रकृत्यर्थो
नियतो प्रत्यया अनियताः। ततो वक्ष्यामि परस्मैपदं भवतीति। तन्नियमार्थं भविष्यति। यत्र परस्मैप
दं चान्यच्च प्राप्नोति तत्र परस्मैपदमेव भवतीति। तत्तर्हि प्रत्ययनियमे द्वितीयं शेषग्रहणं कर्त्तव्यं। न
कर्त्तव्यं। योगविभागः करिष्यते। अनुदात्तङित आत्मनेपदं भावकर्मणोः। ततः कर्त्तरि। कर्त्तरि चा
त्मनेपदं भवति भावकर्मणोः। ततः कर्मव्यतिहारे। कर्त्तरीत्येव। भावकर्मणोरिति निवृत्तं। यद्येवं त
र्हि कर्मणि कर्त्तरि भवत्येवं भावेऽपि कर्त्तरि प्राप्नोति। एति जीवंतमानन्दः। नास्य किंचिद्भुजतीति। द्विती
यो योगविभागः करिष्यते। अनुदात्तङित आत्मनेपदं। ततः भावे। ततः कर्मणि। कर्मणि चात्मनेप
दं भवति। ततः कर्त्तरि। कर्त्तरि चात्मनेपदं भवति कर्मणीत्यनुवर्त्तते। तावदिति निवृत्तं। ततः कर्मव्यति शिवः
हारे। कर्त्तरीत्येव। कर्मणीति निवृत्तं॥ श्रीः॥

कर्तृत्वं विज्ञायते। यस्य स्वाश्रयं कर्तृत्वं कर्मणश्शास्त्रातिदेशाच्चोपचारिकं तत्रैव भवति॥ ॥श्रीः॥ रामकृष्णो जयतः॥ वासुदेवो विजयते॥ श्रीकृष्णः॥ ८

कर्मणि १

अनुपराभ्यां कृञ इत्येवमर्थमिति। एष हि योगोऽपवादितः कस्मान्न प्राप्तित्वादात्मनेपदापवादत्वाच्च बलवानिति न शक्यते योगविभागेन बाधि-
तुं। ननु चैतदपीति। प्राप्तिमात्रं योगविभागेन बाध्यते। ननु चेयमिति। पूर्वविप्रतिषेधेनेति भावः। शेषादित्यस्यावकाशः याति वाती॥ अ-
नुपराभ्यामित्यस्यावकाशः अशेषः कर्त्रभिप्राये विषयः अनुकरोतीति। कर्मकर्त्तर्युभयप्रसंगे पूर्वविप्रतिषेधेन शेषादिति प्राप्तिर्भवति।
सापि योगविभागेन बाध्यते। नो सकृदिति। शेषादिति प्राप्तिर्योगविभागेनापवादविषयाद्विषयांतरं नीता नो सकृत्ते परां प्राप्तिं बाधितु-

एवमपि शेषग्रहणं कर्त्तव्यं अनुपराभ्यां कृञ इत्येवमर्थं इह मा भूत् अनुक्रियते स्वयमेव पराक्रि-
यते स्वयमेव। ननु चैतदपि योगविभागादेव सिद्धं न सिध्यति। अनंतरस्याप्राप्तिः सा योगविभागेन
शक्या ≡ बाधितुं कुत एतत् अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। परा प्राप्तिरप्रतिषिद्ध-
तया प्राप्नोति। ननु चेयं प्राप्तिः परां प्राप्तिं बाधते। नो सकृत्प्रतिषिद्धा सती बाधितुं। एवं तर्हि कर्मव्य-
तिहार इत्यत्र कर्तृग्रहणं प्रत्याख्यातं येन स्म कृतमुत्तरत्रानुवर्त्तिष्यते। शेषात्कर्त्तरि क× कर्त्तरि ×
त्तरीति। किमर्थमिदं कर्त्तरि कर्त्तरीति। कर्त्तेव यः कर्त्ता तत्र यथा स्यात्। कर्त्ता चान्यश्च यः कर्त्ता त-
त्र मा भूदिति। तत्र अनुपराभ्यां कृञः कर्त्तरि कर्त्तरीत्येव॥

मित्यर्थः। अथ चेयं योगविभागप्राप्तिरविशेषादनुपराभ्यामित्यना-
मपि प्राप्तिं बाधिष्यत इत्यर्थः। नो सकृदिति। अपवादापवादत्वादनुपराभ्यामित्यनया प्राप्त्या प्रतिषिद्धा नो सकृत्ते तामेव बाधितुमित्यर्थः।
कर्त्तेव यः कर्त्तेति। यस्य व्यपदेशांतरं नास्तीत्यर्थः। यद्येवमसिद्धिः कर्त्रीति करणे कर्त्तरि न प्राप्नोति। नैष दोषः। कर्त्रैव स्यात् करणत्वाभावात्।
मिपते कुसूलः स्वयमेवेत्यत्र तु स्वाश्रयं कर्त्तृत्वमातिदेशिकं तु कर्मत्वमिति न भव-

5

कर्मणः स्वत्वविनिमय एवात्र कर्मव्यतिहारः।२

शास्त्रोपसिद्धत्वात्।

भा॰कै॰

कर्त्तरि। ॥क्रियाव्यतिहार इति वक्तव्यमिति। प्रसिद्धसन्नत्वात्कृत्रिमस्यैव साधनकर्मणो ग्रहणं प्राप्नोति। साधनकर्मणि च धात्वर्थस्यासंभ
वाद्धात्वर्थस्य तद्विषयत्वं विज्ञायेत। देवदत्तस्य धान्यमिति देवदत्तस्वामिकं धान्यं लवनेन स्वीकुर्वन्तीत्यर्थः। क्रियाणां साध्यैकस्वभावानां क
र्मव्यतिहार इति चेत्। योग्यताविशादस्येयं क्रिया साध्यातस्या इदं साधनमिति निर्ज्ञाते साध्यसाधनभावे यो व्यत्यासः स क्रियाव्यतिहारः। पर

कर्त्तरि कर्मव्यतिहारे ॥ ॥क्रियाव्यतिहार इति वक्तव्यं। कर्मव्यतिहार इत्युच्यमाने इहापि प्रसज्येत। देवदत्त
स्य धान्यं व्यतिलुनंतीति। इह च न स्यात्। व्यतिलुनन्ते व्यतिपुनत इति। तत्तर्हि वक्तव्यं। न वक्तव्यं। क्रियां हि लो
के कर्मेत्युपचरंति। कां क्रियां करिष्यसि किं कर्म करिष्यसीति। एवमपि कर्त्तव्यं। कृत्रिमाकृत्रिमयोः कृ
त्रिमे संप्रत्ययो भवति। क्रियापि कृत्रिमं कर्म। न सिध्यति। कर्त्तुरीप्सिततमं कर्मेत्युच्यते। कथं च क्रि
या नाम क्रिययेप्सिततमा स्यात्। क्रियापि क्रिययेप्सिततमा भवति। कया क्रियया। संपश्यतिक्रि
यया प्रार्थयतिक्रियया अध्यवस्यतिक्रियया च। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स बुध्या तावत्
किंचिदर्थं पश्यति संदृष्टे प्रार्थना प्रार्थिते ऽध्यवसायः अध्यवसाये आरंभः आरंभे निर्वृत्तिः निर्वृत्तौ फ
लावाप्तिः एवं क्रियापि कृत्रिमं कर्म। एवमप्युभयोः कृत्रिमयोरुभयगतिः स प्रसज्येत तस्मात्क्रियाव्यतिहा

स्परकरणमपि कर्मव्यतिहारः। यथा संप्रहरंते राजान इति। अत्रैकैव क्रिया संचारिणी वलस्यते। क्रियामिति। लौकिकाः स्वार्थाइत्यनू
द्यते। कथं च क्रिययेति। द्वयोरपि साध्यत्वात्परस्परासंबंधमत्वा प्रश्नः। क्रियापीति। भोक्तुमिच्छति भोक्तुं जानातीति दर्शनात्। कया क्रिययेति। क्रि
यांतरवाचिप्रयोगाभावात्प्रश्नः। संपश्यतिक्रिययेति। संदर्शनादीनामव्यभिचारात्सतीप्रमानतात्सतीयज्ञानक्रियापेक्षया च अविशेषपिंडाभिलापे क
र्मोद्भिदावदर्शनात्। शिवः ५

5

...प्रेक्षावादिष्वनःप्रागनुक्तावपि कलात्मा प्रतिपादनार्थमादिग्रहणं

इह कर्त्तरीति। क्रियायाः साध्यत्वात्प्राधान्यात्क्रिययाभिप्रेततमत्वात्कर्तृत्वं न क्रियाप्रवर्त्तनात्कर्त्तर्येपि प्राधान्यादुभयव्यतिहारेऽस्मिन्कर्मणि ह

न वक्तव्यं। इह कर्त्तरि व्यतिहार इतीयता सिद्धं। अयमेवं सिद्धे सति यत्कर्मग्रहणं करोति तस्यैतत्प्रयोजनं
क्रियाव्यतिहारे यथा स्यादिति। अथ कर्त्तृग्रहणं किमर्थं। कर्मव्यतिहारादिषु कर्त्तृग्रहणं भावकर्मनिवृ
त्त्यर्थं। कर्मव्यतिहारादिषु कर्त्तृग्रहणं क्रियते भावकर्मणोरात्मनेपदं मा भूदिति। इतरथा हि तत्र प्रति
षेधे भावकर्मणोः प्रतिषेधः। अक्रियमाणे कर्त्तृग्रहणे भावकर्मणोरप्यात्मनेपदमनेन प्रसज्येत। तत्र
को दोषः। तत्र प्रतिषेधे भावकर्मणोः प्रतिषेधः। तत्र प्रतिषेधे भावकर्मणोरप्यनेनात्मनेपदस्य प्रतिषेधः प्रस
ज्येत। व्यतिगम्यन्ते ग्रामाः व्यतिहन्यन्ते दस्यव इति। न वानन्तरस्य प्रतिषेधात्। न वा एष दोषः। किं कारणं।
अनन्तरस्य प्रतिषेधात्। अनन्तरं यदात्मनेपदविधानं तस्य प्रतिषेधात्। कुत एतत्। अनन्तरस्य
विधिर्वा भवति प्रतिषेधो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं
बाधते। नोत्सहते प्रतिषिद्धा सती बाधितुं। उत्तरार्थं तर्हि कर्त्तृग्रहणं कर्त्तव्यं। न कर्त्तव्यं। क्रियते तत्रैव।
शेषात्कर्त्तरि परस्मैपदमिति। द्वितीयं कर्त्तृग्रहणं कर्त्तव्यं। किं प्रयोजनं। कर्त्तैव यः कर्त्ता तत्र यथा स्यात्
कर्त्ता चान्यश्च यः कर्त्ता तत्र मा भूदिति॥ ॥न गतिहिंसार्थेभ्यः॥ प्रतिषेधे हसादीनामुप

णात् क्रियाव्यतिहारोयं गम्यते। क्रिया

पांधात्ववाच्यत्वादन्तरंगत्वात्तत्र प्रतिषेध इति। कर्मव्यतिहारे न गतिहिंसार्थेभ्य इत्यनेन प्रतिषेध इत्यर्थः॥ ॥न गति॥ हसादीनामिति। हसिपका

मा॰के॰ हरिवहोरिति। हरतेर्हिंसार्थत्वाद्वहतेर्गत्यर्थत्वात्प्राप्तिः। ततः संप्रहरिष्यंतौ हंसकर्णौ धनंजयाविसत्रव्यतिहारो न विवक्षितः। किं तर्हि योत्स्यमा नाविसेतावद्विवक्षितं। देशांतरप्रापणक्रियेति। नारं वहतीत्यादौ देशांतरप्राप्त्युपसर्जनं प्रापणमस्य वाच्यं। तत्र तु गतिर्नांतरीयकत्वात्स तीयते न त्वसौ धात्वर्थः। अस्येवन्यायसिद्धार्थस्यानुवादकमर्थग्रहणं। गर्गाणां तु प्रापणं कन्याहारकमिति वदर्गत्यर्थत्वाभावः॥ ॥इतरेतरा॥ लौकिकप्रयोगमवहारे लाघवादितरेतरादिशब्दा उपसर्गाश्च कर्मव्यतिहारद्योतनाय प्रयुज्यंते॥ ॥विपराभ्यां जेः॥ विशब्द इति। पक्षिवाची तु यो विशब्दः तस्य नपुंसकत्वान्नाकासुं सिविभक्त्याव्यवधानादेरजंतरेजयानिर्नसंभवति। वकुविजयति वनमित्यत्र अजहत्स्वार्थायांवृत्तौ

हरिवहोरप्रतिषेधः। संप्रहरंते राजानः। संविवहंते गर्गैरिति। नवदिर्गत्यर्थः। देशांतरप्रापणक्रियो त्रवहिः॥ ॥इतरेतरान्योन्योपपदाच्च॥ परस्परोपपदाच्चेति वक्तव्यं। परस्परस्य व्यतिलुनंति। परस्प रस्य व्यतिपुनंति॥ ॥विपराभ्यां जेः॥ उपसर्गग्रहणं कर्तव्यं। इह मा भूत्। पराजयति सेनेति। तत्तर्हि व क्तव्यं। न वक्तव्यं। यद्यपि तावदयं पराशब्दो दृष्टापचार उपसर्गश्चानुपसर्गश्च। अयं खलु विशब्दोऽदृ ष्टापचार उपसर्ग एव तस्यास्य कोऽन्यो द्वितीयः सहायो भवत्यन्यदत उपसर्गात्तात द्रूपा। अस्य गोर्द्वि तीयेनार्थ इति गौरेवोपादीयते नाश्वो न गर्दभ इति॥ ॥

वेरानर्थक्यादिहचार्थवतो ग्रहणाद्दजहत्स्वार्थायामपि तद्दर्थस्योपस र्जनत्वाद्ग्रहणं। संबुध्यंतं तु वेइति रूपांतरयुक्तत्वान्न गृह्यते। एकदेशविकृतस्यानन्यत्वाद्विशब्द एवायमिति चेत्। विरित्यस्य विभक्त्यंतस्य शिवः वेइति विकारान्न तु विशब्दस्येत्यदोषः। वीजयतइत्यत्र एकादेशस्य पूर्वप्रत्यंतवद्भावाद्विशब्दस्य सरोजयतिः संभवत्येवेति चेत्। पूर्वस्य का र्यं कर्तव्यं तवद्भावः। न चात्र पूर्वस्य किंचित्कार्यमित्यदोषः। अस्य गोरिति। द्वितीयशब्दो लोके प्रयुज्यमानो यद्रूपेण द्वितीयत्वं तत्तुल्यजातीय ६ एव संप्रत्ययं करोति। एवमिहापि विशब्दसाहचर्यात्पराशब्दोऽप्युपसर्गो गृह्यते। पक्षिवाचिनो विशब्दस्य संभवे तु द्वयोरपि दृष्टापचारत्वात्परस्परसा हचर्यादुपसर्गग्रहणं बोध्यं।

आङो दो॥ ॥अव्यसनक्रियस्येति। व्यसनं विभागः विकासनमित्यर्थः। केवलो विहरणशब्द उपादीयमानं पादविहरणं गमयतीत्यास्यग्रहणं स्वेच्छक
तं। केवलो व्यसनशब्दो दुःखादिषु वर्त्तत इति वार्त्तिके क्रियाग्रहणं कृतं। आङो दोऽनास्य इति। आस्यसमवायिन्यां क्रियायां ददातिर्वर्त्तमान आस्यद्यति
र्भवति। यथा लोमविषयदर्शनादेव निर्हृ बिलेन स्ववर्त्तत इत्युच्यते। इहातेरेवास्यविहरणं भवेन्नान्यथा दारूपाणां इति तेषामिहग्रहणाभावः। यद्ये
वं स्वं मुखं आदत्त इत्यत्र मुखविषयत्वाद्दानस्य प्रतिषेधः प्राप्नोति नैष दोषः। आस्यसमवेते वैक्रियालस्यादेऽत्तो ददातिरास्येवऽन्तो भवति। ग्रह

आङो दोऽनास्यविहरणे॥ ॥आङो दोऽव्यसनक्रियस्य। आङो दोऽव्यसनक्रियस्येति वक्तव्यं। इहापि यथा स्यात्। विपादिकां व्याददाति कूलं व्याददातीति। तर्हि वक्तव्यं। न वक्तव्यं। इहाङोऽनास्य इतीयता सिद्धे सोऽयमेवं सिद्धे सति यद्विहरणग्रहणं करोति तस्यैतत्प्रयोजनं आस्यविहरणसमानक्रियादपि यथा स्यात्। यथाजातीयका चास्यविहरणक्रिया तथाजातीयकात्रापि। स्वांगकर्मकाच्च। स्वांगकर्मकाच्चेति वक्तव्यं। इह माभूत्। व्याददते पिपीलिकाः पतंगस्य मुखमिति॥ ॥क्रीडोऽनुसंपरिभ्यश्च॥ ॥उपसर्गग्रहणं कर्त्तव्यं। इह माभूत्। अनुक्रीडति माणवकमिति। समोऽकूजने। समोऽकूजन इति वक्तव्यं। इह माभूत्। संक्रीडंति शकटानि। आगमेः क्षमायां। आगमेः क्षमायामुपसंख्यानं कर्त्तव्यं। माणवकमागमयस्व तावत्॥

णं तु प्राग्गृहीतविषयं। अनास्य इति च पर्युदासः। आस्यानास्यसदृशं पश्चास्यसदृश इति विधिरेव न भवति। सोऽयमिति। आस्यग्रहणं विहर
णविशेषोपलक्षणार्थं नियमस्य सत्यपास्यविहरणसदृशवान्निषेधोऽवर्भते। स्वांगकर्मकादिति। स्वमंगं स्वांगं न तु पारिभाषिकमद्रवं मूर्तिमत्स्वां
गमिति। तेन परकीयास्यविहरणे विधिरेव भवति॥ ॥क्रीडोऽनु॥ ॥अनुक्रीडतीति। तृतीयार्थ इत्यनुः कर्मप्रवचनीयसंज्ञः। माणवकेन सह क्रीड
तीत्यर्थः। एतच्च समासाहचर्याल्लभ्यते। आगमयस्वेति। सहस्व कंचित्कालं मा त्वरिष्ठा इत्यर्थः॥

मा॰के॰ शिक्षेरिति। केचिदाहुः। शकिः सन्नन्तो गृह्यते इति विभ्यर्थमिदं। क्रियाविषयस्य शाकिः प्रयुज्यते। मा कुंश क्रोति शापितुं शक्नोतीति प्रयोगदर्शनात् इह
हलन्त जिज्ञासाविषयः शकिर्गृह्यते। विद्यां जिज्ञासितुं यतत इत्यर्थः। आत्मनेपदेनैव जिज्ञासाया अवगमात् जिज्ञासितुमिति न प्रयुज्यते। अन्ये तु
शिक्ष विद्योपादाने इत्यस्य ग्रहणं नियमार्थं वर्णयन्ति। विधेरवक्तव्यत्वात् सन्नन्तशकिग्रहणं न्याय्यं। किरतेरिति। विक्षेपार्थः किरतिः ह
र्षादयस्तु विषयत्वेनोपात्ताः हर्षादिष्वेव अपाच्चतुष्पादिति सुड् विधीयते। हरतेरिति। गतं प्रकारः। पैतृकमिति। पितुरागतं प्रकारं सततं भो ले

शिक्षेर्जिज्ञासायां। शिक्षेर्जिज्ञासायामनुपसंख्यानं कर्त्तव्यं। विद्यासु शिक्षते। धनुषि शिक्षते। किरतेर्हर्षजी
विकाकुलायकरणेषु। किरतेर्हर्षजीविकाकुलायकरणेषूपसंख्यानं कर्त्तव्यं। अपस्किरते वृषो हृष्टः
अपस्किरते कुक्कुटो भक्षार्थी। अपस्किरते श्वा आश्रयार्थी। हरतेर्गतताच्छील्ये। हरतेर्गतताच्छी
ल्ये उपसंख्यानं कर्त्तव्यं। पैतृकमश्वा अनुहरंते। मातृकं गावो नुहरंते। आङि नुप्रच्छ्योः। आङि नुप्र
च्छ्योरुपसंख्यानं कर्त्तव्यं। आनुते शृगालः। आपृच्छते गुरुमिति। आशिषि नाथः। आशिषि नाथ उपसं
ख्यानं कर्त्तव्यं। सर्पिषो नाथते मधुनो नाथते। शप उपलंभने। शप उपलंभन उपसंख्यानं कर्त्तव्यं। दे
वदत्ताय शपते। यज्ञदत्ताय शपते॥ ॥समवप्रविभ्यः स्थः॥ आङः स्थः प्रतिज्ञाने। आङः स्थः प्रतिज्ञान इति व
क्तव्यं। अस्तिं सकारमातिष्ठते। आगमो गुणवृद्धी आतिष्ठे शिव:

यन्तीत्यर्थः। मातुरनुहरन्तीत्यत्र सादृश्यमात्रं विवक्षितं न तु प्रकारताच्छील्यमि
त्यात्मनेपदं तद्धितार्थेत्यत्र भाष्यकारेण नोक्तं। आशिषि नाथ इति। आशिष्येव नाथ इति नियमार्थमिदं। सर्पिषो नाथत इति। सर्पिर्मे भूयादित्याशास्त
इत्यर्थः। आनुत इति। उत्कण्ठापूर्वकं शब्दं करोतीत्यर्थः। शप उपलंभन इति। उपलंभनं प्रकाशनं। देवदत्ताय शपत इति। श्लाघह्नुङ्स्थाशपां ज्ञीप्स्यमान इति संप्रदानसंज्ञा। ही ७
यमाने विषयं तो। केचित्तु। यस्मा आख्यायते स संप्रदानं यथाख्यायते स इत्यन्ये।

उदोन्॥ ॥उदईहायामिति। ईहाविशिष्टाचेष्टा कायपरिस्पंदात्मिका अथ घटते। उत्तिष्ठति सेनेति। उल्लष्यते जायते सेनेत्यर्थः॥ ॥उपान्मं॥ ॥उपाद्दे
वपूजेति। अमंत्रकरणार्थमिदं। अर्कमुपतिष्ठते इति। देवपूजां मत्वात्मनेपदं कृतं। चापलमेतत् तन्न पूजनमिति तिन कृतमपरस्त्वा। अपरस्त्वा

उदोनूर्ध्वकर्मणि॥ ॥उदईहायां। उदईहायामिति वक्तव्यं। इह मा भूत्। उत्तिष्ठति सेनेति॥ ॥उपान्मंत्र
करणे॥ ॥उपाद्देवपूजासंगतकरणयोः॥ उपाद्देवपूजासंगतकरणयोरिति वक्तव्यं। आदित्यमु
पतिष्ठते। चंद्रमसमुपतिष्ठते। संगतकरणे। रथिकानुपतिष्ठते। अश्वारोहानुपतिष्ठते। बहूनामप्यवि
त्तानामेको भवति चित्तवान्। पश्य वानरसैन्येस्मिन्यदर्कमुपतिष्ठते। मैवमंस्थाः सचित्तोयमेषोपि हि प्रि
यावयं। एतदप्यस्य कापेयं यदर्कमुपतिष्ठति। अपर आह। उपाद्देवपूजासंगतकरणमित्रकरणपथिष्वि -
ति वक्तव्यं। संगतकरणमुदाहृतं। मित्रकरणे। रथिकानुपतिष्ठते। अश्वारोहानुपतिष्ठते। पथिषु। अयं पंथाः
स्रुघ्नमुपतिष्ठते। अयं पंथाः साकेतमुपतिष्ठते। वा लिप्सायां। वा लिप्सायामिति वक्तव्यं। भिक्षुको ब्राह्मणकुल
मुपतिष्ठते। भिक्षुको ब्राह्मणकुलमुपतिष्ठति॥ ॥उद्विभ्यां तपः॥ ॥अकर्मकादित्येव। उत्तपति सुवर्णं सुव
र्णकारः। स्वांगकर्मकाच्च। स्वांगकर्मकाच्चेति वक्तव्यं। उत्तपते पाणी। वितपते पाणी। उत्तपते पृष्ठं। वितपते

हेति। संगतकरणमुपश्लेषमात्रं। मित्रकरणं त्वनुपश्लिष्टस्यापि मैत्रीकरणं संबंधः॥ अयं पंथाः स्रुघ्नमुपतिष्ठत इति। स्रुघ्नं प्राप्नोतीत्यर्थः॥ ॥भिक्षुकः
ति। लिप्सया हेतुभूतया ब्राह्मणकुलमुपगच्छतीत्यर्थः॥ ॥उद्विभ्यां॥ ॥आसने वर्तमानस्तपिरुद्विपूर्वोऽकर्मकः। स्वांगमपि [illegible] घटत
इतीह न भवति। देवदत्तो मन्तुं तपसा पाणिमुत्तपतीति॥

।अपेति। किमयं विधिरथ नियम इत्यभिप्रायेण प्रश्नः। उदि भ्रांत प आत्मनेपदमेव न परस्मैपदमिति नियमो नेन क्रियत इत्याह। निष्पद्यत इति। विधि
नियमसंभवे विधिर्बलवानिति मत्वाह। किं पुनरिति। विधिर्न संभवतीति मत्वाह। तपिरिति। आ सते दीप्यत इत्यस्यार्थे ऽकर्मक इत्यर्थः। अकर्मका
श्चेति। अनेकार्थत्वाद्धातूनां अंतर्भावितण्यर्थत्वादिति भावः। तत्तस्मात्तापयते वर्तमानस्तपिः सकर्मकः। पुनः प्रयोजक व्यापारविवक्षायां कर्त्तुः

प्रयोद्धिस्यामित्यत्र किं प्रत्युदाह्रियते। निष्पद्यत इति। किं पुनः कारणमात्मनेपदमेवोदाह्रियते न पुनः पर
स्मैपदं प्रत्युदाहार्यं स्यात्। तपिरयमकर्मकः। अकर्मकाश्चापि सोपसर्गाः सकर्मका भवंति। न चांतरेण कर्म
कर्त्तारं सकर्मका अकर्मका भवंति। यदुच्यते न चांतरेण कर्मकर्त्तारं सकर्मका अकर्मका भवंतीति। अं
तरेणापि कर्मकर्त्तारं सकर्मका अकर्मका भवंति। तद्यथा। नदी वहतीत्यकर्मकः। भारं वहतीति सकर्मकः। त
स्मान्निष्पततीति प्रत्युदाहार्यं॥ ॥आङो यमहनः॥ अकर्मकादित्येव। आयच्छति रज्जुं कूपात्। आहंति वृषलं पादे
न। स्वांगकर्मकाच्चास्वांगकर्मकाच्चेति वक्तव्यं। आयच्छते पाणी। आहते उदरमिति॥ ॥समो गम्यृच्छिभ्यां॥ ॥समो
गम्यादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानं। समो गमादिषु विदिप्रच्छिस्वरतीनामुपसंख्यानं कर्त्तव्यं। संवि
त्ते। संपृच्छते। संस्वरते। अर्त्तिश्रुदृशिभ्यश्च। अर्त्तिश्रुदृशिभ्यश्चेति वक्तव्यं। मा समृत। मा समृषातां। मा समृषत।
अर्त्तिः। श्रु। संशृणुते। दृशि। संपश्यते। उपसर्गादस्यत्यूह्योर्वा वचनं। उपसर्गादस्यत्यूह्योर्वेति वक्तव्यं। निरस्यति। निर शिवः

कर्मवशाद्वा सिद्धमात्मनेपदमिति पुनर्विधानं नियमार्थं संपद्यत इत्यस्याप्यात्मनेपदं भवत्येव। इदानीं विधिपक्षं दर्शयन्नाह। अंतरेणापीति। तदे ८
वं ज्वलनवृत्तिस्तपिरकर्मकः। संतापने विलापने च सकर्मकः। कर्मकर्त्तरि तु यक्चिणोः प्रतिषेधे णिश्रिग्रंथिब्रूञात्मनेपदाकर्मकाणामिति वचनेन यक्चिणोः प्रतिषेधे॥
समः॥ ॥समो गम्यृच्छिभ्यामित्येतावत्सूत्रमिति वार्तिककारः। उपसर्गादित्यकर्मकादिति च न संबध्यते॥

आङः॥ ॥ओतिआङिति। उद्गमने वर्त्तमानात्। कर्मकः क्रमिः इत्यनुवर्तते। सयाक्रामतीति न भवत्यात्मनेपदं। अत्र हि क्रमिर्व्याप्तौ वर्त्तते न तु उद्गमने॥
व्यक्तवाचां॥ ॥सर्व एवेति। ये वदत्यर्थस्य कर्त्तारः। वद व्यक्तायां वाचीति पाठाद्दिति भावः। अथवेति। विनापि प्रकर्षं गमयाधिकरणपदव

आङ उद्गमने॥ ॥ओतिषामुद्गमने। आतिरुद्गमने इति वक्तव्यं। इह मा भूत्। आक्रामति धूमो हर्म्यतलादिति॥
॥व्यक्तवाचां समुच्चारणे॥ व्यक्तवाचामिति किमर्थं। वरतनु संप्रवदन्ति कुक्कुटाः। व्यक्तवाचामित्युच्यमा
नेप्यत्र प्राप्नोति। एतेपि हि व्यक्तवाचः। आतश्च व्यक्तवाचः कुक्कुटे नोदिते उच्यते कुक्कुटो वदतीति। एवं
तर्हि व्यक्तवाचामित्युच्यते। सर्व एव हि व्यक्तवाचस्तत्र प्रकर्षगतिर्विज्ञास्यते। साधीयो ये व्यक्तवाच इ
ति। के च साधीयः। येषां वाचि अकारादयो वर्णा व्यज्यन्ते। न चैतेषां वाच्यकारादयो वर्णा व्यज्यन्ते। एते
षामपि वाच्यकारादयो वर्णा व्यज्यन्ते। आतश्च व्यज्यन्ते। एवं ह्याहुः कुक्कुटाः कुक्कुडिति। नैवं त आहुः। अनु
करणमेतत्तेषां। अथवा नैवं विज्ञायते व्यक्ता वाग्येषां त इमे व्यक्तवाच इति। कथं तर्हि व्यक्तावाचि
वर्णा येषां त इमे व्यक्तवाच इति॥ ॥अवाद्ग्रः॥ अवाद्ग्रो गिरतेः। अवाद्ग्र इत्यत्र गिरतेरिति वक्तव्यं। ग
णातेर्मा भूत्। तत्तर्हि वक्तव्यं। न वक्तव्यं। प्रयोगाभावात्। अवाद्ग्र इत्युच्यते। न चावपूर्वस्य गणातेः प्रयोगो

... स्पर्शः शुकसारिकादीनां सर्ववर्णविष
यद्वीप्साश्रयणात् मनुष्या एव गृह्यन्ते। व्यक्तावाचीति। वाचि अकारादयो वर्णा येषां व्यक्तास्ते षामिति स्पर्शः ... ॥ ॥अवाद्ग्रः॥ न चावपूर्वस्येति। निय
यं स्वाभाविकं व्यक्तवाक्कं अपि लुपुरुषप्रयत्नवशेन कतिपयवर्णविषयमिति तत्रात्मनेपदाभावः॥
न विषयता केषांचित्क्रियाविशेषणानां

भा.के.

समः॥ धातोस्तृतीयायोगासंभवात्तदर्थेन योगे आत्मनेपदेन। स च सर्वत्र चरस्यार्थे संभवतीत्यभिप्रायेण॥ तृतीयायुक्तादिति किमर्थमिति। स
र्वत्रेति। केचित्सर्वक्रियापेक्षमेतदुक्तमिति मन्यन्ते। यथा असिनाछिनत्ति असिस्तैक्ष्ण्येन छिनत्तीति स्वयमात्मनाछिनत्तीति। यत्र करणाभिधा
नमपि पदं न श्रूयते तत्रापि केनचित्करणेन भाव्यमेव तत एकस्यैव पदार्थस्य भेदविवक्षायां आत्माकरणं। अन्ये तु चरतिक्रियापेक्षमेवमुक्त

समस्तृतीयायुक्तात्॥ ॥तृतीयायुक्तादिति किमर्थं उभौ लोकौ संचरसि इमं चामुं च देवल। तृतीयायुक्तादित्यु
च्यमानेप्यत्र प्राप्नोति। अत्रापि तृतीयपायोग इति। एवं तर्हि तृतीयायुक्तादित्युच्यते। सर्वत्र च तृतीययायोगः
तत्र प्रकर्षगतिर्विज्ञास्यते। साधीयो यत्र तृतीयायोग इति। क्व च साधीयः। यत्र तृतीया श्रूयते॥ ॥दाणश्च
सा चेच्चतुर्थ्यर्थे॥ ॥सा चेत्तृतीया चतुर्थ्यर्थे इत्युच्यते। कथं नाम तृतीया चतुर्थ्यर्थे स्यात्। एवं तर्हि शिष्टव्यव
हारे तृतीयानेन विधीयते आत्मनेपदं च। दास्या संप्रयच्छते वृषल्या संप्रयच्छते। यः शिष्टव्यवहारः ब्राह्म
णीभ्यः संप्रयच्छतीत्येव तत्र भवितव्यं। यद्येवं नार्थोनेन। केनेदानीं तृतीया भविष्यत्यात्मनेपदं च
सहयुक्ते तृतीयाप्रधाने व्यतिहारे तङ्विधिः। सहयुक्तेऽप्रधान इत्येव तृतीया भविष्यति कर्तरि कर्मव्य
तिहार इत्यात्मनेपदं॥ शिवः

मित्याहुः॥ न हि संचरणं करणेन विना संभवति। यत्रेति। तत्र अन्तरंगाकरणप्रतीतिः। अन्यत्र तु करणस्य परि
कल्प्यत्वाद्बहिरंगा॥ ॥दाणश्च॥ ॥अशिष्टव्यवहार इति। अशिष्टानां संकीर्णाचाराणां यो व्यवहारस्तस्मिन्नित्यर्थः। तत्र चेत्यादि चतुर्थ्यर्थे या च २
तुर्थ्याः अनेनैवाभयं संगृहीतमित्याहुः। सहयुक्त इति। दास्येति। विभ्रमाणतया सहस्रपभुंक्ते इत्यपि यथासाधि॥ ॥एकक्षोशिवायनः॥ ॥श्रीः॥॥

उपाद्यमः॥ ॥स्वस्य स्वत्वेन स्थितस्य ग्रहणादिकं स्वकरणं गृह्यते इति भवतो प्रश्नः। इदेति। अस्वमिति। अंतरंगत्वाल्लिप्यादनत्वस्वेण्यकरणे स
र्थो गृह्यते। नातद्भूति चेद्विकल्पेन विधानादिति केचिदाहुः। प्रकृतेरविवक्षितत्वात्कार्यमात्रविवक्षायां नास्ति चेदिति परे॥ ॥नानोर्ज्ञः॥ ॥ओषध
स्येति। ओषधेन प्रवर्तितुमिच्छतीत्यर्थः। नवेति। पूर्वेण सकर्मकाज्जानातेः सन्नन्तादात्मनेपदं विधीयते। अकर्मकात्तु परत्वात्पूर्ववत्सन इत्य

उपाद्यमः स्वकरणे॥ ॥इह कस्मान्न भवति। स्वं शाटकं तन्तुप यच्छतीति। अस्वं यदा स्वं करोति तदा
भवितव्यं। यद्येवं स्वीकरण इति प्राप्नोति। विचित्रास्तद्धितवृत्तयः। नातस्तद्धित उत्पद्यते॥ ॥नानोर्ज्ञः॥ अ
नोर्ज्ञः प्रतिषेधे सकर्मकवचनं। अनोर्ज्ञः प्रतिषेधे सकर्मकग्रहणं कर्तव्यं। इह मा भूत्। ओषधस्यानु
जिज्ञासते इति। न वाऽकर्मकस्यान्तरेण विधानात्। न वा कर्तव्यं। किं कारणं। अकर्मकस्यान्तरेण वि
धानात्। अकर्मकाज्जानातेरुत्तरेण योगेनात्मनेपदं विधीयते पूर्ववत्सन इति। प्रतिषेधः पूर्वस्य
चापूर्वस्य चायं प्रतिषेधः स च सकर्मकार्थ आरंभः। कथं पुनर्ज्ञायते पूर्वस्यायं प्रतिषेध इति। अ
नन्तरस्य विधिर्वा भवति प्रतिषेधो वेति। कथं पुनर्ज्ञायते सकर्मकार्थ आरंभ इति। अकर्मकाज्जा
नातेः सन आत्मनेपदवचने प्रयोजनं नास्तीति कृत्वा सकर्मकार्थो विज्ञायते॥ ॥शदेः शितः॥ ॥शदेः
शितः परस्मैपदाश्रयत्वादात्मनेपदाभावः। शदेः शितः परस्मै पदाश्रयत्वादात्मनेपदस्याभावः।
शीयते शीयेते॥॥

नेन॥ ॥शदेः शितः॥ ॥शदेः शितीति। शिद्धिकरणोऽस्मन्तेः पूर्वमात्मनेपदनिमित्ताभावाच्छेषत्वात्परस्मैपदेन भाव्यं। तत्र कृते
शित्वसमये नानेन विहितं परस्मैपदं निवर्त्यं पितलुङ्शाकाद्युत्पन्नप्रतिपादकत्वलक्षणमप्रमाणमप्यन्तस्य स्त्वत्रस्य आप्तं॥

भा॰कै॰ किं च भो इति। सार्वधातुकसंज्ञाप्रवृत्तेन शितो विधानं न परस्मैपदसंज्ञाप्रवृत्तेन। न खल्विति। सामर्थ्यादिति भावः। कः पुनरिति। समस्तमेवात्मनेपद
प्रकरणं महावाक्यं नियमार्थं। तत्र नियमेनादेशेषु कृतेषु शिति विकरणे कृते नियमोयं प्रवर्त्तते। शब्दः शित एव न तु शास्त्रस्यती। स्यादपि भावः। एव

किं च भोः शब्दः शित्परस्मैपदेष्विष्यते न खलु परस्मैपदेष्विष्यते परस्मैपदेष्वेव तु विज्ञायते। कथं। अनु-
दात्तङित आत्मनेपदं भावकर्मणोरात्मनेपदमिष्यते शेषायोगाद्युक्ता शेषात्कर्त्तरि परस्मैपदमिष्यते
एवं च न परस्मैपदेष्विष्यते परस्मैपदेष्वेव विज्ञायते। कः पुनरर्हत्येतौ योगावुक्त्वा शेषात्कर्त्तरि परस्मै-
पदं वक्तुं। किं तर्हि। अविशेषेण सर्वमात्मनेपदप्रकरणमनुक्रम्य शेषात्कर्त्तरि परस्मैपदमित्युच्यते।
एवमपि परस्मैपदाश्रयो भवति। कथं। इदं तावदयं प्रष्टव्यः यदीदं नोच्येत किमिह स्यादिति। परस्मै-
पदमित्याह। परस्मैपदमिति चेत् परस्मैपदाश्रयोयं भवति। सिद्धं तु लडादीनामात्मनेपदवचनात्।
सिद्धमेतत्। कथं। शब्दे लडादीनामात्मनेपदं भवतीति वक्तव्यं। सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमे-
वास्तु। ननु चोक्तं शब्दः शितः परस्मैपदाश्रयत्वादात्मनेपदाभाव इति। नैष दोषः। शित इति नैषा पंच-
मी। का तर्हि। संबंधषष्ठी। शितो यः शब्दः कश्च शितः। शब्दः प्रकृतिः। शब्दः शित्प्रकृतेरिति। अथ वा नायं शब्दः शि-

मपीति। यद्यपि तावत्पर्यालोचनेन प्रकरणस्य नियमार्थत्वं तथाप्येकैकसूत्रार्थपर्यालोचनकालेऽलब्धां न इति। न च शब्दः शिदस्ति। एवं वि-
तरव्यापारसंभवाद्विध्यर्थता संभवत्येव। अनन्तरं भेद्येषपक्षेपादारम्भे तत्र तङारात् लडादीनामिति। आदिशब्दः प्रकारे। ये तु शितामाव्यं ते
लडादयः शित्प्रकृतेरिति। योग्यतया शित्प्रकृतित्वमाश्रित्य प्रागेव शितुत्पत्तेरात्मनेपदं विधीयते। शिद्विषयादिति। शिद्विषयतामुद्दिश्यैव शित्प्रकृतेनाभिधीयते॥

शिवः

१०

नि॰

अथवेति। प्रकरणं नियमार्थं। तत्र नियमात् सर्वमात्मनेपदेन परस्मैपदान्यनियमेन प्रसक्तानि तत्रैतत्स्यात् आरंभसामर्थ्यात् सर्वे विकरणाः प्रव-
र्त्तन्ते पश्चाच्छित एव शदेरात्मनेपदमिति नियमः। न्यविशन्तेति। ननु विकरणेभ्यो नियमो बलीयानिति प्रागेव विकरणोत्पत्तेर्नियमेन

अथवा यद्यपि तावदेतदन्यत्र भवति विकरणेभ्यो नियमो बलीयानिति। इह तन्नास्ति। विकरणो हीहाम्ना-
यते शित इति। उपसर्गपूर्वनियमेऽड्व्यवाय उपसंख्यानं। उपसर्गपूर्वनियमेऽड्व्यवाय उपसंख्या-
नं कर्त्तव्यं। न्यविशत व्यक्रीणीत। किं पुनः कारणं न सिध्यति। अटा व्यवहितत्वात्। ननु चायमड् धातु-
भक्तो धातुग्रहणेन ग्रहीष्यते। न सिध्यति। अंगस्याडुच्यते न विकरणान्तेनांगं। सोऽसौ संघातभक्तो न श-
क्यो धातुग्रहणेन ग्रहीतुं। एवं तर्हीदमिह संप्रधार्यं अट् क्रियतां विकरण इति। किमत्र कर्त्तव्यं। परत्वा-
दडागमः। नित्या विकरणाः। कृतेऽप्यटि प्राप्नुवन्त्यकृतेऽपि। अडपि नित्यः। कृतेष्वपि विकरणेषु प्राप्नो-
त्यकृतेष्वपि प्राप्नोति। अनित्योऽट्। अन्यस्य कृतेषु विकरणेषु प्राप्नोत्यन्यस्याकृतेषु। शब्दान्तरस्य च प्राप्नुवन्वि-
धिरनित्यो भवति। एवं तर्हीदमिह संप्रधार्यं। अट् क्रियतां लादेश इति। किमत्र कर्त्तव्यं। परत्वादडागमः
नित्यो लादेशः। कृतेऽप्यटि प्राप्नोत्यकृतेऽपि प्राप्नोति। नित्यत्वाल्लादेशे कृत आत्मनेपद एवाडागमो भविष्यति॥

भाव्यं ततो नियमात् सर्वे विकरणाः ततोऽडागम इति किं वार्त्तिकेनोच्यते। एतदनभिप्रेत्येतदुक्तं। शब्दान्तरस्येति। विकरणाः खलु शब्दान्तरादपि
प्राप्नुवन्तो नानित्याः। कृतेऽप्यटीति। धातुभक्तत्वादटस्तद्ग्रहणेन ग्रहणे च व्यवधानाभावात्। अडागमस्त्वनित्यः। स हि लादेशेषु कृतेषु विकरणेषु नि-
मित्तत्वात्प्रतिबध्यते। विकरणेष्वकृतेषु शब्दान्तरप्राप्त्या अनित्यः॥

नापिलादेशाश्रयेन नियमो गच्छेदिति भावः॥५॥

नित्यनिमित्तत्वादिति। कृतेपि लादेशे स्थानिवद्भावाल्लुङादिव्यपदेशोस्त्येवेति प्रदर्शनार्थं निमित्तग्रहणमुपात्तं। यद्यपि लादेशे कृते विकरणेन नित्यत्वादट् बाध्यते तथापि यस्य लक्षणांतरेण निमित्तं विहन्यते तन्न तदनित्यं। तत्रोभयोर्नित्ययोः परत्वादट् प्राप्नोति। ननु भवतु परत्वादडागमः तस्य कृतत्वाल्लुङ्क त्वादव्यवधायकत्वात्तिप्यत्वात्मनेपदं नैवापेक्षः। तत्र यत्नांतरंगत्वाल्लादेशेषु कृतेषु नियमात्पूर्वं नित्यत्वाद्विकरणेषु कृतेषु अडागमो विकर णांतभक्तत्वादुक्तो व्यवधायक इति स्यादिभ्यः परे विप्रतिषेधादयो नितरां तरान संभवंती लनेपदप्रसंग इत्येवं भाष्यचोद्यं व्यवस्थाप्यते। अंतरंगस्त्वहीति।

नित्यत्वाल्लादेशस्यात्मनेपदेऽडागम इति चेदटो नित्यनिमित्तत्वादात्मनेपदाभावः। नित्यत्वाल्लादेशस्यात्मनेपदेऽडागम इति चेदेवमुच्यते अडपि नित्यनिमित्तः। कृतेपि लादेशे प्राप्नोत्यकृतेपि प्राप्नोति। अटो नित्यनिमित्तत्वादात्मनेपदस्याभावः। तस्मादुपसंख्यानं। तस्मादुपसंख्यानं कर्त्तव्यं। अंतरंगस्तर्हि लादेशः। नैतद्विवदामहेंऽतरंगोनांतरंग इति। अस्त्वयं नित्यश्चांतरंगश्च। तत्र खलु लादेशे त्रीणि कार्याणि प्राप्नुवंति। विकरणः अडागमः नियम इति। तद्यदि सर्वतो नियमो लभ्येत कृतं स्यात्। तत्तु न लभ्यं। अथापि ×युगपत्× विकरणादडिति अट्लभ्येत। एवमपि कृतं स्यात्। तत्तु न लभ्यं। किं कारणं। आंगात्पूर्वं विकरणैः भवितव्यः॥ तत्र तेऽंतरंगत्वाद्येवमर्थ्यम्॥

लकारमात्रापेक्षत्वात्। अडागमस्तु लकारविशेषापेक्षत्वाद्बहिरंगः। नैतदिति। न लादेशेन सहास्प्रधारणात् किंतु नियमेन सहेति भावः। तत्तु न लभ्यमिति। ननु पूर्वमेव ज्ञापकादधिकरणे यो नियमस्य बलीयस्त्वं साधितं तत्किमुच्यते लभ्यं नलभ्यमिति। उच्यते। अन्यथापि तज्ज्ञापकं समर्थयितुं शक्यते। कृतेपि विकरणे न व्यवधायक इति। यद्येवं नित्य एव नियमः। नैतदस्ति। यत्र केवलो विकरणो व्यवधायकस्तत्र न भवतु भिन्नो नियमः यथा निर्वेक्ष्यते निविश इति। यत्र तु विकरणे कृतेऽडागमस्तत्राटो व्यवधायकत्वान्नियमेन प्राप्नोति। तत्र इति। अत्र पूर्वं निर्विशतीति रूपं न सिध्यति॥ शिवः ११

आट्कृत इति। आटश्चेति रद्धिरेकादेशं प्राप्नोति ऋच्छि भावश्च। तत्र वर्णमात्राश्रयत्वादेकादेशोऽन्तरंगः। नानाश्रयत्वाच्च वार्णादांगं बलीय इति नास्ति। तत्र श्चैकादेशे कृते तस्यादिवद्भावादृच्छिभावः प्राप्नोति। तत्र ऋच्छ दिति स्यात् ऌवाच्छदिति। ननु चेति। यत्सवत्प्रवृत्तस्याकार्यमित्रशास्त्रे संभवतीति भावः। यत्ताव दिति। तरतहलत्वानित्यमित्वं विकरणास्तु नित्य इति स एव प्रवर्त्तते। यत्रत्विति। यथान रतीति। अस्त्वआडिति। परत्वादृच्छिना भाव्यं अभ्युपगम्य | अत एव तस्य पुनःपुनः स्तन पानेप्रवर्त्तते।

अडाड्भ्यामप्यन्यदांगं पूर्वमेषितव्यं उपार्च्छदित्येवमर्थं। तत्र ध्याटिकृते साट्कस्य [redacted] ऋच्छिभावः प्राप्नोति। ननु च ऋच्छिभावे कृते शब्दांतरस्याकृत आडिति कृत्वा पुनराड्भविष्यति। पुनर्ऋच्छिभावः पुनराडिति च क्रकमव्यवस्था प्राप्नोति। नैष दोषः। यत्तावदुच्यते। आंगात्पूर्वं विकरणा एषितव्याः तरतितरंतीत्येवमर्थमिति। भवेत्सिद्धं यत्र विकरणा नित्याः आंगमनित्यं तत्रांगात्पूर्वं विकरणाः स्युः। यत्र तु खलु भयं नित्यं परत्वात्तत्रांगं तावद्भवतीयदप्युच्यते। अडाड्भ्यामप्यन्यदांगं पूर्वमेषितव्यं उपार्च्छदित्येवमर्थमिति। अस्त्वत्राट् आटिकृते साट्कस्य ऋच्छिभावः। ऋच्छिभावे कृते शब्दांतरस्याकृत आडिति कृत्वा पुनराड्भविष्यति। ननु चोक्तं पुनर्ऋच्छिभावः पुनराडिति चक्रकमव्यवस्था प्रा प्नोतीति। नैष दोषः। चक्रके ह्यव्यवस्था। अ पवाने इति। नैषा पंचमी का तर्हि विशेषणषष्ठी नेर्यां विशिः कथ्यं नेर्वि [redacted] शिः विशेष्यः व्यवहितश्चापि

वादेनत्वेतदुच्यते। चक्रके हीति। व्यवस्थाकारिणः शास्त्रेण भाव्यमित्यव्यवस्थाहेतुः पुनःप्रवृत्तिर्न भविष्यतीत्यर्थः। तदेवं स्थितमेतदंतरंगत्वाल्लादेशेषु कृतेषु परत्वादडागमः। न चायं न्यायः शब्दांतरस्य प्राप्नुवन्विधिरनित्यो भवतीति न त्वशब्दांतरादिति यतो ऽडागमस्यानित्यत्वं स्यात् विकरणस्य नित्यत्वं स्यात् कृतप्रसंगित्वात्तु द्वयोरपि नित्यत्वं। अंगत्वात्कृत्स्नाश्रयणाद्धनास्तिशब्दांतरप्राप्तिरुट्। नेर्यां विशिरिति। व्यवहितश्चाप्यर्थद्वारेण विशेष्यत्वात्संबंधोऽभ

सा॰कौ॰ अथ वेति। नेर्विशः इत्यस्य अयमर्थः। निशब्दात्परस्मात् आत्मनेपदं तं विशब्दं वयं पदं स्यात् प्रभवतीति सत्यव्यङ्गमनेः पदम् नं तस्मै वेति दोषाभावः। विशिरपीति। विशिशब्देन विशब्दवयवः समुदाय उपचारादभिधीयते। पदविधिश्चेति। न्यायप्राप्तार्थानुवादोयं न त्वेन तत्कृते उपयुज्यते इत्याकृ॥ ॥पूर्ववत्सनः॥ ॥पूर्वश ब्दः संबन्धिशब्दत्वाद् अवधिमपेक्षते तत्र को वावधिरभिप्रेत इति पृच्छति। किमिदमिति। ये प्रकृति। योगस्येभ्यो धातुभ्यो विधानात्तद्योगेभ्यो विहितानि सूच्यन्ते पक्षद्वयेपि तेन तुल्यमिति तत्तीयांता इति। अत्र चपंचम्यंतात् लक्षणाभावात् तुल्यार्थे वैरिति विहितात्तीया सर्वविभक्त्यर्थानं तर्भावयतीति पंचम्यर्थ

अथवा निरपि पदं विशिरपि पदं। पदविधिश्च समर्थानां। व्यवहितेपि सामर्थ्यं भवति। ।।पूर्ववत्सनः॥

किमिदं पूर्वग्रहणं सनपेक्षं प्राकू सनो येभ्य आत्मनेपदमु[illegible]क्तं तेभ्यः सन्नंतेभ्योपि भवतीति आहो

स्वित् योगापेक्षं। प्राग् एतस्माद्योगाद् येभ्यो योगेभ्य आत्मनेपदमुक्तं तेभ्यः सन्नंतेभ्योपि भवतीति। किं चातः। यदि सनपेक्षं निमित्तमविशेषितं भवति पूर्ववत्सनः न ज्ञायते किमंतात् भवितव्यमिति। अथ योगा

पेक्षमुत्तरत्र विधिर्न प्रकल्पेत अनुनुसते उपसुयुक्षत इति। यथेच्छसि तथास्तु। अस्तु तावत्सनपेक्षं

ननु चोक्तं निमित्तमविशेषितं भवतीति। निमित्तं च विशेषितं। कथं। सनन्तेवात्र निमित्तत्वेनापेक्षि

ष्यामहे। पूर्ववत्सन आत्मनेपदं भवति कुतः। सन इति। अथवा पुनरस्तु योगापेक्षं। ननु चोक्तमुत्तरत्र शिवः

स्यात्रग्रहणमनुपपन्नमेव। यथा ब्राह्मणवद्वैश्यादधीते ब्राह्मणादिव वैश्यादधीत इत्यर्थः। वैश्या॰ पादानकस्या[illegible] ध्ययनस्य ब्राह्मणपादानमध्ययनमनु

पमानं। तत्र च ब्राह्मणशब्दो वर्तते तेन ब्राह्मणेन तुल्यं वैश्यादधीत इति तृतीयान्ताद्वतिरेवमिहापि पूर्ववदिति द्रष्टव्यं। किमंतादिति। ततस्त्वाप्रति १२

पत्तिः स्यात्। यदि नामात्मनेपदनियमविधानसामर्थ्यादनेन सर्वधातुभ्य आत्मनेपदं भवतीत्येतल्लभ्यते विषयविभागस्तु न ज्ञायेतेति भावः

।सनमेवेति। प्रत्यासत्तेरिति भावः॥ ॥६॥

उत्तरत्रापीति। उत्तरेषु वाक्येषु वाक्यभेदेन पूर्ववत्सन इत्येतत्संबध्यते। आपाभ्यां पुङ्क्ते आत्मनेपदं भवति। ततः पूर्ववत्सन इति। किमर्थमिति। विधिनिषे

विधिश्च प्रक्लृप्तः। कथं। उत्तरत्रापि पूर्ववत्सन इत्येवानुवर्तिष्यते। किमर्थं पुनरिदमुच्यते पूर्ववत्सन इति।
शदिम्रियत्यर्थं। शदिम्रियत्यर्थोयमारम्भः। शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं मा भूदिति। इतरथा हि ता
भ्यां सन्नन्ताभ्यामात्मनेपदप्रतिषेधः। इतरथा हि अनुच्यमानेस्मिन् शदिम्रियतिभ्यामात्मनेपदस्य प्र
तिषेधो वक्तव्यः स्यात्। शिशत्सति। मुमूर्षति। कथं पुनः पूर्ववत्सन इत्यनेन शदिम्रियतिभ्यामात्मनेपदस्य
प्रतिषेधः शक्यो विज्ञातुं। वतिनिर्देशोयं। कामचारश्च वतिनिर्देशे वाक्यशेषं समर्थयितुं। तद्यथा। उशीनर
वन्मद्रेषु यवाः संति न संतीति। मातृवदस्याः कलाः संति न संतीति। एवमिहापि पूर्ववद्भवति न भवतीति। न
भवतीत्येवं वाक्यशेषं समर्थयिष्यामहे। यथा पूर्वयोर्योगयोः सन्नन्ताभ्यामात्मनेपदं न भवति एवमि
हापि शदिम्रियतिभ्यामात्मनेपदं न भवतीति। यदि तर्हि शदिम्रिय== त्यर्थोयमारम्भः। विधिर्न प्रकल्पते
आसिसिषते। शिशयिषते। अथ विध्यर्थः। शदिम्रियतिभ्यां सन्नन्ताभ्यामात्मनेपदं प्राप्नोति। यथेष्टसि
तथा स्यात्। अस्तु तावत्प्रतिषेधार्थः। ननु चोक्तं विधिर्न प्रकल्पत इति। विधिश्च प्रक्लृप्तः। कथं। एतदेव ज्ञापय
ति सन्नन्तादात्मनेपदं भवतीति। यदयं शदिम्रियतिभ्यां स

धोभयपक्षसंभवात्प्रश्नः। यथा पूर्वयोरिति। ज्ञाश्रुस्मृदृशां सनः। नानोर्ज्ञः। प्रत्याङ्भ्यां श्रुव इत्येतयोः। इ
ह च शदिम्रियती अनुवर्तेते इति भावः। यथेष्टसीति। निषेधपक्षे निषेधात्पूर्ववद्विधिरनुमीयते। विधिपक्षे शदिम्रियत्योः सन्नोनेसल्लकारलानावि
ध्यति।

मा॰ कै॰ एवं च कृत्वेति। द्वितीयसन्ग्रहणस्यैतन्नुवृत्त्येति भावः। न च शदेरेवेति। सामग्र्याः कारणत्वं न केवलस्य शदेः सा चेह सामग्री नास्ति सनः पूर्वस्य शदेः शितोऽ
भावात्। अत्रापीति। शिता विशेष्यमाणत्वाच्छदेरेव प्राधान्यात् प्रयतते इति। म्रियतेर्ङित्वात्सर्वत्र सन इति सन्नन्तात्प्राप्नोत्येवेति भावः। अत्रापीति। म्रि

अथवा पुनरस्तु विध्यर्थः। ननु चोक्तं शदेर्म्रियतेश्चान्यां सन्नन्ताभ्यामात्मनेपदं प्राप्नोतीति। नैष दोषः। प्रकृ
तं सनोमेत्यनुवर्त्तिष्यते। क्व प्रकृतं। ज्ञाश्रुस्मृदृशां सनः। नानोर्ज्ञः। सकर्मकात्सनो न भवति। प्रत्याङ्भ्यां श्रुवः।
सनो नानाः शदेः शितः सनो न। म्रियतेर्लुङ्लिङोश्च सनो नेति। इदानीं पूर्ववत्सन इति सन इत्यनुवर्त्तते नेति
निवृत्तं। एवं च कृत्वा सोप्यदोषो भवति यदुक्तं निमित्तमविशेषितं भवतीति। नैव वा पुनरत्र शदेर्म्रियतेश्चा
मात्मनेपदं प्राप्नोति। किं कारणं। शदेः शित इत्युच्यते। न च शदेरेवात्मनेपदस्य निमित्तं। किं तर्हि शिदपि नि
मित्तं। अत्रापि शदेरेव। शित्परस्तु निमित्तं। न चायं सन्परः शित्परो भवति। यत्र तर्हि शिन्नाश्रीयते। म्रिय
तेर्लुङ्लिङोश्चेति। अत्रापि न म्रियतेरेवात्मनेपदनिमित्तं। किं तर्हि लुङ्लिङावपि निमित्तं। अत्रापि म्रि
यतेरेव। लुङ्लिङ्परस्तु निमित्तं। न चायं सन्परः लुङ्लिङ्परो भवति। किं पुनः पूर्वस्य यदात्मनेपदं दृ शिवः
ष्टं न तत्सन्नन्तस्यातिदिश्यते। एवं भवितुमर्हति। पूर्वस्यात्मनेपदं दृष्टं नानुपादिष्वप्रसिद्धिः। सन्नन्तादात्म

यतेर्लुङ्लिङोश्चेति नियमार्थमारब्धमिति भावः। किं पुनरिति। किमयं कार्यातिदेशः यथा पूर्वस्मादात्मनेपदं विधीयते तथा सन्नन्तादपीति। आहो १३
स्विन्निमित्तातिदेशः पूर्वस्य यन्निमित्तं ङित्वादि तत्सन्नन्तस्यातिदिश्यते। निमित्ते चातिदिष्टे तद्युक्तत्वादेव कार्यं भवतीति प्रश्नः॥ ॥श्रीः॥ रामजीय॥

न ह्येतेभ्य इति। नित्यसनविषयत्वात्। ज्ञानादिष्विति। अनुपराभ्यां कृञ इत्यनेन परस्मैपदमेव विधीयते न लुङ्निवृत्तिर्निवर्त्यते। पूर्वकार्यत्वमिति दिश्यमाने अ
त्र दोषाभावः। परस्मैपदेनात्मनेपदस्य बाधितत्वात्। पूर्वस्यात्मनेपदकार्यादर्शनात्सन्नंतस्याप्रसंगात्। अनुबंधेति। तत्सामर्थ्यात्सन्व्यवधाय

पूर्वस्यात्मनेपददर्शनात्सन्नंतादात्मनेपदं भवतीति चेज्जुपादिषु प्रसिद्धिः। गुपादीनां न प्राप्नोति। जुगुप्स
ते मीमांसत इति। न ह्येतेभ्यः प्राक्सन आत्मनेपदं नापि परस्मैपदं पश्यामः। सिद्धं तु पूर्वस्य लिंगातिदेशात्
सिद्धमेतत्। कथं। पूर्वस्य यदात्मनेपदलिंगं तत्सन्नंतस्यातिदिश्यते। ज्ञानादिषु तु लिंगप्रतिषेधः। ज्ञानादि
षु तु लिंगस्य प्रतिषेधो वक्तव्यः। अनुचिकीर्षति पराचिकीर्षतीति। अस्ति हि प्राक्सनस्तेभ्य आत्मनेपदं
दृष्टं तेभ्यः सन्नंतेभ्योपि भवतीति। ननु चोक्तं पूर्वस्यात्मनेपददर्शनात्सन्नंतादात्मनेप भावइ
ति चेज्जुपादिषु प्रसिद्धिरिति। नैष दोषः। अनुबंधकरणसामर्थ्याद्भविष्यति। अथवा अवयवे कृतं लिंगं स
मुदायस्य विशेषकं भवति। तद्यथा। गोः सक्थनि कर्णे वा कृतं लिंगं समुदायस्य विशेषकं भवति। य
थावयवे कृतं लिंगं समुदायस्य विशेषकं भवति। जुगुप्सपति मीमांसपती। स्यत्रापि प्राप्नोति। नैष दोषः। अ
कस्य
वयवे कृतं लिंगं समुदायस्य विशेषकं भवति यं समुदायं योन व्यभिचरति। सनं च न व्यभिचरति। इमं च
पुनर्व्यभिचरति। तद्यथा। गोः सक्थनि कर्णे वा कृतं लिंगं गोरेव विशेषकं भवति न गोमंडलस्य॥ २॥

कः। अथवेति। समुदाये लिंगासंगस्य उपायः अवयवे लिंगासंगः॥ ॥ श्रीः॥ ॥ रामकृष्णाय नमः॥ श्रीः॥ राम॥ कृष्ण॥ नमः शिवाय॥ रामाय नमः॥

115

भा·के·

प्रत्ययग्रहणमिति। यद्येवमतिप्रसंगः पाणयति पनाययतीति। तत्र केचिदाहुः। पूर्ववत्सणिचकुसन इति प्रत्ययविशेषणमेवं निर्देष्टव्यः। अन्ये

प्रत्ययग्रहणं णिजर्थं। प्रत्ययग्रहणं कर्त्तव्यं पूर्ववत्प्रत्ययादिति वक्तव्यं। किं प्रयोजनं। णिजर्थं। णि
यन्तादपि यथा स्यादिति। आकुस्मयते। विकुस्मयते। हृणीयते महीयते इति। तत्र को दोषः। तत्र हेतुमण्णि
चः प्रतिषेधः। तत्र हेतुमण्णिचः प्रतिषेधो वक्तव्यः। आसयति शाययतीति। सूत्रं च भिद्यते। यथान्यासमे
वास्तु। कथमाकुस्मयते विकुस्मयते। हृणीयते महीयते इति। अनुबंधकरणसामर्थ्याद्भविष्यति। अ
थवा अवयवे कृतं लिंगं समुदायस्य विशेषकं भवति। तद्यथा। गोः सक्थनि कर्णे वा कृतं लिंगं समुदाय
स्य विशेषकं भवति। यद्यवयवे कृतं लिंगं समुदायस्य विशेषकं भवति हृणीयते महीयते। सत्रापि प्रा
प्नोति। अवयवे कृतं लिंगं कस्य समुदायस्य विशेषकं भवति यं समुदायं योऽवयवो न व्यभिचरति। तद्य
था। गोः सक्थनि कर्णे वा कृतं लिंगं गोरेव विशेषकं भवति न गोमण्डलस्य॥ ॥आम्प्रत्ययवत्कृञोऽनु
प्रयोगस्य। कृञ्ग्रहणं किमर्थं। इह मा भूत्। ईहामास ईहामासतुः ईहामासुः। कथं चात्रास्तेरनुप्र
योगो भवति। प्रत्याहारग्रहणं हि तत्र विज्ञायते। कथं पुनर्विज्ञायते तत्र प्रत्याहारग्रहणमिति। इह कृ शिव॥
ञ्ग्रहणात्। इह कस्मान्न प्रत्याहारग्रहणं न भवति। इह च कृञ्ग्रहणात्॥ ×यं कंचन व्यभिचरति णिचं तु व्यभिचरति×५ १७

वाहुः। एवं पाठे भाष्यं वार्त्तिकं च न सारख्यातं भवती। ति हेतुमण्णिचः प्रतिषेध इत्यतिप्रसंगविषयोपलक्षणार्थं हेतुमण्णिज्ग्रहणं॥ ॥आम्प्रत्यय॥ ॥केन

अथेह कस्मादिति। स्वरितञित इत्यनेनेति भावः। ननु संविधानेऽनेनात्मनेपदं विधीयते यथाचया स्यादयः संविधानेन वर्त्तेते तयोरुभयोरपि तद
र्थानुपातीच्च करोतिरप्यत्र विषये संविधानेन वर्त्तत इत्यात्मनेपदस्याप्रसंगः। नैष दोषः। संविधान एवात्र विषये यदोहादयो वर्त्तन्ते शब्दशक्तिस्वाभा
व्यात्तदर्थाभिव्यक्तये यदा करोतिः प्रयुज्यमानः संविधानविषय इति मत्वा चोद्यमनुपन्यस्तं। परिहृतं च पूर्ववत्सूत्रेणानुवृत्त्या वाक्यभेदेन। तत्रैकेन वा

अथेह कस्मान्न भवति। ऊढुं मां चकार। उद्धुं मां चकार। ननु चाम्प्रत्ययवदित्युच्यते न चात्राम्प्रत्ययादात्मनेपदं
पश्यामः। न ब्रूमोनेनेति। किं तर्हि। किं तर्हि स्वरितञितः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवतीति। नैष दो
षः। इदं नियमार्थं भविष्यति। आम्प्रत्ययवदेवेति। यदि नियमार्थं विधिर्न प्रकल्पते। ईहां चक्रे ऊहां चक्रे
इति। विधिश्च प्रसज्येत। कथं पूर्ववदिति वर्त्तते। आम्प्रत्ययवत्पूर्ववच्चेति॥ ॥प्रोपाभ्यां युजेरयज्ञपात्रेषु
स्वराद्युपसर्गादिति वक्तव्यं। उद्युंक्ते अनुयुंक्ते। अपर आह। स्वराद्यन्तोपसर्गादिति वक्तव्यं। प्रयुंक्ते वियुं
क्ते॥ ॥समः क्ष्णुवः॥ ॥किमर्थं विदेशस्थस्य ग्रहणं क्रियते न समो गमादिष्वेवोच्येत। समः क्ष्णुवः सकर्म
कार्थं वचनं। सकर्मकार्थोयमारंभः। अकर्मकादिति तत्रानुवर्त्तते॥ ॥भुजोनवने॥ ॥अनवने कौटिल्य
यामिति वक्तव्यं। इहापि यथा स्यात्। प्रभुंजति वाससी। निभुंजति जानुशिरसी इति। तत्तर्हि वक्तव्यं। न वक्तव्यं
यस्य भुजेरवनमनवनं चार्थस्तस्य ग्र

केन विधिः क्रियते द्वितीयेन नियमः॥ ॥प्रोपाभ्यां॥ ॥स्वराद्यन्तोपसर्गादिति। सम् नि सु दुर् इत्ये
तान्निरस्य सर्वे उपसर्गाः संगृहीताः॥ ॥भुजोनवने॥ ॥यस्य भुजेरिति। संसर्गवद्विप्रयोगो विरोधिता विशेषस्मृतिहेतवः। यथा पदेऽभ्यास पर्यायो धेनुशब्द उपादी
यमानः संसर्गविर्विश्लेषे वत्सापत्ने। सवत्सा धेनुरानीयतां सकिशोरा सकरभा सबर्करेति। एवमपवत्सा अकिशोरा अकरभा अबर्करेति विशेषे
व धेनुः प्रतीयते। यस्मायेन द्रव्यः संसर्गः सेवल प्रहिता॥ नीयते।

णेरणौ॥ ॥एकस्मिन्वाक्ये कर्मांतरानिवृत्तिरत्र प्रयोजनमिति वार्त्तिकारंभः। एकवाक्यतायां ह्ययमर्थः। ण्यंतादात्मनेपदं भवति अण्यंतावस्थायां यत्कर्म ण्यंतावस्थायां यदि स कर्त्ता भवत्याध्यानादन्यत्रेति। भवति च कर्मांतरसंज्ञावत्यणौ कर्मणि कर्त्ता। भाष्यकारस्तु वाक्यभेदमाश्रयेणेममर्थं साधयति। णेरात्मनेपदं भवतीत्येकं वाक्यं। ततोऽणौ यत्कर्मणौ चेदिति द्वितीयं। अत्र वाक्ये यत्तदोर्नित्यसंबंधात्तच्छब्देन तत्तच्छब्द आक्षिप्यते। धर्मांतरस्य चानिर्देशात्कर्मत्वमेव सन्निधानात्प्रतिनिर्दिश्यते। अणौ यत्कर्मणौ चेत्तत्कर्मेति। प्रतिनिर्देशेन च कर्मांतरस्यावृत्तिः क्रियते न त्वणौ कर्मणो णौ कर्मत्वसद्भावः प्रतिपाद्यते। स कर्त्तेति वाक्यांतरेण तस्य कर्तृत्वप्रतिपादनात् युगपदेकक्रियापेक्ष

15 णेरणौ यत्कर्म णौ चेत्स कर्त्ताऽनाध्याने॥ ॥णेरात्मनेपदविधानेऽण्यंतस्य कर्मणस्तत्रोपलब्धेः णेरात्मनेपदविधानेऽण्यंतस्य यत्कर्म यदा ण्यंते तदेव कर्म भवति तदा आत्मनेपदं भवतीति वक्तव्यं। इतरथा हि सर्वप्रसंगः। इतरथा हि सर्वप्रसंगः स्यात्। इहापि प्रसज्येत। आरोहन्ति हस्तिनं हस्तिपकाः आरोहयमाणो हस्ती। स्थलमारोहयति मनुष्यान्। तत्रापि वक्तव्यं। न वक्तव्यं। एवं वक्ष्यामि। णेरात्मनेपदं भवति। ततः अणौ यत्कर्म णौ चेत्। अण्यंते यत्कर्म णौ चेत् णौ यदि तदेव कर्म भवति। ततः स कर्त्ता कर्त्ता चेत्स भवति णाविति॥

दृष्टांतेऽपि दृष्टं। आपाति स्तु स्थलमारोहयतीत्यत्र॥

पाकर्मत्वकर्तृत्वविरोधादेकस्य। यथेष्टं वाक्यशेषपरिकल्पनात् अणौ यत्कर्म णौ चेत्तदेव कर्म स्येवकाराध्याहारः कर्मांतरनिवृत्तिलाभः। ततः स कर्त्तेति तृतीयं वाक्यं। अणौ कर्मणो णौ कर्तृत्वप्रतिपादनपरं। एवमेषां वाक्यानामेकवाक्यत्वमप्यवाक्यत्वस्य संस्कारकं संपद्यते॥ ॥पचेवमिति। यथा लुनाति केदारं देवदत्तः लूयते केदारः स्वयमेवेति केदारः कर्मकर्त्ता तथा ण्यंतेपि भावति लावयते केदारः स्वयमेवेति कथमिति। चेत्॥ उच्यते। लुनाति स्म लावद्विधा भवनोपसर्जने द्विधाभावने वर्त्तते। लुनाति केदारं देवदत्तः। द्विधाभवंतं भावयतीत्यर्थः। यदा तु केदारस्य सौकर्यातिशयविवक्षायां देवदत्तस्य व्यापारो न विवक्ष्यते तदा द्विधाभवनमात्रे लुनातिर्वर्त्तते अनेकार्थत्वाद्धातूनां॥

अकर्मकाणां ... धस्य स्वकृतानुक्तं तेन सकर्मकेष्वपि कर्मवद्भावप्रवर्तनं मन्यमानस्य अकर्मकाणामेवैतदुदाहरणं मन्यमानस्य बाधकदेशिनः प्रश्नः। तथैवाग्रे सिद्धान्ते कैयटे प्रपञ्चितं।

भिन्नाण्वयाधातवो भिन्नार्थाः सारूप्याच्च तत्वाध्यवसाय॥ तत्र द्विधाभवने केदारस्य कर्तृत्वे कर्मवत्कर्मणा तुल्यक्रिय इति कर्मकार्याण्यतिदिश्यन्ते। तेन लूयते केदारः स्वयमेवेत्यादयः प्रयोगा उपपद्यन्ते। अत्रापि स्वयमिति स्वस्य यदा आत्मनेत्यर्थः। तदा आत्मा यः कर्मत्वमस्त्येवेति लूयते केदार इत्येतावदुदाहार्यं। वृत्तिकाराणां तु स्वयमिति वचनं कर्त्रन्तरस्य स्पष्टस्य परं विज्ञेयं। अथवा स्वयमित्यनेन करणत्वमात्मनः प्रतिपाद्यते तेन लु कर्तृत्वं। तत्र यदा द्विधाभवनवृत्तेर्लुनातेर्देवदत्तादिप्रयोजकव्यापारे णिच्युत्पद्यते तदा य एवार्थो लुनाति केदारं देवदत्त इति स एवार्थो लावयति केदारं देवदत्त इति। पुनः केदारस्य सौकर्यातिशयविवक्षायामविवक्षिते देवदत्तस्य व्यापारे द्विधाभवनमात्रवृत्तेर्लावयतेः संपद्यते। ततः स्वय एवार्थो लूयते केदारः स्वयमेवेति स एव लावयते केदारः स्वयमेवेति। न च प्रयोज्यप्रयोजकभावनिवर्तने णिचो निवृत्ति मिदं वक्तव्यं

यद्येवं कर्मकर्तायं भवति तत्र कर्मकर्तृत्वात्सिद्धं। कर्मकर्तृत्वात्सिद्धमिति चेद्यक्चिणोर्निवृत्त्यर्थं चेव नां। कर्मकर्तृत्वात्सिद्धमिति चेत् यक्चिणोर्निवृत्त्यर्थः। कर्मापदिष्टो यक्चिणौ मा भूतामिति। न वा यक्चिणोः प्रतिषेधात्। न वा एष दोषः। किं कारणं। यक्चिणोः प्रतिषेधात्। प्रतिषिध्येते ऽत्र यक्चिणौ। यक्चिणोः प्रतिषेधे हेतुमण्णिश्रिब्रूञामुपसंख्यानमिति॥

वृत्तिः। उपायनिवृत्तावप्युपेयानिवर्तनात्। सिद्धशब्दव्युत्पत्तये हि प्रकृतिप्रत्ययकल्पना आश्रीयते। अर्थस्योपादानं त्यागश्च क्रियते। लौकिके तु व्यवहारे सौकर्यमात्रविवक्षायां लावयते केदार इति प्रयुज्यते। एवं लावलित्तप्रेषणज्ञानोः प्रकृतेर्थे णिजुच्यते इत्येतत्य... प्रायेण कर्मकर्ता व्याख्यातः॥ ॥अपरः कल्पः॥ लुनाति केदारं देवदत्तः। लुनंतं देवदत्तं सौकर्यातिशयात्केदारः प्रयुंक्ते इति केदारव्यापारे णिजुत्पद्यते लावयति केदारो देवदत्तेनेति। पुनः प्रयोज्यप्रयोजकभावाविवक्षायां लावयते केदारः स्वयमेवेति प्रयुज्यते। तत्र पूर्वप्रक्रियाश्रयेण कर्मवत्कर्मणा तुल्यक्रिय इति सिद्धमात्मनेपदं। तथाहि। लावयति केदारं देवदत्त इत्यत्र यस्मिन् लावयतौ धातौ यादृशी कर्मावस्थायां केदारस्य द्विधाभवनलक्षणा क्रिया तस्मिन्नेव धातौ तादृशी कर्त्रवस्थायामिति सिद्धं लावयते केदारः स्वयमेवेति। द्वितीया तु प्रक्रिया स्तत्र

अत्र प्रकृतत्वेणात्मनेपदं न तु न अकर्मकाणां वा ... तिपूर्वपक्षिणोऽभिमानः॥

तथाचेयं सर्वपरस्पुरिकारिस्यष्ठमेन ॥१ इदं च पूर्वकसिद्धेणोभिप्रायवर्णनमात्रं न त्वस्ति न येथे आत्मनेपदमिदं लोरिति हेतुमत्त्वं तस्यैवाग्रहणमिति सिद्धांतयिष्यमाणत्वात् ॥२

भा॰के॰ एतस्मिंल्लारब्धे संभवतीति प्रदर्शनार्थं तु तस्यां कर्मवद्भावः प्राप्नोति। लावयतौ केदारस्य कर्मत्वाभावात् कर्मणा समानधातौ तुल्यक्रियत्वाभावा
द्वा यक्चिणोर्निवृत्यर्थमिति। अणौ यत्कर्म णौ चेत्स कर्त्तानाध्याने आत्मनेपदमेव नान्यदिति नियमार्थमेतदित्यर्थः। उदपुपुछ तपुछ,
16 मिति। कथं पुनरत्राणौ कर्म विद्यते यावता पुछशब्दोऽद्रव्यवचनः। अत्राहुः। अस्मिन्विषये पुच्छशब्दः पुच्छकर्मिकायां उदसनक्रियायां व
णिङ् स्वलिखा र्तते। तस्मात्स्वार्थे णिङ् प्रत्ययः। ततो यदा भ्राम्यमाणं पुच्छं संस्कारवशाच्चक्रमिव भ्रमणक्रियायां भूतायां स्या तं श्रेण विवक्षते त

यस्तर्हि न हेतुमणिचू तदर्थमिदं वक्तव्यं। तस्य कर्मापदिष्टो यक्चिणो माभूतामिति। उदपुपुछ,
तपुच्छं स्वयमेव। अत्रापि यथा भारद्वाजीयाः पठंति तथा भवितव्यं प्रतिषेधेन। यक्चिणोः प्र
तिषेधे णिश्रिग्रंथिब्रूञात्मनेपदाकर्मकाणामुपसंख्यानमिति। स चावश्यं प्रतिषेध आश्रयि
तव्यः। इतरथा हि यत्र नियमस्ततोऽन्यत्र प्रतिषेधः। अनुच्यमाने ह्येतस्मि न्यत्र नियमस्ततोऽन्य
त्र तेन यक्चिणोः प्रतिषेधो वक्तव्यः स्यात्। गणयति गणं गोपालकः। गणयति ग
णः स्वयमेव। आत्मनेपदस्य च। आत्मनेपदस्य च प्रतिषेधो वक्तव्यः। गयेणेति गणः स्वयमेव॥

न एव पुच्छपदं / तत्समवेतक्रि / या परं न केवल / मित्यर्णपं ते प्रयो / गस्य दुर्लतादि / यं पूर्वपरस्पुरिकारि / तिष्ठमिति ॥८

दा उदपुपुछेत्यात्मनेपदमेव णिङंतात् यथा स्यात् इत्येवमर्थमिदं सूत्रं संपद्यते। गणयति गणं इति। गणेनैव कर्मणा ले शिवः
वकर्त्तृत्वस्य नियमस्याव्यापारात्सिद्धौ यत्कर्म चीति वक्तव्य एव प्रतिषेधः। तस्येव च व्यापकत्वात् नार्थोनेनसूत्रेणेत्यर्थः। कथं पुनरत्र
कर्मवद्भावप्राप्तिः यावता कर्मस्थभावकानां कर्मस्थक्रियाणां च कर्मवद्भावो विधीयते। गणनं च संख्यानं तत्कः परिच्छेदो ज्ञानवि १५
शेषः कर्तृस्थे वर्त्तते। नैष दोषः। भागशो व्यवस्थापनेपि गणिर्वर्त्तते। भागशो वतिष्ठमानं गणं गोपालको व्यवस्थापयति। तत्रानुकूलत्वा
द्गणस्यैव कर्त्तृत्वविवक्षायामस्ति कर्मस्थभावकत्वात्कर्मवद्भावः॥

एतेन स्वार्थे णिचि ... आत्मनेपदाभावेन गणयति गण इति सिद्धं । एवं च उदपुपुच्छत इत्यपि ... नतु स्वार्थे णिचि । तत्राप्यात्मनेपदं ... इत्याशयः ॥

आत्मनेपदप्रतिषेधार्थमिति । अणौ कर्त्तृकर्मणो णौ कर्मत्वे आत्मनेपदं यथा स्यात् णौ तु कर्मणो णौ कर्त्तृत्वे नाभूदित्येवमर्थमित्यर्थः । न चैतस्मा
दिति । नित्यत्वात् णिचः केवलानां चुरादीनां प्रयोगाभावादणौ कर्मणो ... संभवाभावादिति हेतुमति णिचि ... प्रतिषेधोप्यणाविति तस्यैव प्रत्या
सत्त्या ... हेतुमण्णौ गणस्य कर्मत्वं हेतुमण्णौ कर्त्तृत्वमिति सूत्रस्यार्थो विषयो भविष्यतीति कथमत्रानेनात्मनेपदं निवार्यते इत्यर्थः ।
इदं तर्हीति । न चानिर्दिष्टविषयः प्रतिषेधः शक्यते विधातुमिति सर्वमेव सूत्रं क्रियते । वनगुल्मस्येति । कर्मोपलक्षणमेतत् । अत्र हि व

हेतुमत्त्वं तस्ये तिप्रेषणात्

आत्मनेपदप्रतिषेधार्थं तु । आत्मनेपदप्रतिषेधार्थमिदं वक्तव्यं । गणयति गणः स्वयमेव । इष्यत ए
वात्मनेपदं । किमिष्यत एव ... इष्यते तत्प्राप्नोति च । कथं । अणाविति कस्येदं ग्रह
णं यस्मात् णेः प्राक् कर्म वा कर्त्ता वा विद्यते । न चैतस्मात् णेः प्राक् कर्म कर्त्ता वा । इदं तर्हि प्रयोजनं । अनाध्यान इ
ति वक्ष्यामीति । इह मा भूत् । स्मरति वनगुल्मस्य कोकिलः । स्मरयत्येनं वनगुल्मः स्वयमेवेति । ए
तदपि नास्ति प्रयोजनं । कर्मोपदिष्टा विधयः कर्मस्थभावकानां कर्मस्थक्रियाणां वा भवंति ।
कर्तृस्थायां । एवं तर्हि सिद्धे यदनाध्यान इति प्रतिषेधं शास्ति तज्ज्ञापयत्याचार्यः भवत्येवंजातीयका

नगुल्मस्य शेषत्वेन विवक्षितत्वात्कर्मत्वाभावः । तस्मात्स्मरति वनगुल्ममिति प्रदर्शनीयं । स्मरयत्येनमिति । एतदप्युपलक्षणं । अत्र हि व
नमपीति कर्मणः सद्भावात् कर्मवत्कर्मणा तुल्यक्रिय इति वचनात् कर्मवद्भावप्राप्तिर्नास्ति । नाप्यनेनात्मनेपदस्याकर्मकात्तरसद्भावात् । तस्मात्त्वे
रयति वनगुल्मः स्वयमेवेति प्रदर्शनीयं । भवत्येवंजातीयकानामपीति । ये धात्वर्थं एतेनां ... कर्मणि ते धात्वर्थतानां ... सकर्त्तातदाकर्त्तृ
स्थभावक्रियत्वेप्यात्मनेपदं ... भवतीत्यर्थः । एवं च अनुवर्तनाभाष्यकारेण सूत्रमेतद् ... मित्यर्थश्चोक्तं भवति । तेनारोहयते हस्ती सा
दावनैवात्मनेपदं सिद्धं भवति । तथाहि । रुहिर्गतिविशेषवचनः इति

इदं पूर्वप ... नेतियत्नेन

(17)

... कर्मत्वेपि ... आत्मनेपदाभावः संगच्छते । ४

यस्मात्सेऽप्याकर्मकर्त्ता वेति भाष्याच्छेत्यपि बोध्यं। तेनन्व प्राकृस्थित कर्मकर्त्रीशरात्मनेपदोपयोगित्वं बोध्यते न च कर्तृकर्माणि तिस्तिक कर्मभावबोधने संगच्छते इत्याहुः। १२ भागवृत्तिकारस्य दयाः १

भा॰के॰ यद्वितु परस्मैपदं सी स्यत्र भाष्यकारो वक्ष्यति। एवंच कर्तृस्थक्रियत्वान्नास्त्यत्र कर्मवद्भावः। एवं चारुह्यते हस्ती स्वयमेवेति येऽकर्मवद्भावं प्रदर्शयं
तितेऽन्यायं भाष्यं च बाधमाना अवधीरणीयाः। न चाहि। विशेषदर्शनं यत्र क्रिया तत्र व्यवस्थिता। क्रियाव्यवस्था त्वन्येषां शब्दैरेव प्रकल्पितेति। वि
शेषदर्शनेन शास्त्रार्थानुसारेणैवात्मस्थं कथ्यते क्रियायाः। एतच्च कारणद्वयमारोहणस्य कर्तृस्थतां प्रतिपादयति न कर्मस्थतां। तथाहि।
हस्तिनमारोहति। हस्ती समारोहति पर्वतमारोहति सोपाने कर्मभेदेऽपि नारोहणरूपभेदः प्रतीयते। न चैतेषु प्रयोगेषु क्रियाकृतः कर्मणि क
श्चिद्विशेषो दृश्यते। धातुना च कर्तृगतैव क्रिया प्रतिपाद्यते न कर्मगता। केवलं कर्मणः कारकत्वादवश्यं क्रियया भाव्यमिति क्रियानु
मीयते। सर्वाणि हि कारकाणि स्वं स्वं व्यापारमनुतिष्ठन्ति प्रधानक्रियां संपादयन्ति। बहुवक्तव्यमस्त्यायमर्थः। किंचित्तु प्रकृतोपयोगि

किमेतस्य ज्ञापने प्रयोजनं। पश्यन्ति भृत्या राजानं। दर्शयते भृत्यान् राजा। अत्रात्मनेपदं सिद्धं भवति। आ
त्मनः कर्मत्वे प्रतिषेधः। आत्मनः कर्मत्वे प्रतिषेधो वक्तव्यः। हन्त्यात्मानं। घातयत्यात्मा इति। स तर्हि वक्त
व्यः। न वा ण्यन्तेऽन्यस्य कर्तृत्वात्। न वा वक्तव्यः। किं कारणं। ण्यन्तेऽन्यस्य कर्तृत्वात्। अन्यद्धि ण्यन्ते कर्म
17 अन्यो ण्यन्तस्य कर्ता। कथं। द्वावात्मानौ। अंतरात्मा शरीरात्मा च। अंतरात्मा तत्कर्म करोति येन शरीरात्मा
दुःखमिति प्रकृतमनुसरामः। दर्शयते भृत्यान् राजेति। ननु क सुखदुःखेऽनुभवति। शरीरात्मा तत्कर्म करोति येनांतरात्मा सुखदुः

र्मान्तरसद्भावादात्मनेपदेन न भाव्यं। उच्यते। अस्मादेवोदाहरणाद्भाष्यकारस्यायमभिप्राय ऊह्यते। ण्यन्तावस्थायां यत्कर्तृकर्मणी न तयोरि
क्तकर्मान्तरसद्भावे आत्मनेपदं न भवति यथा स्थलमारोहयति मनुष्यानिति। एवं ण्यावस्थायां कर्तृणां तस्यानां णौ कर्मत्वमिति भवत्येवा शिवः
त्मनेपदं। एवं च स्मरयत्येनं वनगुल्मः स्वयमेवेति कोकिलकर्मत्वेऽपि प्रत्युदाहरणं युज्यते। आत्मनः कर्मत्वे इति। यदेकमेव वस्तु बुध्याविभ
सा३ ज्यकर्मत्वेन च विवक्ष्यते तत्र प्रतिषेध इत्यर्थः। न वेति। वस्तुत एवात्र भेदेन लौकिकस्यैव कर्मत्वं कर्तृत्वं चेत्यर्थः। अंतरात्मेति। सांख्यपक्षेऽन्तःकर १७
णमंतरात्मा तस्यैव कर्तृत्वसंभवात्पुरुषस्याकर्तृत्वात्। नैयायिकानां तु मते पुरुषस्य कर्तृत्वात्स एवान्तरात्मा विवक्षितः। शरीरात्मा सु
खदुःखे इति। शरीरस्याचेतनत्वात्सुखदुःखाभ्यां शरीरं संबध्यत इति व्याख्येयं॥

एवं वाच्यात्मेति तत्प्रेषणे द्वितीयकक्षायां आत्मनेपदं भवतीति सिद्धांतितं। दर्शयते ... तु कर्मकर्तृत्वाभिसंधिमित्युक्त्वा आकर्मकात्पेयोदाहरणानीति वदन्नेतेन परास्तः।

स्वरितञितः॥ इदमात्मनेपदं संविधानेन कृञिभ्यो धातुभ्यो [redacted] भवतीति केचिद्याचक्षते। पचते पाचयतीत्यर्थः। यजते याजयतीत्यर्थः। अनेका
र्थत्वाद्धातूनां प्रकृतिरेव यदा संविधानेनार्थान्तरमात्मनेपदं संभवतीति। यदा तु प्रकृत्यानभिहितं संविधानं तदा तदभिधानाय णिजु
त्पद्यते पाचयतीति। यदा णिच् श्रूयते एवं तदात्मनेपदं भव[ ]तीति तदा द्वितीये संविधाने एवं तस्य वृत्तिः परिकल्प्यते [redacted] याजयतीति याजयते इ
ति। कर्त्रभिप्राये क्रियाफल इत्यनेन संविधानलक्षण एव क्रियाविशेष उपलक्ष्यते श्रीणीध्व पचस्व सेधते चिनुत इति च शिष्टप्रयोगे गुणपर्यो
यागम्यते। स्वरितञित एव संविधाने [redacted] शब्दगन्धिस्त्वाभाव्याद्वृत्तेः तेनान्ये धातव इति स्वरितञिद्ग्रहणं भाष्ये प्रत्याख्यातं। अत्यल्पाकुः॥
स्वार्थयः क्रियामारभते तेनात्मनेपदं परार्थारम्भे तु परस्मैपदं। सा च स्वार्थपरार्थता विवक्षानिमित्ता लोकिके प्रयोगे स्वरितञिद्विषये स्य

स्वरितञितः कर्त्रभिप्राये क्रियाफले॥ स्वरितञित इति किमर्थं। याति वाति द्राति प्साति। स्वरि
तञित इति शक्यमकर्तुं। कस्मान्न भवति। याति वाति द्राति प्सा नीति। कर्त्रभिप्राय इत्युच्यते। स
र्वेषां च कर्त्रभिप्रायं क्रियाफलमस्ति। त एवं विज्ञास्यामः। येषां कर्त्रभिप्रायमकर्त्रभिप्रायं
च क्रियाफलमस्ति तेभ्य आत्मनेपदं भवतीति। न चैतेषां कर्त्रभिप्रायं चाकर्त्रभिप्रायं क्रिया
फलमस्ति॥

अपि पक्षे स्वरितञिद्ग्रहणस्य प्रत्याख्यानं। एवं पञ्चभिर्हेतुभिः कृषतीति विभाषोपपदेन प्रतीयमान इति पक्षे आत्मनेपदाभावः। स्वा
मिदासोपयत इति क्रियामात्रविवक्षायां परस्मैपदं। यदा तु स्वामिगतो धर्मो दासभावेऽप्यतरतदा स्वामिदासोपचते इति आत्मनेपदं संभवत्येवास
र्वेषां चेति। सर्वत्र संविधानस्य सत्त्वात्सर्वत्र च स्वार्थानुष्ठानसंभवादिति भावः। येषामिति। संभवव्यभिचारे च सति प्रकारान्तरव्यवच्छेदेन विशि
ष्टप्रकारे कार्यविधानाय विशेषनिर्देशः क्रियत इति भावः। न चैतेषामिति। यात्यादयः संविधानेव[ ]र्त्तितुं न शक्नुवन्तीत्यर्थः। अथवा स्वाभिधे
मात्रवृत्तयो यात्यादयः नैषां स्वार्थताविशिष्टक्रियावाचित्वसंभवः॥

मा.के.

तथाजातीयकाइति।प्रकारमात्रेपालंबिधाय प्रकारवतिजातीयरुविहितः।अर्थेति।कर्त्तारमेतिप्राप्नोतीतिकर्त्री[redacted]यमितितिसिध्यत्येवविक्षितोऽर्थः।इतिप्रश्नः।यमेवेति।केचिदाहुः।वर्त्तमानकालविवक्षास्यादितितदयुक्तं।कालसामान्ये।ऽविधानात्।तस्माद्यमर्थः।द्विविधंयागादिफलं।दृष्टंअन्नपुत्रवृष्टिशत्रुवधादिकं।अदृष्टंस्वर्गादि।तत्रपूर्वंप्रत्यासन्नमवश्यंभावीतिप्रधानं।इतरत्तुविधुरप्रत्ययोपनि

तथाजातीयकाःखल्वाचार्येणस्वरितञितःपठिताः।येउभयवंतः।ये[redacted]यांकर्त्रभिप्रायमकर्त्रभिप्रायंचक्रियाफलमस्ति।अपाभिप्रायग्रहणंकिमर्थं।स्वरितञितःकर्त्रा[redacted]येक्रियाफलइतीयत्युच्यमानेयमेवसंप्रत्ययेति।क्रियाफलंतत्रैव[redacted]स्यात्।लूञ्लुनीते।पूञ्पुनीते।इहनस्यात्।यजतेवपते।अभिप्रायग्रहणेपुनःक्रियमाणेनदोषोभवति।आभिराभिमुख्यप्रत्यादिकर्मणितेनयंचाभिप्रैतियंचाभिप्रेप्सतियंचाभिप्रागात्तत्रसर्वत्राभिमुख्यसिद्धंभवति।कर्त्रभिप्रायेक्रियाफलेइतिकिमर्थं।पचंतिभक्तकराः।कुर्वंतिकर्मकराः।यजंतियाजकाः।कर्त्रभिप्रायेक्रियाफलइत्युच्यमानेपिप्राप्नोति।अत्रापिक्रियाकर्त्तारमभिप्रैति।याजकायजंतिगालप्स्यामहइति।कर्म

पातसंभवे।व्यभिचारसंभवाद्विप्रकृष्टत्वाच्चाप्रधानमितित

स्यहणंनस्यात्।अभिप्रग्रहणात्तुतस्यापिग्रहणं।आभिमुख्यंफलस्ययदाकर्त्ताबुध्याव्यवस्यतिक्रियारंभेतदाआत्मनेपदमिसयमर्थोभिप्रग्रहणे।सतिलभ्यते।वपतइति।केशश्मश्रुवपतइत्या[illegible]त्रेवासन्नेफलेस्यात्।धान्यंवपतइत्यत्रतुविप्रकृष्टेनस्यादित्यर्थः।यंचाभिप्रागादिति।अयमर्थः।एतत्तुकालनिर्देशःप्रसंगेनोक्तंनचात्रप्राप्तेर्निमित्तमस्ति।पादिकमि

शिवः

१८

न्वांतरेणेति। नहि स्वर्गादिफलं यागमंतरेण भवति तदुद्देशेनैव यागप्रवर्त्तनात्। याजकाइति। प्रतिग्रहेणापीति भावः। तथा च दक्षिणोक्तं।
यस्यार्थस्य प्रसिद्ध्यर्थमारभ्यंते पचादयः। तत्प्रधानं फलं तेषां नलाभादिप्रयोजनमिति। ॥शेषात्कर्त्तरि॥ ॥भिद्यते कुसूल इति। कुसू
लस्य कर्मशास्त्रातिदेशेपि स्वाश्रयं कर्त्तृत्वमनिवृत्तमिति परत्वात्परस्मैपदं प्राप्नोति। स्वमभ्यंते तु शेषशब्देन कर्त्तरि विशेष्यमाणे क
ःसप्तम्याचेत्प्रकृतेः। सप्तम्याचेत्प्रकृतेः प्रतिषेधो वक्तव्यः। आक्षेपे ते स्वावंते ब्रुवते ॥
एवं तर्हि कर्त्रभिप्रायग्रहणं क्रियते सर्वत्र च कर्त्तारं क्रियाफलमभिप्रैति तत्र प्रकर्षगतिर्विज्ञा
स्यते। साधीयो यत्र कर्त्तारं क्रियाफलमभिप्रैति। न चांतरेण यजिं फलं च पिंडान्वपि फलमभि
ते। याजकाः पुनरंतरेणापि यजिं गालभंते भृतका इवापादिकमिति। ॥शेषात्कर्त्तरि परस्मै
पदं॥ ॥शेषवचनं पंचम्याश्चेदर्थप्रतिषेधः। शेषवचनं पंचम्याश्चेदर्थप्रतिषेधो वक्तव्यः। भिद्यते
कुसूलः स्वयमेव। छिद्यते रज्जुः स्वयमेवेति। सिद्धं तु यनिर्देशात्। सिद्धमेतत्। कथं। यनि
र्देशः कर्त्तव्यः। शेषात्क्ष्य इति वक्तव्यं। कर्त्तृग्रहणमिदानीं किमर्थं स्यात्। कर्त्तृग्रहणमनुपरा
र्थं। अनुपरार्थमेतत्स्यात्। अनुक्रियते स्वयमेवेति।
मंकर्त्तुः कर्मवद्भावेन कर्मशास्त्रातिदेशादात्मनेपदविधावु
पयोगादशेषत्वात्परस्मैपदाभावः। सप्तम्याचेदिति। प्रत्ययनिपमे प्रकृतीनामनियमाद्धनुदात्तङित्ः ष्यः परस्मैपदमपि प्राप्नोति भ
नुक्रियतइति। अनुपराभ्यां कृञ इत्यत्र तदशेषापार्थमारभ्यं। गंधनादिषु कर्त्रभिप्रायक्रियाफले च परस्मैपदार्थं। तत्रासतीदं कर्त्त
ग्रहणे कर्मकर्त्तर्यपि परस्मैपदप्रसंगः। सति तु कर्त्तृग्रहणे उत्तरत्र शेषग्रहणस्य चानुवृत्तौ सत्यां शेषे कर्त्तरि परस्मैपदविधाना
त्कर्मकर्त्तरि न भवति॥ ॥

ना॰के॰

अनुपराभ्यां कृञः॥ ॥तत्रात्मनेपदप्रतिषेध इति। अयमभिप्रायः। अशेषत्वात्पूर्वेण नियमात्प्राप्तं परस्मैपदमनेन प्रतिप्रसूयते इति अनुपरापूर्वात्करोतेर्मैले न विधिवाक्येन आत्मनेपदपरस्मैपदप्रसंगः। विधीयत इति। नियममात्रकरणद्वारेण प्रति

॥[illegible]

सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं शेषवचनं पंचम्यां चेदर्थप्रतिषेध इति। नैष दोषः। कर्त्तरि कर्मव्यतिहार इत्यत्र कर्त्तृग्रहणं प्रत्याख्यायते तत्प्रकृतमुत्तरत्रानुवर्त्तिष्यते। शेषात्कर्त्तरि कर्त्तरीति। कर्त्तैव यः कर्त्ता तत्र यथा स्यात् कर्त्ता चान्यश्च यः कर्त्ता तत्र मा भूदिति॥ ॥अनुपराभ्यां कृञः॥ ॥किमर्थमिदमुच्यते। परस्मैपदप्रतिषेधात्कृञादिषु विधानं। परस्मैपदप्रतिषेधात्कृञादिषु परस्मैपदं विधीयते। प्रतिषिध्यते तत्र। परस्मैपदं स्वरितञितः कर्त्रभिप्राये क्रियाफल आत्मनेपदं भवतीति। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्रात्मनेपदप्रतिषेधो ऽप्रतिषिद्धत्वात्। तत्रात्मनेपदस्य प्रतिषेधो वक्तव्यः। किं कारणं। अप्रतिषिद्धत्वात्। न ह्यात्मनेपदं प्रतिषिध्यते। किं तर्हि। परस्मैपदमनेन विधीयते। न वा द्युतादिभ्यो वावचनात्। न वा एष दोषः। किं कारणं। द्युतादिभ्यो वावचनात्। यदयं द्यु

शिवः

19

प्रसूयत इत्यर्थः। भवतीति। द्युतादिभ्यो लुङि इत्यत्रान्तरेणापि वावचनं वृतः परस्मैपदप्रसवादुभयस्मिन्सिद्धे स्वरितत्वनवावचनानुपपत्तिर्लिंगं परस्मैपदप्रसवे आत्मनेपदाभावस्य॥

१९

आत्मनेपदनियमे वेति। सा स्वादात्मनेपदनिषेधे क्रियमाणे मूलविधेः प्रतिप्रसवाशङ्का न भवति। यद्येवं तर्हीति। आत्मनेपदापवादः प
रस्मैपदं विधीयते तेन तु प्रतिप्रसवद्वारे [illegible] णानियमः प्रतिपाद्यते इति भावः॥ ॥बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥ ॥सकर्मका

आत्मनेपदनियमे वा प्रतिषेधः॥ आत्मनेपदनियमे वा प्रतिषेधो वक्तव्यः॥ स्वरित
ञितः कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवति– अनुपराभ्यां कृञो नेति सिध्यति। स
त्वं तर्हि नियम्यते। यथा मा सम्भवास्तु। ननु चोक्तं तत्रात्मनेपदप्रतिषेधोऽप्रतिषिद्धत्वाद्
ति। परिहृतमेतत्। द्युतादिभ्यो वा वचनादिति। अथवा इदं तावदयं प्रष्टव्यः स्वरितञितः
कर्त्रभिप्राये क्रियाफले आत्मनेपदं भवतीति परस्मैपदं कस्मान्न भवति आत्मनेप
देन बाध्यते। यद्येवं तर्ह्यात्मनेपदेन परस्मैपदं बाध्यत एवं परस्मैपदेनात्मनेपदं
बाधिष्यते॥ ॥बुधयुधनशजनेङ्प्रुद्रुस्रुभ्यो णेः॥ ॥बुधादिषु ये कर्मकास्तेषां ग्र
हणं सकर्मकार्थं अचित्तवत्कर्तृकार्थं वा॥

र्थमिति। अकर्मका अपि धातवः सोपसर्गा अनुपसर्गा वा अर्थान्तरवृत्तित्वे सति सकर्मका भवन्ति अन्तर्भावित एव ण्यर्थो वा यस्य योऽप्यकर्म
णः अचित्तवत्कर्तृकार्थं वेति। वाशब्दस्यार्थः। तेनाकर्मकाणामचित्तवत्कर्तृकार्थं ग्रहणं। चित्तवत्कर्तृकाणां तु सकर्मकार्थमित्यर्थः॥

मा॰के॰ अणावकर्मकाच्चित्तवत्कर्तृकात्॥ ॥अणाविति। णिचात्रस्य पर्युदासः [redacted] चुरादिणिजन्तो योऽकर्मकश्चित्तवत्कर्तृकश्च तस्मा
द्धेतुमण्ण्यन्ता [redacted] दप्राप्तं परस्मैपदमित्यणाविति वार्त्तिककारस्याशयः। चुरादिणिचो ण्यन्तादिति। चुरादिण्यन्ताद्धि तृतीये हेतुमण्ण्यन्तादिसर्गः। अ
कर्मककग्रहणमिति। अणावित्यस्य यद्यपि प्रयोजनं नास्ति आरोहयमाणं प्रयुङ्क्ते आरोहयते हस्त्यध्यापनेन माभूत्परस्मैपदं तथा

अणावकर्मकाच्चित्तवत्कर्तृकात्॥ ॥अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपद
वचनं। अणावकर्मकादिति चुरादिणिचो ण्यन्तात्परस्मैपदं वक्तव्यं। इहापि यथा स्यात्। चेत
90 यमानं प्रयोजयति चेतयति। यदि तर्हि तत्रापीष्यते आणि ग्रहणमिदानीं किमर्थं स्यात्। अक
र्मकग्रहणमण्ण्यन्तविशेषणं यथा विज्ञायेत। अण्यन्तं क्रियमाणे आणिग्रहणे अकर्मकग्रह
णं कस्य विशेषणं स्यात्। णिशिति वर्त्तते। णेर्निरि विशेषणं। तत्र को दोषः। इहैव यथा स्यात्
चेतयमानं प्रयोजयति चेतयति। इह न स्यात्। आसयति। शाययतीति। सिद्धं त्वतस्मिन्
णाविति वचनात्। सि [redacted] मेतत्। कथं। अतस्मिन्णौ य अकर्मकस्तस्मादिति वक्तव्यं॥ शिवः

पिप्रयोजनान्तरमप्यस्तीति भाष्यकारो दर्शयति। सिद्धं [redacted] त्वतस्मिन्निति। तच्छब्देन हेतुमणिज्निर्दिश्यते तस्यैव पूर्वसूत्रेऽनुपात्त २०
नाद्धुधादिभ्यस्तस्यैव संभवात्। तेनायमर्थः। अहेतुमण्ण्यन्तो यो [redacted] कर्मकश्चित्तवत्कर्तृकश्च तस्माद्धेतुमण्ण्यन्तात्परस्मैपदं भवति। तेन
चेतयतीत्यत्रापि सिध्यति॥

भा॰के॰

यस्मात्सेरिति। एतच्चोणादिष्वनिर्विप्रत्ययोक्तं तदेव पुनः प्रकृतोपयोगाद्भाष्यकारेण स्मारितं॥ ॥नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः॥ ॥समीचीदूति। प्रथमाद्विवचने वाछन्दसीति पूर्वसवर्णदीर्घः॥ ॥लुटिच क्लृपः॥ ॥स्वरितत्वादनुवृत्त्यान्वयादप्रतिपा

सिष्यति। स्वं तर्हि निर्दिश्यते। यथान्यासमेवास्तु। ननु चोक्तं मृषेणाव कर्मकादिति चुरादिणिचो एव तात्पर्यमपदवचनमिति। नैष दोषः। अणावेति कस्येदं ग्रहणं यस्मात्सेः प्राकूकर्मकत्वावाविद्यते। न चैतस्मात्सेः प्राक्कर्मक [illegible]वाविद्यते॥ ॥नपादम्याङ्यमाङ्यसपरिमुहरुचिनृतिवदवसः॥ पादिषु धेट उपसंख्यानं [illegible] कर्तव्यं। धापयेते शिशुमेकं समीची॥ ॥लुटिच क्लृपः॥ ॥किमर्थश्चकारः। स्यसनोरित्येतदनुकृष्यते। यदि तर्हि नान्तरेण चकारमनुवृत्तिर्भवति। घुद्भ्यो लुङीत्यत्रापि चकारः कर्तव्यः। विभाषेत्यनुकर्षणार्थः। अथेदानीमन्तरेणापि चकारमनुवृत्तिर्भवतीदूर्णापिनार्थश्चकारेण। एवं सर्वे चकाराः प्रत्याख्यायन्ते॥ ॥इति श्री भगवत्पतञ्जलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य तृतीयपादे द्वितीयमाह्निकं। पादश्च समाप्तः॥ शिवः

यस्यार्थं स्य सिद्धत्वाद्भाष्यकारः सर्वानेव चकारान्प्रत्याचष्टे॥ ॥इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य तृतीयपादे द्वितीयमाह्निकम्॥ ॥पादश्च तृतीयः समाप्तः॥ ॥शुभं॥ ॥संवत् १८९६ फा॰ कृ॰ ८ शनौ॥ ॥श्रीः॥ रामजी॥ ॥ २१

स्वर्णप्रस्थचंद्रप्रस्थस्त्रकिकआवर्तकरमणकपांचजन्यसिंहलोलं
का नागकारस्पयकसेरुतान्ना

नं. ११८



भाष्यकैय्यट पंचमाह्निक

४२

८

श्री॥ ईदूदेद्द्विवचनं प्रगृह्यम्॥ किमर्थमिति॥ इह तो नेरेणाद्भिन्नकालनिवृत्त्यर्थं नोपपद्यते तपरत्वं। उदात्तादीनाम् अभेदकत्वात् गुणान्तरयुक्तानां सवर्णानां ग्रहणार्थमपि नोप
पद्यते॥ जातिपक्षे पि दीर्घोच्चारणस्य यत्नाधिक्याद्ध्रस्वानां न भविष्यति प्लुतानां चेष्यत एवेति इत्थाघातं प्लुततपरत्वं करोतीति प्रश्नः॥ तपरइति। व्यक्तिपक्षो भेदका
श्च गुणा इति भावः। केषामिति। प्लुतानामग्रहणप्रसंगात् प्रश्नः। उदात्तेति॥ कश्चिदनुनासिकग्रहणमस्ति न गुणप्रसंगे नोच्चारितं न हि प्रगृह्योनुनासिकः संभवति अ
तोऽप्रगृह्यस्यानुनासिक इति निषेधात्॥ प्लुतानां त्विति॥ व्यक्तिपक्षाद्ययं दोषो न तु तपरत्वात्॥ असिद्ध इति॥ शास्त्रासिद्धत्वाश्रयणात् प्लुतबुद्धावसत्यां प्रगृह्य

॥श्री॥ ईदूदेद्द्विवचनं प्रगृह्यं॥ किमर्थमीदादीनां तपराणां प्रगृह्यसंज्ञोच्यते। तपरस्तत्कालस्येति तत्
कालानां सवर्णानां ग्रहणं यथा स्यात्। केषां॥ उदात्तानुदात्तस्वरितानां॥ अस्ति प्रयोजनमेतत्
। किन्त्विहीति॥ प्लुतानां तु प्रगृह्यसंज्ञा न प्राप्नोति। किं कारणं। अतत्कालत्वात्। न हि प्लुतास्तत्कालाः
असिद्धः प्लुतः तस्यासिद्धत्वात्तत्काला एव भवन्ति॥ सिद्धः प्लुतः स्वरसन्धिषु कथं ज्ञायते। यदयं प्लु
तः प्रगृह्येति प्लुतस्य प्रकृतिभावं शास्ति। कथं कृत्वा ज्ञापकं। सतो हि कार्यिणः कार्येण भवितव्यं
किमेतस्य ज्ञापने प्रयोजनं। अप्लुतादप्लुत इत्येतन्न वक्तव्यं॥

ते विधीयमाने द्विमात्रविषया बुद्धिः प्रवर्तते॥ तथा हि वक्ष्यति॥ असि
द्धवचनं तु उत्सर्गलक्षणभावार्थमादेशलक्षणप्रतिषेधार्थं चेति। यदयमिति॥ असिद्धत्वे प्लुतप्रकृत्येव भाष्यश्रवणायोगात् कार्यित्वेनाश्रयणाद् असिद्धत्वाभावो नुमीयते
। सामान्येन स्वरसंधिप्रकरणविषयं सिद्धत्वं ज्ञाप्यते॥ न तु प्रकृतिभाव एव। यथा रोरुत्व एव सोत्सर्गस्यापवादे चप्रकरणमिति प्रकृतिभावेपि प्रगृह्यत्वे
के सिद्धत्वमुच्यते। किमेतस्येति॥ प्रकृतिभावस्याश्रयात् सिद्धत्वमस्त्विति प्रश्नः॥ हतेशलाघवं दर्शयति॥ अप्लुतादिति। सिद्धे हि प्लुतेऽतो तीति तपरत्वात् प्रसंगः॥ शिव॰ १

किमतइति॥ यथोद्देशे संज्ञापरिभाषं प्रगृह्यसंज्ञा स्वरसंधिप्रकरणमध्यपतितानभवतीति प्रश्नः॥ कार्यकालमिति॥ कार्यार्थत्वाद्गुणानां कार्यस्य च प्रधानत्वात्प्रधान
देशत्वस्य न्याय्यत्वादिति भावः॥ उपस्थिते हीति॥ उपस्थितमनार्षइति करणः। अग्नी इतीत्यत्र प्लुताश्रये प्रकृतिभावे प्रतिषिद्धे प्रगृह्याश्रयः प्रकृतिभाव इष्यते तदाह॥
पठिष्यतीति॥ यत्र प्रगृह्यसंज्ञा नास्ति मप्लुताश्रयप्रकृतिभावप्रतिषेधविषयः। देवदत्ता३ इति देवदत्तेति॥ यदि पुनरिति॥ ननु यथाक्षिप्त ह्याश्रयणात् प्लुतानां न

किमतो यत्सिद्धः प्लुतः स्वरसन्धिषु। संज्ञाविधाव सिद्धः। तस्यासिद्धत्वात्तत्कालाएवमभवंति॥ संज्ञाविधौ
च सिद्धः। कथं॥ कार्य्यकालसंज्ञापरिभाषं॥ यत्र कार्यं तत्र द्रष्टव्यं। प्लुतः प्रगृह्यः प्रकृत्येत्युपस्थितमि
दं भवति। ईदूदेद्द्विवचनं प्रगृह्यमिति॥ किं पुनः प्लुतस्य प्रगृह्यसंज्ञावचने प्रयोजनं। प्रगृह्याश्रयः
प्रकृतिभावो यथा स्यात्। भाभद्रेवं। प्लुतः प्रकृत्येत्येवं भविष्यति। नैवं शक्यं। उपस्थिते दिदोषः
स्यात्। अप्लुतवदुपस्थित इत्यत्र। पठिष्यति ह्याचार्यः। वक्ष्यचनं प्लुतकार्य्यप्रतिषेधार्थमि॥ प्लुतप्र
तिषेधे हि प्रगृह्यप्लुतप्रतिषेधप्रसंगोन्येन विहितत्वादिति॥ तस्मात्प्लुतस्य प्रगृह्यसंज्ञेष्टितव्या
प्रगृह्याश्रयः प्रकृतिभावो यथा स्यात्। यदि पुनर्दीर्घाणामतत्पराणां प्रगृह्यसंज्ञोच्यते एवमप्यका
र एव एकः सवर्णो न गृह्णीयात् ईकारोकारो न गृह्णीयातां किंकारः

ग्रहीष्यति न पुनस्तत्परत्वात्॥ अयमत्राशयः॥ आकृतिपक्ष[illegible]श्रयिष्यते॥ ई
णोच्चारणे ह्यप्रयत्नाधिक्यात्प्लुतानां न भविष्यति। प्लुतानां तु प्रवर्त्तिष्यते। एवमपीति॥ अयं भावः॥ आकृतिपक्षे यथा [illegible] ह्रस्वानां प्रयत्ना[illegible]धिक्यान्न भवति
तथा दीर्घोच्चारणसामर्थ्यात् द्विशिष्टव्यक्तिस्थेवाकृतिर्गृह्यत इति प्लुतानां न स्यात्॥ यथा स्थूलत्वगामानयेत्युक्ते न कृशस्यानयनं भवतीति आकृतिपक्षेपि विशिष्टेवा
कृतिर्दीर्घव्यक्तिगृहीता। तथा चानानन्तादीर्घ्नो ग्राहको न स्यात॥

व्याघ्रजातिपक्षे निर्दिष्ट[illegible]तस्यासत्वादिति भावः। स्वपंचे[illegible]को[illegible]। २

यदि पुनरितिः॥ ह्रस्वसमाहारद्वयोरिकारोपि ह्रस्वशब्देनाभिधीयत इति ह्रस्वानामिति बहुवचनं। तत्र ह्रस्वनिर्देशोऽ गतादाकृतिपक्षो वा यत्नाधिक्यात्तु भिन्नकाला भावा
८१ नां ग्रहणं न सिध्यतीत्यर्थः॥ प्लुतभावीति। प्लुतो भावी यस्य सः प्लुतभावी स्थानी प्रकृतः तस्यैव प्रकृतिभावः। ननु प्लुतस्यासिद्धत्वात्स्थान्यपि प्लुतभावित्वात्र प्लुतव्यपदे
शकेयं लभते। नैष दोषः॥ प्लुतो ह्यस्य भावी ति बुद्ध्या कल्पनमेतत्। न च तत्र प्लुतस्यासिद्धत्वं। अन्यथा प्लुतोऽसिद्ध इत्ययमपि व्यवहारो न स्यात्। कार्यका

यदि पुनरीस्वानामतपराणां प्रगृह्यसंज्ञोच्येत। नैवं शक्यं। इहापि प्रसज्येत। अकुर्व्वहि। अत्र। अकु-
र्व्वयत्रेति॥ तस्माद्दीर्घाणामेव तपराणां प्रगृह्यसंज्ञा वक्तव्या। दीर्घाणां चोच्यमानायां प्लुतानां न प्रा-
प्नोति॥ एवं तर्हि किन्न एतेन यत्नेन यत्सिद्धः प्लुतः स्वरसंधिष्विति। असिद्धः प्लुतस्तस्यासिद्धत्वात्त-
काला एव भवन्तीति। कथं यत्तज्ज्ञापकमुक्तं। प्लुतप्रगृह्या अचीति। प्लुतभावी प्रकृत्यैत्येवमे-
तद्विज्ञायते कथं यत्तत्प्रयोजनमुक्तं क्रियते तन्न्यास एव॥ अप्लुतादप्लुत इति॥ एवमपि य-
त्सिद्धं प्रगृह्यकार्यं तत्प्लुतस्य न प्राप्नोति। अणोऽप्रगृह्यस्यानुनासिक इति। एवं तर्हि किन्न एतेन त्रिव॥
यत्नेन कार्यकालं संज्ञापरिभाषमिति यथोद्देशमेव संज्ञापरिभाषं अ

लपक्षमाश्रित्याह॥ एवमपीति॥ न तस्य प्राप्नोति इत्यत्राप्रगृह्यस्येत्यनुनासि
कप्रतिषेधे क्रियमाणे प्लुतस्य सिद्धत्वात्प्रगृह्यत्वाभावादनुनासिकः स्यात्॥ यथोद्देशपक्षाश्रयेण परिहारः॥ कथं पुनरयं पक्षो यावता कार्यार्थत्वात्संज्ञापरिभाष २
स्य कार्यकालत्वं न्याय्यं। नैष दोषः॥ यदा तु द्विरुपप्रयोजनविशेषं प्रयोजनमात्रमभिप्रायभविष्यतीति किंचिदनेन प्रयोजनमिति संज्ञापरिभाषं प्रणीयते। तदा सम्भवत्ययं वा
यं पक्षो यथाश्रुतं ग्याहि प्रतिपत्त्यपेक्षया। महावाक्यार्थपर्यालोचनया तु प्रतिपत्त्यपेक्षः कार्यकालपक्षः॥

यथवृयोगः प्राथम्यमित्यादि [redacted] युद्दिश्य लक्षणमित्यभियुक्तोक्तेः॥ श्रोतं प्राथम्यमादाय प्रथमः पक्षः॥ संज्ञापेक्ष्यमाहाय द्वितीयः॥

दी१

॥ कथं पुनरिति॥ ईदादयो यद्विमित्तिनस्तद्विशेषणं तु द्विवचनं न ह्यद्विवचनान्तत्वमीदादीनां नसंभवतीति द्विवचनानामेवेदादीनां संज्ञाभाव्यं॥ अथ द्विवचनं संज्ञितद्विशेषणमीदाद यस्तदा तदन्तविधिरप्रधानेन न प्राधानस्येति ईदाद्यन्तं द्विवचनमिति पक्षः॥ तत्रोभयोरपि पक्षयोर्दोषं दर्शयन् आह॥ पचेते इति॥ एकारान्तं द्विवचनं न भवति अपि तु तस्यान्तः॥ वचनादिति॥ द्विवचनावयवे द्विवचनशब्दो वर्त्तते इत्यर्थः॥ अस्तीति॥ मुख्यसंभवति गौणस्य ग्रहणमन्याय्यमित्यर्थः॥ खट्वे इति॥ अन्तादिवच्च त्यादिवद्भावादेका द्विवचनम्॥ एकस्येति॥ असहायस्येत्यर्थः॥ ईदूतोः केवलयोरेवसंभव इति वचनसामर्थ्यात्तयोः सिद्धमिति॥ एकारान्तस्य द्विवचनस्य पचेते इत्यादौ संभवात्तद्वद्द्वय

कथं पुनरिदं विज्ञायते ईदाद्यौदेयद्विवचनमाहोस्विदीदाद्यन्तं यद्विवचनमिति। कश्चात्र विशेषः। ईदादयो यद्विवचनं प्रगृह्या इति चेदन्त्यस्य विधिः। ईदादयो यद्विवचनं प्रगृह्या इति चेत् अन्त्यस्य प्रगृह्यसंज्ञा विधेया। पचेते इति। पचेथे इति। वचनाद्भविष्यति। अस्ति वचने प्रयोजनं किं। खट्वे माले इति। अस्तु तर्हि ईदाद्यन्तं यद्विवचनमिति। ईदाद्यन्तं यद्विवचनमिति चेदेकस्य विधिः। ईदाद्यन्तं द्विवचनमिति चेदेकस्य प्रगृह्यसंज्ञा विधेया। खट्वे माले इति। नत्वाद्यन्तवत्त्वात्। न वा एष दोषः। किं कारणं। आद्यन्तवत्त्वात्। आद्यन्तवदेकस्मिन्

त्रनमिध्यतीति दोषः। येन विधिस्तदन्तस्येत्यत्रस्वस्य च रूपस्येति ना
श्रितमिति दोषोपन्यासः॥ अथवेति॥ प्रत्ययग्रहणे यस्मादिति द्विवचनेन न तदन्तविधिः॥ पश्चाद्द्विवचनान्तमीदादिभिर्विशेष्यते इत्ययं तृतीयः पक्षो भवति॥ ईदाद्यन्तं यद्द्वि
चर वनान्तमिति। ननु संज्ञाविधौ प्रत्ययग्रहणे न तदन्तविधिः... भावः॥ सुप्तिङन्तं पदमित्यत्रान्तग्रहणेन ज्ञापितत्वादिति कथमेतत् सक्षोपपत्तिः॥ चतुर्थपक्षप्रतिपाद
वक्ष्यत्येवेतद्भाष्यकारः इति नैतदपूर्वं चोद्यम्॥ दोषान्तरेणोभं पक्षं निराकर्तुमाह॥ ॥२॥ ॥१॥ ॥१॥ ॥१॥ ॥१॥ ॥१॥ ॥

3

लुकि प्रतिषेध इति। दोषसद्भावेनैवास्य पक्षस्य निराकरणात् तदन्तविध्यभावो ऽत्रेनोक्तः। कुमार्यगारमिति। कथं पुनरस्य द्विवचनान्तस्य समासः। यावता ईत्तो संख्या वि-
शेषो न गम्यते। नैष दोषः। यथा तावत् कीनइत्यादावादेशे न संख्याविशेषो व्यज्यते तथेहापि सत्यां प्रगृह्यसंज्ञायां प्रकृतिभावेन द्विवचनं व्यज्येतेति दोषोपन्यासः। सप्तम्यामि-
ति। ईदूतौ सप्तम्येत्येव तदन्तविधौ सति प्रत्ययलक्षणेन सोमो गौरी अधिश्रित इत्यादौ सिद्धायां प्रगृह्यसंज्ञायामर्थग्रहणं ज्ञापयति। प्रगृह्यसंज्ञाप्रकरणे प्रत्यय-
लक्षणं नेह भवतीति। तत्तर्हीति। आद्यन्तवद्भावाश्रयणाय तृतीयः पक्षः परिगृहीतः। तत्र च दोषप्रतिविधानार्थमर्थग्रहणं कर्त्तव्यं भवतीति सुतरां गौरवं भ-

ईदाद्यन्तं यद्द्विवचनान्तमिति चेत् [illegible] लुकि प्रतिषेधः। ईदाद्यन्तं यद्द्विवचनान्तमिति चेल्लुकि
प्रतिषेधो वक्तव्यः। कुमार्योरगारं कुमार्यगारं। वध्वोरगारं वध्वगारं। एतद्धीदाद्यन्तं श्रूयते द्विव-
चनान्तं भवति प्रत्ययलक्षणेन। सप्तम्यामर्थग्रहणं ज्ञापकं प्रत्ययलक्षणप्रतिषेधस्य यद-
यममीइतौ च सप्तम्यर्थे इत्यर्थग्रहणं करोति तज्ज्ञापयत्याचार्यो न प्रगृह्यसंज्ञायां प्रत्ययलक्ष-
णं भवतीति। तत्तर्हि ज्ञापकार्थमर्थग्रहणं कर्त्तव्यं न कर्त्तव्यं। ईदादिभिर्द्विवचनं विशेषयिष्यामः।
ईदादिविशिष्टेन च द्विवचनेन तदन्तविधिः

वतीत्यर्थः। ईदादिभिरिति। अत्र पक्षे कुमार्यगारमित्यत्राप्रसंगः। न ह्यस्य संबन्धाभावादीदादि-
शब्देन ईदाद्यन्तमुच्यते तेनेदाद्यन्तां तमित्यर्थः। [illegible] स्मामिति। [illegible] अत्रेदूदेदन्तं द्विवचनं किं तर्हि [illegible] सकारान्तं तदन्तमिति द्विवचनान्तं ईदाद्यन्तमिति। ई-
दादिभिः साक्षात्समुदाय [illegible] द्विवचनमौ तस्य नपुंसकाच्चेति शी भावः। ततोऽश्च प्रत्ययः। शी शब्दस्य सुप इति लुक्। अस्य च्वौ वितीत्वं। तद्धितान्तत्वात् सुपूत-
स्याव्ययादिति लुक्। अत्र हि शी शब्द ईकारान्तो द्विवचनं तदन्तश्च समुदायः प्रत्ययलक्षणेनेति प्रगृह्यसंज्ञा प्राप्नोति अत्र हीदादिद्विवचनमिति ईदादिशब्देन

कश्चित्तु पाठ ईदीयंतं च सूयत इति तत्रैवं व्याख्येयं ईदायन्तं च सूयते सूत्रे तदन्तविधिरीदादिभिर्द्विवचनस्याश्रीयत इत्यर्थः। यस्त्वयमस्य व्याविती कारः स द्विवचनस्यैत कश्चिदिति न तदभिप्राये तो भाष्ये व्याख्येयं। अथापि कथंचिदिति। स्थानि विशेषानपेक्षायां कृताकृतप्रसंगित्वेन लुकः शास्त्रप्रवर्त्तना दित्यर्थः। अथवा नित्यत्वेन बाधकत्वे लक्षते तेनांतरंगानपीति न्यायेन शीभावस्य लुग्बाधक इत्यर्थः। एवमपि दोष इति। पक्षस्योत्थानमेवना

अत्र हीदा[illegible]दिच द्विवचनं तदंतं च भवति प्रत्ययलक्षणेन। अत्राप्यकृते शीभावे लुग्भविष्यति। इदमिह संप्रधार्यं लुक् क्रियतां शीभाव इति किमत्र कर्त्तव्यं परत्वाच्छीभावः। नित्यो लुक्। कृते शीभावे प्राप्नोत्यकृतेपि प्राप्नोति। अनित्यो लुगन्यस्याकृते शीभावे प्राप्नोत्यन्यस्य कृते शब्दान्तरस्य च प्राप्नुवन्विधिरनित्यो भवति। शीभावोप्यनित्यः न हि कृते लुकि प्राप्नोति। उभयोरनित्ययोः परत्वाच्छीभावः। शीभावे कृते कृते लुक्। अथापि कथंचिन्नित्यो लुक् स्यादेवमपि दोषः। वक्ष्यत्येतत् तुपदसंज्ञायामंतग्रहणमन्यत्र संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधार्थमिति। इदं चापि।

...ति तत्पक्षासंभवस्एव दोषः। भ्रमश्चयमिति। पदस्य भयत्नाभयादयं पक्षोंगीकृतः। तस्याघंतवज्ञायस्यास्मिन्नपि पक्षेऽवश्यमाश्रयणामंगीकृतं। अग्नीइत्यत्र हीकारएव द्विवचनं नत्वीकारांतं। तस्मादिति। द्वितीय एव पक्षोस्त्वित्यर्थः। मणीवादीनां प्रतिषेधो वक्तव्य इति भाष्यवार्त्तिककाराभ्यामपठितत्वादप्रमाणमेतत्। मणीवोष्ट्रस्येति तु प्रयोगो वाशब्दस्योपमानार्थस्य। दंपती त्यादिस्तु छांदसः प्रयोगः। छन्दसि तु सर्वे विधयो विकल्प्यन्ते॥

८२ अदसोमात्॥ मात्रगृह्येति॥ अस्मिन्सूत्रन्यास इत्यर्थः॥ ऊत्वस्य चेति। चशब्दान्मत्वस्य च। तत्रस्या सिद्धत्वाच्च स्थानिलक्षणमेव कार्यं प्राप्नो-
ति। मातिदेशे ... लक्षणमित्ययादिप्रसंगः॥ अमीआसत इत्ययादेशः प्राप्नोति। अमूआसाते इत्यावादेशः॥ ननु च द्विपदाश्रये हि रंगाअयादयो अमवसार
पु तरंगेषु ... इति पूर्वाभावे कथं पूर्वा... सिद्धमिति त्वादीनामसिद्धत्वं स्यात्॥ नैष दोषः॥ नाज्ञानंतर्ये इति बहि रंगपरिभाषा
निषेधात्। ननु चेति। यथोद्देशपक्षे आश्रयात्सिद्धत्वं भविष्यतीत्यर्थः॥ कार्यकालपक्षमाश्रित्याह। वचनार्थोहीति। वचनस्य प्रयोज-

५ अदसोमात्॥ मात्रगृह्यसंज्ञायां तस्यासिद्धत्वादयावेकादेशप्रतिषेधः। मात्रगृह्यसंज्ञायां तस्य ई
लेऊत्वस्य चासिद्धत्वादयावेकादेशाः प्राप्नुवंति तेषां प्रतिषेधो वक्तव्यः॥ अमीअत्र। अमूअत्र। अ
मीआसते। अमूआसाते॥ ननु च प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति। वचना
र्थो हि सिद्धे नेदं वचनात्प्रभ्यं अस्ति ह्यन्यदेतस्य वचने प्रयोजनं। किं। यत्तद्प्रगृह्यकार्यं तद
र्थमेतत्स्यात्। अणोप्रगृह्यस्यानुनासिक इति। नैकं प्रयोजनं योगारंभं प्रयोजयति। यद्येतावत्प्र
योजनं स्यात्तत्रैवायं ब्रूयादणोप्रगृह्यस्यानुनासिको दसोने

नमित्यर्थः॥ नैकमिति। अनेककार्यसिध्यर्थं संज्ञासूत्रं नैकेन प्रयुज्य-
त इत्यर्थः॥ अन्यत्तु सूत्रमेकेन युज्यते सुऋद इत्यादि। तत्रैवायमिति॥ न च तत्रेदिदेग्रहणं कर्तव्यं। मादिति वा। यस्मादणोनुनासिकेव्यवहितो विधीयते शिवः॥
पूर्वेण च णकारेणाप्रत्याहारणमिति अमोअमुके अमुकाभ्यामित्यादावनुनासिकस्याप्रसंग एव। तदेवं कार्यकालेपि संज्ञापरिभाषप्रकरणोक्त- ४
वेण विधीयमाना प्रगृह्यसंज्ञा सर्वप्रगृह्यकार्यार्था सती असिद्धत्वं बाधिष्यत इत्यर्थः॥

विप्रतिषेधादेति॥ अथावेकादेशाप्रतिषेधो वक्तव्यः॥ विप्रतिषेधात् प्रगृह्यसंज्ञेति विकल्पार्थो वाशब्दः॥ नैकः प्रयोजनमित्यादिस्तु भाष्यकारेणोक्तो न घातिकाकारेणो
तितदपेक्षो विकल्पः॥ नैष युक्त इति। इष्टसिद्धये इति भावः॥ करिष्यत इति, आश्रयिष्यत इत्यर्थः॥ इतरस्त्वगृहीताभिप्राय आह॥ तत्र विपर्यास इति। अभिप्रायं प्र

विप्रतिषेधात्॥ अथवा प्रगृह्यसंज्ञा क्रियतां अयादयो वेति। प्रगृह्यसंज्ञा भविष्यति विप्रतिषेधे
नेति। नैष युक्तो विप्रतिषेधः। विप्रतिषेधे परमित्युच्यते पूर्वा च प्रगृह्यसंज्ञा परेऽयादयः॥ प
प्रगृह्यसंज्ञा करिष्यते। तत्र विपर्यासः कृतो भवति। एवं तर्हि परैव प्रगृह्यसंज्ञा। कथं
कार्यकालं संज्ञापरिभाषा। यत्र कार्यं तत्रोपस्थितं द्रष्टव्यम्। प्रगृह्यः प्रकृत्येत्युपस्थितमि
दं भवति अदसो मादिति। एवमप्ययुक्तो विप्रतिषेधः॥ कथं। द्विकार्ययोगो हि विप्रतिषे
धः। न चात्रैको द्विकार्ययुक्तः॥ नावश्यं द्विकार्ययोग एव विप्रतिषेधः। किं तर्ह्यसंभवोऽपि। स चा
स्त्यत्रासंभवः। प्रगृह्यसं एचामयादयः ईदूतोः प्रगृह्यसंज्ञा ज्ञाभिनिवर्त्तमाना अयादीन्
बाधते। अयादयोऽपि निवर्त्तमाना प्रगृह्यसंज्ञां यानिमित्तं विघ्नंतीत्येषोऽसंभवः। स त्ययमि

कोऽपि तु माह॥ एवं तर्हीति। द्विकार्ययोगो हीति द्वाभ्यां कार्याभ्यां योयुज्यते स विप्रतिषेधविषयत्वाद्धि प्रतिषेधः॥ असंभवोऽपीति॥ असंभव एव विप्रति
षेधः स तु कदाचिद् द्विकार्ययोगे भवति कदाचिदेकेव लोपे तथा हि [illegible] तिसंभवे द्विकार्ययोगत्वान्न विप्रतिषेधः। यथैकस्य धातेरडागमद्विर्वचने भवतः।
अत्र धाटदिति क्वचिदेकस्य द्विकार्ययोगाभावो यसंभवोऽस्ति। यथात्र पूर्णामित्यत्र तुस्तुटोः प्रकृतिप्रत्ययभक्तयोः परस्परानिमित्तव्याघातादायादीन्बाधते।

सतोरित्यस्य युगपत्प्राप्तयोरित्यर्थः॥ ईदादीनामसिद्धत्वेन तस्याप्राप्तिः॥ कलेवलीदादावस्य। उभयमसिद्धमित्यस्योभयमपि प्रत्यन्तमिसर्थः॥ वाक्यसंस्कारपक्षोऽनन्तपदसंस्कारप
क्षे तयोरसिद्धत्वाद्द्वयोरपि तेषां प्राप्तिवत्त्वे ततएव संज्ञाया अप्राप्तिः [redacted] न चान्येति। अत्र पक्षे उभयमसिद्धमिति पूर्वत्रासिद्धेनेति शेषः पक्षद्वयेऽपि त
भा॰कै॰प्र॰पं॰ रसत्वायोरेलुकथनमुभयमिति। परिहरति। आश्रयादिति। पदसंस्कारपक्ष एवात्राश्रीयते। एवं चोभयोर्युगपत्प्राप्तिः प्रगृह्यसंज्ञायां तयोः सिद्धत्वादाया। दी प्रत्र वासिद्धत्वादिस्मृपपत्तौ वेप्रतिषेधः॥

आश्रयात्सिद्धत्वमिति॥ प्रगृह्यसंज्ञायां कार्यित्वेनाश्रयणात्तु असिद्धत्वाभावादीत्वादीनां तेषामयादीनां च विप्रतिषेधोऽपि रूप्यते। तथा हि सतो द्विविप्र
८५ तिषेधो भवतीति पूर्वपक्षे ईदादीनामेव प्रतिषेध आक्षिप्तः॥ तत्रायादीनां च यत्नेऽलावकः अन्येऽत्रेत्यत्रावकाशः। ईदादीनां तु यत्राप्यादीनामप्रसंगः सोऽवका
शः॥ अमी स्थिता अमू स्थिता अमी अग्न इति अमी अत्रेत्यादावुभयप्रसंगे परत्वादीदादय एव भवन्ति। अत्र व्याख्यानांतरं क्लिष्टत्वा [redacted] ओपन्यस्तम्॥

आश्रयात्सिद्धत्वं यथा रोरुत्वे। आश्रयात्सिद्धत्वं वक्तव्यं। तद्यथा। रुत्वे [2] रे आश्रयात्सिद्धो भवति॥
किं पुनः कारणं रुत्वे आश्रयात्सिद्धो भवति। न पुनर्यत्रैव रुः सिद्धः तत्रैवोत्वमप्युच्यते। नैवं शक्यं। असिद्धत्वादुत्वस्याप्रसिद्धिः असिद्धत्वे उत्वस्याप्रसिद्धिः स्यात्। वृक्षो त्राता। प्लक्षोत्रा। तस्मा
त्तत्राश्रयात्सिद्धत्वमेषितव्यं॥ यथा तत्राश्रयात्सिद्धं भवति। एवमिहाप्याश्रयात्सिद्धत्वं भविष्यति। अथवा प्रगृह्यसंज्ञावचनसामर्थ्यादयादयो न भविष्यन्ति। अथवा योगवि
भागः करिष्यते। अदसः। अदसः परे ईदादयः प्रगृह्यसंज्ञा भवन्तीति। ततो मात्। मा
त्परे ईदादयः प्रगृह्यसंज्ञा भवन्तीति अदस इत्येव। किमर्थं योगविभागः एकोऽयं सि
द्धे प्रगृह्यकार्यं तदर्थः॥ अपरोऽयदसिद्धः॥ शिवः

न पुनर्यत्रैवेति। रोः सुपीत्यस्यानन्तरमुत्वमुच्यत इति वक्तव्यं। एवं चासिद्धत्वं न बा
धितं भवति। अत्र पाठक्रमेऽसिद्धत्वस्य प्राप्त्यभावात्तु प्लुतस्योत्वेऽसिद्धत्वात्तत्कालत्वाभावाद्ध्रुतात्प्लुते इति न वक्तव्यं भवति। अथवेति। यथोद्देश ५
पक्षाश्रयेणोक्तदुच्यते। कार्यकालपक्षमप्याह। अथवेति। अदस इति संबंधसामान्ये षष्ठी। अदसः संबंधिन ईदूदेत इति॥ ॥ ॥ ॥ ॥

5

इहापीति। अदसष्टा अदस् उ ओम्। अत्वं। टाष्। सवर्णदीर्घत्वं। आङि चापइत्येत्वं। अदे आ अदे ओ म् इति स्थिते अदसइत्यत्र मादिति विशेषणाभावात् अग्रहणं ज्ञायांसत्यामयादेशाप्रसंगः॥ अमुकेत्रेति। अदसइत्यनेन प्राप्नोति। एदन्तमिति। ईदूतौ रेवस्य इति तत्वप्रतिज्ञानादिति भावः। अनन्तुवृत्तिरेव तिवृत्तिः। यद्येवं माङ्ग्रहणं न कर्त्तव्यं। एङ्‌इत्यनिवृत्त्यैवामुकेत्रेत्यत्र प्रसंगात्। नैतदस्ति। मतिमाङ्ग्रहणेयोगविभागो भवति नान्यथा। एकयोगे परिहारान्तरम् अथाह॥ अथवेति। मादिति। मार्थ एवस्थानी मशब्दोनेत्कोर्थ ईदूदर्थत्वे ईदिति। न चास्याः कल्पनायां मसिद्धत्वं भवति। बुद्धिसंकल्पनायामसिद्धत्वस्यो

इहापि तर्हि प्राप्नोति॥ अमुया अमुयोरिति। किंच स्यात्। यद्यत्र प्रगृह्यसंज्ञा स्यात्। प्रगृह्याश्रयः प्रकृतिभावः प्रसज्येत। नैष दोषः। पदान्तप्रकरणे प्रकृतिभावः। न चैष पदान्तः॥ एवमप्यमुकेत्र अत्रापि प्राप्नोति। द्विवचनमिति वर्त्तते। यदि द्विवचनान्तमिति वर्त्तते अमी अत्रेति न प्राप्नोति। एवं तर्हि एदन्तमिति निवृत्तं। अथवाऽऽह्रयमदसो मादिति। न चैईत्वोत्वे स्तः। नापिमकारः। तत एवं विज्ञास्याम॥ मार्थाद् ईदाद्यर्थानामिति। उक्तं वा। किमुक्तं। अदसईत्वोत्वे स्वरे बहिःपदलक्षणे सिद्धे वक्तव्ये। प्रगृह्यसंज्ञायां चेति। तत्र सकि दोषः। तत्र स [illegible] ककारे दोषो भ...

॥ उक्तं वेति। असिद्धत्वमेवात्रऽसिद्धमित्यर्थः स्वरे इति। अचि॥
॥ बहिष्पदलक्षणाइति। द्वितीयपदव्यवस्थितइत्यर्थः। तेनैकपदव्यवस्थितेऽचि असिद्धे ईत्वोत्वे। तेनामुयोरित्यत्र याद्देशो भवत्येव। प्रगृह्यसंज्ञायांचेति॥ प्रगृह्यसंज्ञायामेव सिद्धत्वेन सिद्धलक्ष्ये प्रपंचार्थः पूर्ववाक्योपन्यासः। तत्र सकि दोष इति। मात्परत्वं ईदाद्यर्थं तामिति दोषोपन्यासः। पूर्वत्रेहितदन्तं गृह्यते मितीहापि तदन्तस्यैवानुवृत्तिरिति भावः। स्वरितत्वेन शब्दमात्रमनुमीयतइति उत्तरेऽभिप्रायः। तत्र माङ्ग्रहणं न गृह्यमाणामि

भ०कै०

८५

शे।। इह कस्मादिति।। अत्र हि प्रत्यक्षमेव शोइति रूपं। युष्मे अस्मे इत्यत्र तु अकारस्यानुबन्धस्य स्मरणाद्युष्मेयमिति प्रश्नः।। शोऽर्थवद्ग्रहणा
दिति। स्वशब्दस्य त्वेवान्तरंगत्वाद्धेयत्वाद्साधारणत्वाच्च रूपपरिग्रहे सिद्धे एव दर्थस्याप्यंगीकरणार्थं रूपग्रहणं कृतं। अत्र च शोर
र्थोऽनर्थकः। समन्यकवचनं सर्थवत्। तयोः समुदायोऽर्थान्तराणाद्भेदादनर्थकः। एवमपीति। अत्र हि मल्लशौ यम समन्यकवच
नयोरर्थवतोः समुदायोऽर्थवानेव। अवयवधर्माननुविधाना समुदायस्येति प्रश्नः।। लक्षणेति। प्रतिपदोक्ते हि स्ट्टितिशा ति

नक्तंचरगतसास्याने
तु विशिष्टरूपोपाद
ने उपास्थितस्यार्थ
स्य शब्दस्य निविशे
षणत्वेसाम्यायोगो
स्यामूलं।२

शे।। ।। इह कस्मान्न भवति काशे कुशे वंशे इति। शोऽर्थवद्ग्रहणात्।। अर्थवतः शोशब्दस्य ग्र
हणं न चैषोऽर्थवान्। एवमपि हरिशे बभ्रुशे इत्यत्रापि प्राप्नोति। एवं तर्हि लक्षणप्रति
पदोक्तयोः प्रतिपदोक्तस्यैवेत्येवं भविष्यति। अथवा पुनरस्तु अर्थवद्ग्रहणेनानर्थकस्ये
ति। कथं तर्हि हरिशे बभ्रुशे इति। एकोऽत्र विभक्त्यर्थेनार्थवान्।। अपरस्तद्धितार्थेन। स
मुदायोऽनर्थकः।। शे।।

शिव ४।।

पत्तिर्भवति। लाक्षणिके तु लक्षणानुसंधानद्वारेण बहिरंगेति न तस्य ग्रहणं अथवेति।। अर्थवत्समुदायस्यापि कस्यचिदनर्थकत्वं यथा दशदाडि
मादिवाक्यस्य। पदार्थानां परस्परमन्वयाभावाद् इहापि हरित्वा शब्दवाच्यार्थगतसंख्याधिकरणश्र [redacted]
[redacted] कि प्रतिपादनाय प्रवृत्तास्मत्प्रत्ययेन शप्रत्ययेन प्रतिपाद्येनान्वेतीति शे शब्दस्यानर्थकत्वम्।। ।।४।। ।।५।। ।।६।।

६

निपात एकाजनाङ्॥ निपात इति किमर्थमिति। निपातस्येत्येकाचोर्थवत्वात्प्रत्ययस्य केवलस्य प्रयोगाभावादानर्थक्यात्कल्पितरूपत्वात्कस्यचनार्थस्य नियमा भावात्प्रश्नः॥ चकारात्रेति। अन्वयव्यतिरेकाभ्यां प्रत्ययस्यार्थवत्वमिति भावः। निपातोपि केवलो न प्रयुज्यते द्योतकत्वादिति साम्यमेवनिपातप्रत्यययोः॥ अततेर्डः। अजागन्छेत्यपि प्रकृत्याह रणं॥ एकाजिति किमर्थमिति। एकग्रहणसामर्थ्यात्पृथगुद्दिश्यते॥ तदस्य प्रेदं ब्रह्म [illegible] निर्वृत्तिर्न कृतेति प्रश्नः॥ तत्पुरुषोयमिति। अन्तरंगत्वाद्गौणेपि द्वार्थप्राधान्यादिति भावः। नैव दोष इति। ननु पुरोहिरितिदलन्तस्य प्रकृतिभावाद्रूढत्वं न स्यात्। नैव

निपात एकाजनाङ्। निपात इति किमर्थं॥ चकारात्र। अजहाराच॥ एकाजिति किमर्थं॥ प्रेदं ब्रह्म। प्रेदं क्षत्रं। एकाजित्युच्यमाने हि अत्रापि प्राप्नोति॥ एषोपि ह्येकाच्॥ एकाजिति नायं बहुव्रीहिः। एकोऽन्यस्मिन्सोऽयमेकाजिति। किं तर्हि तत्पुरुषोयं समानाधिकरणः। नार्थ एकग्रहणेन। इह कस्मान्न भवति प्रेदं ब्रह्म प्रेदं क्षत्रं। अजेव यो निपात इत्येवं विज्ञायते। किं वक्तव्यमेतत्॥ न हि कथमनुच्यमानं गंस्यते। अज्ग्रहणसामर्थ्यात्। यदि हि अचोऽन्यत्र स्यादज्ग्रहणमनर्थकं स्यात्। नु प्रसिद्ध्यन्यदज्ग्रहणस्य प्रयोजनं। किं अजन्तस्य यथा स्यात् हलो...

दोषः॥ प्रगृह्यसंज्ञायां कृतत्वस्यासिद्धत्वात्मकारस्य चकार्यात्
राधसंगात्॥ उक्तेतु कृत्वमाश्रयात्सिद्धं॥ एवमपीति। अन्यतरनिवृत्त्या ऽज्ग्रहणस्यार्थवत्वादज्मात्रं गृह्यते तदन्तं निरस्यते विपर्ययस्तु न भवतीति विशेषाभा वात्प्रश्नः॥ [illegible] सामर्थ्यात्संज्ञाविधौ परिभाषा न प्रवर्तते॥ भावकाशयोरिति। निरवकाशस्य बाधकत्वादेवमुक्तं। तत्र तदन्तविधेरवकाशः ओरा न्यके लाघ्यं पाद्यमिति॥ आद्यन्तवद्भावस्यावकाशः॥ मिदचोन्त्यात्परः। तानि यानीति॥ अत्राहि साक्षाद्दन्तग्रहणमस्तीति तदन्तविध्यभावः॥ समवाभि नयोरिति॥ इह प्रान्तपाठ॥ ॥

निपातविशेषणत्वे तदन्तपरिभाषाया अप्रसक्तेरेव निवृत्तिः। विशेष्यत्वे तु जिति विशेषणसामर्थ्यात्तदन्त स्यैव ग्रहणं ततो मुख्यात्वात्तद्परिग्रहात्मान्तत्वं दित्यस्यानिरासः स्यादित्यर्थः॥

आचार्यप्रवृत्तिरिति। यदि तर्हि लिंगेन तदन्तविधिर्निराक्रियते तदा तन्मूलोऽयं तद्वत्परिभाषा कथं प्रवर्त्तेत॥ नैष दोषः॥ आद्यन्तवद्वित्यस्यापस्था
नाय तदन्तविधिः प्रथमं सन्निधीयते॥ पश्चात्तु लिंगास्परित्यज्यते॥ अथवा लिंगादयं ग्रहणं निपा[...]तेन विशेष्यते इति तदन्तविधेरभावाद तिदेश
स्यापि प्राप्त्र [...] स्वतन्त्रस्तत्फलसंपत्त्याल्लोके परिभाषा भविष्यतीति॥ एवं तर्हीति॥ संज्ञां विधीयमानत्वात्प्राधान्यात् संज्ञिनो गुणत्वात् पृथु
नायजेतेतिवत्संख्या विशेषायां सिद्धायां एकग्रहणमन्यत्र जातिसंप्रत्ययार्थं। अत्र समुदायग्रहणाशंकायां निरर्थं लोके ग्रहणं ज्ञापनफ
लं संपद्यते किं पुनः स्याद्यत्र समुदायस्य ग्रहणं स्यात्॥ उच्यते॥ इह अईउ अयेहीतिसमुदायस्यैकासंज्ञा स्यात्रावयवानामेका डि

आचार्यप्रवृत्तिर्ज्ञापयति। इयमिह परिभाषा भवति। आद्यन्तवदेकस्मिन्निति। इयं न भवति येन। वि
धिस्तदन्तस्येति। यदमनाङिति प्रतिषेधं शास्ति॥ एवं तर्हि सिद्धे सति यदग्रहणं क्रियमाणे एक
ग्रहणं करोति तज्ज्ञापयत्याचार्योऽन्यत्र वर्णग्रहणे जातिग्रहणं भवतीति। किमेतस्य ज्ञापप
ने प्रयोजनं। दंभेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धमिति यदुक्तं तदुपपन्नं भवतीति। अना
ङिति किमर्थं। आ उदकान्तात्। आ उदकान्तात्। इह कस्मान्न भवति आ एवं नु मन्यसे। आ एवं किल
तदिति। सानुबंधकस्येदमाकारस्य ग्रहणं। अननुबंधकश्चात्राकारः। कः पुनरयं सानुबंधकः।

वचनं यदित्थं तस्यैव प्रकृतिभावाद्गुणादेशो न स्यात्॥ वयोस्तु संधिः स्यात् अ समुदायपरिग्रहानुरोधाच्च निपातसमुदायो गृह्यते एकनिपातस्या
समुदायस्याभावात्। अनाङिति किमर्थमिति। ङिद् ङितोराकारयोर्विषयविभागप्रदर्शनायप्रश्नः। इह कस्मादिति। अनुबंधनिवृत्तौ विशेषापरिज्ञा
नात्प्रश्नः। अर्थविशेषात् ङिशेषावसायइत्युत्तरं॥ ईषदर्थे आ उष्णं ओष्णं। आङीषदर्थे इति चोक्तं। क्रियायोगे आङ् मतः एतः प्रादिषु हि ङित्स्वयते आङ्
र्यादाभिविध्योरिति समासविधौ ङिन्निर्दिष्टः। आ उदकान्तात् ओदकान्तात् आ आहित्वाद्वादिह वाक्यादिति विनानेनेति मर्यादासह तेनेत्यभिविधिः पूर्व
प्रकालस्य वाक्यस्यान्यथाद्योतनायाकारः प्रयुज्यते। आ एवं नु मन्यते नैवं पूर्वं प्रमंस्थाः संप्रति मन्यस इति वाक्यारंभसूचनायाकार इत्यपरे तथा स्मृ

श्री व ४

७

ओत्॥ निपातसमाहारोयमिति। अनर्थकानामपि निपातानां कमिमिदुइत्यादीनां पदार्थभेदाभावेपि निपातसमाहारत्वमुक्तं॥ एवेतदीति। चादिषुल
धापाठादितिभावः। ओ षु यातमिति॥ आउ ओ इत्यत्रोत वज्ञावाङ्वत्ययमाङिति अनाङिति प्रतिषेधः प्राप्नोति। पर्युदासे तु न दोषः। तत्राङ्ग
हस्यस्योकारस्याङ्सहैकादेशः आद्विज्ञावाङुकारग्रहणेन ग्रहणतइति सिध्यत्येव प्रगृह्यसंज्ञा। तस्याश्च प्रयोजनं कश्चिद्धारयाणो अयामि
निपाते प्रकृतिभावः। अदोभवद्दिति। अंतत्वेनात्र निपातत्वं। ऊर्यादिषु तिनिपाताधिकारात्। प्रतिषिद्धार्थत्वादस्य कथमत्र प्राप्तिरिति

ओत्॥ किमुदाहरणं। आहो उताहो इति। नैतदस्ति प्रयोजनं। निपातसमाहारोयं। आहो
उ आहो इति। उत आहो उ ताहो इति। तत्रानाङित्येव सिद्धं। एवं तर्हि एके निपाता इमे॥ अ
थवा प्रतिषिद्धार्थोयमारंभः। ओ षु यातमरुतः। ओ षु यातं हि हतीचक्राकरी। ओ श्रि
त्सरवायंसरव्यावहुत्यां॥ ओतश्च प्रतिषेधः। ओ इत्यस्य निपातस्यान्तस्य प्रतिषेधो
वक्तव्यः। अ न द अदः अभवत् अदोभवत्। तिरोभवत्। न वक्तव्यं। लक्षणप्रति

वेदुभयार्थत्वाददोषः। तथाह्योदंतस्य प्रगृह्यसंज्ञा विधीय पदोक्तयोः प्रतिपदोक्तस्यैवेवं भविष्यति। एवमपि लि
मानाप्रतिबंधाभावाददोभवदित्यत्रापि भवतु। ओ षु यातमित्यत्रापि परत्वादनाङिति प्रतिषेधं बाधत इति प्रतिषिद्धार्थत्वमपि स्या
दिति कोविशेषः। उकारस्य प्रतिपदोक्तस्य ग्रहणात् सिद्धमेतत् ओकारस्यात्र प्रतिपदोक्तत्वमस्ति गमेडो इति साक्षादुच्चारणात्। य
स्य हि साक्षादुच्चारणं नास्ति आङुण इत्यादि सामान्यलक्षणेन तद्रूपं निष्पाद्यते तल्लाक्षणिकमुच्यते॥ ॥१॥ ॥२॥ ।

।एवमप्यीति।२

भा०के०॥

८७ एवं तर्हीति ॥ गुणादागतो गौणः ॥ यथा गोशब्दस्य जाड्यादिगुणनिमित्तोऽर्थो वाहीकः ॥ मुखमिव प्रधानत्वान्मुख्यः ॥ तत्र स्वरूपग्रहणेन तु नार्थवत्त्वं हि शास्त्रस्य ज्ञापितं तथापि यथार्थ यतः कार्यं ... णाभवितव्यम् । स चार्थः प्राथम्यान्मुख्य एव गृह्यते । गोशब्दो यथैव प्रयुज्यमानो मुख्यार्थे शेषे गौणेऽपि प्रवर्तते । अनियतश्च गोगौणोऽर्थः ॥ तस्माल्लोकिकोऽयं न्यायो गौणमुख्ययोरिति । गो... भवदित्यत्र तु जाड्यादिना धर्मेण गौणत्वमारोपितमिति गौणत्वमर्थस्य गो... भवदित्यं च वृत्तौ प्रक्रान्ते । कर्तृत्वं संचीभवतीति ...

एवं तर्हि गौणमुख्ययोर्मुख्ये संप्रत्यय इति । तद्यथा गोरनुबन्ध्योऽजोऽग्नीषोमीय इति न वाहीकोऽनुबध्यते । कथं तर्हि वाहीके वृद्ध्यात्वे भवतः ॥ गौस्तिष्ठति गामानयेति । अर्थाश्रय एतदेवं भवति । यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति । शब्दाश्रये च वृद्ध्यात्वे ॥ ॥ उञः ऊँ ॥

8 इह कस्मान्न भवति । आहो इति । उताहो इति । उञ इत्युच्यते । न चात्रोञं पश्यामः ॥

उञोऽयमन्येन सहैकादेशः उञ्ग्रहणेन गृह्यते ॥ आचार्यप्रवृत्तिर्ज्ञापयति नोञ एकादेश उञ्ग्रहणेन गृह्यत इति ॥ शिवः॥

इति बहुवचननिर्देशात् । प्रकृते च गौणत्वमारोपितं न मुख्य... ...

...वामा... प्रत्यये चार्थे ... अतिपदिका ... गुणन्यायात् कार्ये युक्ते तेषु प्राधान्येन संनिधानात् गौणत्वं प्रतीयते तत्र स्वच ८

स्वार्थस्य मुख्यव्यपदेशो नास्ति । गौणापेक्षया संबन्धिशब्दत्वान्मुख्यव्यपदेशस्य गौणाभावे भावाद्धत्वप्रत्यये चेत्युक्ते तत्वनात्वेनापेक्ष्यते त

द्यथा ... गमाल भेतेति गुणद्वयोः श्रोतः क्रियासंबन्धः सामीप्यात्तु न्यायात् सरस्य... ॥ एवं गां वाहीकमानयेति पूर्वक्रियाभिसंबन्धा

पेक्षया विभक्तौ गुणन्यायाच्चामीप्यान्न्यायात्क्षामानाधिकरण्यात्

यद्यमिति। एकारेणोच्चारिते आदिवद्भावात्तत्संज्ञासिः। इहरूपत्रयं बोध्यं। ऊँ इति वितिः। ऊँ इति। तच्चैकयोगेन सिध्यति। एकयोगे सूत्रेऊँ इति श्रुतिरादेशो
नञ्कृतत्वादसंबध्यते न प्रगृह्यसंज्ञया। सा निपातस्यैकाजनाङिति नित्येवास्य भविष्यति। शाकल्यग्रहणानुवृत्त्या चादेशो विकल्प्येते रूपद्वयं स्यात्
उ इति। ऊँ इति मनुस्वरीतितदर्थमाह उञ इति योगविभाग इति। उञ इत्यत्र शाकल्यस्येतौ प्रगृह्यमितिचानुवर्त्तते तत्र प्रगृह्यसंज्ञेव शाकल्य

यद्यमोऽद्वितीयो। तस्य निपातस्य प्रगृह्यसंज्ञा शास्त्रे नेतदस्ति ज्ञापकं। उक्तमेतत्॥ इति वि
सूत्रार्थो यमारंभ इति। दोषः खल्वपि स्यात्। यद्युञेकादेश उञग्रहणेन न गृह्येत। ज्ञानु उ अस्य
रूजति ज्ञान्वस्य रूजति। ज्ञान्व अस्य रूजति भयउ ओवोवेति वत्वं न स्यात्। एवं तर्हि कनि
पातादिमे॥ अथवा द्वावुकारौ विमौ॥ एको ननुबंधः। अपरः सानुबन्धः। तद्यो ननुबंध
कः तस्यैष एकादेशः॥ उञ इति योगविभागः॥ उञ इति योगविभागः कर्त्तव्यः। उञः शाक
ल्यस्याचार्यस्य मतेन प्रगृह्यसंज्ञा भवति। ऊ इति विति। तत ऊँ। उञ ऊँ इत्ययमादेशो भ
वति शाकल्यस्याचार्यस्य मतेन दीर्घोनुनासिकः प्रगृह्यसंज्ञकश्च

स्य मते न विधीयते नान्येषामिति निष्कृत्यं तरानुसंधानं॥
रेण विभाषा संपद्यते। उ इति विती ति। ऊँ इत्येवं च यदि शाकल्यस्येति नापेक्ष्यते तदा प्रगृह्यस्यायमादेशो नित्यमादेशः स्यात्। ततश्च विति ऊँ इत्येतद्
रूपं स्यात्। तस्माच्छाकल्यग्रहणानुवृत्त्या आदेशविकल्पे सति त्रीणि रूपाणि सिध्यंतीति॥ ऊँ वा शाकल्यस्येति। शाकल्यग्रहणं तैरेव फलं प्रति
पादयति। एतदेव व्याचष्टे। शाकल्यस्य विभाषायथास्यादिति। प्रगृह्यसंज्ञा तदेशश्चेत्यय द्यपि सर्वेस्वेव फलरूपेण यानि द्वेऽशस्य देशो द्विवचनेन
बाधरूपेण

भा०कै०प्र०

८८

इद्दुतौ च सप्तम्यर्थे ॥ इद्दुतौ सप्तमीत्येवेति । सप्तमी सहचरितं यदीदूदन्तं सप्तम्यां वा परतस्तत्प्रगृह्यसंज्ञं भवतीत्येवं प्रत्ययलक्षणेन लुप्तायाम
पि सप्तम्यां सोमो गौरी अधिश्रित इत्यादौ भविष्यति प्रगृह्यसंज्ञेति प्रश्नः । लुप्त इति ॥ संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधिप्रतिषेधादस
[illegible] त्यर्थग्रहणे सप्तम्या एव संज्ञिनी [illegible] त्वादसत्याश्च कार्यभावात्प्रत्ययनिमित्तं यत्रान्यस्य कार्यं विधीयते तत्रैव प्रत्ययलक्षणास्य संज्ञा

॥ इद्दुतौ च सप्तम्यर्थे ॥ इद्दुतौ सप्तमीत्येव ॥ इद्दुतौ सप्तमीत्येव सिद्धं । नार्थोऽर्थग्रहणेन । लुप्तेऽ
र्थग्रहणाद्भवेत् । लुप्तायां सप्तम्यां प्रगृह्यसंज्ञा न प्राप्नोति । के । सोमो गौरी अधिश्रित इति ॥
इष्यते चात्रापि स्यादिति । तच्चान्तरेणायत्नेन सिध्यतीत्येवमर्थमर्थग्रहणं । नात्र सप्तमी
लुप्यते किं तर्हि पूर्वसवर्णोऽत्र भवति । पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते । य
दि पूर्वसवर्णो दीर्घः आट् आम्भावश्च प्राप्नोति । एवं तर्हि आहायमीद्दुतौ सप्तमीति ।
न चास्ति तत्र सप्तमी इद्दुतौ तत्र वचनाद्भविष्यति । वचनात्तत्र दीर्घत्वं । नेदं वचना
ल्लभ्यं ॥ अस्ति ह्यन्यदेतस्य वचने प्रयोजनं किं ॥ शिवः॥ २

गौरी त्यत्र प्रसङ्गात् अर्थग्रहणं कृतं । अर्थग्रहणेन सत्यर्थनिमित्तासंज्ञे
यं भवति न प्रत्ययश्रवणनिमित्तेति लोपेऽपि सिध्यति । पूर्वसवर्ण इति ॥ सति च पूर्वसवर्णे एकादेशे चादिवद्भावाद्भवतीकारः सप्तमीति सिद्धा
संज्ञा । आडाम्भाव इति । एकादेशं बाधित्वा ऽऽडाम्भावौ स्यातां । वचनादिति । सर्वत्रैव सप्तमी लुप्यत इति वचनसामर्थ्यात्सप्तमीशब्देन सप्तमीस
हचरितस्य ग्रहणान्मुख्यकल्पनासंभवे गौणीकल्पना गृह्यसंरत्या[?]श्रयणात् सिध्यतीति भावः ॥ ॥ ॥ ॥

सरसीयदीति पदीति संभावनायां। तस्मात्स्थितमेतत् ध्वनात्सर्वत्र लुप्तायामपि सप्तम्यां भविष्यतीति नार्थो ग्रहणेन। २

मुख्यकल्पनासंभवत्येवेत्युत आह।। यत्रेति।। सरसीत्यत्र सरः शब्दात्परस्येयाङियाजीकारागमे पुपसंख्यानमिति कारे कृते भवतीकारः सप्तमी ति तत्रैव स्यान्न तु गौरीत्यत्रेति भावः।। ज्ञापकमिति।। ईदूदेदिति सूत्रे तृतीयचतुर्थपक्षयोरित्यर्थः। इह प्रगृह्यसंज्ञाप्रकरणे यदि प्रत्ययलक्षणं स्यात्तर्हि तद् ईदूतौ सप्तमी त्येव सप्तमी सहचरिते सप्तम्यां वापरे तो यदीदूदंते तदा प्रगृह्यमिति प्रत्ययलक्षणेन लुप्तायामपि सप्तम्यां संज्ञा भविष्यतीति किमर्थ

एवं तर्हि ज्ञापयत्याचार्यः न प्रगृह्यसंज्ञायां प्रत्ययलक्षणं भवतीति। किमेतस्य ज्ञापने प्रयोजनम्। यत्र सप्तम्या दीर्घत्वमुच्यते इति तच्छक्यं सरसीशयानमिति। मतिप्रयोजनं इह न प्राप्नोति सोमो गौरी अधिश्रित इति। तत्रापि सरसीयदि। तत्रापि सिद्धं। कथं। यदि सरसीशब्दस्य प्रवृत्तिरस्ति। अस्ति च लोके रसे सीशब्दस्य प्रवृत्तिः। कथं दक्षिणापथे महान्ति सरांसि सरस्य इत्युच्यंते। ज्ञापकं स्यात्तदन्तविधेः प्रयोजनं कुमार्योरगारं कुमार्यगारं वध्वोरगारं वध्व

ग्रहणेन तत्क्रियमाणं प्रत्ययलक्षणाभावं सूचयति। संज्ञाविधौ प्रत्ययग्रहणे तदन्तविधेरभावात्तदन्तपक्षस्तत्रैवास्थितइति ज्ञापनफलादाहमावेति।।

२८

**वाप्यश्वो नद्यातिरिति। संज्ञायामिति समासे कृते सप्तमी सहचरितनी कारान्तं पूर्वपदमिति स्यात् प्रगृह्यसंज्ञेति तदर्थमर्थग्रहणं
अथेति। अस्त्येवात्र सप्तम्यर्थ इति प्रश्नः। जहत्स्वार्थेति। समासस्यैवार्थवत्त्वात् पूर्वोत्तरपदयोर्वर्णवदनर्थकत्वात्सप्तम्यर्थोऽत्र नास्ति
स्वर्थः। समुदायार्थ इति। वृत्तौ हि पूर्वपदं स्वार्थमप्यभिसन्धत्ते प्रधानार्थमपीति स्वार्थसंमिश्रस्य प्रधानार्थस्याभिधानात्तां समुदकव

अथवा पूर्वपदस्य माभूदित्येवमर्थमर्थग्रहणं। वाप्यामश्वो वाप्यश्वः नद्यामातिर्नद्यातिरिति। अ
थक्रियमाणेऽर्थग्रहणे कस्मादेवात्र न भवति। जहत्स्वार्था वृत्तिरिति। अजहत्स्वार्थायां वृत्तौ
दोष एव। अजहत्स्वार्थायां च न दोषः। समुदायार्थोऽभिधीयते। ईदूतोः सप्तमीत्येव खलु तेऽर्थग्रहणाद्
वेत्। पूर्वस्य चेत्सवर्णोऽसावाडाम्भावः प्रसज्यते। वचनाद्यत्र दीर्घत्वं तत्रापि सरसीयदि। ज्ञा
पकं स्यात्तदंतत्वमावा पूर्वपदस्य भूत्। ईदूतौ च सप्तम्यर्थे॥ ॥ऽ॥ ॥ऽ॥ ॥ऽ॥ शिव ४

त्स्वार्थस्य विवेकानवगमात्समुदायार्थो वृत्तौ संसृष्टरूप एवाभिधीयते। सप्तम्यर्थग्रहणेन यावानेवार्थो वाक्ये सप्तम्यन्तेनाभिधीयते केव १०
लो संसृष्टरूपस्तस्यैव ग्रहणमिति समासे न भवति प्रगृह्यसंज्ञा॥ ॥ऽ॥ ॥ऽ॥ ॥ऽ॥ ॥ऽ॥ ॥ऽ॥ ॥

॥ दाधाघ्वदाप्॥ दाधाशब्दयो घुसंज्ञा विधीयमाना रूपांतरयुक्तानां दोदेङ्धेटां न प्राप्नोतीत्याह। घुसंज्ञायामिति। किंप्रयोजनमिति। दोदेङ्धेटामिति अंतानामनुकरणानि व्यवस्थाप्यात्येकत्वे ददातियच्छतिददात्यनुकरणानां चैकशेषे कृते द्वंद्वनिर्देशात्सिद्धा दोदेङ्धेटां घुसंज्ञा कृतात्वानां चेयं स्यान्निवृत्तात्वेन सिद्धेति प्रश्नः। आत्वभूतानामिति। भवतेः प्राप्त्यर्थो दाधयोरिति विभाषितत्वाच्च कर्तरि कर्मणि वा प्रत्ययः। आत्वंभूता आत्वेन च [illegible] आकारांता इत्यर्थः। न तु लक्षणेन

दाधाघ्वदाप्। घुसंज्ञायां प्रकृतिग्रहणं शिदर्थं। घुसंज्ञायां प्रकृतिग्रहणं कर्त्तव्यं। दाधाप्रकृतयो घुसंज्ञा भवंतीति वक्तव्यं। किंप्रयोजनं आत्वभूतानामियं संज्ञा क्रियते सा आत्वभूतानामेव स्यात् तु अनात्वभूतानां न स्यात्। ननु च भूयिष्ठानि घुसंज्ञाकार्याण्याद्धधातुके। तत्र चैते आत्वभूता दृश्यंते। शिदर्थं। शिदर्थं प्रकृतिग्रहणं कर्त्तव्यं शित्यात्वं प्रतिषिध्यते तदर्थं। प्रणिदयते प्रणिधयतीति। भा(?)रद्वाजीयाः पठंति। घुसंज्ञायां प्रकृतिग्रहणं शिद्विकृतार्थं। घुसंज्ञायां प्रकृतिग्रहणं क्रियते। शिदर्थं विकृतार्थं च शित्युदाहृतं विकृतार्थं खल्वपि प्रणिदातापणिधा

[redacted] कृतात्वा इति विज्ञेयं। अस्यायमभिप्रायः एउंता

नुकरणे प्रमाणाभावाल्लाक्रियायोगे रवाच्च प्रयोगएवये आकारांताः प्रयुज्यंते तदनुकरणानामयमेकशेषनिर्देशः। सामान्यानुकरणं वा दाप्रत्ति धाइति च पदं

निर्दिष्टमिति। प्रणिदयत इति। घुसंज्ञायां ने[illegible]र्गदेतित्वं भवति। लभत इति। आक्षणिके हि लक्षणानुसंधानद्वारेण प्रतिपत्तिर्बहिरंगा प्रतिपदोक्तत्वेनांतरं

गा। प्रणिदातेत्ति घेते ईकोवा रूपं॥

१० कथमिति। दाधाप्रकृतय इति षष्ठीसमासः कर्मधारयो वा। उभयथापि व्याप्तिरिति प्रश्नः। दाधाप्रकृतय इति। दीयत इत्यादावीत्वा + दः।
आत्वभूतानामिति। ... दाण् दाम् धाञ्। प्रकृतयश्चैषामिति। प्रत्यासत्त्यैवामिमिलप्यते अर्थ इति। एतद्द्वितीयं वाक्यं सन्निधानाद्दाधा

अथ क्रियमाणोऽपि प्रकृतिग्रहणे कथमिदं विज्ञायते दाधाः प्रकृतय इत्याहोस्विद्दाधांप्रकृतय इति।
किं चातः। यदि विज्ञायते दाधाः प्रकृतय इति स एव दोषः आत्वभूतानामेव स्यात् अनात्वभूतानां न स्यात्।
अथ विज्ञायते दाधांप्रकृतय इति अनात्वभूतानामेव स्यादात्वभूतानां न स्यात्। एवं तर्हि नैवं वि-
ज्ञायते दाधाः प्रकृतय इति नापि दाधांप्रकृतय इति। कथं तर्हि दाधा घुसंज्ञा भवन्ति प्रकृतयश्चै-
षामिति। तत्र हि प्रकृतिग्रहणं ... कर्त्तव्यं न कर्त्तव्यं। इदं प्रकृतमर्थग्रहणमनुवर्त्तते।
क्व प्रकृतं ईङ्‌तोऽर्थमर्थं इति तत्तो वक्ष्यामि दाधाघ्वदाप् अर्थ इति। नैवं शाक्यं ददातिना स-
मानार्थान् शानिशासति दाशातिमहति प्रीणाति प्रभृतीनाहुः एतेषामपि घुसंज्ञा प्राप्नोति तस्मान्नैवं
मर्थेयः वर्त्तते स घुसंज्ञ इति प्रकृतीनामपि सिध्यति। न तु स्तादिति। घुमास्थाद्योः प्रकृतिग्रहणं कर्त्तव्यं तदुभाभ्यां संभंत्स्यते॥ ॥ ॥

शिव४ ११

नेर्गदोतिसूत्रे

मीनोतिं॰ त्व॰

प्रतिमिनोती तिामीनातिं इडं॰ल्यपिचेत्यात्वविधानाद्भवतिमाप्रकृतिंमनयोः।गामादाग्रहणेष्विति।अस्यचार्थस्यदेपः।पित्वमदाबितिप्रतिषेधेसामा न्यग्रहणार्थलिंगंअन्यथास्यलाक्षणिकलादर्थग्रहणंभविष्यतीति किंप्रतिषेधार्थेन[redacted]पित्वेनसामान्यपेक्ष याचनिरनुबंधकइति॥

यद्विप्रकृतिग्रहणंक्रियते प्रतिमिनोति[redacted]प्रनिमिनातिअत्रापिप्राप्नोतिअथाक्रि यमाणेप्रकृतिग्रहणेइहकस्मान्नभवति प्रनिमाताप्रनिमातुं।प्रनिमानितव्यमिति।आकारां तस्यङि॰तोग्रहणंविज्ञास्यते।यथैवतर्हिअक्रियमाणेप्रकृतिग्रहणेआकारान्तस्यङि॰तो ग्रहणंविज्ञास्यते।एवंक्रियमाणेपिप्रकृतिग्रहणेआकारांतस्यङि॰तोग्रहणंविज्ञास्यतेवि कृतार्थेनापिनार्थः।दोषएवैतस्याःपरिभाषायाः।लक्षणप्रतिपदोक्तयोःप्रतिपदोक्तस्यैवेग्र

हणप्रतिपदोक्तयोः इति चपरिभाषाद्वयानुपस्थानमिदज्ञापयतीति घेटोपिसिध्यति।दोदद्घोरित्यत्रवादइत्येतद्धोति वत्यर्थसत्वधेटो घुसंज्ञांज्ञापय तिनहिदधातिनिवृत्यर्थदद्इत्येतद्धातेर्हि इतिह्यादेशाविधानाद्दत्रावाप्रसंगात्॥ ॥५॥ ॥५॥ ॥५॥ ॥॥

नर

९१ समानशब्दानामिति। समानशब्दानामित्यर्थः। प्रनिदारय तिप्रतिधारयतीति। दरूं दाधाधोर्घ्वि चिदत्वाया कारे दाधाशब्दो संपद्यते तौ चार्थवन्तौ पश्चात्तु रप रत्वं क्रियमाणमागमभूतत्वादन्यत्वं करोतीड् नित्राप्तिः। अर्थवद्ग्रहणादिति। अर्थवद्ग्रहणेनानर्थकस्येत्यस्यार्थस्य स्वरूपं निरूपमनेनेनज्ञादितत्वा दाउरणपरइ तिचाणि विधीयमान एव रपरो भवतीति वृद्धिः क्रियमाणरपरा भवतीति दारू धारोरेवार्थवत्वं न तु तदवयवयोरितिना

घुप्रतिषेधः समान१ समानशब्दानांप्रतिषेधो वक्तव्यः। प्रनिदारयति। प्रतिधारयति। दाधा घुसंज्ञा भवंतीति घुसंज्ञाप्रा

प्तौ निसमानशब्दाप्रतिषेधोऽर्थवद्ग्रहणात् समानशब्दानाप्रतिषेधः अनर्थकः प्रतिषेधोऽप्रति

१५ षेधः। घुसंज्ञाकस्मान्न भवति। अर्थवद्ग्रहणात् अर्थवतोर्दाधोर्ग्रहणं नैतावर्थवंतौ। अनुपस

र्गा। अथवायत्क्रियायुक्ताः प्रादयस्तं प्रत्येवगत्युपसर्गसंज्ञा भवंतिनचैतौ दाधौ प्रति क्रियायोगः

इहापितर्हि नप्राप्नोति प्रणिदापयति प्रणिधापयतीति। अत्रापि नैतौ दाधावर्पयतौ ना शि.च.१

त्तिक्रियायोगः। घुसंज्ञा। अनुपसर्गाद्वेति। अभ्युपगम्य घुसंज्ञादोषं परिहरति। घुसंज्ञापेक्षया यं नौ दाधौ प्रति क्रियायोगः॥४॥ ॥ १२

यस्योपसर्गत्वं। तस्मात्परस्य नेर्धीपरतो णत्वं विधीयते। अत्र दाधापेक्षया नास्ति प्रशब्दस्योपसर्गत्वं किंतु दारू धारू शब्दापेक्षया इत्यदोषः

। इहापितर्हीति। अत्रापि पुकि कृते पकारांतोर्थवान् न केवलो दाशब्दः पुगंतमेव च प्रत्युपसर्गत्वं न दाशब्दमिति प्रश्नः॥ ॥५॥ ॥६॥

नवार्थवत इति। लब्धात्मकस्य भावस्य निमित्तवशादुपचयापचयौ व्यपदेशहानिं न कुरुतः। यथा देवदत्तस्यांगाधिकांगच्छेदौ। इहाप्यंतरङ्गत्वात्कृतायां दाधोर्घुसंज्ञायां पश्चाद्दुत्सवः
पुगागमो घुव्यपदेशं न निवर्त्तयति नाप्यर्थवत्त्वमित्यदोषः। अनर्थकस्याप्यागमो व्यपदेशहानिं न करोति। यथा सत्यपि रेफे आकाराकारयो[illegible]र्वृद्धिगुणव्यपदेशहानिः।
इह त्वर्थवतोऽर्थवद्ग्रहणं दृष्टं वत इति युक्तं यदा च प्रकृत्यर्थः प्रेण विशेष्यते तदायं परिहारः। यदार्थविशेषणत्वे तु पस्य दाधोप्रत्ययानुपस[illegible]र्गत्वाम्स्तं भवत्येव। नं द्गुणीभू

न वा ह्यर्थवतो ह्यागमस्तद्गुणीभूतस्तद्ग्रहणेन गृह्यते यथान्यत्र। न वा एष दोषः किं कारणं। अर्थवत
आगमस्तद्गुणीभूतः अर्थवद्ग्रहणेन गृह्यते। यथा अन्यत्र। नन्वथान्यत्राप्यर्थवत आगमोऽर्थवद्ग्रह
णेन गृह्यते। क्वान्यत्र। लविता चिकीर्षक इति। युक्तं पुनर्यन्नित्येषु नाम शब्देषु आगमशासनं स्यात्
न नित्येषु नाम शब्देषु कूटस्थैः अविचालिभिर्वर्णैर्भवितव्यं अनपायोपजनविकारिभिः। आगम
श्च नामापूर्वः शब्दोपजनः। अथ युक्तं यन्नित्येषु शब्देषु आदेशाः स्युः। बाढं युक्तं। शब्दान्तरैरिह भवित
व्यं। तत्र शब्दान्तरस्य प्रतिपत्तिर्युक्ता। आदेशास्तर्हीमे भविष्यन्ति। अनागमकानां सागमकाः। तत्क

न इति। प्रयोगसंपादनेऽउपकारक इत्यर्थः। युक्तं पुनरिति। ननु नित्येष्वागमविरोधात्तद्वारेणादेशविधानाद्वा पूर्वशब्द एवार्थवा[illegible]न्न दीह इति तदवस्थो दो
ष इति भावः। अथ युक्तमिति। तत्रापि स्थानिनमपनीयादेशः क्रियत इत्यनित्यत्वप्रसंगः। यश्चोभयोर्दोषो न तमेकश्चोद्यः। बाढमिति। प्रसंगवाची स्थानशब्दो
न निवृत्तिवाची। ततश्च संत एव प्रयोगे नित्याः शब्दाः। कुधुन्भञ्ज ननिमज्ज न द्वारेण प्रतिपादने। आगमस्त्ववस्थितस्यापूर्वः क्रियमाणो नित्यत्वं विरुणद्धि। आदेशा

७२

सर्वइति। आगमा अपीत्यर्थः। सर्वपदादेशाइति पदशब्देन न सुप्तिङन्तं गृह्यते अपितु कार्यप्रतियत्सप्रमानं प्रतीयमानं प्रकृतिप्रत्ययादि तत्सर्वं। एकदेशविकारेही ति। यद्यपि सर्वविकारेष्वनित्यत्वं यथा पिठरस्थपयसः पाकादिषु तथापि विकाराभावप्रतिपादनार्थमेतत् बुद्धिविपरिणाममात्रं। स्थान्यादेशागमागमिभाव द्वारेण क्रियत इत्यर्थः। यद्येवं स्त्रशब्दस्य दापूर्वाद्द आदेशः क्रियत इति दाश्ब्दस्यानर्थकत्वप्रसंगः। नैष दोषः। नित्यतास्मर्थनाय आदेशपक्षआश्रितः। प्रक्रि यायां तु कल्पिता या आगमागमिभावएव। अन्यथागमादेशयोर्भेदेनध्यवस्थोशेन स्यात्। दीङ इति। उपादीसत इति स्थिते मीनोतीत्यात्वे कृते दाशब्दसादर्थ्ये लाद

सर्वे सर्वपदादेशाः दाक्षीपुत्रस्य पाणिनेः। एकदेशविकारे हि नित्यत्वं नोपपद्यते। दीङः प्रतिषेधः स्थाघ्वो रित्वे। दीङः प्रतिषेधः स्थाघ्वोरित्वे वक्तव्यः। उपादास्तास्य स्वरः शिक्षकस्येति। आत्वे कृते स्थाघ्वोरिच्चेतीत्वं प्रा प्नोति। कुतः पुनरयं दोषो जायते। किं प्रकृतिग्रहणाद्दोस्विद्रूपग्रहणात्। रूपग्रहणादित्याह। इह खलु प्रकृतिग्रहणे दोषो जायते। उपादिदीषते। स निमीमाघुरभलभेति। नैष दोषः। दा प्रकृतिरित्युच्यते न चेयं दाप्रकृतिः। आकारान्ता नामेजन्ताः प्रकृतयः एजन्ता नामीकारान्ताः। न च प्रकृतिग्रहणे न गृह्यते। सत्यं हि

प्रकृतिः प्रकृतिः

घुसंज्ञाप्रसंगः। इह खल्विति। एचो विषय आत्वविधानात् दीशब्द एवदाप्रकृतिरिति दोषः। न चेयमिति। एच एव स्थाने आत्वविधानादित्यर्थः। सन्निपाते सि अकित्वसन्निपातेनात्वं क्रियते। यदि चात्र घुसंज्ञा स्यात्तस्थाघ्वोरिच्चेति कित्वं स्यात् इति अकित्वस्य विघातः स्यादिति घुसंज्ञां प्रतिनैव आकार आत्मानं दर्शयतीति घुसंज्ञा न प्रवर्त्तते। अत्र चेचिदाङः। दीङस्तु जादावात्वे घुसंज्ञा भवत्येवेति प्रातिदातेति णत्वं सिध्यति। अतएव वार्त्तिककारेण स्थाघ्वो रित्वइति विषयविशेषो निर्दिष्टः। अन्ये त्वाहुः। निर्देश एवैजन्तानामनुकरणनामात्वे कृतेदागुदाङ्धानां चेक्शेषेद्दे चदाधाइति निर्देशाद्दीङो नास्ति प्राप्तिः

१३

शिव॰

13

दाप्रतिषेधइति। दापूलवलइत्यस्यैव निषेधः स्यादित्यर्थः॥ अवदातमिति। तत्रमत्रप्राप्नोति। शक्यं तावदिति। दाप् दैपोधातुषु यनोपठितव्यौ। तावत्येवेति॥
इत्संज्ञायां सत्यामेव। प्रयोगे दाशब्दएवायपि कार्यं तु लभत इत्यर्थः॥ अथवेति। अनुबंधानामेकांतत्वपक्षेउपदेशे एजंततानामातत्सु चमानं दैपोनप्राप्नोति।

दाप्रतिषेधे न दैप्यनेजंतत्वात्। दाप्रतिषेधे दैपप्रतिषेधो न प्राप्नोति। अवदातं मुखं। ननु चात्वे कृते भविष्य
ति। न घात्वं न प्राप्नोति किं कारणं। अनेजंतत्वात्। सिद्धमनुबंधस्यानेकांतत्वात्। सिद्धमेतत्। कथं। अनुबंधा
अनेकांताः॥ पित्प्रतिषेधाद्वा। अथवा दाधाघ्वपिदिति वक्ष्यामि तच्चावश्यं वक्तव्यं। अदाबिति सुच्यमाने
इहापि प्रसज्येत। प्रणिदापयतीति। शक्यं तावदनेनादाबिति ब्रुवता गंतस्य प्रतिषेधो विज्ञातुं। सूत्रं
भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं दाप्रतिषेधे न दैपीति। परिहृतमेतत्। सिद्धमनुबंधस्यानेकांतत्वा
दिति। अथैकांतेषु दोष एव। एकांतेषु च न दोषः आत्वे कृते भविष्यति। ननु चोक्तं त्वात्वं न प्राप्नोति। किं कारणं
अनेजंतत्वात्। पकारलोपे कृते भविष्यति। न स्यात्तदा दाभवति। भूतपूर्वगत्या भविष्यति। एतच्चात्र युक्तं॥
यत्सर्वेषु वसानुबंधकग्रहणेषु भूतपूर्वगतिर्विज्ञास्यते। अनैमित्तिको ह्यनुबंधलोपः तावत्येव भवति। अथ
तिज्ञापकोपन्यासः॥ माङ्इ इति मेङोग्रहणं न माङः मेङो वतीहारेऽनित्ययोगात् माङस्तु विवक्षावशान्नितिमिमीत इति कादाचित्क लाघवहारयोगस्य प्रणिदानं व्यति
हार इत्येकोऽर्थः॥ उदीचां मेङ इति तु न कृतं। एवं हि नानुबंधकृतमिति नानापि तस्यात्। अथवेति। दिवादिषु दैप् शोधन इति पठिष्यत इत्यर्थः॥ ॥ ४ ॥ ॥

14

भा०कै०प्र०

आद्यंतवदेकस्मिन्।। एकशब्दोऽसहायवाची। न संख्यावाची। बहुष्वपि व्यवस्थितस्य एकत्वसंख्यास्तीति किमेकस्मिन्नित्यनेन कृतं स्यात्। एकस्मिन्निति सु
१३ पमेये सप्तमीनिर्देशात् आद्यंतवदित्युपमानात्सप्तम्यंताद्वतिर्विज्ञायते। यथा मथुरावत् पाटलिपुत्रे प्राकार इति द्वयोर्ह्युपमानोपमेययोर्गाधारा
धेयसंबंधप्रतिपादनाय वाक्यं प्रयुज्यते। यदि च तयोर्भिन्नविभक्तित्वं स्यात् उपमानोपमेयभाव एव न गम्येत।। सर्वातिदेशानां कार्यातिदेश

आद्यंतवदेकस्मिन्। किमर्थमिदमुच्यते। सत्यन्यस्मिन्नाद्यंतवद्भावादेकस्मिन्नाद्यंतवद्वचनं।
सत्यन्यस्मिन्यस्मात्पूर्वं नास्ति परमस्ति स आदिरित्युच्यते। सत्यन्यस्मिन्यस्मात्परं नास्ति पू
र्वमस्ति सोंत इत्युच्यते। सत्यन्यस्मिन्नाद्यंतवद्भावादेतस्मात्कारणात् एकस्मिन्नाद्यंतापं
15 दिष्टानि कार्याणि न सिध्यंति। इष्यंते च स्युरिति। तान्यन्तरेण यत्नं न सिध्यंतीत्येकस्मि
न्नाद्यंतवद्वचनं। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति।। ॥५॥ शिव४

स्य प्राधान्यात्तस्यैवेहाश्रयणं। किमर्थमिति।। व्यपदेशिवद्भावेन सिद्धत्वान्न कर्तव्यमित्यर्थः। इतरो मुख्यसंभवत्तिगौणं न स्यादित्याह।। स १५
त्यन्यस्मिन्निति। आद्यंतौ शब्दौ विधेते यस्मिन् शास्त्रे तदाद्यंतवत् तस्य भावात्प्रवर्त्तनादित्यर्थः। क्वचिदाद्यंतभावादितिपा
ठः।।

तत्र व्यपदेशिवद्वचनमिति॥ सर्वकार्यसिद्ध्यर्थं व्यापकं कर्त्तव्यमित्यर्थः। तत्र निमित्तसद्भावानुख्यापदेशो यस्यास्ति स व्यपदेशी। यस्तु व्यपदेशाद्रहितः भावात् अविद्यमानव्यपदेशः स
तेन तुल्यं वर्त्तते कार्यं प्रतीति व्यपदेशिवत्। व्यपदेशिवत्तद्भाव्यते। वत्सादिति। वतूलेडिति प्रतन्मेति लोपः लेगेडा टावित्सडागमः। सिद्धं तु लं। अत्र सकारमात्रं प्रत्य
यो न तु प्रत्ययस्यावयवं [illegible] सकार इति षत्वं स्यात्। अवचनादिति। अवचनं वचनरहितं लोकविज्ञानं तस्माल्लोकव्यवहारात् इत्यर्थः। इदन्ताय दियायेति
इत्यातुः प्रयोगभेदा कुरूपः। एतिद्वतः यं तिअयनं आपकः अगात् गमयतीति। तस्यायमेकोऽवयव इव लक्ष्यते। अपवार्थविलोपातोरयं व

तत्र व्यपदेशिवद्वचनं। तत्र व्यपदेशिवद्भावो वक्तव्यः। व्यपदेशिवदेकस्मिन्कार्यं भवतीति वक्तव्यं। किं प्र
योजनं। एकाचो द्वे प्रथमार्थं। वक्ष्यत्येकाचो द्वे [illegible] प्रथमस्येति बहुव्रीहिनिर्देश इति। तस्मिन्क्रियमाण इहै
व स्यात् पपाच। पपाठ। इयाय आरेत्यत्र न स्यात्। व्यपदेशिवदेकस्मिन्कार्यं भवतीत्यत्रापि सिद्धं भवति। षत्वे
चादेशसंप्रत्ययार्थं। वक्ष्यत्यादेशप्रत्यययोरित्यवयवषष्ठ्येषेति। तस्मिन्क्रियमाण इहैव स्यात् करिष्य
ति। हरिष्यति। इह न स्यात् इन्द्रो मा वक्षत् स देवान्यक्षत्। व्यपदेशिवदेकस्मिन्कार्यं भवतीत्यत्रापि सिद्धं भ
वति। स तर्हि व्यपदेशिवद्भावो वक्तव्यः। न वक्तव्यः। अवचनाल्लोकविज्ञानात्सिद्धमेतत्। विज्ञानात्सिद्धं

एकोऽ [illegible] पैइति। अर्थस्य संयोगोपादानाभ्यां भवति व्यपदेश एकाजिति। एवं अन्तरेणापि वचनं लोके। तद्यथा। लोके शालासमुदायो ग्राम इत्यु
शिलापुत्रकस्य शरीरमित्यनेकक्रियाविषयस्यावस्थानुरिदमेका [illegible] वस्थायुक्तं शरीरमित्यस्ति व्यपदेशः। एवं हि मिपू प्रत्यय इदं स
हितोपि दृष्टो लोपि षष्ठ्यादित्यादेकेवलोपीति तस्यायं सकार इति व्यपदिश्यते। लोकनिरूढश्चायं व्यवहार इति लोकवच्छास्त्रेपि व्यवहारो गन्तुरव्यन्यायो

अन्यानननितितिकुथ्याकनीयानिति व्यपदिश्यते।२

९४ परसमुदाय इति। पादपर्यायः पदशब्दः तथा चैकपदा ऋगिति पाद एव विवक्षितः ननु ऋचः कस्याश्चिद् …पि एकमेव पदं भवति। अयमेव मे ज्येष्ठ इति। प्रथमरूप
ताध्यवसायात्॥ अत्रापार्थेनेति। पदादीनां योऽर्थः सोऽन्यपदार्थ इत्यर्थः। उभे द्वे पचारान्नाणि एव पदादि भिन्न शब्दभिधीयते॥ मध्यमकार्यकरणाच्च मध्यम इति व्यप
दिश्यते। अस्वस्तायामिति। बहुषु सत्स्वपि प्रसूता प्रथमपुत्रेण काचिदुच्यते। तथा च यापि प्रसो ष्यते सापिका चित् … तेन पुत्रे उच्यते इत्युभयोरुपादानं

विषमउपन्यासः। ग्रामशब्दोऽयं बह्वर्थः। अस्त्येव शालासमुदाये वर्त्तते। तद्यथा ग्रामो दग्ध इति। अस्तिवाटपरि
वर्त्तते क्षेपे वर्त्तते तद्यथा। ग्रामं प्रविष्ट इति। अस्ति मनुष्येषु तद्यथा ग्रामो गतः। ग्राम आगत इति। अस्ति सारण्य
के सस्थंडिलिके वर्त्तते। तद्यथा ग्रामो लब्ध इति। तद्यः सारण्यके सस्थंडिलिके वर्त्तते तमभिसमीक्ष्यैतदुच्यते
एकशालो ग्राम इति। यथा तर्हि वर्णसमुदायः पदं। पदसमुदायो ऋक्। ऋक् समुदायः। भवति चेत्तदेक
स्मिन्नप्येकवर्णं पदं। एकपदा ऋक्। एकर्चं सूक्तमिति। अत्रापार्थेन युक्तो व्यपदेशः॥ सूक्तमित्युच्यते॥ प
दं नामार्थः ऋङ्नामार्थः। सूक्तं नामार्थः। यथा तर्हि बहुषु पुत्रेष्वेतदुपपन्नं भवति। अयं मे ज्येष्ठः अ
यं मे मध्यमः। अयं मे कनीयानिति। भवति चेत्तदेकस्मिन्नप्यपि … अयमेव मे ज्येष्ठः। अयमेव मे

तापि प्रसूता। नापि प्रसोष्यते कुक्षिस्थेनैव गर्भेण ह… वमे मध्यमः। अयमेव मे कनीयानिति। तथा अस्वस्तायामसो
ताप्रथमगर्भेण हतेत्युच्यते। अपत्यपर्यायो गर्भशब्दस्तत्र तस्या एव योग्यताध्यवसानेन भाविगर्भेणाहतेति व्यपदेशः। स्यं तरेषु वा बहु शिव४
पुत्रे सति आद्यगर्भस्य प्रथमव्यपदेशदर्शनात्तथाविधस्य प्रथमव्यपदेशः॥ ॥श्रीः॥ ॥राम॥ ॥श्रीः॥ ॥ॐ॥

15

अनेनेति ॥ बहुकृत्वो ह्यागन्तुः पूर्वागमनं तस्मात्प्रथमव्यपदेशं तत्र मुख्यं करोत्येव ॥ आजिगमिषुश्च भाविन्यागमनानि तु धायन्त्यस्याप्य कुर्याद्देव प्रथमव्यवहारं ॥ यस्तु स
कृदेवागतः सोऽपि करोति प्रथमव्यवहारमिति प्रतिपादनार्थमनेन्यानाञ्जिगमिषुरित्युपात्तं ॥ तत्रान्यसंबंधिषु बहुष्वागम नेषु आद्यस्य प्रथ
मव्यवहारदर्शनात्तथाविधत्वात्स्यादेकस्मिन्नप्यागमने प्रथमव्यवहारः ॥ इदानीं योगं प्रत्याख्यातुमाह ॥ अपूर्वेति ॥ यद्यपि बहुषु स्थितेषु
आद्यन्तशब्दौ प्रयुज्येते तथाप्यपूर्वानुत्तरत्वमात्रमेतयोः प्रवृत्तिनिमित्तं तच्चैकस्मिन्नपि अस्तीति नार्थः सूत्रेण ॥ भाष्यकारस्त्वाह ॥ सतित्वन्यस्मि

तथा अनेन्यानाञ्जिगमिषुरादेदं मे प्रथमागमनमिति ॥ आद्यन्तवद्वा वश्च शक्तौ वक्तुं ॥ कथं ॥ अपू
र्वानुत्तरलक्षणत्वादाद्यं तयोः सिद्धमेक[illegible]स्मिन् ॥ अपूर्वलक्षणआदिः ॥ अनुत्तरलक्षणोऽन्तः ॥ ए
तच्चैकस्मिन्नपि भवति ॥ अपूर्वानुत्तरलक्षणत्वात् एतस्मात्कारणात् देकस्मिन्नपि आद्यन्तापदि
ष्टानि कार्याणि भविष्यन्तीति नार्थ आद्यन्तवद्भावेन ॥ गोनर्दीयस्त्वाह ॥ सतित्वन्यस्मिन्निति ॥ का निपु
नरस्य योगस्य प्रयोजनानि ॥ प्रत्ययस्य ञ्नित्याद्युदात्तत्वे ॥ प्रत्ययस्यादिरुदात्तो भवतीति दैवस्या ॥

न्निति ॥ अन्यनपेक्षितप्रतियोगिनोराद्यन्तयोः प्रवृत्तिरित्यर्थः ॥ तस्मादेकस्मिन्नस्त्येवाद्यन्तव्यपदेशो नास्तीति कर्तव्यो योगः ॥ यद्यपि लोके किं न व्यपदेशि
वद्भावेनाद्यन्त [illegible] व्यपदेशः एकस्मिन्नपि सिध्यति ॥ तथापि गौणत्वात्कार्येण न भवितव्यमिति यस्य भ्रान्तिः स्यात्तं प्रति योगोऽय
मारब्धः ॥ प्रत्ययस्य ञ्नि[illegible]दाद्युदात्तत्वे इति ॥ प्रत्ययस्याद्युदात्तत्वं ञ्नितीत्याद्युदात्तत्वं इत्यर्थः ॥ कथं पुनर्भिन्नविभक्तौ द्वंद्वः उच्यते ॥ प्रत्ययस्याद्यु
दात्तत्वं तस्य प्रत्ययो [illegible] विषय इति प्रत्यये पि तदुच्यते ॥ यद्वा ञ्नितीति यद[illegible]दात्तत्वं तं ञ्नितोऽपि संबंधि भवतीति नास्ति भिन्नविभक्तिता ॥ ऋदोरवि

गार्ग्य इति। अत्र परत्वाद्यस्येति लोपेकृते आदित्वाभावात् प्रकृते राद्युदात्तत्वं न प्राप्नोति स्वरविधौ स्थानिवद्भावप्रतिषेधाच्चैत्तत् लिघस्वरः। स्वरविधौ व्यंजनस्याविद्यमानत्वाच्चास्ति हलपेक्षमप्यादित्वं। कृतिरिति। किनोनित्वात्ताच्चनितिकृत्यनावित्वेवमर्थं स्यात् सोवर्यः स स्यस्तत्वं तस्य स्य इत्यनाश्रित्येत दुक्तं॥ ज्ञापियदिति। लिट् इर्यादिवितिचज्ञापकं सि ज्विषयमेव स्यादिति सिपइण न स्यात्। यस्मिन्विधिरिति। स्वस्य च रूपस्येति नानुवर्तन इति प्रयोज-

नं। गार्ग्यः कृतिरित्यत्र न स्यात्। बलादेरार्द्धधातुकस्येट् प्रयोजनं। आर्द्धधातुकस्येड्वलादेरिहैव स्यात्करिष्यति। हरिष्यति। जोषिषत् मंदिषत् इत्यत्र न स्यात्। यस्मिन्विधिस्तदादित्वे प्रयोजनं वक्ष्यति। यस्मिन्विधिस्तदावल्ग्रहणा इति तस्मिन्नुक्ते यमाणे अचि श्नुधातुभ्रुवांय्वोरियङुवङोइहैव स्यात्। श्रियः भ्रुवः। श्रियो भ्रुवो इत्यत्र न स्या-

त्। अजाद्यष्टाप्रयोजनं। अजादीनामिहैव स्यात्। ऐक्षिष्ट ऐहिष्ट ऐषअ ध्येष इत्यत्र न स्यात्। अथांतवत्वेकानि प्रयोजनानि। अंतवद्विर्वचनात्तमप घ्येत्वे प्रयोजनं। इइदे द्विवचनं प्रग्रसं इहैव स्यात्। पचेते इति। पचेथे इति। खट्वे माले इत्यत्र न स्यात्। मिदचोंत्यात्परः प्रयोजनं। इहैव स्यात्कुंडानि वनानि। नानियानीत्यत्र न स्यात्। अचोंत्यादिटि प्रयोजनं। टित आत्मनेपदानां टेरेइहैव स्यात् कुर्वाते कुर्वाथे इति। कुरुते कुर्वे इत्यत्र न स्यात्। अलोंत्यस्य प्रयोजनं। अतो दीर्घो यञि इहैव स्यात्पटाभ्यां घटाभ्यां आभ्यामित्यत्र न स्यात्।

न त्वेनोपन्यासः। अजाद्याष्टेति। सूत्रपाठापेक्षया प्रयोजनत्वोपन्यासः। वार्त्तिककारस्त्वजादीनामटा सिद्धमित्याह। अंतवदिति। येन विधिस्तदंतत्वे इत्यनेन गतेश्च पंचार्थीमसुपन्यासः। कुरुत इति। अर्थवताव्यपदेशिवद्भावानशब्दाकारस्यानर्थकत्वादिह प्रयोजनोपन्यासः। आभ्यामिति। अत्र द्वेअंतवत्वेठप ... युज्येते। आकारांतस्यागस्याः लोंत्यस्य दीर्घत्वं भवतीति प्रयोजनोपन्यासः। एयामिति। इदोऽय्पुंसि एणत्त्वित्यमिति भवति॥

तरप्तमपोघः॥ आतिशायनिकप्रत्ययप्रकरण एव तादीर्घः। पितौ घ इतिवा कर्त्तव्ये प्रकरणोत्कर्षेण संज्ञाकरणं स्वार्थेपितरब
स्तीति सूचनार्थं। तेनाल्पाचूतरमित्यादि सिद्धं भवति॥ साहु॥ नदीतर इति। तरते॥ ऋदोरबित्यप्। सर्वत्र चानुबंधाः स्मर्य
माणा एव कार्यप्रतिहेतुत्वं लभंते इति घसंज्ञाप्राप्तिः। साहचर्यं चेह व्यवस्थाहेतुः सर्वत्र नाश्रीयते। तथाहि। द्वि स्त्रि श्च

घसंज्ञायांनदीतरस्य प्रतिषेधः॥२

तरप्तमपोघः॥ घसंज्ञायांनदीतरे प्रतिषेधः। घसंज्ञायांनदीतरे प्रतिषेधो वक्तव्यः॥ नद्यास्त
रो नदीतरः इति। घसंज्ञायांनदीतरे ऽप्रतिषेधः॥ अनर्थकः प्रतिषेधोऽप्रतिषेधः। घसंज्ञाक
स्मान्न भवति। तरपग्रहणं सोपदेशिकं। औपदेशिकस्य तरपो ग्रहणं। न चैष उपदेशे तर
पूशब्दः। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। इह हि व्याकरणे सर्वेष्वेव सानुबं
धकग्रहणेषु रूपमाश्रीयते। यत्रास्यैतद्रूपमिति। रूपनिर्ग्रहश्च शब्दस्य नांतरेण लौकि
कं प्रयोगं। तस्मिंश्च लौकिके प्रयोगे सानुबंधकानां प्रयोगो नास्तीति कृत्वा द्वितीयः प्रयोग
उपास्यते। कोसौ। उपदेशो नाम॥

तु रितिकृतोर्थग्रहणाच्च तुः शब्दविशेषणार्थं कृतं। अन्यथा द्वित्रिशब्दसाहचर्याच्चतुः शब्दोपि कृतोर्थ एव गृह्यते इति किं कृतो
र्थग्रहणेन। अप्रतिषेध इति। नप्रतिषेध इति नञः प्रतिषेधक्रिया नञा निषिध्यते। भाष्यकारस्तु वस्तुस्वरूपं व्याचष्टे अनर्थ
कः प्रतिषेध इति। नोपदेशिकमिति। उपदेशः प्रयोजनमस्य तत्र वा भव मोपदेशिकं। यत्रास्यैति। अनुबंधयुक्तमित्यर्थः।

(17)

९६ नचैषइति। काल्पनिकमस्यतत्पूर्त्वं नसाक्षान्निर्दिष्टं समानाधिकरणेघिति। आतिशायनिकस्वस्वार्थिकत्वात्समानाधिकरणाः
प्रतरहीति। ननुतीर्थिरितिभवितव्यं। एवंतर्हितीर्थलेइतिनरइतिसामान्येनपदंसंस्क्रियतेपश्चात्तद्याविशेष्यतेइतिन
ति२ दोषः॥ स्त्रीलिंगेघिति। स्वार्थिकश्च[illegible]ल्लिंगानुविधानात्स्त्रीलिंगः॥ महिषीरूपमिवेति। इवशब्दोभिन्नक्रमः॥ तेनायमर्थः

नचैषउपदेशोतरपृशाब्दः॥ अथवाअस्त्वस्यघसंज्ञाकोदोषः॥ घादिषुनद्याह्रस्वोभवतीति
ह्रस्वत्वप्रसज्येत। समानाधिकरणेषुघादिष्वित्येवंतत्। यदातर्हिसैवनदीसएवतरः तदा
प्राप्नोति। स्त्रीलिंगेषुघादिष्वित्येवंतत्। अवश्यंचैतदेवंविज्ञेयं। समानाधिकरणेषुघादि
ष्वित्युच्यमानेह्रस्वप्रसज्येत। महिषीरूपमिवब्राह्मणीरूपमिवेति॥ ॥बहुगणवतुडति
17 संख्या॥ संख्यासंज्ञायांसंख्याग्रहणं। संख्यासंज्ञायांसंख्याग्रहणंकर्त्तव्यं। बहुगणवतुड
तयः संख्यासंज्ञाभवंति संख्याचसंख्यासंज्ञाभवतीतिवक्तव्यं। किंप्रयोजनं। संख्यासं
प्रत्ययार्थं एकादिकायाः संख्यायाः संख्याप्रदेशेषुसंख्येत्येषसंप्रत्ययायथास्यात्॥

शिवः

महिषीइवेयमाकृतिरिति। तत्रसुप्सुपेतिसमासेकृतेह्रस्वत्वंस्यात्॥ ॥बहुगणवतुडतिसंख्या॥ ॥संख्यासप्र
त्ययार्थमिति। संख्यायाः एकादिकायाः संख्याप्रदेशेषुसंप्रत्ययार्थमित्यर्थः॥ ९७

ननु चेति। यथापसुरपर्त्यंदेवलेति लौकिको पौर्णमासीते तथैकादिकापि संख्याग्रहीष्यते इत्यर्थः। कृत्रिमाकृत्रिमयोरिति। न्या यायं। तथाहि। सर्वार्थाभिधानशक्तियुक्तः शब्दोयदा विशिष्टेर्थे संव्यवहाराय नियम्यते तदा तत्रैव प्रतीतिं जनयति। ना न्यत्र। नदी पौर्णमासीति। पूर्वाचार्यैर्नदीति संज्ञाविधानात्संज्ञितो नो ग्रहणं प्राप्नं न तु स्वरूपस्य। अग्रहणसंज्ञेति निषेधा

ननु चैकादि संख्या लोके संख्येति प्रतीता तेनास्याः संख्याप्रदेशेषु संख्यासंप्रत्ययो भवि ष्यति। एवमपि कर्तव्यं किं प्रयोजनं। यथा लोके अक्रियमाणे हि संख्याग्रहणे एकादिका याः संख्याया: संख्येत्येष संप्रत्ययो न स्यात् इतरथा ह्यसंप्रत्ययो कृत्रिमत्वात् स्यात्। किंकार णं। अकृत्रिमत्वात्। बह्वादीनां कृत्रिमा संज्ञा। कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो भ वति यथा लोके। तद्यथा लोके गोपालकमानय कटजकमानयेति। यस्यैषा संज्ञा भवति स आनीयते न यो गाः पालयति यो वा कटे जातः। यदि तर्हि कृत्रिमाकृत्रिमयोः कृत्रिमे सं प्रत्ययो भवति। नदी पौर्णमास्याग्रहायणीभ्यः अत्रापि प [redacted] सज्येत। पौर्णमास्याग्रहा यणीग्रहणसामर्थ्यान्न भविष्यति। तद्धि शेषेभ्यस्तर्हि प्राप्नोति गंगायमुनेति। एवं त र्ह्याचार्यप्रवृत्तिर्ज्ञापयति। तद्धिशेषेभ्या

त्। पौर्णमासीति। नियमार्थं पौर्णमास्याग्रहायणीग्रहणमीकारांतानां स्यादिति चेत्। एवमपि पौर्णमास्याग्रहायणीभ्य इति व क्तव्यं स्यात्। उकारग्रहणं न च नदीसंज्ञकमेवोकारांतं पौर्णमास्याग्रहायणीशब्दसाहचर्याद्गृह्यते। तद्धिशेषेभ्य इति गंगादिभ्यः॥

यत्क्यमिति। नित्यार्थः पाठ इति चेत्तत्रव स्यिल विभाषया विपाट्शब्दस्यनित्यश्च भविष्यतीत्यदोषः। बहुवचनेनेति। अन्यथा आ
९७ एनयाइत्यादेौयथैकवचने। न निर्देशस्तथैवापि कर्तव्यः स्यात्। न चेदमफलमिति। अनाश्रिते मित्यर्थः। उत्तरार्थं चेति। अ
यं हि स्त्रोपात्तः संख्याशब्दः स्वरूपपदार्थकः। उत्तरत्र संज्ञिनिर्देशेन प्रयोजनं। [redacted]

यदयं विपाश्शब्दं शरत्प्रभृतिषु पठति। इतरथा हि प्राप्नोति। नदीभिश्चेति। बहुवचननिर्देशान्न
भविष्यति। स्वरूपविधिस्तर्हि प्राप्नोति। बहुवचननिर्देशादेव न भविष्यति। एवं च न चेद
मकृतं भवति कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय इति न च कश्चिद्दोषो भवति। उत्तरा
18 र्थं च। उत्तरार्थं च संख्याग्रहणं कर्त्तव्यं। ष्णान्ता षट्। षकारनकारान्तायाः संख्यायाः षट्सं
ज्ञा यथा स्यात्। इह मा भूत्। पामानो विप्रुष इति। इतरार्थेन तावन्नार्थः संख्याग्रहणेन। न
नु चोक्तमितरथा ह्यसंप्रत्ययोऽकृत्रिमत्वाद्यथा लोक इति। नैष दोषः। अर्थात्प्रकरणा
द्वा लोके कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्ययो भवति। अर्थो वास्यैवं संज्ञकेन भवति
इदमेवं संज्ञकेन कर्तव्यमिति। आलभ्यार्थात्प्रकरणाद्वा। अंग हि भवान्ग्राम्यं पांसुलपा

[redacted] इहार्थेनेति। इहार्थो यस्येति सामान्यविशेषभावान्न पौनरुक्त्यं। प्रातश्चेति। इ
त्यस्येत्यर्थः। अर्थः सामर्थ्यं। यथा गोपालकमानयमाणवकमध्यापयेति। तिष्ठि इत्यस्याध्यापनासंभवात्ज्ञानोपादानं प्रकरणं।
प्रस्तावः। यथा भोजनप्रकरणे सैन्धवमानयेति लवणे प्रतीतिर्गमनप्रकरणे त्वश्वे। ग्राम्यमिति। ऊहितुमसमर्थं पांसुलपादमिति। अचिरोर्ब्रि १८
शिवः

उभयगतिरिति। किंसंज्ञेयं यस्य कस्यचिन्निर्दिष्टस्यायुतयष्टिस्तोष्वाविवक्षितः स्यादिति संदेहवान्भवतीत्यर्थः। साधी
यो वेति। यो मम प्रसिद्धः सोनेन बोधितः न च ममैवं संज्ञकः प्रसिद्ध इत्ययं मन्यते। लोके च गोपालकशब्दः संज्ञिनि
नियम्यमानः संशयं तरं निवर्त्तयति। क्रियानिमित्तत्वमर्पनां निरस्यति। तुल्यजातीयविषय एव हि नियमो भव
ति। एवमित्थपीति। बह्वादय एवात्र संख्यात्वेन प्रकृता इति भावः। न यथा लोक इति। संख्याग्रहणे हि बह्वादि प्र

कर्म ६

उभयगतिस्तस्य भवति। साधीयो वा यष्टिस्त्वं गमिष्यति। यथैव तद्वदर्थासकरणाद्धा
लोके कृत्रिमाकृत्रिमयोः कृत्रिमे कार्यसंप्रत्ययो ... भवति। एवमित्थपि प्राप्नोतीत्यतो ना
कृत ३ तिद्यसो बह्वादीनां कृत्रिमा संज्ञेति। न यथा लोके तथा व्याकरणे। उभयगतिरिह भवति
अन्यत्रापि नावश्यकमित्येव। तद्यथा कर्तुरीप्सिततममिति कृत्रिमा संज्ञा। कर्मप्र
देशेषु चोभयगतिर्भवति। कर्मणि द्वितीयेति कृत्रिमस्य ग्रहणं। कर्तरि कर्मव्यतिह
रे इत्यत्राकृत्रिमस्य। तथा साधकतमं करणमिति कृत्रिमा संज्ञा। करणप्रदेशेषु चोभ
यगतिर्भवति। कर्तृकरणयोस्तृतीयेति कृत्रिमस्य ग्रहणं। शब्दवैरकलहाभ्रकण्व

करण २

तिपादनाय संज्ञात्वेन विनियुक्तो नैकादिसंख्यानिरासाय अधिकार्थप्रतिपत्त्यर्थत्वादिह संज्ञाकरणस्य। क
र्मणि द्वितीयेति। आख्यातिपदिकादनभिहिते कर्मणि संज्ञायां द्वितीया विधीयते। न च क्रियायाः संख्यो संभव
तीति कारकस्य ग्रहणं। कर्तरि कर्मव्यतिहारे। अत्र धातोः साक्षात्क्रियायां वृत्त्या क्रियाया एव ग्रहणं। कण्वमेघेभ्यः करणे।

विप्रतिषिद्धमिति। द्वन्द्वावयवानां शक्यमनभिधायित्वादधिकरणं द्रव्यं गृह्यते। तद्वदतिदेशो मिति। संख्याकार्यातिदेशोऽयमि
१८ त्यर्थः। यदि हि संज्ञा स्यात् टिघुभादिसंज्ञावदेकाक्षरा क्रियेत। तस्माल्लौकिकार्थाभिधायी संख्याशब्द उपादीयमा
नोऽतिदेशार्थत्वमस्य बोधयति। अथ वेति। गुरुसंज्ञाकरणाद्वैकादेशः संख्याशब्देन प्रदेशेषु न त्यज्यते लिङ्गेनाप्यनुमी

तथा आधारोऽधिकरणमिति कृत्रिमाधिकरणसंज्ञा। अधिकरणप्रदेशेषु चोभयगतिर्भव
ति। सप्तम्यधिकरणे चेति कृत्रिमस्य ग्रहणं। विप्रतिषिद्धं चानधिकरणवाचीत्यकृत्रिमस्य
८३ । अथ वानर्थं संज्ञाकरणं। तद्वदतिदेशोऽयं। बहुगणवतुडति संख्यावदिति। सत्तर्हि व
तिनिर्देशः कर्तव्यः। न ह्यन्तरेण वतिमतिदेशो गम्यते। अन्तरेणापि वतिमतिदेशो गम्य
19 ते। तद्यथा। एष ब्रह्मदत्तः अब्रह्मदत्तं ब्रह्मदत्त इत्याह। तेन मन्यामहे ब्रह्मदत्तवदयं भ
वतीति। एवमिहाप्यसंख्यां संख्येत्याह। संख्यावदिति गम्यते। अथवाचार्यप्रवृत्तिर्ज्ञा
पयति भवत्येकादिकायाः संख्यायाः संख्याप्रदेशेषु संप्रत्यय इति। यदयं संख्यायाः अति
ति
दन्तायाः इति। शदन्तायाः प्रतिषेधं शास्ति। कथं कृत्वा ज्ञापकं। न हि कृत्रिमा त्यन्ता शदन्ता चास्ति। ननु चेयम
स्ति डतिः। यत्तर्हि शदन्तायाः प्रतिषेधं शास्ति। यच्चापि त्यन्तायाः प्रतिषेधं शास्ति। ननु चोक्तं ङस
र्थमेतत्स्यादिति। अर्थवद्ग्रहणे नानर्थकस्येत्यर्थवतस्तिशब्दस्य ग्रहणं। न च डतेस्तिरर्थ शिवः

यत इत्यर्थः। अर्थवत इति। ननूभयसंभवेऽयं परिभाषा प्रतिष्ठते। डसंज्ञा च कृत्रिमास्ति। डतेश्च तिशब्दोऽनर्थक एवे
ति तस्यैव निषेधः स्यादिति ज्ञापकस्त्यन्तायाः प्रतिषेधः। नैष दोषः। अतिशदन्तायाः इत्युच्चारणकाल एवार्थवतस्तिशब्दस्य १९

सं॰प्रा ३

अथवेति। ननु महत्याः संज्ञायाः करणात्तदर्थानुगतानामुपात्तानामेव संज्ञिनां भवतु संज्ञा। यथा सर्वादीनामेव सर्वनामसंज्ञा न त्वधिकानां। तेन बहुगणशब्दयोः संघवैपुल्यवाचिनोः संज्ञा मा भूद् एकादीनां तु कथं स्यात्। नैष दोषः। इहान्वर्थकरणेन तावदनुरूपः संज्ञी सर्व आक्षिप्यते तेनैकादीनां नाव भवति। पश्चाद् बहुगणवतुडतीति भूर्यादिनिवृत्त्यर्थं नियमार्थं व्याख्यायते। अत एव संघवैपुल्यरसयोर्बहुगणशब्दयोः संज्ञा न भवति। तेऽतिदेशप

अथवा महतीयं संज्ञा क्रियते। संज्ञा च नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणं तत्र महत्याः संज्ञायाः करणे एतत्प्रयोजनं अन्वर्थसंज्ञा यथा विज्ञायते संख्यायतेऽनयेति संख्येति। एकादिकया चापि संख्यायते। उत्तरार्थं न तावन्नार्थः संख्याग्रहणेन। इदं प्रकृतमुत्तरार्थमनुवर्त्तिष्यते। इदं वै संज्ञार्थं उत्तरत्र संज्ञिविशेषणेनार्थः। न चान्यार्थं प्रकृतमन्यार्थं भवति। न खल्वप्यन्यत्प्रकृतमनुवर्त्तनाद् अन्यद् भवति। न हि गोधाः प्रसर्पन्तीति सर्प
दन्य॰ णाद् अहिर्भवति। यत्तावदुच्यते। न चान्यार्थं प्रकृतमन्यार्थं भवतीति। [redacted] ति। अन्यार्थमपि प्रकृतमन्यार्थं भवति। तद्यथा। शाल्यर्थं कुल्याः प्रणीयन्ते ताभ्यश्च पानीयं पीयते उपस्पृश्यते शालयश्च भाव्यन्ते। यदप्युच्यते न खल्वप्यन्यत्प्र

सेऽपि परस्परसाहचर्यात् संख्यावाचिनोरेव भूर्यादिनि(कृतमनुवर्त्तनादन्यद्भवतीति। नहि गोधाः प्रसर्पं वृत्त्यर्थं नियमार्थमतिदेशः क्रियते इह सति प्रसंगो भवति। संज्ञिविशेषणेनार्थ इति। स्थानेऽसनेन विशिष्टं संज्ञिनं प्रतिपादयितुमुपयोग इत्यर्थः। न चान्यार्थमिति। एकशब्दस्य दर्शनादिति भावः। भवतु लोके प्रतिप्रयोगं शब्दभेद इत्याह। न खल्वपीति। यथा गोधा देशान्तरगमनमात्रेण गोधात्वं न जहाति एवं शब्दोऽपि रूपान्तरं न जहातीत्यर्थः। अन्यार्थ

शब्दस्त्विति। स्वरितत्वेन वा कालेः देशः कार्यात्तु गादिषु यस्क प्रतिपादनयोग्यमनुमीयते। सादृश्यात्तु तत्त्वाध्यवसाय इत्यर्थः॥ सापेक्षोयमिति। स्त्रीलिंगेन निर्देशः कृतः। तत्र प्रकृतत्वादन्यपदार्थत्वेन संख्या स्वरितत्वेन विना प्यपेक्षते इत्यर्थः॥ अध्यर्धग्रहणं चेति। वार्त्तिके संख्याग्रहणं कर्त्तव्ये न स्थितं तदपेक्षया समुच्चयार्थश्च शब्दः विप्रतिषेधे चेदं। अध्यर्धशब्दस्य त्रिभागचतुर्भागादिशब्दवत् संख्यावाचित्वात् अर्धशब्दश्चैकदेशवाची न सं

२० शब्दस्तु खलु येन येन विशेषणेनाभिसंबध्यते तस्य तस्य विशेषको भवति। अथवा सापेक्षोयं निर्देशः क्रियते। न चान्यत्किंचिदपेक्ष्यमस्ति। संख्यामेवापेक्षामहे। अध्यर्धग्रहणं च समासकन्विध्यर्थं। अध्यर्धग्रहणं च कर्त्तव्यं। किं प्रयोजनं। समासकन्विध्यर्थं। समासविध्यर्थं कन्विध्यर्थं च। समासविध्यर्थं तावत्। अध्यर्धशूर्पं। कन्विध्यर्थं। अध्यर्धकं। लुकि चाग्रहणं। लुकि चाध्यर्धग्रहणं न कर्त्तव्यं भवति। अध्यर्धपूर्वद्विगोर्लुगसंज्ञायामिति॥

ख्यावाची। एकदेशादिशब्दवत्। तस्याधिशब्देन समासे कृते पोगिकार्यः प्रतीयते न संख्या। अध्यर्धशूर्पमिति। अध्यर्धेन शूर्पेण क्रीतमिति द्विकं संख्य इत्यनुवर्त्तमाने तद्धितार्थेति समासः॥ ततः शूर्पादञन्यतरस्यामि त्यञष्ठञो वा अध्यर्धपूर्वेति लुक्। अध्यर्धकमिति। संख्याया अतिशदंताया: कन्निति कन्॥ ॥ ॥ शिवः

द्विगोरित्येव सिद्धमिति। समासविध्यर्थमिति संबंधसामान्ये षष्ठी। तेन समासे विधीयमाने समासनिमित्ते चान्यस्मिन्कार्ये वि
धीयमान इत्यर्थः। तेन द्विगुनिमित्तो लुगपि ~~[illegible]~~ लभ्यते। अन्ये त्वाहुः। अध्यर्द्धशब्दः संख्यावाच्येव। न त्वादिगण एव ते
एकोऽध्यर्द्धो द्वौ तलीय इति। तस्मात् नियमार्थमध्यर्द्धशब्दस्यैव संख्यात्वेन ग्रहणं यथा स्यात्। सार्द्धादीनां मा भूदिति
वाक्यभेदेन च द्वितीयो नियमस्तस्य च समासकन्विध्यर्थं संख्यात्वं न कार्यान्तरार्थमिति। अ[illegible]धिक इति। अ

अर्द्धपूर्वपदश्च पूरणप्रत्ययान्तः॥

द्विगोरित्येव सिद्धं। अर्द्धपूर्वपदश्च पूरणप्रत्ययान्तः संख्यासंज्ञो भवतीति वक्तव्यं
किं प्रयोजनं। समासकन्विध्यर्थमेव। समासविध्यर्थं कन्विध्यर्थं च। समासविध्य
र्थं तावत्। अर्द्धपंचमशूर्पः। कन्विध्यर्थं। अर्द्धपंचमकं। अधिकग्रहणं चालुकि स
मासोत्तरपदवृध्यर्थं। अधिकग्रहणं चालुकि कर्त्तव्यं। किं प्रयोजनं। समासो
त्तरपदवृध्यर्थं। समासविध्यर्थं उत्तरपदवृध्यर्थं च। समासस्तावत्। अधि
कषाष्टिकः। अधिकसाप्ततिकः। उत्तरपदवृध्यर्थं च। अधिकषाष्टिकः। अधिकसाप्ततिकः।
अलुकीति किमर्थं। अधिकषाष्टिकः। अधिकसाप्ततिकः। बहुव्रीहौ चाग्रहणं। बहुव्रीहौ
चाधिकशब्दस्य ग्रहणं न कर्त्तव्यं भवति। संख्ययाव्ययासन्नदूराधिकसंख्याः सं

धिकया षष्ट्या त्रिंशत्। तत्र हि संख्याविशेषणं अधिकशब्देन संख्येति। तद्धितार्थेति समासः। प्राग्वतेष्ठञ्। अलुकीति वच
नाल्लुकि कर्त्तव्ये संख्यासंज्ञा नास्तीति अर्द्धपूर्वे तिल्लुकुन्न भवति। ततः संख्यायाः संवत्सरसंख्यस्योत्तरपदस्य वृद्धिः। नन्वुत्त
रपदवृध्यर्थमिति वचनाल्लुकुन्न भविष्यति किमलुकीत्यनेन। नैतदस्ति। आर्हत्यर्थात्परेषु अर्थेषु यः प्रत्ययस्तस्य लुगभा

[redacted] ज्ञापकात्सिद्धमिति। एकादिवत्तिग्रहणसंख्यायाश्चित्वं बकारादीनां नास्तीति ज्ञापकाश्रयः। योगापेक्ष
१०० मिति। अस्य योगस्य प्रत्याख्यानादेतद्योगापेक्षमिति न बोद्धव्यं किंतु योगानपेक्षमनेनेति योगापेक्षं। यद्ययं वतुग्रग
णसंघस्य निपुकू। वतोरिड्वेति परतः आगमशास्त्रं ज्ञापयति न वतिसंख्याकार्यमिति।

ज्ञापकात्सिद्धं। ज्ञापकं किं। यदयं वतोरिड्वेति संख्याया विहितस्य वतो रिटं शास्ति। व
तो रेव तज्ज्ञापकं स्यात्। नेत्याह। योगापेक्षं ज्ञापकं॥ ॥ष्णान्ता षट्॥ षट्संज्ञायामु
पदेशवचनं। षट्संज्ञायामुपदेशवचनं कर्त्तव्यं। उपदेशे षकारनकारान्तानां सं
21 ख्यानां षट्संज्ञा भवतीति वक्तव्यं। किं प्रयोजनं। शताद्यष्टनोर्नुम्लुङ्पं। शतानि सहस्रा
णि नुमि कृते ष्णान्तापट्डिति षट्संज्ञा प्राप्नोति। उपदेशग्रहणान्न भवति। अष्टानामि
त्यत्रात्वे कृते षट्संज्ञा न प्राप्नोति उपदेशग्रहणाद्भवति। उक्तं वा। किमुक्तं। इ
ह तावच्छतानि सहस्राणीति सन्निपातलक्षणो विधिरनिमित्तं तद्विघातस्येति
अष्टनोप्युक्तं। किमुक्तम्॥ ॥

ष्णान्ता षट्॥ ॥षट्संज्ञायामिति। प्रकृतिप्रत्ययविभागेन प्रति शिवः
प॰ पादनं गुणोः प्रापयामुदेशः। तेन प्रकृतिप्रत्ययाद्युपदेशे षकारनकारान्तानां संख्यानां षट्संज्ञेत्यर्थः। नुम्लुङ्पमि
ति। अर्थशब्दः प्रयोजनवाची। तत्र नुमि कृतानीत्यत्र षट्संज्ञानिवृत्तिः प्रयोजनं नुड्ढितु विधीयमाने षट्संज्ञाप्रवृत्तिः प्र
योजनं। अष्टानामिति। परत्वान्नित्यत्वाच्चात्वे कृते नुडप्राप्तिः। कार्यकालत्वात्संज्ञायाः प्रवृत्तेर्नास्त्यंतरंगत्वं॥ ॥ २१

अष्टनो दीर्घ इति । नच हि दीर्घग्रहणं अष्टस्विम निस्तुपउदात्तत्व निवृत्त्यर्थं क्रियते यदि च कृतात्वस्य षट्संज्ञा स्यात्तत्
दाऽष्टाभ्य इति परत्वात् षट्स्वरोऽन्तस्य पोत्तम मिति भविष्यति । किं दीर्घग्रहणेन । कृतं च तत्कृतात्वस्यापि षट्संज्ञां
ज्ञापयति । ततश्चापवादत्वात् षट्स्वरोऽनेन बाध्यते इति दीर्घपक्षे इव अदीर्घपक्षेपि विभक्तेः स्वरः स्यादिति

अष्टनो दीर्घग्रहणं ज्ञापकं षट्संज्ञायामाकारान्तस्य लुङर्थ मिति । अथवा आका
रोप्यत्र निर्दि॰ श्यते । षकारान्तान कारान्ता आकारान्ता च संख्या षट्संज्ञा भ व
तीति । इहापि तर्हि प्राप्नोति । स च मा दो धुम्न एकस्मा इति । नैष दोषः । एक शब्दोयं
बह्वर्थः । अस्त्येव संख्यापदं । तद्यथा । एको द्वौ बहव इति । अस्त्यसहाय वाची । तद्
यथा । एकाग्नयः । एक हलानि एकाकिभिः क्षुद्रकैर्जितमिति । असहायैरित्यर्थः ।
अस्त्यन्यार्थे वर्तते । तद्यथा प्रजामेका ॰ जेमेकेति । अन्ये त्वर्थः । स च मा दो धु
म्न एकस्मा । अन्या इत्यर्थः । तद्योन्यार्थे वर्तते तस्यैष प्रयोगः । इहतर्हि प्राप्नोति द्वा
भ्यामिष्टये विंशत्या चेति । एवं तर्हि सप्तमे योगविभागः करिष्यते । अष्टाभ्य औश् ।
ततः षड्भ्यः । षड्भ्यश्च यदुक्तं तदष्टाभ्योपि भवति । ततो लुक् लुक् भवति । षड्भ्य इति । अ

दीर्घग्रहणं कर्तव्यं । एकस्मा इति । संख्यावाचित्वाभ्युपगमवादी मत्यये न बहुवचनं मन्यते । अन्यवाचित्वाश्रयेण
तु न रं इह तर्हीति । द्वाभ्यामिति षट्स्वरः स्यात् । सप्तम इति । अष्टाभ्य इति कृतात्वानुकरणं । औश्त्वविधानसामर्थ्या

१०१ हलीति। ततश्चौंकारान्ताभिनिवृत्तिकृतेमात्वं भवति। तथासोस्त्वष्टान्यइतिकृतात्वनिर्देशाज्ज्ञापकादात्वं भवति। कृतात्वस्याहिनिर्देशस्यप्रयोजनं यत्रात्वं तत्रौश्त्वं यथास्यादिति। यदिपेत्तत्कृतात्वनिर्देशस्यप्रयोजनं स्यात् लाघवार्थमष्टमौश्इत्येवब्रूयात्। यद्येवमिति। हलादावुच्यमानमात्वमोजसोर्नप्राप्नोतीतियत्राष्टा(?) स्यमाधान्यं तत्रौश्त्वं नभविलव्यं। तत्रे वचौश्त्वेनात्वमनुमीयते इतिजसयात्वमत्रज्ञापकान्नप्राप्नोतिवि

हलीत्युभयोः शेषः। यद्येवं त्रिपाद्यो प्रियाष्टाः इति न सिध्यतीय आत्वस्त्रएप्र युक्ते॥ ॥डति च॥ इह डतीत्यष्टानां छः क्रियते संख्यासंज्ञायां षट्संज्ञायां च। एकं शक्यमकर्तुं कथं। यदितावत्संख्यासंज्ञायां क्रियते षट्संज्ञायां न

22 व॰२ करिष्यते। कथं ष्णान्ता षडिति तत्र डतीसनुवर्तिष्यते। अथवा षट्संज्ञायां क्रियते संख्यासंज्ञायां न करिष्यते डतिचेत्यत्रसंख्यासंज्ञाप्यनुवर्तिष्यते॥

भक्तिमात्रेवात्वं विधीयमानमौजसोः सिध्यति। अष्टनआविभक्ताविलत्रपदांगाधिकारेतस्यतदुत्तरस्यचेति दीर्घोत्र नहलविधिसंज्ञावाधकवचनैर्निर्देशाभावाज्जुगाष्टेप्यष्टार्थेनात्वेन नाष्ट्रमित्यत्रापिसिध्यतीतिप्रश्नः यथालक्षणमिति। यस्यविशिष्टः प्रयोगोनस्मार्यतेनापिप्रयोगानिषेधस्मृतिः। तथा यालक्षणमनुगंतव्यं तदा नमाष्टद्विशेषणं दात्वमित्यर्थः। नैववालक्षणमप्रयुक्तेचर्चते अप्रयुक्तानांकेवलक्षणेनान्वाख्यानात्॥ डति च॥ शिवः यदितावदिति। तत्रवतुसाचर्याक्तिद्धितएवडतिर्गृह्यतेनतुपातेडतिः। अर्थमिति। तत्रसंख्यासंज्ञायाअनुवर्तनादन्वर्थं २२

वै१

क्तक्तवतू निष्ठा ॥ इत्यनुबंधाः कार्यार्थमुपादीयंते प्रयोगश्चैषां लुप्तवन्नास्ति। यत्र च सारूप्यं तत्र च संदेहः कथमस्यानुबंध
कार्यं कृतमस्य तु न कृतं इति पूर्वपक्षाभिप्रायः॥ सिद्धांतवादी तु मन्यते अधुवेणानुबंधेन नियतसन्निधानाः अर्थाः कार
ककालादयो ... लक्ष्यंते। तद्दर्शनादनुबंधस्मृतौ चलल्लक्षितानां कार्याणां साधुत्वं विज्ञायते। तत्र यद्यपि देवद

क्तक्तवतू निष्ठा। निष्ठासंज्ञायां समानशब्दप्रतिषेधः। निष्ठासंज्ञायां समानशब्दप्रति
षेधो वक्तव्यः। लोलोगत्वे इति। निष्ठासंज्ञायां समानशब्दप्रतिषेधः। निष्ठासंज्ञायां स
मानशब्दानामप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। निष्ठासंज्ञा कस्मान्न भव
ति। अनुबंधोन्यत्वकरः। अनुबंधः क्रियते सोन्यत्वं करिष्यति। अनुबंधोन्यत्वकर इ
ति चेन्न लोपात्। अनुबंधोन्यत्वकर इति चेत् तन्न। किं कारणं। लोपात्। लुप्यते चानुबंध
॥ लुप्ते चानुबंधेनान्यत्वं भवति। तद्यथा कलर देवदत्तस्य गृहं महो यत्रासौ काक इति।
उत्पतिते काके नष्टं तद्गृहं भवति। एवमिहापि लुप्तेनुबंधे नष्टः प्रत्ययो भवति। य
द्यपि लुप्यते जानाति त्वसौ सानुबंधकस्येयं संज्ञा कृतेति। तद्यथा इतरत्रापि कलर दे
वदत्तस्य गृहं अदो यत्रासौ काक इति। उत्पतेपि काके यद्यपि तद्गृहं नष्टं भवति। अंततस्त

तेन लक्षनः शालिरिति कश्चिदयुंक्ते तद्गृहलक्षणाद्। कर्मभूतकालावगमात् क्तप्रत्ययं मन्यते। प्रमोदात् तु लोन मालभेनेति
प्रयोगस्तदा प्रेषवाचीलोत शब्दः तन्प्रत्ययांतः प्रयुक्त इति मन्यते।

सिद्धविपर्यासश्चेति। सिद्धो विपर्यासः संशय इत्यर्थः। इदं तद्रूपमिति। बुद्धेरनवस्थितत्वमनेन प्रतिपाद्यते।। चेत्तर्हि व
१०२ चनं। वीसाद्यर्थाभावात्। आकीर्षेति। अत्र भूतकालोऽस्तीति भावः। दृश्यंते त्रेति। सिजादीयादिश्लिष्टः प्रकारे ॰ तत्राभिव
घटं देवदत्त इति प्रयोगे कर्मण्येधिकलायवगाय भाष्ये लुङुक्तः। तस्यायं प्रयोगो न निष्ठांतस्येति प्रतिपद्यते। ओं ज्ञघ्चि ल्यः क

93

सिद्धविपर्यासश्च। सिद्धस्य विपर्यासः। यथापि जानाति संदेहस्तस्य भवति। अयं सनभृशः लो
लागन्तरेति। अयं सलभक्षः लनंगीर्ष इति। तथा यथा इतरत्रापि कमनरेद्वरत्तस्य ग्रं रु भ्रदोयत्रा
सोकाकइति। उत्पतिलेपिकाकेयथापि तमुद्देशं ज्ञानाति संदेहस्तु तस्य भवति। इदं तद्रू
इदं तद्रूपमिति। एवं तर्हि कारककालविशेषा। सिद्ध। कारककालविशेषव्युपादेयौ। भूतेम
स्तशब्दः कर्तरि कर्मणि भावे चेति। तद्यथेतरत्रापि य एष मनुष्यः प्रेक्षापूर्वकारी भवति
सो ध्रुवेणाऽनिमित्तेन ध्रुवं निमित्तमुपादत्ते वेदिकां पुंडरीकं वा। एवमपि प्राकीर्षे सत्र
प्राप्नोति। लुङ् सिजादिदर्शनात्। लुङि सिजादिदर्शनान्न विषयाति। यत्र तर्हि सिजादयो
न दृश्यंते। प्रासिद्धेति। दृश्यंते त्रापि सिजादयः।। किं वक्तव्यमेतत्। न हि। कथमनुच्यमानं गं
स्यते यथैवायमनुपादिष्टान् कारककालविशेषानवगच्छति एवमेतदप्यवगंतुमर्हति। यत्र
सिजादयो नेति।। ।।इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमस्याध्याय शिवः

स्यस्य निष्ठासंज्ञा न भवति। उणादीनामव्युत्पन्नत्वात्। कुलकाद्य। अन्यथा निष्ठांतत्वज्ञानादिस्ताद्युक्तं तत्संस्थाल्।। ।।इत्युपा
ध्यायजैय्यटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य प्रथमे पादे पंचमाह्निकं।। ।।१।। ।। ।। २३

॥ भाष्यैकैय्यटप्रथमाध्यायद्वितीयचरण। ॥

श्रीः

गाङ्कुटाहिभ्यः॥

गाङ्कुट



गा॰के॰

२०२

= यथा देरिति शेषः। २

श्रीगणेशाय नमः॥ ॥गाङ्कुटादिभ्योऽञ्णिन्ङित्॥ चत्वारोऽत्र पक्षा उपक्षिप्ता भाष्ये। ङित्वकित्वसंबंधप्रतिपादनं। भावनं। संज्ञाकरणं। अतिदेशश्चेति। तत्राद्यपक्षनिराकरणाय वार्त्तिकमुपन्यस्यति। ङित्किद्वचन इति। सतां हि विद्यमानेन वस्तुना भिसंबंधोऽर्थस्य शक्यते कर्त्तुं। न च गाङ्कुटादिभ्यः परस्य प्रत्ययस्य ङकार इत्संज्ञोऽस्ति येन तस्य ङिदिति व्यपदेशः स्यात्। सत्त्वे वा नुवादे प्रयोजनाभाव इत्यप्रामाण्यमापतति। न च गाङ्कुटादिभ्य इत्यादेः कृतोऽनेन विधानमुपलभ्यते। अञ्णिद्ग्रहणानर्थक्यप्रसंगात्। भाष्ये तु इति। गाङ्कुटा-

= संबंधप्रतिपादनं १ ४ यस्य ता गा यो न वेति। २

श्रीः॥ गाङ्कुटादिभ्योऽञ्णिन्ङित्॥ ङित्किद्वचने तयोरभावादप्रसिद्धिः। ङित्किद्वचने तयोरभावात् ङकारककारयोरभावान् ङित्वकित्त्वयोरप्रसिद्धिः। सता हि भिसंबंधः शक्यते कर्त्तुं। न चात्र ङकारककारावितो पश्यामः। तद्यथा। चित्रगुर्देवदत्त इति स एव ताभ्यां शृङ्गाभ्यां शृङ्गाभ्यां शक्यते भिसंबद्धुं। भाष्ये तेतदर्थनेन न गाङ्कुटादिभ्योऽञ्णिन्ङिद्भवतीति असंयोगाल्लिट् किद्भवतीति। भवतीति चेदादेशप्रतिषेधः। भवतीति चेदादेशस्य प्रतिषेधो वक्तव्यः। ङकारक-

दिभ्यः परो योऽञ्णित्प्रत्ययः स ङिद्भवति। ङकार इत्संज्ञकस्तस्य भवतीत्यर्थः। स तु ङकार आदौ मध्ये न्ते वेति देशविशेषं नापेक्षत इत्युक्तं तस्यैव विधानात्। इतां च धर्मोऽश्रूयमाणानामपि कार्यं प्रति विशेषकत्वं भवतीति चेदिति। टित्वकित्त्वङित्वानामभावात् इदनंतरोऽस्येति अनंतरार्थे बहुव्रीहिः भावाच्चादेः परस्यत्यादेः स्थाने ङकार आदेशः प्राप्नोतीत्यर्थः। ङु इति ङिदिति लघुरूप एव व्याप्यः। स्वपदार्थप्राधान्येन तस्यान्तरंगत्वात् बहुव्रीह्यर्थानुपपादाच्च। कुटिते सापेक्षप्रसिद्ध ङित्वास्वङादयो यथादेशाः क्रियन्ते तत्र न तेतदर्थाभिधाने समर्थाः। तदादयश्च वेदशास्त्रे न प्रसिद्धाः। अथास्मादेव वचनादपूर्वाः क्रियेरन् तत् ङिच्च संततस्य स्युः॥ ॥श्रीः॥ शिवः १

कथंपुनरिति। इत्संज्ञो ह्यसन्नेव कार्यमात्रं प्रतिपादयति। आदेशस्तु भावरूपो ह्यन्यस्य प्रसंगे भवति। किंहीति। लोपस्य यथा आदेशत्वं तथा
ङकारस्यापीत्संज्ञकस्य भविष्यतीत्यर्थः। तत्र स्थानिनिर्वृत्तस्य ङकारेण निवर्त्त्येत। संज्ञाकरणमिति। अल्पपरिमाणा संज्ञा कृतेति न्यूनाति
रिक्तशब्दोच्चारणे संज्ञास्वरूपानुपलंभात्संज्ञिनामसंप्रत्ययः। ङित्संज्ञाकरणं तु यद्येवं कुटादित्ववचनात्संप्रसारणार्थं स्यात्। क्ङि

कथंपुनरित्संज्ञो नामादेशः स्यात्। किंहि वचनान्न भवति। एवं तर्हि षष्ठीनिर्दिष्टस्यादेशा उ
च्यंते। नचात्र षष्ठीं पश्यामः। गाङ्कुटादिभ्य इत्येषा पंचमी अञ्णिदिति प्रथमायाः षष्ठीं प्रकल्पय
ति। तस्मादित्युत्तरस्येति। संज्ञाकरणं तर्हीदं गाङ्कुटादिभ्य इं अञ्णिन्ङित्संज्ञो भवतीति। अ
संयोगाल्लिट् कित्संज्ञो भवतीति। संज्ञाकरणे क्ङिद्ग्रहणे ऽसंप्रत्ययः शब्दभेदात्। संज्ञाकरणे
क्ङिद्ग्रहणे ऽसंप्रत्ययः स्यात्। किं कारणं। शब्दभेदात्। अन्यो हि शब्दः क्ङितीति। अन्यः कितीति
अन्यः ङितीति च। तत्र क्ङिद्ग्रहणेषु क्ङिद्ग्रहणेषु चानयोरेव संप्रत्ययः स्यात्। तद्वदतिदेशस्तर्ह्य
यं। गाङ्कुटादिभ्य अञ्णिन्ङिद्वद्भवतीति। असंयोगाल्लिट् किद्वद्भवतीति। स तर्हि वतिनिर्दे
शः कर्त्तव्यः। न ह्यन्तरेण वतिमतिदेशो गम्यते। अंतरेणापि वतिमतिदेशो गम्यते। तद्यथा।

तः कित्संज्ञा च वचिस्वपीति संप्रसारणार्था स्यात्। गाङ्कुटादिभ्यस्तर्हि ङित्संज्ञा किमर्था स्यात्। अनर्थिका भवतु न्यायागतेत्यर्थः किंकु
र्मः। क्ङिति चेत्यादौ तु यौगिकस्यैव ग्रहणं स्याद्यस्य ककारो ङकारश्चेत्संज्ञकः। अनयोरेवेति। कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय इति न्या
यात्। चङादीनां तु ङित्करणं क्ङिल्लक्षणे प्रतिषेधानुग्रहणार्थं स्याद्यत्र संज्ञानुपलब्धिः॥

भा[redacted]फे
२०३ एष अल्लदत्त इति। निर्ज्ञाते भेदे तत्कार्यं प्राप्नुयेत् तद्रूपारोपणं क्रियते इत्यर्थः। अतिदेशगतिः। अकिद्विप्रसंग इति। कार्यातिदेशेन तत्प्रतिबद्धानि कार्याण्यपि आत्मनेपदेत्यन्तरेणापि भवन्तीति गुणनिषेधादीनामेवातिदेशः। अभ्यागमस्तु स्वाश्रयः केन निवार्यते। यथाब्राह्मण एव वदतिदेशः क्षत्रियस्य स्वाश्रयं युद्धादि निवर्तयति। अकितीति च पर्युदासाश्रयणात् किति बद्धकार्याभावान्तःप्रतिरेक त्वाश्रयो मागमः स्यात्। सिद्धं त्विति। प्रसज्यप्रतिषेधे ऽभ्या

एष अल्लदत्तः अब्रह्मदत्तं ब्रह्मदत्त इत्याह। ते मन्यामहे ब्रह्मदत्तवदयं भवतीति। एवमिहाप्यङिन्तं ङिद्वदाहङिद्वदिति गम्यते। अकितं किद्वदाह किद्वदिति गम्यते। किद्वदतिदेशे ऽकिद्विधिप्रसंगः। किद्वदतिदेशे ऽकिद्विधिरपि प्राप्नोति। सृजिदृशोर्झल्यमकिति। स्रष्टा द्रष्टा। अकिल्लक्षणो ऽभ्यागमः प्राप्नोति। सिद्धं तु प्रसज्यप्रतिषेधात्। सिद्धमेतत्। कथं। प्रसज्यायं प्रतिषेधः क्रियते किति नेति। सर्वत्र सन्नन्तादात्मनेपदप्रतिषेधः। सर्वेषु पक्षेषु सन्नन्तादात्मनेपदं प्राप्नोति तस्य प्रतिषेधो वक्तव्यः। सिद्धं तु पूर्वस्य कार्यातिदेशात्। सिद्धमेतत्। कथं। ×चुकुटिषति। निचुकुटिषति ङितः इत्यात्मनेपदं प्राप्नोति। ×पूर्वस्य यत्कार्यं तदतिदिश्यते। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। सप्तम्यर्थे पि वतिर्भवति। तद्यथा। मथुरायामिव मथुरावत्। पाटलिपुत्र इव पाटलिपुत्रवत्। एवं ङि

गमनिषेध एव ङित्कार्यं। सिद्धं तु पूर्वस्येति। विशिष्यमत्र ङित्कार्यमतिदिश्यते न सर्वमित्यर्थः। सप्तम्यर्थे पीति। सप्तम्यर्थे वर्तमानादपि वार्थे वतिरित्यर्थः। ननु नेह वति[redacted] रूपात्तस्तत्कथमयं परिहारः। अयं भावः। यथा न सर्वं कार्यं प्राप्त्यर्थ एवाब्रह्मदत्ते ब्रह्मदत्तत्वारोपः अपि तु कस्यचिदेव कार्यस्य लाभार्थः एवमिहापि व्याख्यानाद्विशिष्टङित्कार्यातिदेशार्थ एवाश्रितस्य तद्रूपासंगो ऽपदेशो ऽगदरणानुवृत्त्या शिवः २

अथ किमर्थमिति। कार्यार्थत्वादनुबंधासंगस्यैकेनैवानुबंधेन गुणनिषेधादेः सिद्धत्वादनुबंधभेदोऽनर्थक इति प्रश्नः। एकस्य चानुबंधस्य करणेऽति

अथ किमर्थं पृथक्कृङितौ क्रियेते। न सर्वं किदेव स्यान्ङिदेव वा। पृथगनुबंधत्वे प्रयोजनं वचिस्वपि
यजादीनाम संप्रसारणं सार्वधातुक चङादिषु। पृथगनुबंधत्वे प्रयोजनं वचिस्वपियजादीनामसं
प्रसारणं सार्वधातुके चङादिषु च। सार्वधातुके प्रयोजनं। यथेह भवति सुप्तः सुप्तवानिति एवं स्व
पितः स्वपिथ इत्यत्रापि प्राप्नोति। चङादिषु च प्रयोजनं। के पुनश्चङादयः। चङ् अङ् जिङ् निबधङ्ङः
चङः यथेह भवति। शूनः शूनवानिति। एवमशिश्वयदित्यत्रापि प्राप्नोति। अङः यथेह भवति शून
उक्तः इति एवमश्वत् अवोचदत्रापि प्राप्नोति। नजिङः यथेह भवति सुप्त एवं स्वप्नगित्यत्रापि प्रा
प्नोति। इनिपः यथेह भवति इष्टमिति। एवं यज्वा इत्यत्रापि प्राप्नोति। अथङः यथेह भवति उषित
इति एवमावसथ इत्यत्रापि प्राप्नोति। नङः यथेह भवति इष्टमिति एवं यज्ञ इत्यत्रापि प्राप्नोति।
जाग्रोऽगुणविधिः। जागर्तेरगुणविधिः प्रयोजनं। यथेह भवति जागृतः जागृथ इत्यङिती तिपर्यु
दासः। एवं जागरितः जागरितवानित्यत्रापि प्राप्नोति। अपर आह। जाग्रो गुणविधिः। जागर्तेर्गुण
विधिः प्रयोजनं। यथेह भवति जागरितः जागरितवानिति एवं जागृप इत्यत्रापि प्राप्नोति। श्रीः॥

देशोपि भेदेनं न कर्तव्यः। आवसथ इति। रुदिविदिभ्यां ङिदित्यतो ङिदित्यनुवर्त्तमाने उपसर्गे वसेरित्यथप्रत्ययः। जाग इति। किति गुण इष्य [illegible]

3

नुविलेति। एरस्तु लौ। रुविधूनने। किती। तिसप्तमीनिर्देशादिट्प्रतिषेधस्याप्यतिदेशः स्यादित्युपन्यासः। नत्विट्प्रतिषेधः पूर्वस्य का
र्यं। कुटित्वेति। नक्त्वा सेडिति निषेधो विशेषणानुपादानादौपदेशिकवदातिदेशिकस्यापि कित्वस्य स्यात्। अथ वायद प्राप्ते कार्ये न

कुटादीनामिट्प्रतिषेधः। कुटादीनामिट्प्रतिषेधः प्रयोजनं। यथेह न भवति लूत्वा पूत्वा इति श्र्युकः कि
तीतीट्प्रतिषेधः एवं नुवित्वा धुवित्वा अत्रापि प्राप्नोति। क्त्वायां किम्प्रतिषेधश्च। किंच। इट्प्रतिषेधश्च।
शे३ ने साह। अदैर्यं चः पठितः क्त्वायां च किम्प्रतिषेध इति। यथेह न भवति देवित्वा सेवित्वेति नक्त्वा सेडिति
कित्वप्रतिषेधः एवं कुटित्वा पुटित्वा अत्रापि प्राप्नोति। अथवा देश एवायं वः पठितः। क्त्वायां किम्प्रति
षेधश्चेट्प्रतिषेधश्च। किम्प्रतिषेध उदाहृतः। इट्प्रतिषेधो यथेह न भवति लूत्वा पूत्वा श्र्युकः किती
ति एवं नुवित्वा धुवित्वा अत्रापि प्राप्नोति। स्यादेतत्प्रयोजनं यद्यस्य नियोगत आतिदेशिकेन ङि
त्वेनौपदेशिकं कित्वं बाध्येत। सत्यपि ङित्वे किदेवैषः। तस्माल्लूत्वा धूत्वा इत्येव भवितव्यं॥ ॥सा
र्वधातुकमपित्॥ ॥सार्वधातुकग्रहणं किमर्थं। अपि ङिद्वितीयस्तुच्यमाने आर्द्धधातुकस्याप्य
नेनापि तो ङित्वं प्रसज्येत। कर्त्ता हर्त्ता। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नानेनार्द्धधातुकस्या

दतिदिश्यते इति क्त्वाप्रत्यये किंत्वातिदेश एवन स्यात्। नुविलेति। ङित्वेनात्र कित्वं येन नाप्राप्त इति बाध्यते इति भावः सत्यपीति। विरोधा
भावादतिदेशेन स्वाश्रयस्य कित्वस्यानिवर्त्तनाद्येन नाप्राप्त इति न्यायाभावाच्च। न हि कुटिता कुटितुमित्यादौ कित्वेप्राप्ते ङित्वारम्भः॥ ॥सार्व
धातुकमपित्॥ ॥लिंगादव्याप्तिरतिव्याप्तिर्वेति प्रदर्शनाय सार्वधातुकग्रहणस्याक्षेपप्रतिसमाधाने भाष्यकारेणोपन्यस्ते॥

आर्द्धधातुकीयानि॰ आर्द्धधातुके पुनर्वा इति ठञंतत्वादंतोदात्तत्वाभावात् बहुचोंतोदात्तादिति ठञभावेवृद्धाच्छो भवति॰ तातङ॰ स्तुङि॰ त्वे
तिपः पित्वाद्प्राप्तमित्यज्ञापकं सार्वधातुकाङि॰ त्वस्य कुं॰ निषेधोङि॰ त्वमज्ञाकं॰ अस्यापि त्वात् ङि॰ त्वाप्राप्तिः॥ अथवं तेप्लु वंभवति॰ गुणा॰ सर्व
नित्यत्वादंतरंगत्वाच्चैकादेशः तत्र कृते परस्य रूपितआश्रितत्वात् परस्य कार्यप्रत्वादिवद्भावात् गुणानिषेधः स्यात्॥ साधारणपरिहारो

यदयमार्द्धधातुकीयान्कांश्चित् ङि॰तः करोति॥ चङ॰ ङ्नि ञि ङ्नि निवपङ्न ङः॥ सार्वधातुकेप्येतज्ज्ञाप
कं स्यात्॥ नेत्याह॥ तुल्यजातीयस्यज्ञापकं॥ कश्च तुल्यजातीयः॥ यथाजातीयकाश्चङ॰ ङ्नि ञि ङ्नि नि
वपङ्नङः॥ कथं जातीयकाश्चैते॥ आर्द्धधातुकं॥ यद्येतदस्ति तुल्यजातीयस्य ज्ञापकमिति॥ च
ङ्॰ङो लुङ्विकरणानां ज्ञापकौ स्यातां॥ नञ्जिङ्नुर्वर्त्तमानकालानां॥ ङ्नि भूतकालानां॥ अथ ङेणा
दिकानां॥ नङ्॰ शब्दौघ त्र्यर्थानां॥ तस्मात्सार्वधातुकग्रहणं कर्त्तव्यं॥ किंपुनरयं पर्युदासः य
दन्यत्पितइत्याहोस्वित्प्रसज्यायं प्रतिषेधः पिन्नेति॥ कश्चात्र विशेषः॥ अपिन्ङिदितिचे
च्छ्वेकादेशप्रतिषेध आदिवत्वात्॥ अपिन्ङिदितिचेच्छ्वेकादेशेप्रतिषेधो वक्तव्यः॥
[illegible]वंते॥ किंकारणं॥ आदिवत्वात्॥ पिदपितोरादेशेऽपित आदिवत्स्यात्॥ अस्त्यन्यत्पितइति

भिधानापवादार्थं प्रसंगमिति नाश्रितं॥ प्रसज्यप्रतिषेधे लुङि॰ त्वनिषेधः पूर्वस्य कार्यमिति पूर्वं प्रत्यंतवद्भावात् ङि॰ त्वाभावः॥ यद्यपि सार्वधा
तुकावयवस्यैकादेशस्तथापि परं प्रत्यादिवत्वादंतशब्दः सार्वधातुकमपिद्भवतीति स्यादेवाङि॰ त्वं॥ च्यवेइति चोक्तमेकवचने सर्व
स्यैव सार्वधातुकस्यैकादेश इति ङि॰ त्वप्रसंगः॥

भा·कै· तुह्यानीति। यद्यप्युत्तमस्यपित्त्वं तथापि तद्भक्तत्वादाटः पिद्वयवस्यैकादेशः पित उत्तमस्यादिवदिति स्थानिङित्त्वनिषेधः। तुर्देहूत्यत्रापस
र्वस्यैवपित एकादेशः पित आदिवदिति ङित्त्वनिषेधप्रसंगः। स्थानिवद्भावादिति। यथा स्थानिकाले यथायोगं गुणप्रवृत्तिर्निवृत्तीतथाआ
२०५ देशेपिकृतेव्यवधानबुध्या भवतः॥ ॥असंयोगात्॥ ॥ऋदुपधेभ्य इति। बिभिदतुः बिभिदुः इत्यादौ किलंनित्यं गुणस्त्वनित्यः। वदन्ते इत्या

अस्तु तर्हि प्रसज्यप्रतिषेधः पिन्नेति। न पिन्ङिद्भवतीति चेदुत्त
मैकादेशे प्रतिषेधः प्राप्नोति। तुहानि तिरवाणि। किं कारणं आदिवद्भावेन पिदपितोरेकादेशः पित
आदिवत्स्यात्तत्र पिन्नेति प्रतिषेधः प्राप्नोति। यथेच्छसि तथास्तु। ननु चोक्तमुभयथा च दोष इति उ
भयथा न दोषः। एकादेशः पूर्वविधौ स्थानिवद्भवतीति स्थानिवद्भावाद्व्यवधानं॥ ॥असंयोगाल्लिट् कि
त्॥ ॥ऋदुपधेभ्यो लिटः कित्त्वं गुणात्प्रतिषेधेन। ऋदुपधेभ्यो लिटः कित्त्वं गुणाद्भवति विप्रतिषेधे
न। ववृते। ववृधे। उक्तं वा। किमुक्तं। नवाक्सस्यानवकाशत्वादपवादो गुणस्येति। विषम उपन्यासः
युक्तं तत्र यदनवकाशं कित्करणं गुणं बाधते। इह पुनरुभयं सावकाशं। कित्करणस्यावकाशः इज
ऊः ईजुः। गुणस्यावकाशः वर्तिता वर्धिता। इहोभयं प्राप्नोति ववृते ववृधे। परत्वाद्गुणः प्राप्नोति। इष्यते चात्रकित्त्वं। शिवः

देशेतु द्वयोरप्यनित्यत्वं तत्र परत्वाद्गुणप्रसंगः पूर्वविप्रतिषेधाश्रयेण निवार्यते। नवाक्सस्येति। यथा क्सस्य कित्करणसामर्थ्याद्गुणो बा
ध्यते तथैवातिदेशसामर्थ्यादित्यर्थः। युक्तं तत्रेति। क्सस्य कित्करणे प्रयोजनान्तराभावः। इह तु संप्रसारणविधौ कृतार्थत्वाद्दुर्बलेनातिदे ४
शेन प्राप्यमाणे गुणनिषेधो दुर्बलत्वाद्विधिना सह न स्पर्धते नातद्भ्यायेनाइष्टवाचीति। स्तञ्जकारलोवा यप्रयर्थः संगृहीतः सतु स्तत्र वा इत्यर्थः॥

इंधिभ॥ ॥किमर्थमिति। विनापि सूत्रेणेधं सिध्यति सत्यपि चेधं न सिध्यति। बभूवेत्यत्र लक्षणत्वाद्वुको लक्षणाभावात्प्रतिषेधाप्रसंगात्। गुणाभा
वप्रतिषेध एव तु बभूवेति चाणित्वाभावपक्षे स्यादिति प्रश्नः। इंधेरिति। भाषायां लिधाभावाद्विषयाभावात् छंदस्यमंत्रइत्याम्प्रतिषेधादेतदुक्तं न त्वस्य
भाषायां प्रयोगाभावः। तत्र छंदस्युभयथेति लिटः सार्वधातुकत्वात्सन्नीध इति ङित्वात्नलोप[redacted]ः। आर्द्धधातुकत्वाच्चस्य भावः प्रत्ययो बकु

इंधिभवतिभ्यां च॥ ॥किमर्थमिदमुच्यते। इंधेः संयोगार्थं भवतेः पिदर्थं। अयं योगः शक्योऽक
र्तुं कथं। इंधेश्छंदोविषयत्वाद्भुवो वुको नित्यत्वाच्च ताभ्यां किद्वचनानर्थकं। इंधेश्छंदोविषय
त्वाल्लिटि न ह्यंतरेण छंदः इंधेर्लिट् लभ्यः। भाषा भाषायां भवितव्यं भुवो वुको नित्यत्वात्। भ
वतेरपि नित्यो वुक्। कृते गुणे प्राप्नोत्यकृतेपि प्राप्नोति। ताभ्यां किद्वचनानर्थकं। ताभ्यामिं
धिभवतिभ्यां किद्वचनमनर्थकं॥ ॥मृडमृदगुधकुषक्लिशवदवसः क्त्वा॥ ॥किमर्थमि
डादिभ्यः परस्य क्त्वः कित्वमुच्यते। किदेव क्त्वा। न क्त्वा सेडिति प्रतिषेधः प्राप्नोति तद्बाधनार्थं
यदि तर्हि मृडादिभ्यः परस्य क्त्वः कित्वमुच्यते नार्थो न क्त्वा सेडिति किंतु प्रतिषेधेन। इदं नियमा
र्थं भविष्यति मृडादिभ्य एव परस्य क्त्वः कित्वं भव

त्ववचनाद्य। नित्यो वुगिति। भोः स्थानीत्यन्तभोरिति तु वर्त्तत इति भावः। एकदेशवि
कृतस्यानन्यत्वाच्च शब्दांतरप्राप्त्यभावः। सत्यामपि वा शब्दांतरप्राप्तौ कृताकृतप्रसंगित्वमात्रत्वाद्वुको नित्यत्वं। वुकि कृते गुणस्य प्राप्तिरेव ना
स्तीति नैतयोस्तुल्यबलत्वं॥ मृडमृद॥ मृडादिभ्य एवेति। विपरीतनियमस्तु व्याख्यानान्न भवति। मृडादिभ्यः क्त्वैव किदिति। न ह्यनिष्टार्थशास्त्र
प्रवृत्तिर्लक्ष्यमनुलक्ष्यप्रकरणस्य तेः॥ ॥

लूत्वेति । क्त्वामात्रस्य नियमः स्यात् किन्त्वं तु क्त्वा तोसुन्कसुन इत्यादौ विशेषणार्थं स्यात् । एवमपीति । क्लिशः क्त्वा निष्ठयोरिति विकल्पेनेड् विधानात् । अस्तु तावदिति । मृडमृदगुधकुषक्लिशवदवसः क्त्वा । कित्त्वविधानं नियमार्थं स्यात् । गुधकुषक्लिशीनां तु रलो व्युपधादिति विकल्पे प्राप्ते नित्यार्थं । तत्र विधिसंभवे क्लिशेरनिटः क्त्वः कित्त्वविधानं नियमार्थं न भवति ॥ ॥रुदविद॥ ॥सन्नर्थमिति । तत्रैरितार्थत्वादनिटः क्त्वः कित्त्वविधानं

यदि तर्हि नियमः क्रियते इहापि नियमान्न प्राप्नोति । लूत्वा पूत्वा । अत्राप्यकित्वं प्राप्नोति । तुल्यजातीयस्य नियमः । कश्च तुल्यजातीयः । यथाजातीया मृडादिभ्यः परः क्त्वा । कथंजातीयकश्च मृडादिभ्यः परः क्त्वा । सेट् । एवमप्यस्ति कश्चिद्विभाषितेट् सोऽनिसंनियापकः स्यात् । अस्तु तावदसेट्त्वेषां ग्रहणं नियमार्थं भविष्यति । यदिदानीं विभाषितेट् तस्य ग्रहणं विध्यर्थं भविष्यति ॥ ॥रुदविदमुषग्रहिस्वपिप्रच्छः संश्च ॥ ॥स्वपिप्रच्छ्योः सन्नर्थं ग्रहणं क्रियते । किं देवक्त्वा ॥ ॥इको झल् ॥ ॥किमर्थमिकः परस्य सनः कित्त्वमुच्यते । इकः कित्त्वं गुणो मा भूदिति । चिचीषति तुष्टूषति । नैतदस्ति प्रयोजनम् । दीर्घारम्भात् । दीर्घत्वमत्र बाधकं भविष्यति । कृते भवेत् । कृत एव तु दीर्घत्वे गुणः प्राप्नोति । अनर्थकं तु । अनर्थकमेवं सति दीर्घ

नियमार्थं न भवति ॥ ॥इको झल् ॥ ॥किमर्थमिति । इको झल्वत् लं ताश्चेत्येकयोगः कर्त्तव्यः किमर्थं योगविभाग इति प्रश्नार्थः । वक्ष्यमाणश्चात्राभिप्रायः । दीर्घत्वमिति । अज्झनगमां सनीति दीर्घत्वं नाप्राप्ते गुणे आरभ्यमाणं तस्य बाधकमिति भावः । कृते भवेदिति । एतस्मिन्नवर्त्तमानं धर्मसाधनं जपादिवदिति भावः । अनर्थकं त्विति । एतस्य पूर्वकालप्रयोगाभावः नतु शास्त्रप्रवृत्तिमात्रादित्यर्थः ॥ श्रीः ॥ शिव ५

ह्रस्वार्थमिति। ह्रस्वानामेव दीर्घविधानसामर्थ्याद्गुणेन स्यात् दीर्घाणां तु प्रागेव तादृप्यात् तद्रूपविशेषसंपत्तिफलकत्वाच्छास्त्रस्य दीर्घ
शास्त्राप्रवर्त्तनाद्गुणप्रसंगः। दीर्घाणामपीति। गुणापकरणार्थं दीर्घविधिरिहार्थशास्त्रं प्रवर्त्तत एवेत्यर्थः। नहि भुक्तवानिति। तृप्तिफलं भोजनं फ
ले संपन्ने पुनर्न प्रवर्त्तते। ननु चेति। तथापि पुनर्भुङ्क्त इत्यर्थः। प्राप्यमिति। कर्त्तव्यं भोजनादि तृप्तिविशेषाद्यर्थमिति रित्यर्थः। न किंचिदि
ति। नहि दीर्घाणां दीर्घतरः संपाद्यत इत्यर्थः। अग्निवदिति। दग्धस्यायोग्यत्वाद्दहतीति भावः। इहाप्ययोग्यत्वाद्दीर्घेषु शास्त्रेण न प्रवर्त्तव्यमित्यर्थः।

दीर्घाणामपि२

नानर्थकं। ह्रस्वार्थं। ह्रस्वानां दीर्घवचनसामर्थ्याद्गुणो न भविष्यति। न वै ह्रस्वानां दीर्घवचनसामर्थ्याद्गुणेन
स्यात्। दीर्घाणां तु प्रसज्यते। दीर्घाणां तु खलु गुणः प्राप्नोति। ननु च दीर्घवचनसामर्थ्याद्गुणो न भविष्यति। न दीर्घा
णां दीर्घाः प्राप्नुवंति। किं कारणं। नहि भुंक्ते कृतश्मश्रुश्च पुनः श्मश्रूणि कारयति। ननु च पुनः प्रवृत्तिरपि दृष्टा
भुक्तवानपि पुनर्भुंक्ते कृतश्मश्रुश्च पुनः श्मश्रूणि कारयति। सामर्थ्याद्धि पुनर्भाव्यं। सामर्थ्याद्धि पुनः प्रवृ
त्तिर्भोजनविशेषाच्छिल्पिविशेषाद्वा। दीर्घाणां तु पुनर्दीर्घत्ववचनेन न किंचित्प्रयोजनमस्ति। अकृतकारि खल्वपि
शास्त्रमग्निवद्भवति। तद्यथा। अग्निर्यददग्धं तद्दहति। यद्दग्धं तन्न दहति। दीर्घाणामपि दीर्घवचन एतत्प्रयोज
नं गुणो मा भूदिति। उभयकृतकारि खल्वपि शास्त्रं पर्जन्यवत्। तद्यथा। पर्जन्यो यावदूनं पूर्णं च सर्वमभिवर्षति। य
थैव तर्हि दीर्घत्ववचनसामर्थ्याद्गुणो न भवत्येवमृदित्वमपि न प्राप्नोति। चिकीर्षति। जिहीर्षतीति। ऋदित्वं दीर्घ

दीर्घाणामपीति। ह्रस्वेष्वपूर्वं दीर्घरूपसंपादनार्थं दीर्घशास्त्रं प्रवर्त्तते। दीर्घेषु तु रूपप्रतिबंधिगुणनिवर्त्तनेन स्वरूपप्रत्यापत्त्यै। यथा मोरराजि समः का
विति मकारस्य मकार इति भावः। तस्मात् ह्रस्वानामिव दीर्घाणामपि येन नाप्राप्तिन्यायेन दीर्घेण गुणो बाध्यत एव। यथैवेति। दीर्घारंभात् इह विकृते नैव दी
र्घेण स्यात्तव्यमिति भावः। ऋदित्वमिति। यदंतरेण दीर्घविधानं प्राप्नुयात् ह्रदित्वं तदा दीर्घेण बाध्येत यतस्तु दीर्घाभ्यपमेव ऋदित्वं तदा तदेव फलं दीर्घस्य
संजातमिति ऋदित्वं प्रवर्त्तिष्यते। तथा चोच्यते। यं विधिं प्रत्युपदेशोऽनर्थकः स वि

दीर्घाणामपीति। इत्वोवाभ्यां गुणवृद्धी भवतो विप्रतिषेधेनेति गुणप्रसंगादित्यर्थः। ञीप्सतीति। असतिकित्वे गुणवत्सिलोपस्यापि विशेषाभा
वाद्दीर्घेण बाधनं न स्यादित्यर्थः। कारस्ता इति। यथान्यत्रा क्षिप्तानां धारादीनामन्यत्र निपातोऽसंभाव्य एवं कित्वणिलोपयोरपि संबंधोऽसं
भाव्य इत्यर्थः। एषोभिसंबंध इति। ञीप्सतीति एगुणलोपदीर्घत्वानि प्राप्नुवंति। तत्रासति कित्वेऽनवकाशत्वाद्विशेषाभावाच्च गुणवत्सि
लोपस्यापि दीर्घत्वं बाधकं स्यात्। अथवा पुरस्तादपवादा अनंतरान्विधीन्बाधंते नोत्तरानिति णिलोपस्यैव बाधकं तत्स्यात्। गुणस्तु

भवेद्ध्रस्वानां नाकृते दीर्घे कृदित्वं स्यात्। दीर्घाणां तु खल्वविकृते दीर्घत्वे कृदित्वं प्राप्नोति। दीर्घाणां नाकृ
ते दीर्घे। दीर्घाणामपि नाकृते दीर्घे कृदित्वं प्राप्नोति। यदा दीर्घत्वेन गुणो बाधितः तत उत्तरकालं कृदित्वं भ
वति। णिलोपस्तु प्रयोजनं। इदं तर्हि प्रयोजनं। णिलोपो यथा स्यात्। ञीप्सतीति। कारस्ताः क्वनिपति
ताः। क्व कित्वं क्व णिलोपः। को वाभिसंबंधः। यत्सति कित्वे णिलोपः स्यादसति कित्वे न स्यात्। एषो
भिसंबंधः। यत्सति कित्वे सावकाशं दीर्घत्वं परत्वाण्णिलोपो बाधेत। तत्र णिलोपस्यावकाशः। कार
णा हारणा। दीर्घत्वस्यावकाशः। चिचीषति। तुष्टूषति। इहोभयं प्राप्नोति ञीप्सतीति परत्वाण्णिलोपः॥

स्यादेव। सति तु कित्वे नैव गुणो बाधित इति चिचीषतीत्यादिषु लब्धावकाशं दीर्घत्वं परत्वाण्णिलोपेन बाध्यते। ननु असत्यपि कित्वे येन नाप्राप्ति
न्यायेन गुणस्यैव बाधकं दीर्घत्वं भविष्यति न णिलोपस्य। गुणबाधेन च सावकाशं दीर्घत्वं परत्वाण्णिलोपेन बाधिष्यत इति नार्थः कित्वेन। नै शिवः
तदस्ति। यदा बाध्यं भेदेनापेक्ष्यते इदं सर्वत्र प्राप्तमिदं तु क्वचिदेवेति तदायं न्यायः। यदा तु बाध्यमात्रमपेक्ष्यते विध्यंतरेणव्याप्तो वि
षयो न कश्चिदस्तीति तदा सर्वस्यैव बाधया भाव्यं॥ ६

अ सत्यपीति। मीनातिमीनोत्योः सत्यवकाशत्वाद्गुणं बाधित्वा दीर्घत्वं प्रवर्त्तते। ततो मीग्रहणेन ग्रहणादित्र भावेन प्रतिपदविहितेन गुणेन बाध्यते
कृते चेत्स्वभावे हलंताच्चेति किल्वाल्लघूपधगुणाभावः। तत्र सामान्यग्रहणे चरितार्थत्वाद्दीर्घविधानस्य दीव्यती ऽ ति परत्वाल्लिलोपो ऽ भवि
ष्यतीति नार्थः किल्वेन। ननु लाक्षणिकत्वान्मिनोते मीरूपस्य मीग्रहणेन प्राप्नोति। नैष दोषः। यत्र लक्षणाभिनिर्वृत्तत्वेन शब्दरूपमपेक्ष्यते
तत्र लक्षणप्रतिपदोक्तयोरिति परिभाषोपस्थानं। न तु यत्र प्रयोगाश्रयणं तत्र। ननु एवमसत्यपि मीग्रहणे न ग्रहणे मीनातीत्या
दिना आत्वे कृते गामादाग्रहणेष्वविशेष इति मा ग्रहणेन ग्रहणादित्र भविष्यतीति सामान्यग्रहणमपि दीर्घस्य प्रयोजनं नोपपद्यते। एं

असत्यपि किल्वे सावकाशं दीर्घत्वं। को वकाशः। इत्स्वभावः। निमित्सति। प्रनिमित्सति। मीनातिमीनोत्यो
र्दीर्घत्वे कृते मीग्रहणेन ग्रहणं यथा स्यात्। यथेवलधूसति किल्वे सावकाशं दीर्घत्वं परत्वाल्लिलोपो बाध
त एवं गुणमपि बाधेत। तस्मात्किल्वं वक्तव्यं। इकः किल्वं गुणे मा भूत् दीर्घारंभात्कृते भवेत्। अनर्थकं तु ह्र
स्वाणां दीर्घाणां तु प्रसज्यते। सामर्थ्याद्धि पुनर्भाव्यमृदित्वं दीर्घसंश्रयं। दीर्घाणां नाकृते दीर्घे णिलो
पस्तु प्रयोजनं॥ ॥हलंताच्च॥ अयुक्तो यं निर्देशः। कथं हि इको नाम हलंतं स्यात् अन्यस्यान्यः। कथं तर्हि
निर्देशः कर्त्तव्यः। इग्वतो हल इति॥
वं तर्हि इक्समीपाद्धल इति वा ग्रहणं तदा सामीप्यश्चेति ... स्यात्। तद्धि कार्यं नैतत्सूत्रं निरूपितं।
तदेव दोषांतरमाह। यथेवेति। सामान्यग्रहणाउपयुक्तत्वाद्दीर्घस्य नानवकाशत्वं इति द्वाभ्यामपि गुणणिलोपाभ्यां दीर्घत्वं बाध्यते इति कर्त्त
व्यं किल्वं। न च दीर्घविधानस्य कुङ्शब्द इति धातुरवकाशः। चुकूषत इति। यस्मात्कुङ्शब्द इति पाठः तत्र कुङ्ग दित्वान् ङि ले सति गुणाभावाद्दीर्घस्य प्र
वर्णां सिद्धं। वेदलोकयोश्चाकृतशब्दस्य प्रयोगो दृश्यते। गुञ्जेवावकाश इति चेन्न ऊरु निगमामिति स्यात् किं प्रत्याहारेण॥ ॥हलंताच्च॥ ॥अयु
क्त इति। अंतशब्दस्य वयववचनं मत्वा पर्यनुयुंक्ते। अन्यस्यान्य इति। अत्यंतभेदमनेन दर्शयति। अवयवावयविनो भेदविवक्षापि भवति। तंत

पिपिपक्षतीति। अत्र संप्रसारणप्रसंगः। तयोः सामीप्य इति। एवं च हल् चासावंत्यश्चेति कर्मधारयः। निपातनाच्च विशेषणस्य परनिपा
तः। एवमपीति। व्यक्तिनिर्देश इति भावः। असतीति किलेन लोपो न स्यात् इदं भेदिति। वर्णग्रहणे जातिग्रहणमिति निपातएकाजनाङ् इत्यत्र ए
कग्रहणेन ज्ञापितं। न चात्र व्यक्तिगतमेकत्वं अपि तु जातेः स्वगतं। तत्र पदार्थावत् व्यक्तिव्यतिरेका जातिः तस्याश्च व्यक्तिद्वारकाः सामी
प्यादयो धर्माः तदानस्याएकत्वादिकसमीपत्वं सनन्तपरत्वं तदपेक्षमस्तीति सिद्धं पिपक्षतीति किंत्वं हकारादिषु चाभिन्नप्रत्ययाभिधानाद्धल्

यद्येवं पिपिक्षतीति अत्रापि प्राप्नोति। एवं तर्हि इगुपधाद्धलंतादिति वक्ष्यामि। एवमपीदं भेर्न प्राप्नोति सूत्रं भिद्यते
यथान्यासमेवास्तु। ननु चोक्तमयुक्तोयं निर्देश इति। नायुक्तः। अयमंतशब्दोस्त्यवयववाची। तद्यथा। वस्त्रांतः
वसनांत इति। वस्त्रावयवो वसनावयव इति गम्यते। अस्ति सामीप्ये। तद्यथा। उदकांतं गत इति। उदकसमीपं गत
इति गम्यते। तयोः सामीप्यवर्त्तिनस्येदं ग्रहणं। एवमपीदं भेर्न सिध्यति। यो ह्यत्रैकसमीपे हल् न तस्मादुत्तरः स
न्नायस्मादुत्तरः सन्नासाविकसमीपे। एवं तर्हि इदं भेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्धं। हल्जातिर्निर्दिश्यते। इक
उत्तरायाः हल्जातेरिति॥ ॥लिङ्सिचावात्मनेपदेषु॥ कथमिदं विज्ञायते आत्मनेपदयोर्लिङ्सिचाविति आ

त्वजातेः सद्भावः। यद्यपि व्यक्तिभेदाद्व्यक्तय एव जातिरिति पक्षः तदा भेदस्तु (हो)स्विदात्मनेपदेषु परतो यौ लिङ्सिचाविति॥
द्रासावभेदाश्रयणादिष्टसिद्धिः॥ ॥लिङ्सिचा॥ ॥कथमिति। आत्मनेपदेष्विति सरूपं तु तस्यार्थरूपं न लभ्यते। तत्र यदि निर्द्धारणे सप्तमी। द्विव:
तदा तुल्यजातीयस्य निर्द्धारणात् लिङ्विशेषितं स्यात्। लिङ्शब्देन लिङादेशग्रहणात्। अथ परसप्तमी तदा सिजेव विशेष्यते न लिङ् सी
युडादिसमुदायो लिङ्शब्देन गृह्यते इति तस्यात्मनेपदपरत्वाभावः। न चानयोर्भिन्नयोरर्थयोः सहविवक्षासंभवतीत्येकशेषस्याप्रयोगः॥ ७

[redacted]

सिच्चविशेषितइति। आत्मनेपदपरत्वादुपचारात्सिजेवात्मनेपदमुच्यते गौणार्थमुख्यार्थयोरात्मनेपदशब्दयोः सारूप्यमात्रप्रतिबद्धएक

किंचालः। यदि विज्ञायते आत्मनेपदंयोलिङ्सिचाविति लिङ्विशेषितः सिजविशेषितः। अथ विज्ञा
यते आत्मनेपदेषु परतोयोलिङ्सिचाविति सिज्विशेषितः लिङ्विशेषितः। यथेच्छसितथास्तु। अस्तु
तावदात्मनेपदंयोलिङ्सिचाविति। ननु चोक्तं लिङ्विशेषितः सिजविशेषितइति। सिच्चविशेषितः। कथं
आत्मनेपदंसिज्नास्तीतिकृत्वा आत्मनेपदपरे सिचि कार्यं विज्ञास्यते। अथवा पुनरस्त्वात्मनेपदे
षुपरतोयोलिङ्सिचाविति। ननु चोक्तं सिज्विशेषितो लिङ्विशेषितइति। लिङ्विशेषितः। कथं आ
त्मनेपदेपरतो लिङ्नास्तीतिकृत्वा आत्मनेपदेलिङ्कार्यं विज्ञास्यते। नैववा पुनरर्थो लिङ्विशेष
णेनात्मनेपदग्रहणेन। किंकारणं। झलितिवर्त्तते। आत्मनेपदेषु चैव लिङ् झलादिः। नपरस्मैपदेषु।
तदेतत्सिज्विशेषणमात्मनेपदग्रहणं। अथ सिज्विशेषणे आत्मनेपदग्रहणे सति किंप्रयोजनं। इ
हतावन्माभूत् अयाक्षीत् अवाप्सीत्। नैतदस्ति। इक इति वर्त्तते। एवमप्यवैषीत् अनैषीत्। अत्रापिप्राप्नो
ति। हलन्तादिति वर्त्तते। एवमप्यकोषीत् अमोषीत्। अत्रापिप्राप्नोति। नैतदस्ति। झलितिवर्त्तते। एवमप्य
भैत्सीत् अच्छैत्सीत्। अत्रापिप्राप्नोति। नैतदस्ति। इग्लक्षणयोर्गुणवृद्ध्योः प्रतिषेधः। न चैषेग्लक्षणा वृद्धिः। इ

[illegible]

शेषः करिष्यतइत्यर्थः। आत्मनेपदेलिङ्गीति। अवयवगतं पौर्वापर्यं समुदाये आत्मविषयत इत्यर्थः। अथवा तंत्रेणाशब्दद्वयोच्चारणाद्दर्थद्वयं लभ्य
ते नैववेति। संभवव्यभिचाराभ्यां सिजेव विशेष्यते न तु लिङ्गीत्यर्थः॥ श्रीः॥

स्याद्धोरिच्च॥ ॥इच्चकस्येति। कथं पुनरत्र षष्ठी यावता हेतुषष्ठ्येषा लोकेन प्रयुक्त इति हेतुतृतीयया भाव्यं। नैष दोषः। हेतुरूपताया अविवक्ष णात्संबंधिरूपेण विवक्षितत्वात्। यथा भद्रीयाः पुत्रा इति शैषिकः प्रत्ययः तदुत्पत्तिकाले ऽपत्यरूपत्वस्याविवक्षणात्। तकार इत्तकारे तत्स्य नावस्तकारे त्वं किमर्थं क्रियते। दीर्घो मा भूदिति। आंतरतम्यान्मात्राकालोतीति भावः। भाव्यमानोऽण् सवर्णान्न गृह्णातीत्येष परिह रः। नित्यत्वान्नोक्तः। क्वचिद्भाव्यमानस्यापि सवर्णग्रहणात्। यथा अमू स्यामित्यादावूकारो दीर्घस्य भवति। परिहारांतराभिधाना र्था। अंतरेणापीति। इकारविधानेनापीत्यर्थः। किं त्वं तु कर्त्तव्यमेव। तेन विना ईत्वस्य प्राप्त्यभावात्। अनंतर इति। असदृश आदेशे क्रि

स्याद्धोरिच्च॥ ॥इच्चकस्य तकारे त्वं। कस्य हेतोरिकारस्तपरः क्रियते। दीर्घो मा भूत्। दीर्घो मा भूदि ति। कृतेऽपि सः। अंतरेणाप्याकारं भं दीर्घोत्र सिद्धः। पुमास्यागापाजहातिसां हलीति। अनंतरे प्लुतो मा भूत्। इदं तर्हि प्रयोजनमनंतरे प्लुतो मा भूदिति। कुतो नु खल्वेतदनंतरार्थे आरंभे ह्रस्वो भविष्यति न पुनः प्लुत इति। प्लुतश्च विषये स्मृतः। विषये प्लुत उच्यते। यदा चाविषयो भवति यथैव तदा प्लुतेन। इच्चकस्य तकारे त्वं दीर्घारंभात्कृतं भवेत्। अनंतरे प्लुतो मा भूत्प्लुतश्च विषये

प्रमाण इत्यर्थः। प्लुतश्चेति। अनेन तपरत्वं प्रत्याख्यायते। यद्यनेन प्लुतो विधीयते तदा यत्रापि विषये ऽनंतरस्यापि प्रत्याख्यानयोरित्या दिना प्लुतो विहितस्तत्राप्यनेन विधीयेत। अस्मिन्कर्त्तव्ये पूर्वत्रासिद्धमित्याष्टमिकस्य प्लुतस्यासिद्धत्वात्। ततश्च पक्षे अनुवाददोषः प्रा प्नोतीति ह्रस्व एव भवति। अन्ये तु तपरत्वमनेन समर्थितमिति व्याचक्षते। अनंतरे प्यादेशे प्रमाणो दीर्घ एव स्यात्। ननु सिद्ध एव दीर्घ इत्युक्तं प्रसिद्धस्यापि पुनर्विधानं प्लुतनिवृत्त्यर्थं स्यात्। मा भूत्प्लुत इति चेत्तन्न। प्लुतश्च विषये स्मृतः। सत्यां सति तपरत्वेन प्राप्नोती ति दीर्घनिवृत्त्यर्थं तपरत्वं स्थितं। प्लुतविधौ तु वाक्यस्य टेरित्यधिकारात्कथमिकारस्य प्लुतः स्यादिति चिंत्यमेतत्॥ ॐ॥ ॐ॥ ॐ

न क्त्वा सेट्॥ ॥कृते ऽकित्वे इति। अकारप्रश्लेषः। निष्ठायामिति। शीङादिभ्य एव परा निष्ठा न किदिति नियमः। विपरीतस्तु निषेधे वा निया-
ख्यानान्न भवति। परोक्षायामिति। पूर्वाचार्यप्रसिद्ध्या परोक्षा लिडुच्यते। अस्त्वत्रेति। प्राप्नोतु कित्वमित्यर्थः। न तु निर्दिष्टस्य निषेधः

न क्त्वा सेट्॥ ॥न सेडिति कृते किति त्वा न सेडित्येवास्तु किं नार्थः क्त्वाग्रहणेन। निष्ठायामपि तर्हि प्राप्नोति। गुधितः। गुधितवानिति।
निष्ठायामवधारणात्। निष्ठायामवधारणं न भविष्यति। किमवधारणं। निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः इति। परोक्षायां
तर्हि प्राप्नोति। किं च स्यात्। पपिच। पपिम। क्ङितीत्याकारलोपो न स्यात्। मा भूदेवमिटीत्येवं भविष्यति। इदं तर्हि। जग्मिव। ज-
घ्निव। क्ङितीत्युपधालोपो न स्यात्। ज्ञापकात्परोक्षायां। ज्ञापकात्परोक्षायां न भविष्यति। किं ज्ञापकं। सनि झल्ग्रहणं
विदुः। यदयमिको झल्ग्रहणं करोति तज्ज्ञापयत्याचार्य औपदेशिकस्य कित्वस्य प्रतिषेधो नातिदेशिकस्येति। कथं कृत्वा
ज्ञापकं। झल्ग्रहणमनर्थकं स्यात्। अस्त्वत्र कित्वं न सेडिति प्रतिषेधो भविष्यति। पश्यति त्वाचार्य औपदेशिकत्वस्य कित्वस्य
प्रतिषेधो नातिदेशिकस्ये(ति) ततो झल्ग्रहणम् (करोति)। नैतदस्ति ज्ञापकं। उत्तरार्थमेतत्स्यात्। स्थाघ्वोरिच्च। हलादौ यथा स्यादिह मा
भूत्। उपास्थायिषातां। उपास्थायिषत।

॥शाक्यः कस्तु उपास्थायिषातामिति। स्थाघ्वोरात्ताविति स्थितेऽत्र इत्वं च प्राप्नोति चिण्वदिड्वा। तत्र परत्वाच्चिण्वदिड्वा युक् प्राप्नोति इट्
त्वात्तत्र अपवादत्वाद्युगागमः। तत्र कृते यकारस्य लप्रसंगः। न च पुनरिड्भविष्यति पूर्वमेव युका बाधितत्वादिति भावः॥ श्रीः॥

(9)

असतिकित्वेइति।हल्ग्रहणस्यज्ञापकत्वंनतावत्तस्यनित्यातिदेशिकस्यापिकित्वस्यनस्सेऽडितिनिषेधोनवतीत्यभिप्रायः।सुधीवनीति।अ
नोबहुव्रीहेरितिप्रकृतस्यैवङीपोनिषेधः।नतुरेफस्यापि।सत्तुसन्नियोगशिष्टानामन्यतरापायेऽन्यतरस्याभावइतिन्यायान्निवर्त्तते।
अयंन्यायोबिल्वकादिभ्यश्छस्यलुगित्यत्रछग्रहणेनज्ञापितः।अस्त्वत्रेति।यकारस्यकृतेइत्वेवृद्धिर्भविष्यतियुगागमेनचाकारस्यह

इत्वंकित्सन्नियोगेन।कित्वसन्नियोगेनत्वमुच्यते।तेनासतिकित्वेइत्वंनभविष्यति।रेणतु
स्यंसुधीवनि।तद्यथा।सुधीवासुपाविति।ङीप्सन्नियोगेनरउच्यमानोऽसतिङीपिनभविष्यति।
अथवास्त्वत्रेत्वं।कारूपसिद्धिः।वृद्धौकृतायामाद्यादेशोनप्राप्नोति।वस्वर्थं।वस्वर्थंतर्हिक्ग्रह
णंकर्त्तव्यं।वसौयोपदेशिकंकित्वं।किंचस्यात्।पपिवान्।तस्थिवान्।क्ङितीत्याकारलोपोन
स्यात्।माभूदेवमिटीत्येवंभविष्यति।इदंतर्हिजग्मिवान्।जघ्निवान्।क्ङितीत्युपधालोपोनस्यात्।
वस्वर्थंकिदतिदेशात्।अस्त्वत्रोपदेशिकस्याकित्वस्यप्रतिषेधः।आतिदेशिकमत्राकित्वंभविष्य
ति।यत्रतर्हितन्नातिदिश्यते।अंजेः।आंजिवानिति।एवंतर्हिछांदसः।क्वसुः।लिट्छंदसिसार्वधातु
कंभवति।तत्रसार्वधातुकमपिन्ङिद्वतीत्युपधालोपोभविष्यति।निगृहीतिःप्रयोजनं।इदंत
र्हिप्रयोजनं।इहमाभूत्।निगृहीतिः।उपस्निहितिः।निकु

द्विर्वाच्यतेनात्विकारस्यापि।आंजिवानिति।इदंनोपपद्यते।अत्रहिनलोपेकृते शिवः
द्विर्वचनेएकादेशेचवस्वेकाजाद्घसामितीडागमः।तत्रहिकित्वप्रतिषेधान्नलोपनिवृत्तौद्विरुक्तत्वान्नुट्सत्येकाच्त्वाभावादिण्निवृत्तौनलोपा
दीनांचककप्राप्तिः।चक्रकेषुचेष्टतोव्यवस्था।भाष्यकारेणतुपरिहारांतरसद्भावाद्दोषपरिहारोनाश्रितः।निगृहीतिरिति।तितुत्रेषग्रहादीनामितीडागमः॥

क्त्वा च किद्ग्रहणादिति। विग्रहो विभागो योगस्य करिष्यत इत्यर्थः॥ ॥उदुप॥ ॥उदुपधाच्छप इति। शपः संबंधी यः शब्विकरणो यस्मादि
त्यर्थः॥ ॥पूङः॥ ॥पूङ इति। सेडित्यन्यतरस्यामिति चानुवर्त्तनात् सेटो वेरेः क्त्वानिष्ठयोः कित्वविकल्पः स्यात्। ततश्च पुवित्वा पुवितमिति

क्त्वा च विग्रहणात्। उपरिष्टाद्योगविभागः करिष्यते। न सेडित्यस्य निष्ठा शीङ्स्विदिमिदिक्ष्विदिधृषः। मृषस्तितिक्षायां। उ
दुपधाद्भावादिकर्मणोरन्यतरस्यां। ततः पूङः क्त्वा निष्ठा सेट् किन्न भवति। ततः क्त्वा च। क्त्वा च सेट् किन्न भवति। पूङ
इति निवृत्तं। न सेडिति कृते किं निष्ठायामवधारणात्। ज्ञापकान्न परोक्षायां सनि भल्ग्रहणं विदुः। इह तु कि
त्त्वनियोगेन रूपेण तुल्यं स्वपीवति। वस्त्वर्थं किदितीदं शङ्कते इति। क्त्वा च विग्रहणात्॥ ॥उदुपधाद्भावादिक
र्मणोरन्यतरस्यां॥ ॥इह कस्मान्न भवति गुधितः गुजितवान्। उदुपधाच्छपः। शब्विकरणेभ्य इष्यते॥
पूङः क्त्वा च॥ ॥पूङः क्त्वानिष्ठयोरिड्विप्रसंगः सेट्प्रकरणात्। पूङः क्त्वानिष्ठयोरिड्विभाषा प्राप्नोति किं
कारणं। सेट्प्रकरणात्। सेडिति वर्त्तते। न वा सेट्त्वस्याकिदाश्रयत्वादनिड्वा कित्वं। न वा एष दोषः। किं
कारणं। सेट्त्वस्याकिदाश्रयत्वात्। किदाश्रयं सेट्त्वं यदा कित्वं तदेटा भवितव्यं। सेट्त्वस्याकिदाश्रयत्वादनिड्
वा विभाषा कित्वं भविष्यति। इड्विधौ पूङो ग्रहणं क्रियते। तेन वचनादिड् सेट्प्रकरणाच्च इड्वा च विभा
षा कित्वं प्राप्नोति। इड्विधौ च ग्रहणं। इड्विधौ हि पूङो ग्रहणं न कर्त्तव्यं भविष्यति॥

पक्षे स्यात्। अस्ति चेडागमः। पूङश्चेति विकल्पेनेड्विधानात्। न वेति। इड्विधौ पूङश्चेति सूत्रं वार्त्तिककारः प्रत्याचष्टे। तत्रानिटोरेव क्त्वा
निष्ठयोरनेन कित्वं विकल्प्यते। तत्र यदा कित्वं तदा गुणः कित्यनीटू प्रतिषेधात् स्यादेतदिति। यदा त्वकित्वं तदेड्गुणयोः पवित्वा पवितमिति
भवति॥

भारद्वाजीयादिति। लाघवमनादृत्य सूत्रकारेण पृथग्व्यवस्थितो विधिरुपदिष्टं इत्यनुविकल्पो नानुवर्त्तते उत्तरत्र वा ग्रहणादिति शिष्यतीति
मितिभावः॥ उत्तरार्थमिति। न क्त्वा सेडिति कित्त्वप्रतिषेधस्यासिद्धत्वात्॥ ॥तृषिमृषि॥ ॥पूजार्थमिति। शास्त्रस्य पूजायां तात्पर्यं प्र
 तिपादनेनानादित्वाख्याप्रामाण्यप्रतिपादनात्॥ ॥रलो व्यु॥ किमिदमिति। किं नियमप्राप्ते विभाषा आहोस्वित्प्राप्तेति प्रश्नः तत्र च्वा

भारद्वाजीयाः पठन्ति। नित्यमकित्त्वमिडाद्योः क्त्वाग्रहणमुत्तरार्थं। नित्यमकित्त्वमिडाद्योः सिद्धं कथं
विभाषाप्रकरणेऽयं योगः क्रियते विभाषामध्ये च ये विधयस्ते नित्या भवंति। किमर्थं तर्हि क्त्वाग्रहणं।
क्त्वाग्रहणमुत्तरार्थं। उत्तरार्थं क्त्वाग्रहणं क्रियते। नोपधात्थफान्ताद्वा। वंचिलुंच्यृतश्चेति॥ ॥तृषिम
षिकृशेः काश्यपस्य॥ ॥काश्यपग्रहणं किमर्थं। काश्यपग्रहणं पूजार्थं। वेत्येव हि वर्त्तते॥
रलो व्युपधाद्धलादेः संश्च॥ ॥किमिदं रलः क्त्वासनोः कित्त्वं विधीयते आहोस्वित्प्रतिषिध्यते। किं चा
तः। यदि विधीयते क्त्वाग्रहणमनर्थकं किद्धि क्त्वा। अथ प्रतिषिध्यते सन्ग्रहणमनर्थकम्।
अकिद्धि सन्। अत उत्तरं पठति। रलः क्त्वासनोः कित्त्वं विधीयते। ननु चोक्तं क्त्वाग्रहणमनर्थ
पक्षे कमिति। नानर्थकं। न क्त्वा सेडिति प्रतिषेधः प्राप्नोति तद्बाधनार्थम्॥

प्राप्तविभाषायां सन एवाप्राप्तं कित्त्वं विधी
यत इति क्त्वानुवृत्तिरनर्थिका। नहि तस्य कित्त्वं विधेयं स्वत एव भावात्। अप्राप्तविभाषा तु रल्भ्यः कित्त्वमस्तीति तस्यैव पक्षे निषेधः
कर्त्तव्य इति सन्ग्रहणं न कार्यं। नहि तस्य कित्त्वमस्ति यत्पक्षे निषिध्यते। रल इति। अप्राप्तविभाषेयमेकेनैव रूपेण व्यवस्थितेत्यर्थः
एकरूपत्वदर्शनाय विचारः कृतः। न तूभयत्र न संति। प्रतिलक्ष्यं पारम्पर्येणाम्नायस्य सिद्धत्वात्॥

उकालः॥ ॥अयुक्तोऽयमिति। तपरस्तत्कालस्येत्यत्र व्याख्यातत्वादिह न व्याख्यायते। ह्रस्वादिष्विति। ऊ इत्यस्यैव शब्दस्योच्चारणात्तद्भेदानवगमा
त्संज्ञिविशेषणस्यैकत्वे सति संज्ञिनोऽप्येकत्वात्संज्ञानां च त्रित्वात्संख्यातानुदेशाप्रसंगः। सिद्धं त्विति। त्रयाणां कृतैकादेशानां निर्देशाद्विशेषणा

ऊकालोऽज्झ्रस्वदीर्घप्लुतः॥ ॥अयुक्तोऽयं निर्देशः। ऊ इत्येतेन कालः प्रतिनिर्दिश्यते। ऊ इत्ययं च वर्णः। तत्रा
युक्तं वर्णेन सह कालस्य सामानाधिकरण्यं। कथं तर्हि निर्देशः कर्त्तव्यः। ऊकालकाल इति। किमिदमूका
लकाल इति। ऊ इत्येतस्य कालः ऊकालः। ऊकालः कालो यस्य स ऊकालकाल इति। स तर्हि तथा निर्दे
शः कर्त्तव्यः। न कर्त्तव्यः। उत्तरपदलोपोऽत्र द्रष्टव्यः। तद्यथा। उष्ट्रमुखमिव मुखमस्य उष्ट्रमुखः। ख
रमुखः। एवमूकालकाल ऊकाल इति। अथवा साहचर्यात्ताच्छब्द्यं भविष्यति। कालसहचरितो वर्णो
ऽपि काल एव। ह्रस्वादिषु संख्यातानुदेशाप्रसिद्धिर्निर्देशवैषम्यात्। ह्रस्वादिषु समसंख्यातानुदेशेन
प्राप्नोति। किं कारणं। निर्देशवैषम्यात्। तिस्रः संज्ञाः। एकः संज्ञी। वैषम्यात्संख्यातानुदेशो न प्राप्नोति।
सिद्धं तु समसंख्यत्वात्। सिद्धमेतत्। कथं। समसंख्यत्वात्। कथं समसंख्यत्वं। त्रयाणां हि विकारनि
र्देशः। त्रयाणामयं प्रश्लिष्टनिर्देशः। कथं पुनर्ज्ञायते त्रयाणामयं प्रश्लिष्टनिर्देश इति। तिसृणां संज्ञा
नां करणसामर्थ्यात्। यद्यपि तावत्तिसृणां संज्ञानां करणसामर्थ्याज्ज्ञायते त्र

सिद्ध

त्रयावच्छिन्नत्वात्संज्ञिनामपि त्रित्वाद्यथासंख्यं
त्रयावच्छिन्नत्वात्संज्ञिनामपि त्रित्वाद्यथासंख्यस्तत्रेणाश्रीयते न शब्दतएव। अथवा शब्दतः साम्याश्रयणेऽपि संहिताश्रयादेकमिव प्राप्तास्त्र
संबंध इत्यर्थः। अर्थतस्त्वसाम्यं यथासंख्यस्तत्रेणाश्रीयते
यः शब्दोच्चारिता इत्यस्य दोषः। कथं पुनरिति। प्रत्यक्षेणैकस्यैव शब्दस्य श्रवणाद्भेदावगमे प्रमाणाभाव

का. के. अयंतावदिति।लौकिकव्यवहाराश्रयेणप्लुतत्वंह्रस्वत्वंचसिद्धमाश्रित्यैतदुच्यते।यत्तावदिति।ह्रस्वात्प्रतिपत्तौयांह्रस्वादिसंज्ञापांलोकेह्र ॥४॥

कुतस्त्वेतेनानुपूर्व्येणासन्निविष्टानांसंज्ञानविघ्नतीति।आदौमात्रिकस्ततोद्विमात्रस्ततस्त्रिमात्रइति।नपुन

२१२ र्मात्रिकोमध्येवान्तेवास्यादिति।तथाद्विमात्रआदौवास्यादन्तेवा।नमात्रिमात्रआदौवामध्येवास्यात्।अयंता

वत्त्रिमात्रोऽशक्यआदौमध्येवाकर्तुं।कुतः।प्लुताश्रयोहिप्रकृतिभावःप्रसज्येत।मात्रिकद्विमात्रिकयोरपि

घ्यन्तंपूर्वंनिपततीतिमात्रिकस्यपूर्वनिपातोनविघ्नतीति।यत्तावदुच्यते।अयंतावत्त्रिमात्रोऽशक्यआदौवा

मध्येवाकर्तुं।प्लुताश्रयःप्रकृतिभावःप्रसज्येतेति।प्लुताश्रयःप्रकृतिभावः।प्लुतसंज्ञाभावेनैव।यदिच

त्रिमात्रआदौवामध्येवास्यात्प्लुतसंज्ञैवास्यनस्यात्।कुतःप्रकृतिभावः।यदप्युच्यतेमात्रिकद्विमात्रिक

योरपिघ्यन्तंपूर्वंनिपततीतिमात्रिकस्यपूर्वनिपातोनभविष्यतीति।ह्रस्वाश्रयाहिघिसंज्ञा।ह्रस्वसंज्ञाभावे

नैव।यदिचमात्रिकोमध्येवान्तेवास्यात्ह्रस्वसंज्ञैवास्यनस्यात्।कुतोघिसंज्ञाकुतःपूर्वनिपातः।एवमेषाव्यवस्था

नप्रकल्प्यते।एवंतर्ह्याचार्यप्रवृत्तिर्ज्ञापयतिनत्रिमात्रोऽन्तेभवतीति।यदयंविभाषापृष्टप्रतिवचनेहेरिति

मात्रिकस्यप्लुतंशास्ति।कथंकृत्वाज्ञापकं।योऽन्तेसप्लुतसंज्ञः।यदिचमात्रिकोऽन्तेस्यान्नप्लुतसंज्ञास्यात्तत्रद्विमात्रोऽका

लस्यमात्राकालवचनमनर्थकंस्यात्।मध्येतर्हिवास्यादिति।अत्राप्याचार्यप्रवृत्तिर्ज्ञापयतिनमात्रिकोमध्येभवती शिवः

ति।यदयमतोदीर्घोयञिसुपिचेतिदीर्घत्वंशास्ति।कथंकृत्वाज्ञापकं।योमध्येसदीर्घसंज्ञकः।यदिचमात्रिकोमध्येस्या

स्यादित्यवहारानायपेक्षिभाकः।यदयमिति।अनंतरतमादेशविधानार्थमेतत्स्यादितिचेत्।तन्न।नहिस्थानेन्तरतमइत्यस्याःप्रसक्तायाःबाधायुक्तेतिविशिष्टा ११

नुपूर्व्योप्रतिपत्तौलिंगत्वमेवप्लुतविधानस्य।। ॥४॥

त्वात्

मात्रिकेणेति। लिंगद्वयेनांतमध्याभ्यां मात्रिकस्यापकृष्टत्वादिति भावः। दीर्घप्लुतयोस्त्विति। उकारेण द्विमात्रत्रिमात्रयोः स्वरूपस्य च ग्रहात् कइति
ह्रस्वसंज्ञा त्रयाणामपि प्राप्नोति। न च दीर्घप्लुतसंज्ञाभ्यां द्विमात्रत्रिमात्रयोः ह्रस्वसंज्ञा बाध्यते संज्ञानां समावेशमुपगमात् आकरादेकासंज्ञे
ति वचनात् द्विमात्रत्रिमात्रावेव न एतावाञ्झल्कालानां न ग्राहकाविति तत्र न दोषः याव चेति एककार्यत्वादेतदुक्तं ऊकालोऽज्झ्रस्वकालार्थोऽल्प्यत्वेऽप्युका

द्विमात्रं तदर्थं तेस्यादिति। अत्राप्याचार्यप्रवृत्तिर्ज्ञापयति न द्विमात्रोंतेन भवतीति। यदयमनोभ्यादानङिति द्विमात्रि
कस्य प्लुतं शास्ति। कथं कृत्वा ज्ञापकं। योंते सप्लुतसंज्ञः यदि च द्विमात्रोंतेस्यात्प्लुतसंज्ञा स्यात्त्रद्विमात्रकालस्याद्वि
मात्राकालवचनं अनर्थकं स्यात्। आचिकेणाचास्य पूर्वनिपातो बाधितइति कृत्वा नान्यचोत्सर्गइतेष्टविनुमन
दतोमध्यात्। एवमेषा व्यवस्याप्रकृता। दीर्घप्लुतसंज्ञयोस्तु पूर्वसंज्ञाप्रसंगः। दीर्घप्लुतयोरपि पूर्वसंज्ञाप्रा
प्नोति। का। ह्रस्वसंज्ञा। किंकारणं। अणः सवर्णान्गृह्णातीति। सिद्धंतु तपरनिर्देशात्। सिद्धमेतत्। कथं। तपरनिर्देशः
कर्त्तव्यः। उद्कालइति। ययेवं द्रुतायांस मध्यमविलंबितयोरुपसंख्यानं कालभेदात्। द्रुतादिषुचोक्तं। किमुक्तं। सि
द्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यंत इति। सतर्हि तपरनिर्देशः कर्त्तव्यः। न कर्त्तव्यः। इ
हयावश्यं तपरकरणं क्रियते तावद्यकालग्रहणं प्रत्येकं च कालशब्दः परिसमाप्यते। ऊकाल ऊकाल ऊ३कालइति
अ। कालग्रहणं क्रियते। एवाएकसंज्ञाधिकारेयं योगः कर्त्तव्यः। तत्रैकासंज्ञा भविष्यतीया परानवकाशा
चेति। एवं हि दीर्घप्लुतयोः पूर्वसंज्ञा बाधिन भविष्यति।। श्री।।
रादयोल्पत्वं न यांति च रंतीति तिनात्वेन ते विशिष्यंते प्रपितु तेरद्ध।
तत्रोकारास्येदिकालत्वादुकारादिसदृशो ज्झ्रस्वदीर्घप्लुतइति नार्थः कालग्रहणेनातत्क्रियते ग्रहणमाणेनोकारेणकालं विशेषयितुमिति
सवर्णग्रहणं न भविष्यति तत्रैतत्स्यादुकारास्वरः कालशब्देनग्रहयत इत्याह प्रत्येकं चेति। षण्मात्रस्याचोसंभवात्संज्ञात्रयकरणाञ्चेति भावः।।

मा॰के॰ अथाद्ग्रहसंज्ञायामिति। ह्रस्वसंज्ञा च शकृत्संज्ञेति न ह्याचेउकारः सवर्णान्न ग्रहीष्यते। उत्तराद्रावस्तु गुणेन भेदकाद् इति लाङ्गिनस्यापि ह्र
स्वसंज्ञा न विष्यतीति उदात्तादिसंज्ञास्वग्रहणं निरुक्तानि दीर्घप्लुतानामपि ला भविष्यति। इत्योत्वयोग्यत्वात्र आवः। इकोयणचीत्या
२१२ दौ तु न संज्ञा विधानं अपि त्वादिरन्त्येन। नो विहितसंज्ञानुवाद इति सवर्णग्रहणं भविष्यति। अथवा ह्रस्वसंज्ञेति। त्रयाणां च ह्रस्व

अथवा स्वं रूपं शब्दस्याशब्दसंज्ञेत्ययं योगः प्रत्याख्यायते। तत्र यदेतच्छब्दसंज्ञेत्येन यथा यथा विभक्त्यानि
र्दिश्यमानमर्थं वक्ष्यति तथा निर्दिष्टमुत्तरत्रानुवर्तिष्यते। अणुदित्सवर्णस्य चाप्रत्ययः। अशब्दसंज्ञायामिति
अथवा ह्रस्वसंज्ञावचनसामर्थ्याद् दीर्घप्लुतयोः पूर्वसंज्ञा न भविष्यति। ननु चेदं प्रयोजनं स्यात्संज्ञया
विधाने नियमं वक्ष्यामीति ह्रस्वसंज्ञा स्थाने यदुच्यते तद्ध्रस्वः स्थाने यथा स्यात्। स्यादेतत्प्रयोजनं यदि
किंचित्कराणि ह्रस्वशासनानि स्युः। यत्तस्तु खलु यावदज्ग्रहणं तावद्ध्रस्वग्रहणमतोऽकिंचित्कराणि ह्रस्व
शासनानि। इदं तर्हि प्रयोजनं। एच इग्घ्रस्वादेश इति वक्ष्यामीति। अनुच्यमाने तस्मिंस्त्रिर्ह्रस्वप्रदेशेष्वेच
इग्भवतीति वक्तव्यं स्यात्। ह्रस्वो नपुंसके प्रातिपदिकस्य एच इग्भवतीति। णौ चङ्युपधाया ह्रस्व एच
इग्भवतीति ह्रस्वः। हलादिः शेषः एच इग्भवतीति। संज्ञाकरणं नाम यथा न लघीयः। कृत एतत्। लघ्वर्थं
संज्ञा तत्र ह्रस्वप्रदेशेषु त्रयः संज्ञिन उप हि संज्ञाकरणं लघीयश्च त्रिर्ह्रस्वप्रदेशेषु एच इग्भवतीति न पुनः संज्ञाकरणम्॥ शिवः
ति यत्नेतत्रान्तरतमादेशविधाने ह्रस्वसंज्ञाविधानमनर्थकमेव स्यात्। अथवा वचनादन्तरतमो भवेत्। एवमपि स्वप्रदेशेष्व १२
ज्ग्रहणमेव कुर्यादित्यर्थः। इस्तर्हीति। असत्यां ह्रस्वसंज्ञायां ह्रस्वादेश इति कर्तुं न युज्यते। ततश्च ह्रस्वविधिप्रदेशेषु ह्रस्व एच इगि

ग्रहणानीति। ग्रथ्यतेनेनार्थ इति ग्रहणं पदमुच्यते। ह्रस्वादेशे इत्याङः प्रश्लेषनिर्देशात्पृथक्प्रयोगाभावादाङ्न भणितः॥ ननु मितां ह्रस्व इत्यत्र हेङ्वेषने इत्यस्या हिंडयतीत्यर्थे नेचइगिति वक्तव्यं। तथा खित्यनव्ययस्येत्यत्रापि परमनुमत्य इत्यर्थं मितिगोरवप्रसंगः। एवं तर्हि एच इगिति पंचकृत्वो पुत्रा

त्रिर्ह्रस्वप्रदेशेषु एच इग्भवतीति षड्ग्रहणानि। संज्ञाकरणे पुनरष्टो। ह्रस्वसंज्ञावक्तव्या। त्रिर्ह्रस्वप्रदेशेष्वेच

इगिति वक्तव्यं ह्रस्वो ह्रस्वो ह्रस्व इति एच इग्घ्रस्वादेश इति। सोयमेवं लघीयसान्यासेन सिद्धे यद्गरीयांसं

यत्नमारभते तस्यैतत्प्रयोजनं दीर्घप्लुतयोस्तु संज्ञा माभूदिति॥ ॥अच्चश्च॥ ॥किमयमलोंत्यशेषआहो

स्विदलोंत्यापवादः कथं चायं तच्छेषः स्यात् कथं तदपवादः। यद्येकं वाक्यं तच्चेदं च। अलोंत्यस्य विधयो भ

वंति अचो ह्रस्वदीर्घप्लुता अंत्यस्येति ततोयं तच्छेषः। अथ नानावाक्यं अलोंत्यस्य विधयो भवंति अचो ह्र

स्वदीर्घप्लुता अंत्यस्यैकि चानंत्यस्य चेति ततोयं तदपवादः। कश्चात्र विशेषः। ह्रस्वादिविधिरलोंत्यस्ये

ति चेद्दृचिप्रच्छिशमादिप्रभृतीनां निगमि दीर्घग्रहणं। ह्रस्वादिविधिरलोंत्यस्येति चेद्दृचिप्रच्छिशमादि

प्रभृतीनां निगमि दीर्घग्रहणं कर्त्तव्यं। वृश्चिप्रच्छ्योर्दीर्घः अच इति वक्तव्यं। अनंत्यत्वाद्धि न प्राप्नोति। श

मादीनां दीर्घः अच इति वक्तव्यं। अनंत्यत्वाद्धि न प्राप्नोति। निगम्योर्दीर्घः अच इति वक्तव्यं। अनंत्यत्वाद्धि न

र्यमाणे प्रतिपत्तिलाघवं भवतीति लाघवोपलक्षणपरमिदं भाष्यं द्रष्टव्यं। ह्रस्वविधेर्दीर्घप्लुतइति सौत्रत्वान्निर्देशस्य लिंगव्यत्ययेन पुंस्त्वं॥

॥अच्चश्च॥ ॥इकोगुणवृद्धी इत्यनेन समानमिदं शमादिप्रभृतीनीति। प्रभृतिग्रहणेन ष्ठिवुक्लम्वादयो गृह्यंते॥ ॥श्रीः॥ रामजी॥ कृष्णजी॥ श्रीः

भा॰कै॰ भ्रियत इति। मकारादेर्यदङ्गं तस्य यो वयवो ऽच् तस्येवमत्र प्रसंगः। यदा त्वङ्गेन यकारादिना विशेष्यते तदा त्र व्यवधानान्नास्ति प्रसंगः एवमन्यत्रापि द्रष्टव्यं।
२१४ अस्तु तर्हि तदपवादः। अचश्चेन्नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घघनं तस्य प्रतिषेधः। अचश्चेन्नपुंस
कह्रस्वाकृत्सार्वधातुकनामिदीर्घघनं तस्य प्रतिषेधो वक्तव्यः। ह्रस्वो नपुंसके प्रातिपदिकस्य यथेह न भवति रै
अतिरि। नौ अतिनु। एवं सुवाग्ब्राह्मणकुलमित्यत्रापि प्राप्नोति। अकृत्सार्वधातुकयोर्दीर्घः यथेह न भवति
चीयते स्तूयते एवं छिद्यते भिद्यत इत्यत्रापि प्राप्नोति। नामि दीर्घः यथेह न भवति अग्नीनां वायूनामिति एवं पयसा
मित्यत्रापि प्राप्नोति। नैष दोषः। नोपधाया इत्येतन्नियमार्थं भविष्यति। प्रकृतस्यैष नियमः स्यात्। किं च प्रकृ
तं नामीति। तेन भवेदिह नियमान्न स्यात् पयसामिति। अन्यते तन्यते इत्यत्रापि प्राप्नोति। अथाप्येवं नियमः
स्यात् नोपधायाः नोपधायाः नाम्येवेति। एवमपि भवेदिह नियमान्न स्यात् अन्यते तन्यत इति। पयसामि
त्यत्र तु प्राप्नोति। अथाप्युभयतो ऽयं नियमः स्यात् नोपधाया एव नामि नाम्येव नोपधाया इति एवमपि भि
द्यते छिद्यते सुवाकुब्राह्मणकुलमित्यत्रापि प्राप्नोति। एवं तर्हि ह्रस्वो दीर्घः प्लुत इति यत्र ब्रूयात् अच इति तत्रोप
स्थितं द्रष्टव्यं। किं कृतं भवति। द्वितीया षष्ठी प्रादुर्भाव्यते तत्र कामचारः। गृह्यमाणेनाचं विशेषयितुमचा वा गृ
ह्यमाणं। यावता कामचारः इह तावद्द्यविप्रच्छिशमादिप्रभृतिहनिगमिदीर्घेषु गृह्यमाणेनाचं विशेषयिष्या ॥ शिवः
मः एतेषां दीर्घो भवत्यच इति। इहेदानीं नपुंसकह्रस्वाकृत्सार्वधातुकनामिदीर्घेष्वचा गृह्यमाणं विशेषयिष्या ॥
मः नपुंसकस्य ह्रस्वो भवत्यचः अजन्तस्येति। अकृत्सार्वधातुकयोर्दीर्घो भवत्यचः अजन्तस्येति। नामि दीर्घो भवत्यच अजन्त १३

अजिति वर्त्तत इति। ततश्च ह्रस्वादिशब्दाह्वानुवृत्तानाच्चमुपस्थापयंति। तस्य स्वयमुपस्थानादित्याश्रितस्वरूपव्यापाराश्रीयंत इत्यर्थः। तेन ह्र
स्व इत्येवं योर् सोचः स्थाने भवतीत्यर्थः संपद्यते। एवं दीर्घप्लुतयोरपि। अथेति। इहैव तदज्ग्रहणं क्रियतां पूर्वसूत्रे तु न वक्तव्यमिति प्रश्नः
प्रतक्ष्येति। यथा प्रत्याहारे अश्रुता आकारादयो दीर्घप्लुतसंज्ञे लभंते तथा संयोगोपि ह्रस्वसंज्ञः स्यादिति लुकप्रसंज्येम। तितउ छत्रमिति।
परत्वाद्दीर्घलक्षणो वालुकि सति सकृद्गतौ विप्रतिषेध इति न्यायाद्ध्रस्वलक्षणः पुनर्न प्रवर्त्तते। न चैवंविधे विषये पुनःप्रसंगविज्ञानमस्ति

ह्रूकस्मान्न भवति योः पंथाः सह क्रिश्संज्ञया विधानेनियमः। संज्ञयायो विधीयंते ले तु नियमः। किंव
क्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। अजिति हि वर्त्तते तत्रैव मनिसंबंधः करिष्यते। अन्चः। अज्
भवति। ह्रस्वो दीर्घः प्लुत इत्येवं भाव्यमान इति। अथ पूर्वस्मिन्योगेऽज्ग्रहणे सति किं प्रयोजनं। अज्ग्र
हणं संयोगाच्समुदायनिवृत्त्यर्थं। अज्ग्रहणं क्रियते संयोगनिवृत्त्यर्थं अच्समुदायनिवृत्त्यर्थं च।
संयोगनिवृत्त्यर्थं तावत्। प्रतक्ष्य प्ररक्ष्य ह्रस्वस्य पिति। कृति तुगिति तुङ्मा भूदिति। अच्समु
दायनिवृत्त्यर्थं। तितउछत्रं तितउच्छाया। दीर्घात्पदांताद्वेति तुङ्मा भूदिति॥

नित्यविकल्पयोर्विरोधात्पूर्वेणाबाधात्। यत्र हि पूर्वो विधिः परेण बाध्येत तत्र पुनःप्रसंगविज्ञानं कचिदाश्रीयते। समुदाये वा कार्यं प्रातिपा
श्रीयमाणो अवयवानां पारतंत्र्याद्व्यापारान्नैव ह्रस्वलक्षणलुकप्रसंगः। ननु क्रियमाणेप्यज्ग्रहणे वर्णग्रहणे जातिग्रहणाद्च्समुदाय
स्यापि दीर्घसंज्ञाप्रसंगः। नैष दोषः। ऊकाल इति विशेषणाद्व्यक्तिराश्रीयते। न हि जातेः परिमाणमस्ति। व्यक्तिद्वारकं वा जातेः परि
माणमाश्रीयते। एकैकव्यक्तिव्यंग्या हि जातिर्न समुदायव्यंग्या॥

भा॰कै॰ उच्चैरुदात्तः॥ ॥षष्ठीनिर्दिष्टमिति। उच्चैर्नीचैरित्येतेऽव्ययेऽधिकरणप्रधाने। तत्राच् इत्यनुवृत्तौ सत्यां अयमर्थो भवति। उच्चैः स्थाने उ
२१५ पलभ्यमान उदात्तसंज्ञः स्यादचः स्थाने इत्यर्थः। हल्स्वरप्राप्ताविति। सत्यामच् इत्यस्यानुवृत्तौ समासस्येत्यंतोदात्तत्वं राजपुरुष इत्यादावे
वस्यात्। न चरान्जन्वप इत्यादौ। असत्यां त्वनुवृत्तौ समासस्य योंतो दकारस्तस्य स्वरप्राप्ताववविद्यमानवत्त्वाद् अकारस्य स्वरः सिध्यति। एषा च
परिभाषा यतो नावद् इत्यत्रानाव इति प्रतिषेधेन ज्ञापिता। अन्यथा नाव्यमित्यत्र नकारस्यायोग्यत्वाद् अकारस्य चानादित्वाद् उदात्तत्वं न

उच्चैरुदात्तः॥ नीचैरनुदात्तः॥ ॥ किं षष्ठीनिर्दिष्टमज्ग्रहणमनुवर्त्तत उताहो न। किं चातः। यद्यनुवर्त्त
ते हल्स्वरप्राप्तौ व्यंजनमविद्यमानवदि[illegible]षा परिभाषा न प्रकल्पेत। कथं हलो नाम स्वरप्राप्तिः स्यात्
एवं तर्हि निवृत्तं। बहून्येतस्याः परिभाषायाः प्रयोजनानि। अथ प्रथमानिर्दिष्टमज्ग्रहणमनुवर्त्तत उ
ताहो न। किं वार्थो ऽनुवृत्त्या। बाढमर्थः। यद्येते व्यंजनस्यापि गुणा लक्ष्यंते। ननु च प्रत्यक्षमुपलभ्यंते इ
घोषो ऽर्द्धे वा। नैते व्यंजनस्य गुणाः किं तर्ह्यच एव। तत्सामीप्यात्तु व्यंजनमपि तद्गुणमुपलभ्यते। तद्यथा
द्वयो रक्तयोर्वस्त्रयोर्मध्ये शुक्लं वस्त्रं तद्गुणमुपलभ्यते एवं बदरपिटके रिक्तको लोहकंसस्तद्गुण
उपलभ्यते। कुतो नु खल्वेतद् अच एते गुणाः स्युः। तत्सामीप्यात्तु व्यंजनमपि तद्गुणमुपलभ्यते न पु
नर्व्यंजनस्यैते गुणास्तत्सामीप्याद्वा ऽपि तद्गुण उपलभ्यत इति।

भविष्यतीति किमनाव इति प्रतिषेधेन। अथ प्रथमानिर्दिष्टमिति।
ननु को विशेषः। यावता यत्र स्वरो विधीयते तत्र व्यंजनस्याविद्यमानत्वाद् अच एव भविष्यति। अनुदात्तादेरञित्याद्यवनुवादेऽपि न दोषः। स्व शिवः
त एव हलो ऽनुदात्तत्वं भवतु अनुदात्तात्परागवग्राह्य नदनुवादेन कार्यविधानेन कश्चिद्विशेषः। एवं तर्हि न्यायव्युत्पादनार्थ एवायं वि
चारः। ननु चेति। बाधकाभावाच्च व्याप्यव्यापकः सिद्धिः। नेत इति। अन्यथाप्युपपत्तिर्नोपपन्नेरिति भावः॥ ॥श्रीः॥ राम हलोऽजयतः॥ श्रीरस्तु १८

अंतरेणापिव्यंजनमिति। आप्यायत्वमितियथा। अत्रह्याकारउदात्तस्त्रिङंतस्यनिघातः। तत्रश्चान्वयव्यतिरेकाभ्यां अचएवैतेगुणाः। यदितुहला मध्येतेगुणाअभविष्यन्तदाहलामन्वांचामिन्नस्वरताप्युपालप्स्यत। यस्मात्त्वचामेवस्वरमनुविदधातिहलस्तस्मात्हलांस्वरोस्तीतिनिश्चयः। अन्वग्भवतीति। अनुगच्छतीत्यर्थः। शिष्टसमाचाराच्चेदंनिर्वचनमभिहितं। नत्वत्रवर्णसादृश्यं किंचिदस्ति। अथवागतिरपिव्यंजेरर्थः। वि

अंतरेणापिव्यंजनमचएवैतेगुणाउपलक्ष्यंते नपुनरंतरेणाचंव्यजनस्योच्चारणमपिभवति। अन्व र्थं खल्वपिनिर्वचनं स्वयंराजंतइतिस्वराः। अन्वग्भवतिव्यंजनं। उच्चनीचकस्याव्यवस्थितत्वात्संज्ञाऽ प्रसिद्धिः। इहमुच्चनीचमनवस्थितंकपदार्थकं। तदेवकंचित्प्रत्युच्चैर्भवतिकंचित्प्रतिनीचैः। एवंहिकश्चि त्कंचिदधीयानमाह किमुच्चैरोरूयसेशनैर्वर्त्ततामिति। तमेवमपराधीयाम[redacted]नमपरआह। किमंतर्दंतकेनाधीषेउच्चैर्वर्त्ततामिति। एवमुच्चनीचकस्यानवस्थितत्वात्संज्ञायाअप्रसिद्धिः। एवं तर्हिलक्षणंकरिष्यते। आयामोदारुण्यमणुतास्वस्येति उच्चैःकराणिशब्दस्य। आयामोगात्राणांनि ग्रहः। दारुण्यंस्वरस्यदारुणतारूक्षता। अणुतास्वस्यकंठस्यसंवृतता। उच्चैःकराणिशब्दस्य। अथ नीचैःकराणिशब्दस्य। अन्ववसर्गोमार्दवमुरुतास्वस्येतिनीचैःकराणिशब्दस्य। अन्ववसर्गोगात्रा णांशिथिलता। मार्दवंस्वरस्यमृदुतास्निग्धता। उरुतास्यस्वमहत्ताकंठस्येतिनीचैःकराणिशब्दस्य॥

विधंगच्छत्यजुपरागवशादितिव्यंजनमित्यस्यमर्थः पर्यायांतरेणभाष्यकारेणाभिहितः। उपरागश्चपूर्वपराच्चसन्निधानेपिपरेणाचा हलोभवतिनपूर्वेण। उच्चनीचकस्येति। श्रुतिप्रकर्षापकर्षमितलक्षणोच्चनीचत्वाश्रयःपर्यनुयोगः। नचानवस्थितत्वस्याश्रयेणासाधुत्वं

भा०कै० एतदपीति। ओमाहिवक्रगतानायामादी।धर्मान्कार्यादवस्पति।कार्यंच संकीर्णं। तथाहिमहाप्राणो नीचैरप्युच्चारयन्स्वरेण महांतं देशं व्याप्नो
ति। अल्पप्राणस्तूच्चैरपि वदन्नल्पं देशं व्याप्नोति। सिद्धं त्विति। प्रक्रम्यंते वर्णा यस्मिन्निति प्रक्रमः स्थानमुच्यते। तेनायमर्थः। एकस्मिंस्ताल्वा
२१८ दिके स्थाने ऊर्ध्वाधरभागयुक्ते ऊर्ध्वभागेनोच्चार्यमाण उदात्तः अधरभागे [redacted] निष्पन्नोनुदात्तः। एवं चोच्चैरित्यनेनोर्ध्वभागो गृह्यते नी
चैरित्यधरभागः। अभ्यास समधिगम्यश्चायं स्वरवि[redacted]शेषः षड्जादिवदिति ज्ञेयः॥ ॥समाहा॥ ॥कस्येति। समाहरणं समाहारः इति भावे सा
द्धि

एतदप्यनेकांतिकं। यद्यल्पप्राणस्य सर्वोच्चैस्त्वं महाप्राणस्य सर्वनीचैः। सिद्धं तु समानप्रक्रमे वचना
त्। सिद्धमेतत्। कथं। समानप्रक्रम इति वक्तव्यं। कः पुनः प्रक्रमः। उरः कंठः शिर इति॥ ॥समाहारः स्वरितः॥
15 समाहारः स्वरित इत्युच्यते कस्य पुनः समाहारः स्वरितसंज्ञो भवति। अचोरित्याह। समाहारो वाऽचो
र्नाभावात्। समाहार अचोश्चेत्तन्न। किं कारणं। अभावात्। न ह्यचोः समाहारोस्ति। ननु चायमस्ति
गांगेन्द्र इति। नैषोचोः समाहारः। अन्योयमुदात्तानुदात्तयोः स्थाने एकआदिश्यते। एवं तर्हि गुणयोः॥

धनंमत्वाकस्येति प्रश्नः। अचोरिति। तयोश्च समाहार उपश्लेषरूपः। अन्यत्र तोत्तराधर्यरूपोपि संभवति। गांगेन्द्र इति। स्था
निनोरकाराकारयो[redacted]रुदात्तानुदात्तयोः समाहारात्स्थानिधर्मेणादेशस्यापि तथा व्यपदेशः। समाहारो वाऽचोरिति। कार्यं। क्व कन्याद शिवः
सादौ स्थानिद्वारकोपि समाहारव्यवहारव्यवहारो नास्ति। यत्राप्यस्ति गांगेन्द्र इति तत्राप्यसौ गौणः। तत्र गंगाशब्दोंत्यं तत्वादंतोदात्तः।
सप्तम्येकवचनेन सह एकादेश उदात्तः। अन्द्र इत्यन्नोरप्रधानकनीयसीत्यंतोदात्तत्वादनुदात्तादिस्तत एकादे १५
शः स्वरितो वानुदात्ते पदादाविति स्वरितः। एवं[redacted]ति। गुणयोर्नैरंतर्येणोपलंभादस्ति समाहारः॥

अच्प्रकरणादिति। प्रकरणं प्रस्तावः। ननु स्वरितत्वादनुवृत्तिः। तस्याः पूर्वं प्रत्याख्यानात्। तदयमर्थः। पूर्वसूत्रयोः सामर्थ्यात्क्षिप्तोऽजेवसं
ही उदात्तानुदात्ताविति ताविहानुवर्तौ वचं प्रत्याययतः। ननु गुणां सिद्धमिति। गुणगुणिनोरन्योः समाहारासंभवात्सामर्थ्याद्गुणयोः स
माहारस्याश्रयणमित्यर्थः। कथं पुनरिति। स्वरित इत्यनया संज्ञयायोग्यत्वादच् संज्ञित्वेनाक्षिप्तः। न चाच्समाहारो भवति। मत्वर्थलोपइ

गुणयोश्चेत्वात्प्रकरणात्। गुणयोश्चैव समाहार इति चेत्तन्न। किं कारणं। अच्प्रकरणात्। आजिति व
र्तते। सिद्धं त्वच्समुदायस्याभावाद्गुणे संप्रत्ययः। सिद्धमेतत्। कथं। अच्समुदायो नास्तीति कृत्वा गु
णस्याचः समाहारगुणस्य संप्रत्ययो भविष्यति। कथं पुनः समाहार इत्यनेनाच्छब्दः प्रतिनिर्दिष्टः। मत्व
र्थलोपोऽत्र द्रष्टव्यः। तद्यथा। पुष्पकाण्येषां ते पुष्पकाः कालकाण्येषां ते कालकाः इति। एवं समाहारवान् समा
हारः। अथवा अकारो मत्वर्थीय इति। यथा। तुंदो घाट इति। यद्येवं त्रैस्वर्यं न प्रकल्पते। तत्र को दोष
ः। त्रैस्वर्येणाधीमह इत्येतन्नोपपद्यते। नैतद्गुणापेक्षं। किं तर्ह्यज्पेक्षमेतत्। त्रैस्वर्येणाधीमह इति। त्रि
प्रकारैरज्भिरधीमहे। केश्चिदुदात्तगुणैः केश्चिदनुदात्तगुणैः केश्चिदुभयगुणैः। तद्यथा। शुक्लगु
णः शुक्लः कृष्णगुणः कृष्णः य इदानीमुभयगुणः स तृतीयामाख्यां लभते। कल्माष इति वा सारंग इति
वा। एवमिहापि उदात्त उदात्तगुणः अनुदात्त अनुदात्तगुणः य इदानीमुभयगुणः स तृती

ति। गुणगुणिनोरभेदोपचाराद्गम्यमानार्थस्य मत्वर्थलोपोऽप्रयोग इत्यर्थः। अकार इति। अर्शआदेराकृतिगणत्वात्। त्रैस्वर्यमिति। उदात्तानुदात्तगुणव्यति
रेकेण स्वरितत्वाभावात्त्रैस्वर्यव्यवहारेण स्यात्। अस्ति चायं व्यवहारः। अज्पेक्षमिति। स्वरशब्देनाच उच्यन्ते। त्रय एव स्वरास्त्रैस्वर्यमिति स्वार्थे ष्यञ्॥

तस्यादितः॥ ॥अक्षरपरिमाणं ह्रस्वसंज्ञाकृतानाव्यपदेशस्येति न्यायाद्दीर्घप्लुतावयवयोर्ह्रस्वत्वं ज्ञानेन गृह्यते इत्यालोच्याह अर्द्धह्रस्वमिति। कन्ये
ति। कन्या राजमनुष्याणामिति स्वरितः। शक्तिके ३ शक्तिके इति। स्वरितमाम्रेडिते समूयेति स्वरितः प्लुतः। मात्रा च इति। अर्द्धह्रस्वशब्दः प्रमा
२१७ णवाची रूढिशब्दः। व्युत्पत्त्यर्थं तु ह्रस्वस्योपादानं। अर्द्धमात्रात्वेनाभिधीयते। ततः प्रमेयमात्राचं विधाय तस्य प्रमाणे लइति लोपः क्षिपतीत

तस्यादितउदात्तमर्द्धह्रस्वं॥ ॥अर्द्धह्रस्वमित्युच्यते तत्र दीर्घप्लुतयोर्न प्राप्नोति। कन्या। शक्तिके ३ शक्ति
के। नैष दोषः। मात्रा चातो लोपोऽत्र द्रष्टव्यः। अर्द्धह्रस्वमात्रमर्द्धह्रस्वमिति। किमर्थं पुनरिदमुच्यते। आमि
श्रीभूतमिवेदं भवति। तद्यथा। क्षीरोदके संपृक्ते आमिश्रीभूतत्वान्न ज्ञायते कियत् क्षीरं कियदु
दकं कस्मिन्नवकाशे क्षीरं कस्मिन्वोदकमिति। एवमिहाप्यामिश्रीभूतत्वान्न ज्ञायते कियदु
दात्तं कियदनुदात्तं। कस्मिन्नवकाशउदात्तं कस्मिन्ननुदात्तमिति। तदाचार्यः सुहृद्भूत्वान्वाचष्टे इ
यदुदात्तमियदनुदात्तं अस्मिन्नवकाशउदात्तमस्मिन्नवकाशेऽनुदात्तमिति। यद्येवमेव सुहृत्
किमन्यान्यप्येवंजातीयकानि नोपदिशति। कानि पुनस्तानि। स्थानकरणानुप्रदानानि। व्याकर
णं नामेयमुत्तरा विद्या सोसौ छंदःशास्त्रेष्वभिविनीतउपलब्ध्या गंतुमुत्सहते। यद्येवं नार्थोनेन। शिवः

त्रयपा ह्रस्वे बुध्यार्द्धमात्रा विभज्यते एवं दीर्घप्लुतयोरपीति। किमर्थमिति। नैवंभूतमिदान्वाख्यानं दृश्यते संध्यक्षरादिविषयस्याभिविभागस्या
न्वाख्यानप्रसंगादिति प्रश्नः। आमिश्रीभूतमिवेति। तत्वतोर्द्धमात्रास्त्येव विभाग इतीवशब्दउपात्तः। क्षीरोदके इति। नियतव्यक्तिविवक्षायां
जातिपरत्वाभावादेकवद्भावो न कृतः। उत्तरा विद्येति। पुराकल्पे पूर्वाभ्यस्तत्वेनोत्तरेति पस्पशायामाख्यातं॥ ॥श्रीः॥ रामकृष्णो विजयतस्तरां। १९

संज्ञाकरणमिति। प्रदेशेषु चैकदेशप्रसायनात्समुदाय आक्षेपसते। उभयमिति। सत्यप्यक्षरगौरवे महतोर्थस्यव्याप्तिर्भवति सुखेन विभागस्य परिज्ञाना
दित्य। उदात्तादेरिति। उदात्तादेः प्रतिपादकं यच्छास्त्रं आद्युदात्तश्चेति तत्स्वरितादेरपि प्राप्नोति। ततश्च प्रत्ययः कदाचित्स्वरितादिरपि स्यादित्य
र्थः। अन्वाख्यानमेवेति। न केवलमिदं सूत्रं यावदुच्चैरुदात्त इत्यादि संज्ञाकरणमपि मंदबुद्धिप्रतिपादनार्थं। सिद्धो हि वेदाध्यायिनां शिक्षायामे

संज्ञाकरणं लर्हीदं। तस्य स्वरितस्यादितोऽर्द्धह्रस्वमुदात्तसंज्ञं भवतीति। किं कृतं भवति। त्रिरुदात्तप्रदे
शेषु स्वरितग्रहणं न कर्त्तव्यं भवति। उदात्तस्वरितपरस्य सन्नतरः। उदात्तस्वरितयोर्यणः स्वरितो
नुदात्तस्य। नोदात्तस्वरितोदयमगार्ग्यकाश्यपगालवानामिति। एतदपि नास्ति प्रयोजनं। संज्ञाकरणं
नाम यतो न लघीयः। कुत एतत्। लघ्वर्थं हि संज्ञाकरणं। लघीयश्च त्रिरुदात्तप्रदेशेषु स्वरितग्रहणं न पुनः
संज्ञाकरणं। त्रिरुदात्तस्य प्रदेशेषु नवाक्षराणि। संज्ञाकरणे पुनरेकादश। एवं तर्ह्युभयमनेन क्रियते। अ
न्वाख्यानं संज्ञा च। कथं पुनरेकेन यत्नेनोभयं लभ्यं। लभ्यमित्याह। कथं। अन्वर्थग्रहणात्। अन्वर्थग्रहणं वि
ज्ञास्यते। तस्य स्वरितस्य आदितोऽर्द्धह्रस्वमुदात्तसंज्ञं पुनर्भवति। ऊर्ध्वमात्तमिति चात उदात्तं। यदि तर्हि संज्ञा
करणं उदात्तादेर्यदुच्यते तत्स्वरितादेरपि प्राप्नोति अन्वाख्यानमेव तर्हीदं मंदबुद्धेः। स्वरितस्यार्द्धह्रस्वोदात्तत्वेदो
दात्तस्वरितपरस्य सन्नतर इत्येतस्मात्सूत्राद्धि [illegible] कांऽत्र ऊर्ध्वमुदात्तादनुदात्तस्य स्वरित इत्यतः कर्त्तव्यं

वोदात्तादिव्यवहारः। स्वरितस्येति। आ अर्द्धह्रस्वोदात्तादित्याकारप्रश्लेषः। इयं न वक्तव्यमुदात्तादनुदात्तस्य स्वरित इत्येतस्मात्पराकर्त्तव्या तेन हि
स्वरितात्संहितायामनुदात्तानामिति येकश्रुतो विधीयमानायां उदात्तादित्वि स्वरितस्य सिद्धं भवति। तेन मे शक्तापरेषां गंगे प्रभृतीनामामंत्रित

भा॰ कै॰

क्व तर्हीति। आश्रयात्सिद्धत्वं स्वरितस्य भविष्यतीत्यभिप्रायः। कार्यमिति। अत्र नित्स्वरितमिति स्वरितत्वं। तच्च सिद्धं नित्यत्रैव स्यात्। स्वरितोदात्ता
र्थमिति। स्वरितस्य यउदात्तो विधीयते स आष्टमिकस्यासिद्धत्वान्न प्राप्नोति। सुब्रह्मण्यामिति। सुब्रह्मण्यासाधुरिति यत्प्रत्यये स्तित्स्वात्स्वरितः। तत्र ष
२१८ बेकादेशः स्वरितानुदात्तयोरांतरतम्यात्स्वरितः। तत्र ओमाङोश्चेत्युदात्तस्वरितयोरेकादेशः स्वरित एव तस्यासिद्धत्वादुदात्तत्वं सुब्रह्मण्याया

किंप्रयोजनं। स्वरितादिति सिध्यर्थं। स्वरितादिति सिद्धिर्यथा स्यात्। स्वरितात्संहितायामनुदात्तानामिति। इ
मं मे गंगे यमुने सरस्वति शुतुद्रि। क्व तर्हि स्यात्। यः सिद्धः स्वरितः। कार्यं देवदत्त यज्ञदत्त। स्वरितोदात्तार्थं चास्व
रितोदात्तार्थं च तत्रैव कर्त्तव्यं। न सुब्रह्मण्यायां स्वरितस्य तूदात्तः। इंद्र आगच्छ। क्व तर्हि स्यात्। यः सिद्धः स्वरितः।
सुब्रह्मण्यायामिंद्र आगच्छ। स्वरितोदात्ताच्चास्वरितार्थं। स्वरितोदात्ताच्चास्वरितार्थं तत्रैव कर्त्तव्यं। इंद्र आगच्छ ह
रिव आगच्छ। स्वरितपरसन्नतरार्थं च। स्वरितपरसन्नतरार्थं च तत्रैव कर्त्तव्यं। उदात्तस्वरितपरस्य सन्न
तरः। माणवक जटिलकाध्यापक। न्यङ्। क्व तर्हि स्यात्। यः सिद्धः स्वरितः। माणवक जटिलकाभिरूपक। क्वं
तर्हि वक्तव्यं। न कर्त्तव्यं। देवब्रह्मणोरनुदात्तवचनं ज्ञापकं सिद्धः स्वरित इति। यद्येतज्ज्ञाप्यते। स्वरितोदात्ता
परस्यानुदात्तस्वरितत्वं प्राप्नोति। न क्रमो देवब्रह्मणोरनुदात्तवचनं ज्ञापकं सिद्धः स्वरित इति किं तर्हि प

मिति च स्वरूपमेव गृह्यते तेन तु निगदोलस्यते। स्वरितोदात्ताच्चेति। आगच्छ स आगश्छाकारस्य स्वरितस्योदात्तत्वे कृते उदात्तादनुदात्तस्य स्वरित शिवः
इति छ्गश्छाकारस्य स्वरितत्वं प्राप्नोति। न्यङ्किति। न्यधी चेति पूर्वपदप्रकृतिस्व स्तात उदात्तस्वरितयोर्यण इत्यकारस्वरितस्यासिद्धत्वात्सर्वस्स
न्नतरो न स्यात्। देवब्रह्मणोरिति। लिंगात्पाठक्रमबाधेन क्रमांतरमाश्रीयते अन्यथा स्वरितस्यासिद्धत्वादनुदात्तस्यानुदात्तविधानमनर्थकं स्यात्। २१
यद्येतदिति। स्वरितस्यैवासिद्धत्वमनेन लिंगेन ज्ञाप्यत इत्यर्थः। न क्रम इति। सन्निवेशांतरज्ञापनार्थं लिंगं व्याख्यायत इत्यर्थः॥

एकश्रुति॥ ॥किमिदमिति। कृत्रिमाकृत्रिमयोः कृत्रिमे संप्रत्यय उभयगतिरिह शास्त्रे संभवतीति चेन्न्यायद्वयसंभवात्प्रश्नः। यथा न दोष इति। न हि दूरादिति विशेषणमेकवचनस्योपपद्यते। संबोधनस्य तु क्रियारूपत्वादपादानत्वाद्दूरादिति विशेषणसंभवः। व्याप्तिश्चान्वर्थग्रहणे भवति। किं पुनरिति। उदात्तानुदात्तरागवशात्प्रश्नः। यावदुच्चैरिति। यदि चोदात्तश्रुतिरभविष्यत्तदा यज्ञकर्मणीत्येकश्रुतेः सिद्धत्वादुच्चैस्तरां वा वषट्कार इति सूत्रं नाकरिष्य

एकश्रुति दूरात्संबुद्धौ॥ ॥किमिदं पारिभाषिकाः संबुद्धेर्ग्रहणं देवाब्रा ललणा अत्र न प्राप्नोति। अथान्वर्थग्रहणं न दोषो भवति। यथा न दोषस्तथास्तु। किं पुनरियमेकश्रुतिरुदात्ता आहोस्विदनुदात्ता। नोदात्ता। कथं ज्ञायते। यदयमुच्चैस्तरां वा वषट्कार इत्याह। कथं कृत्वा ज्ञापकं। अतंत्रं तरनिर्देशः यावदुच्चैस्तावदुच्चैस्तरां। यदि तर्हि नोदात्ता। अनुदात्ता। अनुदात्ता च न। कथं ज्ञायते। यदयमनुदात्तस्वरितपरस्य सन्नतर इत्याह। कथं कृत्वा ज्ञापकं। अतंत्रं तरनिर्देशः यावत्सन्नस्तावत्सन्नतरः सेयं ज्ञापकाभ्यामुदात्तानुदात्तयोर्मध्यमेकश्रुतिरंतरालं [redacted] क्रियते। अपर आह। किमियमेकश्रुतिरुदात्ता आहोस्विदनुदात्ता। उदात्ता। कथं ज्ञायते। यदयमुच्चैस्तरां वा वषट्कार इत्याह। कथं कृत्वा ज्ञापकं। तंत्रं तरनिर्देशः उच्चैरुच्चैरुच्चैस्तरां उच्चैस्तरामित्येतद्भवति। यदि तर्ह्युदात्ता। नानुदात्ता॥ ॥

त्तेत्यर्थः। यावत्सन्न इति। तत्रैकश्रुत्यनुवृत्त्यैव सिद्धत्वात्सन्नतरविधानमनर्थकं स्यात्। अंतरालं क्रियत इति। इह तेहि कर्मकत्वात्प्रधानकर्मणि लकारः। क्षीरोदकवदुदात्तानुदात्तयोर्भेदतिरोधानमेकश्रुतिरित्यर्थः। स्वरिते तु विभागेन तयोरुपलब्धिः। उच्चैरुच्चैरिति। सामस्याग्ने आ याहि वीतये इत्यत्र मंत्रे यज्ञकर्मणीत्यनेनैकश्रुतिर्विहिता तदपेक्षया वौषट्शब्दस्योदात्ततरत्वं विधीयते। सति चैकश्रुतेरुदात्तानुरागे तदपेक्षः प्रकर्षो युज्यते। यथा मलिने वस्त्रे शौक्ल्यानुबोधसद्भावात्तदपेक्षो वस्त्रांतरे शुक्लतरेषु शुक्लतरव्यपदे[illegible]त्यर्थः॥

भा॰के॰ सन्नं दृष्ट्वेति। एकश्रुतिगतमित्यर्थः। सोन्येनेति। अनुदात्तेनोपरक्तः। यथा स्फटिकः पटो वर्णांतरद्रव्येणेत्यर्थः। कस्यचित्तु स्वरितस्योदात्तभागोनानु
दात्तेनानुरज्यत इति पृथक् स्वरितो निर्दिष्टः। स्वरितस्य ज्ञाप्य भेदादुन्नाल्य स्वरादयो ष्टौ। ते भाष्यकारेण प्रकृतत्वादिह नोक्ताः। इयं चैकश्रुतिरा
२१९ प्लुतात्संबोधनवाक्यस्य भवति। प्लुतस्तूदात्त एवं विधानसामर्थ्यात्॥ ॥नसुब्रह्म॥ ओकार इति। नेदमपूर्वविधानं अपितु सूत्रव्यापार
एवेति प्रदर्श्यते। यथाचोदात्त ओकारस्तथा स्यादित इत्यत्रोक्तं। ओमभ्यादान इति तु प्लुतोदात्तत्वं न भवति। तस्यापि ह्नकर्मविषयत्वादु
दात्तो भवति। सुब्रह्मण्यायां आकार आख्याते। परादिश्चेति

अनुदात्ताच। कथं ज्ञायते। यद्दयमुदात्तस्वरितपरस्य सन्नतर इत्याह। कथं कृत्वा ज्ञापकं। तंत्रांतरनिर्दिष्टाः सन्नं दृष्ट्वा सन्नतर इत्येतद्भवति। त एते तंत्रेतरानिर्देशे सप्त स्वरा भवंति। उदात्तः। उदात्ततरः। अनुदात्तः। अनुदात्ततरः। स्वरितः। स्वरिते य उदात्तः सोन्येन विशिष्टः। एकश्रुतिः सप्तमः॥ ॥नसुब्रह्मण्यायां स्वरितस्य तूदात्तः॥ ॥सुब्रह्मण्यायामोकार उदात्तः। सुब्रह्मण्यायामोकार उदात्तो भवति। इंद्र आगच्छ हरिव आगच्छ। वाक्यादेश्च द्वे उदात्ते भवतः। इंद्र आगच्छ। हरिव आगच्छ। मघवन्वर्ज्जं। आगच्छ मघवन्। सुत्यापराणामंतः। सुत्यापराणामंत उदात्तो भवति। द्व्यहे सुत्यां त्र्यहे सुत्यां। असावित्यंतः। असावित्यंत उदात्तो भवति। गार्ग्यो यजते वात्स्यो यजते।

18

दियाकुः॥ इंद्र आगच्छेति। इंद्रशब्द आमंत्रितत्वादाद्युदात्तः तस्य द्वितीयो वर्णो वर्ज्यमानस्वरेणानु
दात्तः। स उदात्तानुदात्तस्य स्वरित इति स्वरितः तस्मात्तेनोदात्तत्वं। आकार आख्यात इति। तिङंते गच्छशब्दे परत आकार उपसर्गत्वादुदात्तः। परादि शिवः
श्चेति। आकारात्परस्य गच्छत्यस्यादिरुदात्तः। तिङ् तिङ इति निघाते पूर्ववत्स्वरिते च कृते तेनोदात्तविधानात्। वाक्यादेश्चेति। अनंतरोक्तप्रक्रिययेति
भावः। मघवन्वर्ज्जमिति। मघवन्निस्य स्यामंत्रितस्येति निघातविधानात्। सुत्यापराणामिति। सुत्याशब्दः परो येभ्यस्तेषामित्यर्थः। द्व्यह इति। एजंतत्वादं १८
तोदात्तत्वं। असावित्यंत इति। इदं वाचनिकं। असावितिप्रथमांतोपल

अमुष्येति। षष्ठ्यंतोपलक्षणमेतत्। दाक्षेरिति। पूर्ववदाद्युदात्तत्वं॥ ॥देवब्र॥ ॥अनुदात्तत्वमेकइति। ये देवाब्रह्माणइति पदयोर्वैयधिकरण्यमाकुः। तदाहि पूर्वस्यामंत्रितस्याविद्यमानत्वाद्द्वयोरपि पदयोरामंत्रितायुदात्तत्वे शेषनिघाते च कृते ऽनेनानुदात्तः क्रियते। यदा तु ये देवाब्रह्माणइति नयोः सामानाधिकरण्यं तदापि नाधिष्ठितं विशेषवचने बहुवचनमिति पक्षे ऽविद्यमानत्वादामंत्रितस्येति निघातस्यासिद्धत्वान्नानेनार्थइत्यन्ये प्रांस तमितिमतत्वेदप्रदर्शनार्थमेकेइत्युक्तं॥ ॥स्वरितात्॥ ॥घ्येकयोरिति। पक्षनायज्ञेतेति यत्संख्यायाः विवक्षितत्वात्। आग्निवेश्यइति। यत्रतथा

अमुष्येत्यंतः॥ अमुष्येत्यंतउदात्तो भवति। दाक्षेः पितायजते। स्यांतस्योपोत्तमं च। स्यांतस्योपोत्तममनुदात्तं भवति। अंत्यश्च। गार्ग्यस्य पितायजते। वात्स्यस्य पितायजते। वानामधेयस्योपोत्तमं भवति। देवदत्तस्य पितायजते। देवदत्तस्य पितायजते॥ ॥देवब्रह्मणोरनुदात्तः॥ ॥देवब्रह्मणोरनुदात्तत्वमेके। देवब्रह्मणोरनुदात्तत्वमेकइच्छंति। देवाब्रह्माणः। देवाब्रह्माणः॥ ॥स्वरितात्संहितायामनुदात्तानां॥ स्वरितात्संहितायामनुदात्तानामिति घ्येकयोरेकश्रुत्यवचनं। स्वरितात्संहितायामनुदात्तानामिति च घ्येकयोरेकश्रुत्यं वक्तव्यं। आग्निवेश्यः पचतीति। किं पुनः कारणं न सिध्यति। बहुवचनेन निर्देशः क्रियते। तेन बहूनामेव कश्रुत्यं स्यात् घ्येकयोर्न स्यात्। नैष दोषः। नात्र निर्देशस्तंत्रं। कथं पुनस्तेन वचनाम निर्देशः क्रियते तत्रा

इदिरुदात्तः शेषनिघातः ततः द्वितीयो वर्णउदात्तादिति स्वरितः। तस्मात्परौ द्वावनुदात्तौ। पचतीति। धातुरुदात्तः। शप्तिपावनुदात्तौ। ततः शब्कारः स्वरितः। ततः परएकोनुदात्तः। घ्येकयोरित्यत्र द्विशब्देन द्वित्वमुच्यते एकशब्देन चैकत्वं। ते न द्वित्वे एकत्वे सती सर्प्यः। नात्रेति। तंत्रशब्दोत्र प्रधानवाची। यथाग्रहं संमार्ष्टीति संख्यात विवक्ष्यते तत्र ग्रहणीयत्वः। तत्कारीति। असत्यां बहुत्वसंख्यायां बहुवचनमेव न स्यादिति तद्विवक्षणीयं नात्र निर्देशस्तंत्रमिति वचनात्तदेवाविवक्षितमिति विशेषदर्भः॥

मा॰के॰ नांतरीयकत्वादिति। शब्दसंस्कारार्थमेवात्र बहुवचनं विवक्ष्यते न कार्यार्थमित्यर्थः। तुषपलालानीति। तुषसहितानि पलालानीत्यर्थः। तिलतुषः। द्वंद्वे तु जातिवाचित्वादेकवद्भावप्रसंग[redacted]ः। एवं शकलकंटकानीति। व्यवहितानामिति। स्वरितादिति पंचमीनिर्द्देशादनंतरस्यैव
२२० कार्येण भाव्यमिति तेनं मे गंगे इत्यत्र मे शब्दात्स्वरितात्परस्यैकस्यैवानंतरस्य स्यात् द्वितीयादीनां व्यवधानादित्यर्थः। एकशेषनिर्द्देशोपि

नांतरीयकत्वादत्र बहुवचनेन निर्द्देशः क्रियते। अवश्यं कयाचिद्विभक्त्या केनचिद्वचनेन निर्द्देशः कर्त्तव्यः
इति। तद्यथा कश्चिदन्नार्थी शालिकलापं सपलालं सतुषमाहरति। नांतरीयकत्वात्स यावदादेयं ताव
दादाय तुषपलालान्युत्सृजति। तथा। कश्चिन्मांसार्थी मत्स्यान्सकंटकान्सशकलानाहरति नांत
रीयकत्वात्स यावदादेयं तावदादाय शकलकंटकानुत्सृजति। एवमिहापि नांतरीयकत्वाद्बहु
वचनेन निर्द्देशः क्रियते। अविशेषेणैकश्रुत्यं अविशेषेणैकश्रुत्यमिति चेद्व्यवहितानां न प्राप्नोति।
इमं मे गंगे यमुने सरस्वति शुतुद्रि× अविशेषेणैकश्रुत्यमिति चेद्व्यवहितानामप्रसिद्धिः। ×अने
कमपीति तु वचनात्सिद्धं। अनेकमप्येकमपि संहितात्परं संहितात्परमेकश्रुतिर्भवतीति वक्तव्यं सू
त्रं तर्हि भिद्यते। यथान्यासमेवास्तु। ननु चोक्तं स्वरितात्संहितानामनुदात्तानामिति चेदेकयोरेकश्रुत्यवचनमिति

योगारंभपक्षे वर्गत्रयोपादानेनैकशेषः क्रियते। अनुदात्तयोश्चानु विशेषेणाव्यवहितानामप्रसिद्धिरिति। नैष दोषः। कथं। एकशेषः
दात्तानामिति च कृते पुनरेकशेषपुनरेकशेषः कर्त्तव्यः। आकृतिपक्षाश्रयेणालुप्रत्याख्यातेस्मिन्सूत्रे जात्याख्यायामिति बहुवचनं कृतं। तत एव कद्विबहुषु
स्वरितात्परस्याः जातेरानंतर्येणोपलंभात्सर्वेषामेकश्रुत्यसिद्धत्वाद्दोषाभावः। १९

एवमपीति। सहविवक्षायामेकशेषविधानात्समुदितानां कार्यप्रसंगः। प्रभृतिग्रहणेन चैकशेषवाक्येनुवृत्तानित्यन्येनैव चलुरादयोप्यनुवृत्त
द्योतागम्यंते इति दर्शयति। प्रत्येकमिति। निर्देशः एव सहविवक्षा। कार्यप्रसक्तिस्तु प्रत्येकं। यथा देवदत्त यज्ञदत्त विष्णुमित्रा भोज्यतामित्युक्ते देव

एवमपि षट्प्रभृतीनामेव प्राप्नोति। षट्प्रभृतिषु ह्येकशेषः परिसमाप्यते। प्रत्येकं वाक्यपरिसमाप्तिर्द
ष्टेति। एकयोरपि भविष्यति॥ ॥अपृक्तएकाल्प्रत्ययः॥ ॥अपृक्तसंज्ञायां हल्ग्रहणं स्वादिलोपे हलो
ग्रहणार्थं। अपृक्तसंज्ञायां हल्ग्रहणं [redacted] कर्त्तव्यं।
एकहल्प्रत्ययोपृक्तसंज्ञो भवतीति वक्तव्यं। किं प्रयोजनं। स्वादिलोपे हलः ग्रहणार्थं। एवं
हि स्वादिलोपे हलो ग्रहणं न कर्त्तव्यं भवति। हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हलिति। अपृक्त
स्येत्येव सिद्धं। अणिञोर्लुगर्थं च अल्ग्रहणं। अणिञोर्लुगर्थं च अल्ग्रहणं कर्त्तव्यं। किं प्रयोज
नं। अणिञोर्लुकि ग्रहणं न कर्त्तव्यं भवति। एवं ह्यत्रियार्षञितो यूनि लुगणिञोरिति। अ
पृक्तस्येत्येव सिद्धं। अणिञोर्लुगर्थं च ग्रहणमिति चेदतिप्रसंगः। अणिञोर्लुगर्थमिति
चेदतिप्रसंगो भवति। इहापि प्राप्नोति फांटाहृतेरपत्यं माणवकः फांटाहृत इति। एवं वचनसाम

र्थ्यादयः पृथगेव भुंजते॥ ॥अपृक्तएकाल्प्रत्ययः॥ ॥स्वादिलोपइति। विभेदेति एलोपृक्तस्यैवग्रहणेनैव निवृत्तिः सिद्ध
मीत्यर्थः। अणिञोरिति पदद्वयोच्चारणमेव गौरवमिति भावः। एवं वचनेति। लुगपवादो णो विज्ञास्यते। अन्यथाणएव लुकि सिद्धे णविधान
मनर्थकं स्यादित्यर्थः॥

भा॰कै॰ फक्किः इत्यर्थमिति। यञिञोश्चेति प्राप्तस्य फको बाधनार्थमेव वचनं स्यात् तस्य च लुक् स्यादेवेत्यर्थः। कस्मान्न भवतीति। प्रत्ययस्य विशेषण
२२१ मल्ग्रहणमिति तदन्तविधिसद्भावबुद्धिमत्वा प्रश्नः। इदं तु नाश्रितमनुनासिकपरत्वादिति। अल्ग्रहणसामर्थ्यादिति। यद्येवं तस्य स्यात्के
वलस्य चाधं तत्वज्ञावात्तदा ऽल्ग्रहणेन न किंचिद्व्यावर्त्तितं स्यात्। दर्विः इति तु न हलन्तत्वादत्र प्राप्तिरेव नास्ति। नैष दोषः। अपृक्तसं

वचनप्रामाण्यादिति चेत् फक्किः इत्यर्थं वचनं। वचनप्रामाण्यादिति चेत् फक्किः इत्यर्थमेतत्स्यात् फगतो मा
भूदिति पेलादिषु च वचनात् सिद्धं। प्रयत्नवत् प्रयोजनं स्यात् पेलादिष्वेवास्य पाठं कुर्वीत। तत्र पाठादन्येषा
मपि फको निवृत्तिर्भवति। एवं तर्हि सिद्धे यदयं णिशास्ति तज्ज्ञापयत्याचार्यो नास्य लुग्भवतीति।
20 तान्येतानि त्रीणि ग्रहणानि भवन्ति। अपृक्तसंज्ञायां हल्ग्रहणं कर्त्तव्यं। स्वादिलोपे हल्ग्रहणं न क
र्त्तव्यं। अणिञोर्लुकि ग्रहणं कर्त्तव्यं। अल्ग्रहणेऽपि वै क्रियमाणे तान्येव त्रीणि ग्रहणानि भवन्ति। अ
पृक्तसंज्ञायामल्ग्रहणं कर्त्तव्यं। स्वादिलोपे हल्लोपे हल्ग्रहणं कर्त्तव्यं। अणिञोर्लुकि ग्रहणं न कर्त्त
व्यं भवति। तत्र नास्ति लाघवकृतो विशेषः। अयमस्ति विशेषः। अल्ग्रहणे क्रियमाणे एकग्रहणं न करि
ष्यते। कस्मान्न भवति दर्विः जागृविरिति। अल्तेयं यः प्रत्ययः। किं वक्तव्यमेतत्। नहि कथमनुच्यमानं गं
प्रतिको विशेषः इति। क्विबादिषु अन्तलपूर्वं स्यते। अल्ग्रहणसामर्थ्यात्। यदि च यो ल्यवान्यश्च सः स्यादल्ग्रहणमनर्थकं स्यात्। हल् शिवः
गतिर्न लभ्यते। तत्राप्यपृक्तसंज्ञायां हल्ग्रहणेन हल्त्वान्नग्रहेतयथा गुरोश्च हल इत्यत्र गुरुमान् हलेवेति। हलः प्राधान्यात्प्रत्ययस्य विशेष
णत्वादित्यर्थः। क्विबादिषु अन्तपूर्वंगत्याप्रत्ययणञोणीचेत्कल्पना अत्र हल् एकेन तद्वतो ग्रहणे किं न गोली॥ २०

हल्ग्रहणसामर्थ्यादिति। क्विबादयोपि हल्त्वं तोदर्विरित्यादौ विप्रस्य योनापीति किमनेन व्यवच्छिन्नं स्यात् हल्पर्यः। हल्नंतस्यपथास्या
दिति। तस्यासत्येकग्रहणेहन्यादित्यादौ तिलोपः स्यादिति कर्तव्यं हल्ग्रहणे क्रियमाणेएकग्रहणं। अल्ग्रहणेलुक्रियमाणेनक
र्तव्यं कृतं तु ज्ञापनार्थं तद्दर्शितं भाष्ये। यद्यप्ययमर्थो निपातएकाजनाङितिसूत्रे कग्रहणेन ज्ञापितस्तथापि तं दृढं कुर्वन्नाम नुग्रहणं

किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते हल्ग्रहणसामर्थ्यात्। यदि चयोहल्त्वान्य स्यतत्रस्या
त् हल्ग्रहणमनर्थकं स्यात्। अस्त्यन्यद्धल्ग्रहणस्य प्रयोजनं। किं हल्नंतस्य पथास्यादजंतस्य मा भू
दिति। एवं तर्हि सिद्धे यद्धल्ग्रहणे क्रियमाणे एकग्रहणं करोति तज्ज्ञापयत्याचार्यो न्यत्र वर्णग्र
हणे जातिग्रहणं भवतीति। किमेतस्य ज्ञापने प्रयोजनं दंभेर्हल्ग्रहणस्य जातिवाचकत्वात्सिद्ध
मित्युक्तं तदुपपन्नं भवति॥ ॥तत्पुरुषः समानाधिकरणः कर्मधारयः॥ ॥तत्पुरुषः समाना
धिकरणः कर्मधारय इति चेत्समासैकार्थत्वादप्रसिद्धिः। तत्पुरुषः समानाधिकरणः कर्मधारय इ
ति चेत्समासैकार्थत्वात्संज्ञाया अप्रसिद्धिः। एकोयमर्थस्तत्पुरुषो नाम। अनेकार्थाश्रयं च सामानाधिक
रण्यं। सिद्धं तु पदसामानाधिकरण्यात्। सिद्धमेतत्। कथं [redacted]करण्यादकर्म

पुनरिह ज्ञापितः। अपत्यक्षरार्थं चलुक्
ल्ग्रहणेनैव सिद्धे विज्ञाविधानं विस्पष्टार्थं नहि रोहेति सत्रास्य परिभावासंव्यवस्थापितमिहकथं संज्ञात्वेन व्यवहारः। पारार्थ्यसामा
न्यात्परिभाषासंज्ञात्वेन व्यवह्रियते इत्यदोषः॥ ॥तत्पुरुषः॥ ॥समासैकार्थत्वादिति। भिन्नप्रवृत्तिनिमित्तप्रयुक्तस्यानेकस्यार्थस्यैकस्मिन्न
र्थेवृत्तिः सामानाधिकरण्यमुच्यते। नीलोत्पलादिष्वतत्पुरुष एकएवेति सामानाधिकरण्यमनुपपन्नं। तर्हि पदानां तु सामानाधिकरण्यमनुप

कर्मधारयसंज्ञा विधीयते ...

एकपदमिति पदशब्देनार्थ उच्यते। ऐकार्थ्यमित्यर्थः। अथवा समासादिर्न तत्पुरुषो सत्यामेकपद्यमुच्यते। एकविभक्तित्वमि ति। एककारकत्वमित्यर्थः। तदाह इति। ननु मुख्यस्य तत्पुरुषस्य पदान्तरेणार्थैकत्वात् सामानाधिकरण्यं समवस्येव राजपुरुषः शो भन इत्यादौ तत्कथं गौणस्य ग्रहणं। नैष दोषः। तत्पुरुषस्य पदान्तरेण सामानाधिकरण्यं बहिरङ्गं। अन्तरङ्गं स्वं तु वर्णि पद नामिति तदेवाश्रीयते। तत्र स्वसामर्थ्यात् तत्पुरुषशब्दो गौणार्थवृत्तिः परिगृह्यते। तेन समासावयवानामेव पदानां कर्मधा

अयं तत्पुरुषोऽस्त्येव प्राप्यम कल्पिको यस्मिन्नेकपद्यमेकस्वर्यमेकविभक्तित्वं च। अस्ति तादर्थ्याच्चाच्छब्द्यं। तत्पुरुषार्थानि पदानि तत्पुरुष इति। तथा स्तादर्थ्याच्छाब्द्यं तस्येदं ग्रहणं।

॥ प्रथमानिर्दिष्टं समास उपसर्ज्जनं ॥ ॥ प्रथमानिर्दिष्टं समास उपसर्ज्जनमिति चेदन्तेनिर्देशात् प्रथमायाः समासे संज्ञाप्रसिद्धिः। प्रथमानिर्दिष्टं समास उपसर्ज्जनमिति चेदनिर्देशात् प्रथमायाः समास उपसर्ज्जनसंज्ञाप्रसिद्धिः। नहि कष्टादीनां समासे प्रथमान्तापश्यामः। सिद्धं तु समासविधाने वचनात्। सिद्धमेतत् कथं। समासविधाने प्रथमानिर्दिष्टमुपसर्ज्जनसंज्ञं भ

र्यस्येकैव कर्मधारयसंज्ञा न तत्प्रत्येकं। तत्पुरुषसंज्ञाप्रकरणे इयं संज्ञा न कृता एकसंज्ञाधिकारात् तत्पुरुषसंज्ञाया बाधा माभूदिति॥ शिवः
॥ प्रथमानिर्दिष्टं ॥ ॥ अनिर्देशात् प्रथमाया इति। समासे किं प्रथमानिर्दिष्टं न विलुमर्हतीति यस्मात् समासे प्रथमा विधीयते। न च तथा भूतस्य संभवः समासे हि कृते तत्र एव प्रथमानाम यथा तेन तु तदवयवात्। अन्तर्वर्तिन्याश्च विभक्त्या प्रथमानिर्दिष्टत्वे आश्रीयमाणे कष्टश्रित इत्यत्र श्रि तशब्दस्यैवोपसर्ज्जनसंज्ञा स्यान्न कष्टश्रितशब्दस्य। निर्दिष्टग्रहणं चानर्थकं स्यात्। समासे प्रथमान्तमुपसर्जनमिति वक्तव्यं स्यात्॥ २१

नचेति। गुरुत्वाद्यासंनवाङ्गोणार्थेग्रहणेइत्यर्थः। यस्यविधावितिनिर्देशोपेक्षयासमासस्याधारत्वात्प्रथमानिर्दिष्टस्यसर्वत्रोपस
र्ज्जनसंज्ञाप्रसंज्ञाप्राप्नोतीतिभावः। राजकुमारीति। सस्युपसर्ज्जनैवेकृत्वःस्यात्पूर्वनिपातान्यवस्थाच। सिद्धंत्विति। यस्याश्रितादेः
समासविधौतंश्रितादिकंप्रतीत्यर्थः। महतीसंज्ञेति। लोकेप्रधानमुपसर्ज्जनमुच्यतेइत्याधितत्वेवाश्रीयतइत्यर्थः। यद्येवंपू

तत्तर्हिवक्तव्यं। नवातादर्थ्यात्ताच्छब्द्यं। नवावक्तव्यं। किंकारणं। तादर्थ्यात्ताच्छब्द्यंभविष्यति। समासार्थंशास्त्रं
समासइति। यस्यविधौप्रथमानिर्दिष्टस्ततोऽन्यत्रोपसर्ज्जनसंज्ञाप्रसंगः। यस्यविधौप्रथमानिर्दिष्टः
क्रियतेततोऽन्यत्रोपसर्ज्जनसंज्ञाप्राप्नोति। राज्ञःकुमारीराजकुमारी। श्रितः। श्रितादिसमासेद्वितीयां
तंप्रथमानिर्दिष्टंतस्यषष्ठीसमासेप्युपसर्ज्जनसंज्ञाप्राप्नोति। सिद्धंतुयस्यविधौतंप्रतीतिवचनात्
सिद्धमेतत्। कथं। यस्यविधौयत्प्रथमानिर्दिष्टंतत्प्रतितदुपसर्ज्जनंभवतीतिवक्तव्यं। तत्तर्हिवक्त
व्यं। नवावक्तव्यं। उपसर्ज्जनमितिमहतीसंज्ञाक्रियते। संज्ञाचनामयतोनलघीयः। कुतएतत्। ल
घ्वर्थंहिसंज्ञाकरणं। तत्रमहत्याःसंज्ञायाःकरणएतत्प्रयोजनं। अन्वर्थसंज्ञायथाविज्ञायेत। अप्रधान
मुपसर्ज्जनमिति। प्रधानमनुपसर्ज्जनमितिचसंबंधिशब्दावेतौ। तत्रसंबंधादेतद्गंतव्यंयंप्रति
यदप्रधानंतंप्रतितदुपसर्ज्जनसंज्ञंभवतीति। अथयत्रद्वैषं

र्वकायोऽर्द्धपिप्पलीपुरुषव्याघ्रइत्यादिषूपसर्ज्जनसंज्ञाप्रधानस्यन।
प्राप्नोति। नैषदोषः। अन्वर्थसंज्ञाहियत्रसोऽर्थःसंभवतितत्रप्रवृत्तिनिमित्तापेक्षाप्रवर्त्तते। अन्यत्रतुविधानसामर्थ्यान्निरपेक्षा। यथाकर्मप्रव
चनीयसंज्ञास्वत्यादीनामितिप्रथमानिर्दिष्टशासामर्थ्यादर्थादीनांसंज्ञाप्रवर्त्तते। अथयत्रेति। परिहारांतरसज्ञाभावेनतदुच्यते। अन्वर्थाश्रयणे
नैषतदपिसिध्यति॥ ॥

भा॰ के॰

२२३ षष्ठ्यंतयोश्चेति। पूर्वनिपातप्रकरण इदमुक्तं। तत्र हि पूर्वनिपातः प्रसारव्यायतेन वा अनिष्टादर्शनादिति। अपाप्यात्रस्य
नेतत्पापि राजशब्दस्यैव पूर्वनिपातः न पुरुषशब्दस्य। एवं हि वाक्यापेक्षया समासस्यैकार्थो भवति। अन्यथा वाक्यसमासयो
भिन्नार्थता स्यादित्यर्थः। तथा हि पुरुषो राजापेक्षया प्रधानमेवात्रेति नासौ भिद्यते राजापेक्षया न व्यतिरिच्यते। अ
तोऽप्रधानस्यैव राज्ञः पूर्वनिपातः। शब्दशब्दार्थाविति। नन्वेतत्तत्र प्रसारव्यातं परमयुक्तमिति रित्यादेर्द्वौ तिशब्दौ स्या

षष्ठ्यंतयोश्चोपसर्ज्जनत्वमुक्तं। किमुक्तं। षष्ठ्यंतयोः समासेऽर्थाभेदादप्रधानस्यापूर्वनिपात इति।
एवं न चेदमकृतं भवति उपसर्ज्जनं पूर्वमिति। अर्थश्चाभिन्न इति कृत्वाप्रधानस्य पूर्वं निपातो न भ
विष्यति यद्यपि तावदेतदुपसर्ज्जनकार्यं परिहृतमेवमपीदमपरं प्राप्नोति। राज्ञः कुमार्या राजकुमा
र्याः। गोस्त्रियोरुपसर्ज्जनस्येति ह्रस्वत्वं प्राप्नोति। उक्तं वा। किमुक्तं। परवल्लिंगमिति शब्दशब्दार्थाविति।
१२ तत्रोपदेशिकस्य ह्रस्वत्वमातिदेशिकस्याग्रहणं भविष्यति॥ ॥एकविभक्ति चापूर्वनिपाते॥ ॥द्विती
यादीनामप्येतेनोपसर्ज्जनसंज्ञा प्राप्नोति। तत्र को दोषः। तत्रापूर्वनिपात इति प्रतिषेधः प्रसज्येत॥ शिवः

तामिति। एवं तर्ह्यन्वर्थाश्रयणेनास्य परिहारस्योक्तत्वाद्वचसक्षेपो लिकान कृता॥ ॥एकविभक्तिच॥ ॥समास इति वर्त्तते। मुख्यसमास एवेष्टः
सतोऽसमासे विधानव्यपदेशो विभक्तौ नीति। समार्थं वा वाक्यं समासो गृह्यते। सर्वस्य चशब्दस्यैकविभक्तित्वमिति विशेषेणोपादानसामर्थ्याद्यस्य प २२
र्यायेणापि न सर्वविभक्तित्वं तदुपसर्ज्जनसंज्ञां यथा निष्कौशाम्बिरित्यत्र कौशाम्बीशब्दोऽनिष्क्रमणक्रियापेक्षयापादानशक्तिसंबंधात्संचमांत एव
न सस्यैक्रियांतरापक्षः शक्त्यंतराविर्भावः। द्वितीयादीनामिति। कष्टश्रितादिषु कष्टादयः श्रितादिविशेषणत्वादेकविभक्तिकाः तुल्यनेनोपसर्ज्जने

ननु चैवमिति। प्रतिषेधयुक्तत्वायुक्तत्वेन विरोधात्परत्वादिति भावः। नो त्सहत इति। अपवादविषयं प्रकल्प्योत्सर्गस्य प्रव
र्त्तनात्। पंचगुरिति। द्विगुप्राप्तापन्नालंपूर्वं॰ गतिसमासेषु प्रतिषेधो वक्तव्य इति वचनात्परवल्लिंगं न भवति। अलंकु

नाप्रतिषेधात्। नायं प्रसज्यप्रतिषेधः पूर्वनिपातेनेति। किं तर्हि। पर्युदासोयं। यदन्यत्पूर्वनिपाता
दिति। पूर्वनिपातेऽव्यापारः। यदि केन चित्प्राप्नोति तेन भविष्यति। पूर्वेण च प्राप्नोति। तेन भविष्यति
। अप्राप्तेर्वा। अथवा अनंतरस्य या प्राप्तिः सा प्रतिषिध्यते। कुत एतत्। अनंतरस्य विधिर्वा भवति प्रतिषे
धो वेति। पूर्वा प्राप्तिरप्रतिषिद्धा तया भविष्यति। ननु चेयं प्राप्तिः पूर्वां प्राप्तिं बाधते। नोत्सहते प्रति
षिद्धा सती। बाधितुं। एकविभक्तावषष्ठ्यंतवचनं। एकविभक्तावषष्ठ्यंतानामिति वक्तव्यं। इह मा
भूत्। अर्द्धं पिप्पल्याः। अर्द्धपिप्पलीति। उक्तं वा। किमुक्तं। परवल्लिंगमिति शब्दशब्दार्थाविति यत्रोपदे
93 शिकं ह्रस्वत्वमातिदेशिकस्य श्रवणं भविष्यति। कानि पुनरस्य योगस्य प्रयोजनानि। द्विगुप्राप्ता
पन्नालंपूर्वोपसर्गाः कार्यं। द्विगुः पंचगुः। दशगुः। प्राप्तो जीविकां प्राप्तजीविकः। आपन्नो जीविकामा
पन्नजीविकः। अलंपूर्वं। अलं कुमार्यै अलंकुमारिः। उपसर्गाः कार्यं निष्कौशांबिः। निर्वाराणसिः॥ ॥

मारिरिति। पर्यादयो ग्लानाद्यर्थे चतुर्थ्यैतिस (इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमस्या

मासः॥ ॥ इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्यायस्य द्वितीये पादे प्रथममाह्निकं॥ ॥ रामजीश्रीः॥

पत्रा सि ८०३

श्लोकसंख्या ११०००



८३

मा॰कै॰

२२५ श्रीगणेशाय नमः॥ ॥अर्थवदधातुः॥ अभिधेयवचनोऽर्थशब्द आश्रीयते। तत्राधातुरप्रत्यय इति पर्युदासाश्रयणादर्थवत एव संज्ञा भ-
विष्यति नार्थवद्ग्रहणेनेत्याशंक्याह। अर्थवदिति। व्यपदेशायेति। संज्ञिन इति वाक्यशेषः। पर्युदासाश्रये केन धर्मेण सादृश्यमाश्री-
यत इत्यप्रतिपत्तिः स्यादिति भावः। वर्णानां मा भूदिति। विशिष्टसंज्ञिव्यपदेशफलं दर्शयति। क्वचिद्वर्णानां चेति पाठः। तत्र च शब्देन
पदसमुदायोऽनर्थको दशदाडिमानीत्यादिः समुच्चीयते। किं च स्यादिति। संख्याकर्मादिषु स्वादीनां विधानादनर्थकेभ्यः स्वाद्यु-
त्पत्तिर्न भविष्यतीति प्रश्नः। वनमिति। नन्वधातुरिति नान्तस्य प्रतिषेधो भविष्यति। नैतदस्ति। प्रतिवर्णमत्रापि तत्त्वसत्तिप्रसं-
गः। न च प्रतिवर्णं धातुसंज्ञासमावेशः। अयं भावः। अविशेषेण स्वाद्युत्पद्यते तैस्त्यन्नेष्वर्थनियमः। प्रकृतार्थापेक्षया वा प्रत्य-

श्रीः॥ अर्थवदधातुरप्रत्ययः प्रातिपदिकं॥ ॥अर्थवदिति व्यपदेशाय। वर्णानां च मा भूदिति। किं
च स्यात्। धनं वनमिति नलोपः प्रातिपदिकान्तस्येति लोपः प्रसज्येत। अधातुरिति किं। अहन्वृत्रम्॥

यनियम इति स्यादेव स्वाद्युत्पत्तिः अव्ययादिवत्। यत्तु क्तेसंघातस्यैकार्थ्यात्तद्वभावो वर्णादिति तद्वर्णानामर्थवत्त्वापक्षे। तत्रापि तं-
त्रेणैकैकवद्विभक्तिः समुदायावयवगतमेकत्वं प्रत्याययिष्यति। एकमेव हि तदेकत्वं। तच्चैकेनैव द्विरूपा प्रत्यायितमिति प्रत्य-
वयवेभ्यो विभक्तिर्न स्यात्। अनर्थकस्य तु प्रातिपदिकसंज्ञायां प्रकाशयितव्यार्थस्याभावात् समुदायादिव प्रतिवर्णं विभक्त्युत्प-
त्तिप्रसंगः। नलोप इति। विभक्तेः स्वप्रत्ययेन न भवति। समुदायस्यापि च प्रातिपदिकसंज्ञायां तदन्तभावात् लुको भावात् न लोपस्याप्र- शिवः
लक्षणार्थत्वात् कुशलादीनामपि प्रसंगः। अहन्निति। विशेषविहितत्वाल्लङन्त्युत्पत्तौ सत्यामडागमस्य धातुभक्तत्वात्प्रातिपदिकसं-
ज्ञायां सत्यां नलोपप्रसंगः। न चाप्रत्यय इति प्रत्ययलक्षणेन प्रतिषेधः। नङिसंबुद्ध्योरिति ज्ञापनान्नलोपे विधीयमाने प्रत्ययलक्षणेना १

धातुग्रहणं करोतीति। पुनीयतीत्यादेः प्रातिपदिकत्वादेव लुकृसिद्ध इति। मा कः। श्येनायत इति। अत्राप्रत्यय इति निषेधा [redacted] प्रातिपदिकसं
ज्ञा। कृत्तद्धितग्रहणं किमिति। तद्धितग्रहणमत्र नियमार्थं। कृद्ग्रहणं तु प्रति [redacted] षेधार्थं। जिहृष्विड् इत्यत्र अधातुरिति प्रतिषेधप्रसंगः। अनेकप
दप्रसंग इति। अनेकं पदमस्मिन्निति अनेकपदः समुदायस्तस्य संज्ञाप्रसंगः। अनेकस्यापि पदस्येति। समुदितस्येति बोद्धव्यं। प्रातिपदं

अधातुरिति शक्यमवक्तुं। कस्मान्न भवति अहन्नत्रमिति। आचार्यप्रवृत्तिर्ज्ञापयति न धातोः प्राति
पदिकसंज्ञा भवतीति यदयं धातुप्रातिपदिकयोरिति धातुग्रहणं करोति। नैतदस्ति ज्ञापकं प्रतिषेधार्थ
मेतत्स्यात्। अपि काकः श्येनायत इति। अप्रत्यय इति किं। कांडे कुड्ये। अप्रत्यय इति शक्यमवक्तुं। कस्मा
न्न भवति कांडे कुड्ये इति। कृत्तद्धितग्रहणं नियमार्थं भविष्यति। कृत्तद्धितांतस्यैव प्रत्ययांतस्य प्रातिप
दिकसंज्ञा भवति नान्यस्येति। अर्थवत्यनेकपदप्रसंगः। अर्थवदिति प्रातिपदिकसंज्ञायां अनेकस्या
पि पदस्य धातुसंज्ञा प्राप्नोति। दशदाडिमानि षड् पूपाः कुंडमजाजिनं पललपिंड अधरोरुकमे
तत्कुमार्याः स्फैयकृतस्य पिता प्रतिशीन इति। समुदायो[यौ]ऽत्रानर्थकः। समुदायोनर्थक इति चेदवयवार्थ
वत्त्वात्समुदायार्थवत्त्वं यथा लोके। समुदायोनर्थक इति चेदवयवार्थवत्त्वात्समुदायार्थवत्त्वं अवयवै

नैव तु संज्ञा प्राप्नोत्यप्रत्यय इति निषेधात्। समुदायस्य तु निषेधो न प्रवर्त्तते प्रत्ययग्रहणे यस्मात्स विहित इति वचनात्समुदायाच्च प्रत्ययस्या
विधानात् प्रत्ययांतत्वाभावात्तेन विद्यते प्रत्ययो यस्मिन्सोयमप्रत्यय इत्याश्रयितुं न युज्यते। बहुपटव इत्यस्यापि समुदायस्य निषेध
प्रसंगात्परे दोषप्रसंगात्। समुदायोऽत्रानर्थक इति पदार्थानां समन्वयाभावात्। अनवयवार्थत्वादिति। अवयवधर्माणां च समुदाये व्यपदेशात्सति च प्राति
पदिकत्वे सुब्लुक्प्रसंगः॥

भा०कै० एषैषेति। एषा या वाचोयुक्तिः स एषा एतत्प्रमाणेत्यर्थः। अकारो मत्वर्थीय इति। न तस्यावयवधर्मेण समुदाये व्यपदेशः किं तर्हि दंड्यादिवद्यौ
गिक इत्यर्थः। मत्वंतान्नेति। मत्वंतान्मतुप्न भवति। सरूपप्रत्ययो नेष्य इति वचनात्। तस्मादेकगोपूर्वाट्ठञ् नित्यमिति ठञो भाष्यकारवचनप्रामाण्याल्लो
२२६ पः। मत इति च तत्र निवृत्तं गोत्रिकादिसिध्यर्थं। गवां समूहो गोत्रा सास्मिन्नस्तीति गोत्रिकं। अथवा मत्वंतान्मत्वर्थीयो लुप्यत इत्यनेनावय

तद्यथा लोके आढ्यमिदं नगरं गोमदिदं नगरमित्युच्यते। न च सर्वे तत्र आढ्या भवंति सर्वे वा गोमंतः। य
था लोक इत्युच्यते लोके चावयवा अर्थवंतो न समुदायाः। अतश्चावयवा अर्थवंतो न समुदायाः। यस्य
हि यद्द्रव्यं भवति स तेन कार्यं करोति। यस्य च या गावो भवंति स ताभ्यः क्षीरं घृतं चोपभुंक्ते अन्ये तैरे
द्रष्टुमशक्यं। का तर्हीयं वाचोयुक्तिः आढ्यमिदं नगरं गोमदिदं नगरमिति। एषैषा वाचोयुक्तिः। इह ताव
दाढ्यमित्यकारो मत्वर्थीयः। आढ्याः अस्मिन्संति तदिदमाढ्यमिति। गोमदिदं नगरमिति मत्वंतान्म
त्वर्थीयो लुप्यते। एवमपि वाक्यप्रतिषेधोऽर्थवत्त्वात्। वाक्यस्य प्रातिपदिकसंज्ञायाः प्रतिषेधो वक्त
व्यः। देवदत्त गामभ्याज शुक्लां देवदत्त गामभ्याज कृष्णामिति। किं कारणं। अर्थवत्त्वात्। अर्थवद्ध्येतद्वाक्यं

वधर्मस्य समुदाये उपचारः स्यात्। इह तु मुख्येऽर्थवत्त्वे संभवत्युपचरितस्याश्रयो न वै पदार्थादन्यस्योपलब्धिर्भवति वाक्ये॥ शिवः
न युक्तः। अर्थवद्वाक्यमिदानीं दर्शयति। एवमपीति। अर्थवद्धीति। पदार्थानां समन्वयावगमात्। न वै पदार्थादिति। पदानि स्वं स्वमर्थं प्रति
पादयंति वाक्ये पदार्था एव साकांक्षायोग्यतासन्निधिवशात्परस्परसंसृष्टा वाक्यार्थ इत्यर्थः। न तु वाक्यं वाक्यार्थो वा पृथगस्ति॥ ॥ २

पदार्थाभिसंबंधस्येति। व्यतिरेकं नित्यं वा वाक्यं विशिष्टार्थस्य पदार्थसंसर्गरूपस्य वाचकं। अन्यथा ह्य शाब्दो वाक्यार्थः स्यात्। कर्त्ता निर्दिष्ट इति। सं
बोधनविषयमनियतक्रियं कर्तृमात्रमित्यर्थः। यद्विशेषेवस्थानमिति। पदार्थसंसर्गरूपे वाक्यार्थ इत्यर्थः। अत एव वाक्यमेव मुख्यः शब्दो वाक्या
र्थ एव मुख्यः शब्दार्थः। सादृश्यात् अन्वयव्यतिरेकौ कल्पितौ लाघवार्थमाश्रित्य पदपदार्थव्यवस्थापनं क्रियते। प्रतिवाक्यं लक्षणस्यासंभवाच्च

पदार्थादन्यस्यानुपलब्धिरिति चेत् पदार्थाभिसंबंधस्योपलब्धिः। पदार्थादन्यस्यानुपलब्धिरिति चे
त्पदार्थात्तदुदनुच्यते। पदार्थाभिसंबंधस्योपलब्धिर्भवति वाक्ये। इह देवदत्त इत्युक्ते कर्त्ता निर्दिष्टः
कर्म क्रिया गुणो वानिर्दिष्टो। गामित्युक्ते कर्म निर्दिष्टं कर्त्ता क्रिया गुणो चानिर्दिष्टौ। अभ्याजेत्युक्ते क्रिया
निर्दिष्टा कर्तृकर्मणी गुणश्चानिर्दिष्टः। शुक्लामित्युक्ते गुणो निर्दिष्टः कर्तृकर्मणी क्रिया चानिर्दिष्टा। इ
ह दानीं देवदत्त गामभ्याज शुक्लामित्युक्ते सर्वं निर्दिष्टं। देवदत्त एव कर्त्ता नान्यः। गामेव कर्म नान्य
त्। अभ्याजेव क्रिया नान्या। शुक्लामेव न कृष्णामिति। एषां पदार्थानां सामान्ये वर्त्तमानानां यद्विशेषे
वस्थानं स वाक्यार्थः। तस्मात्प्रतिषेधः। तस्मात्प्रतिषेधो वक्तव्यः। न वक्तव्यः। अर्थवत्समुदायानां स
मासग्रहणं नियमार्थं। अर्थवत्सग्रहणं नियमार्थं भविष्यति। समास एवार्थवतां समुदायानां प्रा
तिपदिकसंज्ञो भवति नान्य इति। यदि नियमः क्रियते प्रकृतिप्रत्ययस

इत्यवहाराभावप्रसंगात्। बहुपटव इति। घोसेना
र्थेनार्थवान्प्रत्ययः प्रकृतिस्तु वाच्येने सर्थवत्समुदायो यं भवति। उच्चैकैरिति। तन्मध्यपतितस्तद्ग्रहणेन गृह्यत इति पदानाश्रीयते नाप्यक
कच्छन्नच्यत इति तदायं दोषः। न ह्यर्द्धिस्तु वंनस्याकचि कृते। स्यादिति स्वलुगभावात् लुपोत्पत्तौ प्रातिपदिकयोरिति लुग्गिष्यते स च न प्राप्नोति।

भा॰के॰

किंपुनरत्रेति। उच्चकैरित्याद्यन्यथापि सिध्यतीति प्रश्नः। इतरो बहुपटव इति न सिध्यतीति मन्यमान आह। प्रातिपदिकादिति। स्वर इ
२२१ ति। बहुपटव इति वकारस्योदात्तत्वं प्राप्नोति। टकारस्य चेष्यते। प्रकृत्येकदेशत्वादिति। न ह्यसौ प्रकृतेरेकदेश इत्यर्थः। अप्रत्य
य इति प्रतिषेधं शास्तीत्युक्ते कश्चिद्भूयाद्बहुपटव इत्यत्राप्यप्रत्यय इति प्रतिषेधः प्राप्नोतीत्यत आह। सचैतदंतविधिप्रति

किंपुनरत्र प्रातिपदिकसंज्ञया प्रार्थ्यते। प्रातिपदिकादिति स्वाद्युत्पत्तिर्यथा स्यात्। नैष दोषः। यद्येवात्र प्रातिपदिकत्वात्स्वाद्युत्पत्तिर्न भवति एवं लुगपि न भविष्यति। तत्रैवासावंतर्वर्तिनी विभक्तिस्तस्याः श्रवणं भविष्यति। नैवं शक्यं। स्वरे हि दोषः स्यात्। बहुपटव इत्येवं स्वरः स्यात्। बहुपटव इति चेष्यते। पठिष्यति ह्याचार्यः चित्तः सप्रकृतेर्बह्वकजर्थमिति। तस्यां तु भाष्यायां प्रकृत्येकदेशत्वादंतोदात्तत्वं न भविष्यति। एवं तर्ह्याचार्यप्रवृत्तिर्ज्ञापयति भवति प्रकृतिप्रत्ययसमुदायस्य प्रातिपदिकसंज्ञेति। यदयमप्रत्यय इति प्रतिषेधं शास्ति। सचैतदंतप्रतिप्रतिषेधः। स तर्हि ज्ञापकार्थः प्रत्ययप्रतिषेधो वक्तव्यः। ननु चायं प्राप्त्यर्थोऽपि वक्तव्यः। नार्थः प्राप्त्यर्थेन। कृत्तद्धित ग्रहणं नियमार्थं भविष्यति। कृत्तद्धितांतस्यैव प्रत्ययां शिवः

ध इति। प्रत्ययग्रहणे यस्मात्स विहितस्तदादेस्तदंतस्य इति तदंतविधिः संज्ञाविधौ च प्रत्यय ग्रहणे तदंतविधिर्निवारितः। अप्रत्यय इत्ययं तु प्रतिषेधविधिः। पटुशब्दश्चात्र जसुत्पन्नो न बहुपटुशब्दादिति बहुपटव इत्येतदप्रत्ययांतमेव।
अथवा अप्रत्यय इति बहुच्प्रत्ययाश्रयणात्प्रत्ययादेरपि बहुपटव इत्यस्य निषेधः प्राप्नोतीत्याशंक्य चेति। अप्रत्यय इति तत्पुरुषमाश्रीयते। तस्य स्वप ३
दार्थत्वेनांतरंगत्वादिति भावः। प्राप्त्यर्थ इति। प्रतिषेधार्थ इत्यर्थः॥ ॥श्रीः॥

सएषोनन्यार्थइतिज्ञापकार्थएवेत्यर्थः। सुबंतानामिति। एतच्चोपलक्षणं। भेदसंसर्गद्वारकार्थवत्वयुक्तानांयस्मात्सुबंतात्सुबंतानांमपिसमासो
दृश्यते। प्रश्वक्रीतीत्यादौगतिकारकोपपदानांकृद्भिःसहसमासोदृश्यते। अश्वक्रीतीत्यादौगतिकारकोपपदानांकृद्भिःसहसमासवचनंप्राक्सुबुत्प
त्तेरितिवचनात्। देवदत्तोग्रामंगतइत्यादेःसुबंतसमुदायस्यैववाक्यस्यनियमेननिवृत्तिःस्यादित्यभिप्रायेणाह। सुप्तिङ्समुदायस्येति। ज्ञहिकर्मणे

सएषोनन्यार्थःप्रत्ययप्रतिषेधोवक्तव्यःप्रकृतिप्रत्ययसमुदायस्यवाप्रातिपदिकसंज्ञावक्तव्या। उभयं
नवक्तव्यं। तुल्यजातीयस्यनियमः। कश्चतुल्यजातीयः। यथाजातीयकानांसमासः। कथंजातीयकानांस
मासः। सुबंतानां। सुप्तिङ्समुदायस्यतर्हिप्रातिपदिकसंज्ञाप्राप्नोति। सुप्तिङ्समुदायस्यापिप्रातिप
दिकसंज्ञाआरभ्यते। ज्ञहिकर्मणावहुलमाभीक्ष्ण्येकर्तारंचाभिदधातीति। तन्नियमार्थंभविष्यति। ए
तस्यैवसुप्तिङ्समुदायस्यप्रातिपदिकसंज्ञाभवतिनान्यस्येति। तिङ्समुदायस्यतर्हिप्रातिप
दिकसंज्ञाप्राप्नोति। तिङ्समुदायस्यापिप्रातिपदिकसंज्ञाआरभ्यते। आख्यातमाख्यातेनक्रियासा
तत्यइति। तन्नियमार्थंभविष्यति। एतस्यैवतिङ्समुदायस्यप्रातिपदिकसंज्ञाभवतिनान्यस्येति। अ
र्थवत्तानोपपद्यतेकेवलेनावचनात्। अर्थवत्तानोपपद्यतेवृक्षशब्दस्य। किंकारणं। केवलेनावचना
त्। नहिकेवलेनवृक्षशब्देनार्थोगम्य
तेननुसमाससंज्ञेयंसमासांतोदात्तार्था। नेप्रदोषः। समासत्वादेवप्रातिपदिकत्वमितितत्तुल्यजातीयाः
तामप्रातिपादनार्थमेतदुपन्यस्तमिति। तिङ्समुदायस्येति। पचतिभवतीत्यादेः। ततश्चप्रातिपदिकांतोदात्तत्वप्रसंगः। आख्यातमितितिततश्चसमासे
नतुल्यजातीयानांसर्वेषांवाक्यानांनियमान्निवृत्तिःसिद्धेत्यर्थः। अर्थवत्तेति। अर्थवत्तासंज्ञानिमित्तत्वेनेहोपात्तासाचवाक्यस्यैववापदस्यकेवलस्यलो
केप्रयुज्यमानस्योपपद्यतेनतुप्रकृतिभागस्यकेव

मा. के.

२२८ नवेति। अन्यथासिद्धः केवलस्याप्रयोगः। न केवला प्रकृतिः प्रयोक्तव्या न च केवलः प्रत्यय इति नियमात्। अर्थवत्तात्वन्वयव्यतिरेकाभ्यामस्त्येवेति
भावः। अन्वयव्यतिरेकाभ्यामिति। अन्वयो गमः सति शब्दे ऽर्थावगमः। व्यतिरेकः शब्दाभावे तदर्थानवगमः। विषम इति। यद्येकः शब्द एकस्मिन्नर्थे नियय

नवा प्रत्ययेन नित्यसंबंधात्केवलस्याप्रयोगः। नवा एष दोषः। किंकारणं। प्रत्ययेन नित्यसंबंधात्। नित्यसंबद्धौ
वेतावर्थौ प्रकृतिः प्रत्यय इति। प्रत्ययेन नित्यसंबंधात्केवलस्य प्रयोगो न भविष्यति। अन्यद्वाप्यष्टोऽप्यदाचष्टे
आम्नायश्च कोविदारानाचष्टे। अर्थवत्ता नोपपद्यते केवलेनावचनादिति न वा न स्यात्रिष्वोदितः केवल
स्याप्रयोगे हेतुमाह। एवंच किल नामकृता चोद्यते समुदायस्यार्थे प्रयोगादवयवानामप्रसिद्धिरिति। सिद्धं
त्वन्वयव्यतिरेकाभ्यां। सिद्धमेतत्। कथं। अन्वयाद्व्यतिरेकाच्च। कोसावन्वयो व्यतिरेको वा। इह वृक्ष इत्युक्ते क
श्चिच्छब्दः श्रूयते वृक्षशब्दो अकारांतः सकारश्च प्रत्ययः। अर्थोपि कश्चिद्गम्यते मूलस्कंधफलपलाशवानेकत्वं च। वृ
क्षावित्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते कश्चिदन्वयी। सकारो हीयते औकार उपजायते वृक्षशब्दः
अकारांतोन्वयी। अर्थोपि कश्चिद्धीयते कश्चिदुपजायते कश्चिदन्वयी। एकत्वं हीयते द्वित्वमुपजायते मूलस्कं
धफलपलाशवानन्वयी। ते मन्यामहे यः शब्दो हीयते तस्यासावर्थो हीयते यः शब्द उपजायते तस्यासावर्थो योर्थो
उपजायते यः शब्दोन्वयी तस्यासावर्थः योर्थोन्वयी। विषम उपन्यासः। बहवो हि शब्दा एकार्था भवंति। तद्यथा। शिवः

मः स्यात्तदा एतद्युज्येत वक्तुं। यतस्तु न नियमः इंद्रः शक्रः पुरंदरः। कंदुः कोष्ठः कुसूल इति। एकश्च शब्दो बह्वर्थः। तद्यथा। अक्षाः पा ४

तः केचित्तैरेव सर्वैर्याः स्युः। यथा दधि मधु अग्निचिदिति। प्रत्ययः क्वचिद्द्योतकः प्रत्ययस्यैव वा सर्वेऽर्थाः स्युः इत्यनेन नियमः। प्रकृतिस्तदर्थाभिधाने
सप्रत्ययकमात्रं कुर्यात्॥

ततः किल साधीय इति। प्रकृतिः सर्वानर्थानभिदधाति घातिकास्तु विभक्त्य इति सिद्धार्थवत्ता। प्रत्यय एवेति। ततश्चाष्टप्रैते रर्थवत्ता न सिध्यतीति तद

ततः किं न साधीयोऽर्थवत्ता सिद्धा भवति। नन्विमोऽर्थवत्ता न सिध्यतीति। वर्णितार्थवत्ताऽन्वयव्यतिरेकाभ्यामेवात
त्रकृत एतदयं प्रकृत्यर्थोऽयं प्रत्ययार्थ इति। न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात्प्रत्यय एव वा। सामान्यशब्दा एते एवं
स्युः। सामान्यशब्दाश्च नान्तरेण विशेषं प्रकरणं वा विशेषे व्यवतिष्ठन्ते। यतस्तु खलु वृक्ष इत्युक्ते स्वभावतः क
स्मिंश्चिदर्थे प्रतीतिरुपजायते। अतो मन्यामहे नेमे सामान्यशब्दा इति। न चेदिमे सामान्यशब्दाः प्रकृतिः प्रकृत्य
र्थे वर्तते प्रत्ययः प्रत्ययार्थे। किं पुनरिमे वर्णा अर्थवन्त आहोस्विदनर्थकाः। वर्णस्यार्थवदनर्थकत्वे उक्तं। कि
मुक्तं। अर्थवन्तो वर्णा धातुप्रातिपदिकप्रत्ययनिपातानामेकवर्णानामर्थदर्शनात्। वर्णव्यत्यये चार्थान्त
रगमनात्। वर्णानुपलब्धौ चानर्थगतेः। संघातार्थवत्त्वाच्च। संघातस्य चैकार्थ्यात्सुबभावो वर्णात्। अनर्थ
कास्तु प्रतिवर्णमर्थानुपलब्धेः। वर्णव्यत्ययापायोपजनविकारेष्वर्थदर्शनात्। इति। तत्रेदमपरिहृतं संघा
तार्थवत्त्वाच्चेति। तस्य परिहारः। संघातार्थवत्त्वाच्चेति चेद्दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः। संघातार्थव
त्त्वाच्चेति चेद्दृष्टो ह्यतदर्थेन गुणेन गुणिनोऽर्थभावः। तद्यथा। एकस्तन्तुस्त्वक्त्राणेऽसमर्थः। तत्समुदायः कंब
लश्च समर्थः। एकस्तण्डुलः क्षुत्प्रतिघातेऽसमर्थः। तत्समुदायश्च वर्धितकं समर्थं। एकश्च बल्वजः बन्धनेऽसम

वस्योदाहरणत्यर्थः। सामान्यशब्दा इति। प्रकृतिश्चेत्सर्वानर्थानभिदध्याद्वृक्ष इत्युक्ते सर्व संख्या प्रतीयेत प्रत्ययो वा सर्वस्य प्रातिपदिकस्यार्थं प्रत्याययेदित्यर्थः।
यतस्तु खल्विति। प्रकरणादिना विनेवेति भावः। अतदर्थेनेति। अतत्प्रयोजनेनेत्यर्थः। गुणेनेति। अवयवेन। सह्यवयविन उपकारकत्वाद्गुणः। अवयवी
तु गुणी। अर्थभावः प्रयोजनोऽसत्तिः।

मा.कै. याच्च यावतीति। अयं समुदायः काश्चिदित्यर्थवन्तो। विहलानीति। विच्छिन्नानीत्यर्थः। अनर्थकस्येति। निपातानामनेकत्वादभिधेयार्थाभावेपि द्योत्यार्थस-
द्भावाद्येषामर्थवत्त्वं तेषां सिद्ध्यत्येव संज्ञा। यस्य तु द्योत्योप्यर्थो नास्ति तदर्थं वचनं। निघातो यथा स्यादिति। अर्थवदनर्थकयोरसत्यपि सामर्थ्ये संज्ञावि-

२२९

विषम उपन्यासः। भवति हि तत्र या च यावती चार्थमात्रा। भवति हि किंचित्प्रत्येकस्तं तुस्त्वक्त्राणे समर्थः। एकश्चतं-
तुलः सूत्रतिपाते समर्थः। एकश्च वल्वजो बंधने समर्थः। इमे पुनर्वर्णा अत्यंतमेवानर्थकाः। यथा तर्हि रथांगानि वि-
हृतानि प्रत्येकं व्रजिक्रियां प्रत्यसमर्थानि भवंति। तत्समुदायश्च रथः समर्थः। एवमेषां वर्णानां समुदाया अर्थ-
वन्तः अवयवा अनर्थकाः इति। निपातस्यानर्थकस्य प्रातिपदिकसंज्ञा वक्तव्या। खंजति। निखंजति। लंबते प्र-
5 लंबते। किंपुनरत्र प्रातिपदिकसंज्ञया प्रार्थ्यते। प्रातिपदिकादिति स्वाद्युत्पत्तिः सुबंतमिति पदसंज्ञा पदस्य प-
दादिति निघातो यथा स्यात्। नैतदस्ति प्रयोजनं। सत्यामपि प्रातिपदिकसंज्ञायां स्वाद्युत्पत्तिर्न प्राप्नोति। किं कारणं
नहि प्रातिपदिकसंज्ञायामेव स्वाद्युत्पत्तिः प्रतिबद्धा। किं तर्हि। एकत्वादिष्वर्थेषु स्वादयो विधीयंते। न चैतेषामे-
कत्वादयः संति। नैष दोषः। अविशेषेण उत्पद्यंते। उत्पन्नानां नियमः क्रियते। अथवा प्रकृतानर्थानपेक्ष्य निय-
मः। के च प्रकृताः। एकत्वादयः। एकस्मिन्नेवार्थे एकवचनं न द्वयोर्न बहुषु। द्वयोरेवार्थयोर्द्विवचनं नैकस्मिन्न
बहुषु। बहुष्वेवार्थेषु बहुवचनं नैकस्मिन्न द्वयोरिति। अथवा आचार्यप्रवृत्तिर्ज्ञापयति अनर्थकानामप्येषां भव- शिवः
त्यर्थवत्कृतमिति। ५

पादसामर्थ्यान्निघातो भवतीत्यके। समानवाक्यतानिमित्तो निघातो न सामर्थ्यनिमित्तः। सा चेहास्ति। आख्यातं साव्ययकारक-
विशेषणं वाक्यमित्यपरे। नहीति। स्वादिविधिवाक्यस्य संख्याविधिवाक्येनैकवाक्यत्वात्। अविशेषेणेति। नानावाक्याश्रयणात्। नियमश्चार्थानां न
प्रत्ययानामित्यनर्थकेभ्योपि ते भवंति। अथवेति। प्रत्ययनियमेपि दोषाभावइत्यर्थः।

अधिपरी इति। क्रियायोगे गत्युपसर्गसंज्ञयोर्विधानादनर्थकयोः क्रियायोगाभावात्प्राप्तिरेव नास्तीति संज्ञाविधानं ययोः कार्यस्य ज्ञापकसं
पद्येते। आनर्थक्यं च निपातयोः साधारणार्थतया ऽधिकयोस्याभावादुच्यते न तु सर्वात्मना अर्थाभावात्। निबेकादेश इति। तिपतिशब्दादारभ्य

यदयमधिपरी अनर्थकाविति अनर्थकयोर्गत्युपसर्गसंज्ञां बाधित्वा कर्मप्रवचनीयसंज्ञां शास्ति।
किं पुनरयं पर्युदासः यदन्यत्प्रत्ययादिति आहोस्वित्प्रसज्यायं प्रतिषेधः प्रत्ययो नेति। कश्चात्र वि
शेषः। अप्रत्यय इति चेन्निबेकादेशप्रतिषेधोऽन्तवत्त्वात्। अप्रत्यय इति चेन्निबेकादेशे प्रतिषेधो व
क्तव्यः। काण्डे कुड्ये। किं कारणं। अन्तवत्त्वात्। निबन्तिपोरेकादेश अन्तिपोऽन्तवत्स्यात्। अस्त्यन्यत्तिप इ
ति कृत्वा प्रातिपदिकसंज्ञा प्राप्नोति। अस्तु तर्हि प्रसज्यप्रतिषेधः प्रत्ययो नेति। न प्रत्यय इति चेत् ङ्ये
कादेशप्रतिषेध आदिवत्त्वात्। न प्रत्यय इति चेत् ङ्येकादेशे प्रतिषेधः प्राप्नोति। ब्रह्मबन्धूः। किं कार
णं। आदिवत्त्वात्। प्रत्ययाप्रत्यययोरेकादेशः प्रत्ययस्यादिवत्स्यात्तत्र प्रतिषेधः प्राप्नोति। किं पुन
रत्र प्रातिपदिकसंज्ञया प्रार्थ्यते। प्रातिपदिकादिति स्वाद्युत्पत्तिर्यथा स्यात्। नैष दोषः। आचार्यप्र
वृत्तिर्ज्ञापयति ङ्संघाते ऊङन्तात्स्वादय इति। यदयं नोङ्धात्वोरिति विभक्तिस्वरस्य प्रतिषेधं शास्ति।

सुपः पकारेण प्रत्याहारः। अन्तवत्त्वादिति। पूर्वप्रत्ययस्य दृशस्य प्रातिपदिकसंज्ञाकार्यमिति संभवति एवं प्रत्ययान्तवद्भावः। आदिवत्त्वादिति। परकार्ये
प्रतिषेधे कर्तव्ये परं प्रत्येकादेशस्यादिवद्भावः। पदपमिति। अपवा प्रातिपदिकग्रहणे लिंगविशिष्टस्यापि ग्रहणमिति स्वादयः ङ्संघाते॥ ॥

प्रा॰के॰ ङ्ग इति। तत्रांतरंगत्वात्प्रत्ययोलोपेतः प्रागेव अग्निवत्सलबंधुरादेर्ह्रस्वप्रवृत्तौ प्रातिपदिकसंज्ञायां ङेकादेशस्य पूर्वं प्रत्ययं तद्भावादस्यैव प्रातिपदिकत्वमिति न दोषः। ए
ऊ इति। तत्र नलोपो न स्यात्। अत्राप्यंतरंगत्वात्सर्वमेव प्रवृत्ता प्रातिपदिकसंज्ञा बहिरंगेण प्रतिषेधेन नेतुमशक्यते तन्निवर्तयितुमिति परिहारः स्त्रि। नङिसंबुद्ध्यो
२३० रिति। ननु हे स्वराजन्निति समासप्रातिपदिकसंज्ञार्थः प्रतिषेधः स्यात्। न चोत्तरप्राप्तेरप्रत्यय इति प्रतिषेधः अस्यैवापवादन्यायात्। एवं तर्हि समासेप्य

अथवा ह्यत्र प्रातिपदिके संज्ञे अवयवस्यापि [illegible]स्यापि। तत्रावयवस्याप्रातिपदिकसंज्ञालयां तव
द्भावात्स्वाद्युत्पत्तिर्न विघ्यति। सुब्लोपे च प्रत्ययलक्षणत्वात्सुब्लोपे च प्रत्ययलक्षणेन प्रतिषेधः प्राप्नोति। राज्ञा
तक्ष्णा प्रत्ययलक्षणेन प्रत्ययो नेति प्रतिषेधः प्राप्नोति। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयति न प्रत्ययलक्ष
6 णेन निषेधो भवतीति। यदयं नङिसंबुद्ध्योरिति प्रतिषेधं शास्ति। अथवा पुनरस्तु पर्युदासः। ननु चोक्तम
प्रत्यय इति चेन्निबेकादेशे प्रतिषेधो न वक्तव्यादिति। प्रसज्यप्रतिषेधेप्येष दोषः। ह्यत्र प्रातिपदिकसंज्ञे
अवयवस्यापि समुदायस्यापि। गृह्यते च प्रातिपदिकाप्रातिपदिकयोरेकादेशः प्रातिपदिकग्रहणे
नात स्वादुनाम्नामपि वक्तव्यं स्यात् ह्रस्वो नपुंसके यत्तस्येति। किं च न नपुंसके। नपुंसकं यस्य गुणः कस्य च
नपुंसकं गुणः प्रातिपदिकस्य॥ ॥कृत्तद्धितसमासाश्च॥ ॥समासग्रहणं किमर्थं। समासग्रहणमुक्तं। कि शिवः
प्रत्यय इति वर्तते। अन्यथा स्वराज्ञा अतिराज्ञे इत्यादौ विध्यर्थतायां संभवत्वान्नियमार्थं समा कं। अर्थवत्समुदायानां समासग्रहणं नियमार्थमिति।
... लिंगयोगः। न चांतवद्भावेनार्थः एकोऽतिदेष्विति न भवति ह्रस्वः। अथवा नपुंन
सग्रहणं न स्यात्। यत्तस्येति। विभक्त्यंतं च शक्तिसंख्याप्रधानं। न च तयोर्लिंगयोगः। न
कं प्रातिपदिकार्थस्यैव संभवतीति प्रातिपदिकग्रहणं मुख्यप्रातिपदिकग्रहणार्थं मित्यंतवद्भावेन यत्प्रातिपदिकं तस्य ह्रस्वाभावः। अत्र च तत्रैव यदयमुक्त
मर्थवत्सूत्रे ग्रहणं। सुप्यचो तु ह्रस्वं नवाऽऽदेवसिध्यतीति पपगस्यारंभोन

ह्रस्वो नपुंसके॥ ॥प्रातिपदिकग्रहणमिति। नपुंसकं लिंगं द्रव्यस्यैव संभवति। द्रव्यवाचित्वं च प्रातिपदिकस्यैव। न त्वेवं तस्य। क्रियाप्रधानत्वात्। नापि लिङ्‌न स्यात् क्रियाप्रधानत्वादिति प्रश्नः। कांडे इति। द्वयोरपि शक्तिशक्तिमतोरभेदाभिधानात् शक्तिनपुंसकार्थवृत्तित्वं सुबंतस्यापीति भावः। रमते ब्राह्मणकुलमिति। यथैव साधनाश्रयां संख्यामुपादत्ते तथा तल्लिंगमपि। अव्ययप्रतिषेध इति। यथोपपद्यते तन्न्यायेनाव्ययस्यापि लिंगयोगात् प्राप्तिः। दोषा ब्राह्मणकुलमिति। दोषासहचरितत्वाद् ब्राह्मणकुलमेव दोषाशब्देनोच्यत इति ह्रस्वप्रसंगः। नानाव्ययमिति। दोषाशब्दो रात्राविसर्ये वर्त्तते दिवाशब्दो

ह्रस्वो नपुंसके प्रातिपदिकस्य॥ ॥प्रातिपदिकग्रहणं किमर्थं। नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिङ्नि वृत्त्यर्थं। नपुंसकह्रस्वत्वे प्रातिपदिकग्रहणं तिङ्निवृत्त्यर्थं। तिबंतस्य ह्रस्वत्वं मा भूत्। कांडे कुड्ये रमते ब्राह्मणकुलमिति। अव्ययप्रतिषेधश्च। अव्ययानां प्रतिषेधो वक्तव्यः। इह मा भूत्। दोषा ब्राह्मणकुलं दिवा ब्राह्मणकुलमिति तर्हि वक्तव्यः। न वक्तव्यः। नात्राव्ययं नपुंसके वर्त्तते। किं तर्हि। अधिकरणमत्राव्ययं नपुंसकस्येति। इह तर्हि प्राप्नोति। कांडी भूतं वृषलकुलं कुड्यीभूतं वृषलकुलमिति। न वा लिंगाभावात्। न वा वक्तव्यं। किं कारणं। लिंगाभावात्। अलिंगमव्ययं। किं पुनरयमव्ययस्यैव परिहार आहोस्वित् तिबंतस्यापि। तिबंतस्यापीत्याह। कथं। अव्ययं हि किंचिद् द्रव्यप्रधानं किंचित् क्रियाप्रधानं॥

प्यहनीत्यर्थ इति ब्राह्मणकुलसाधनानां क्रियाणां अधिकरणं कालो भवन् ब्राह्मणकुलस्याधिकरणं भवति दोषाशब्दे च रात्रावधीतेवेति। आ धेयव्यवधानेनाधिकरणस्य क्रियाधारणत्वात्। कांडीभूतमिति। प्रकृतिविकारयोरभेदविवक्षायां च्विप्रत्ययः। द्वयोरप्यत्र तयोर्नपुंसकत्वाद्ध्रस्व प्रसंगः। कृते ह्रस्वत्वे च्वौ चेति दीर्घो भविष्यतीति चेद्ध्रस्वस्य बहिरंगत्वाद्दीर्घे कर्त्तव्ये सिद्धत्वाद्दीर्घाप्रसंगः। एवं रमत इत्यत्रापि ह्रस्वे सति टेरेत्वस्याप्रसंगः। नवेति। असत्त्ववाचित्वाद्व्यस्य न तेन लिंगं प्रतिपाद्यत इत्यर्थः॥

न चैतयोरिति। आख्यातस्य शक्त्याश्रयद्रव्यसंख्याप्रतिपादने सामर्थ्यं न तु तल्लिंगप्रतिपादने। विचित्रता ह्यावशक्तीनां कांडे तिष्ठत इत्यत्रापि संख्यायाः
प्राधान्यान्नपुंसकत्वायोगः। अवश्यमिति। यद्यवयवधर्मेण समुदायो व्यपदिश्यत इत्यर्थः। यत्तस्येति। साक्षात्तस्यैव पदान्नपुंसकत्वं तदा ह्रस्वः। य
॥[illegible]॥

• उच्चैर्नीचैरिति विभक्तिप्रधानं। हिरुक् पृथगिति क्रियाप्रधानं। तिबंतं चापि किंचित्प्रधानं किंचित्सत्त्वप्र-
प्रधानं किंचित्क्रियाप्रधानं। कांडे कुड्ये इति विभक्त्यर्थप्रधानं रमते ब्राह्मणकुलमिति क्रियाप्रधानं।
न चैतयोरर्थयोर्लिङ्गसंख्याभ्यां योगोऽस्ति। अवश्यं चैतदेवं विज्ञेयं। क्रियमाणेऽपि हि प्रातिपदिक-
ग्रहणे प्रसज्येत कांडे कुड्ये। इह यत्र प्रातिपदिकसंज्ञा अवयवस्यापि समुदायस्यापि गृह्यते च प्रातिपदि-
कात् प्रातिपदिकपरे कादेशः प्रातिपदिकग्रहणेन। तस्मादुभाभ्यामपि वक्तव्यं स्यात् ह्रस्वो नपुंसके
यत्तस्येति। किं च नपुंसके। नपुंसकं यस्य गुणः। कस्य च नपुंसकं गुणः। प्रातिपदिकस्य। यञ्जेकादे-
शदीर्घत्वेषु प्रतिषेधः। यञ्जेकादेशदीर्घत्वेषु प्रतिषेधो वक्तव्यः। युगवरत्राय। युगवरत्रार्थं। युगवर-
त्रेभ्यः। यञ्जेकादेशदीर्घत्वेषु बहिरंगलक्षणत्वात्सिद्धं। बहिरंगा एते विधयः। अंतरंगं ह्रस्वत्वं। असि-
द्धं बहिरंगमंतरंगे। उपसर्जनत्वं च। किं। यञ्जेकादेशदीर्घत्वेषु प्रतिषेधो वक्तव्यः। [illegible] युगवर-
त्रेभ्यः। उपसर्जनह्रस्वत्वं च। किं। बहिरंगलक्षणत्वात्सिद्धमिसेव

समलवयवहारकं तस्य माभूत्। अथवा तस्यैव अनुपजातव्यतिरेकस्येत्यर्थः। वि
सत्त्वं तच्चोपजातव्यतिरेकमिति ह्रस्वाभावः। सूत्रकारेण तु प्रातिपदिकग्रहणं कुर्वता प्रातिपदिकग्रहणार्थं कृतं। प्रातिपदिकस्यैव नपुंसकवृत्तित्वं
भवात्। तेनांतवद्भावातिदिष्टे प्रातिपदिकसंज्ञे ह्रस्वाभावः। युगवरत्रायेति। दीर्घे कृते पुनर्ह्रस्व

गोस्त्रियोरुपसर्जनस्य॥ ॥ह्रस्वनिवृत्त्यर्थमिति। धातुस्त्रिया अपि ह्रस्वं न बाङ्द्वेनानिर्देशः। भाष्यकारस्तु तदेव विभज्य व्याचष्टे। कुतः स्त्रिया धातुस्त्रिया
श्चेति। स्वरितेनेति। स्वरितेनाधिकार इति योगो नैकधा व्याख्यातस्तत्र श्चायमत्र स्वरितत्वं प्रतिज्ञायते तेन तत्र तदधिकारो गम्यते इत्ययमर्थितसा
र्थः। स्त्रियां किं लिंग तत्प्रकरणविहितानां तु ह्रस्वभाविवाद ग्रहणं। अस्त्रीप्रत्ययेनेत्येवं तादिति। ननु ष्यङः संप्रसारणं इत्यत्रापि कारीष
गंध्यपुत्र इत्यत्र संप्रसारणाभावार्थमनुपसर्जन स्त्रीप्रत्यय विषयस्तदादिनियमप्रतिषेधः प्रदर्शितः ह्यनुपसर्जनत्वादिह नियमे

गोस्त्रियोरुपसर्जनस्य॥ ॥गोटाङ्ग्रहणं ह्रस्वनिवृत्त्यर्थं। गोटाङ्ग्रहणं कर्तव्यं। किमिदं टाङिति। प्रत्या
हारग्रहणं। क्व सन्निविष्टानां प्रत्याहारः। टापः प्रभृत्याष्यङो ङकारात्। [redacted] किं प्रयोजनं। ह्रस्व
निवृत्त्यर्थं। कुस्त्रिया धातुस्त्रिया श्च ह्रस्वत्वं माभूदिति। अतितंत्री॥ अतिश्रीः। अतिलक्ष्मीः इति। तत्तर्हि व
क्तव्यं। न वक्तव्यं। स्त्रीग्रहणं स्वर्यते। तत्र स्वरितेनाधिकारगतिर्भवति। स्त्रियामित्येवं प्रकृत्य ये
विहितास्तेषां ग्रहणं विज्ञास्यते। स्वरितेनाधिकारगतिर्भवतीति न दोषो भवति। यद्येवं प्रत्ययग्रहणमि
दं भवति। तत्र प्रत्ययग्रहणे यस्मात्स तदादेर्ग्रहणं भवतीति इह न प्राप्नोति। अतिराजकुमारिः। अतिसे
नभार्यं। नैष दोषः। क्वचिदुपसर्जने पि तदादिनियमो न भविष्यति। ह्रस्वा व्यष्ट इत्यत्र नानीकुमारिरिति। अस्त्रीप्रत्ययेनेत्येवं तत्॥
दीर्घग्रहणात्। अन्यथा निष्कौशांबिरित्यादावुपसर्जनत्वादस्या वं न तो ह्रस्वलोपो न भविष्यतीति किं दीर्घग्रहणेन। कथं तर्ह्यनुपसर्जना
दि यत्र कौ न कारे यो न सिध्यतीत्युक्तं यावता कारशब्दादपि ङीपि कृते तदादिनियमाभावात्कुं न कारीशब्दात् भविष्यति। नैष दोषः। तदा
[redacted] दिनियमाभावे कारीशब्दादपि कदाचित्कुं स्यात्॥ ॥श्रीः॥

भा० कै०
२३२

पुंवद्वचनमिति। यथा पुंविषये ईकारः श्रूयते न तु ह्रस्वत्वं प्रतिपद्यते तथेयसोऽपि परइत्यर्थः। गोकुलमिति। प्रथमानिर्दिष्टमिति गोशब्दस्योपसर्जनत्वं। राजकुमारीपुत्र इति। राजकुमारीशब्दः समासप्रातिपदिकं। इह तु कुमारीपुत्र इति कुमारीशब्दस्य प्रत्ययांतत्वात्प्रातिपदिकत्वाभावः। उभयत इति। प्रातिपदिकं स्त्रीप्रत्ययश्चेत्युभयमाश्रीयते। तत्र यदि प्रातिपदिकस्यांतवत्त्वं स्त्रीप्रत्ययः परो नास्ति। अथ स्त्रीप्रत्ययस्यादिवत्त्वं प्रातिपदि-

ईयसो बहुव्रीहौ पुंवद्वचनं। ईयसो बहुव्रीहौ पुंवद्भावो वक्तव्यः। बह्व्यः श्रेयस्यो ऽस्य बहुश्रेयसी। विद्यमानश्रेयसी। पूर्वपदस्य च प्रतिषेधो गोसमासनिवृत्त्यर्थः। पूर्वपदस्य च प्रतिषेधो वक्तव्यः। किं प्रयोजनं गोसमासनिवृत्त्यर्थं। गोनिवृत्त्यर्थं समासनिवृत्त्यर्थं च। गोनिवृत्त्यर्थं तावत्। गोकुलं गोक्षीरं गोपालकमिति। समासनिवृत्त्यर्थं। राजकुमारीपुत्रः सेनानीकुमारीपुत्र इति। किमुच्यते समासनिवृत्त्यर्थमिति न पुनरसमासेऽपि किंचित्पूर्वपदं यदर्थः प्रतिषेधः स्यात्। स्त्र्यंतस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। न चांतरेण समासं स्त्र्यंतं प्रातिपदिकमुपसर्जनम [illegible] स्ति। ननु चेदमस्ति अतिखट्वः पादः अतिमालः पाद इति। एकदेशे कृते न वक्तव्या स्यात्प्राप्नोति। उभयत आश्रयणे नांतादिवत्। गोनिवृत्त्यर्थेन तावन्नार्थः। गोंतस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। न चैतद्गोंतं। ननु च व्यपदेशिवद्भावेन गोंतं।

कत्वाभावः। गोंतस्येति। उपसर्जनग्रहणेन गोस्त्रियो विशेष्येते। प्रत्यासत्त्याभ्यांतदंतविधिः। प्रातिपदिकमिति×××ग्रहणेन ततो न च प्रत्य-यविधिविषयत्वादिह नो प्रतिषेधः। व्यपदेशिवद्भाव इति। ननु रोगस्य ग्रहणं तस्य चेयं स च तस्य चेति सर्वस्य शेषः इति व्याख्यानात्स्वं रूपमिति स्यात्तु वृत्तं तु ज्ञानात्कुलमित्यत्र ह्रस्वः प्राप्नोत्येव नैष दोषः। स्वं रूपमिति नानुवर्त्तते। तथा चार्थान्तरवत् तच्चेयेन विधिस्तदंतत्वे प्रयोजनम्। कः। तस्य चेयेतत्र नत्रस्य याः गिकस्य शेषो न तत्र सा भागोपुत्र इत्यत्रापि न भवति। भवत्येव गोनान्तप्रातिपदिकं गोंतम

[illegible] शिवः

८

पंचकुमारीप्रिय इति। त्रिपदे बहुव्रीहौ कृते द्वयोः पदयोर्द्विगुसमास इति पंचकुमारीशब्दः पूर्वपदं न भवति। कपि चेति। अंतरंगत्वाद्ध्रस्वः प्राप्नोति ततः
कबिति भावः। कपीति च विषयसप्तमी। कुक्कुटमयूर्याविति। समासार्थे ऽवयवार्थस्याप्राधान्यादनेकनिमित्तस्यानुवृत्तस्य प्रधानानिर्दिष्टत्वाच्च मयूरीशब्द

समाससन्निवृत्त्यर्थेनापि नार्थः। स्त्र्यंतस्य प्रातिपदिकस्योपसर्जनस्य ह्रस्वो भवतीत्युच्यते। प्रधानमुपसर्जन
मिति च संबंधिशब्दावेतौ। तत्र संबंधादेतद्गंतव्यं यत्प्रति यदप्रधानं न [illegible] नि स्य चेत्सो तो भवतीति। अवश्यं चैत
देवं विज्ञेयं। उच्यमानेपि प्रतिषेधे इह प्रसज्येत पंचकुमार्यः प्रियाय स्य पंचकुमारीप्रियः। दशकुमारीप्रि
य इति। कपि च। कपि च प्रतिषेधो वक्तव्यः। बहुकुमारीकः। बहुवृषलीकः। ईयसश्च। ईयसश्च प्रतिषेधो वक्तव्यः। कु
क्कुटमयूर्यौ। उक्तं वा। किमुक्तं। कपि तावदुक्तं न कपीति प्रतिषेध इति। नैतदस्त्युक्तं। केण इति या ह्रस्वत्वप्रा
प्तिः तस्याः प्रतिषेध इति। कुत एतत्। अनंतरस्य विधिर्वा भवति प्रतिषेधो वेति। अवश्यं चैतदेवं विज्ञेयं। यो हि म
न्यते याऽवयावती ह्रस्वत्वप्राप्तिस्तस्याः सर्वस्याः प्रतिषेध इति। इहापि तस्य प्रतिषेधः प्रसज्येत। प्रियंग्रामणि
ब्राह्मणकुलमस्य प्रियग्रामणिकः। प्रियसेनानिक इति। इदं तर्ह्युक्तं कपि कृते ऽनंत्यत्वा[illegible] ह्रस्वत्वं न भविष्य
तीति। इदमिह संप्रधार्यं कप् क्रियतां ह्रस्वत्वमिति। किमत्र कर्त्तव्यं। परत्वात्कप्। अंतरंगं ह्रस्वत्वं। अंतरंगतरः
कप् ननु चायं समासांत इत्युच्यते।

स्योपसर्जनत्वं अनंसत्वादिति। समासांत इति वचनात्केवलस्य समासस्यांत इति स्त्रीप्रत्ययांतं समा
सप्रातिपदिकं न भवति। सावकाशश्च कप् बहुयवागूक इत्यादौ। अंतरंगमिति। उपसर्जनस्त्रीप्रत्ययांत प्रातिपदिकमात्रापेक्षत्वात्। कप्
समासविशेषफलयुक्तरपदमपेक्षत इति बहिरंगः। अंतरंगतर इति। पराभ्युपगमापेक्षया प्रकर्षप्रत्ययः॥ ॥

परत्वादिति। १

भा॰कै॰

तादर्थ्यादिति। न तस्यावयवापेक्षत्वात्कथं समुदायापेक्षो विधिरंगः। द्वंद्वे पुंवदिति। परिहारांतरमप्यत्रास्ति। अवयवार्थो वेव परस्परसहितो द्वंद्वा

१२२ र्थ इति प्राधान्यादुपसर्जनत्वाभाव इति॥ ॥लुक्तद्धितलुकि॥ ॥अवंत्यादीनामिति। अवंतीत्यत्र वत्सवंतिशब्द उपसर्जनं। स्त्रीप्रत्ययश्चास्ति लुक्च

तद्धितस्य कृत इत्यस्ति लुकः प्राप्तिः। अलुक्परत्वादिति। अत्र स्त्रीप्रत्ययांतात्परस्य लुकं तद्धितस्य लुकं न अलुकाभावं। अत्रानुकृते लुकि स्त्रीप्रत्ययः

कृतः। नहीति। लुकोऽतीरूपत्वात् बुद्धिपरिकल्पितं लुकः परत्वमाश्रित्य वार्त्तिककृतोक्तं अलुक्परत्वादिति। नन्वजातिरिति। उपसर्जनग्रहणं

तादर्थ्यात्ताच्छब्द्यं भविष्यति। येषां पदानां समासः न तावत्तेषामन्यद्भवति। कथं तावत्प्रतीयते। द्वंद्वे पुंवत्। किंतु

क्तं परवल्लिंगमिति शिष्याणामर्थो विति। तत्रोपदेशिकस्य ह्रस्वत्वमातिदेशिकस्य च वर्णं भविष्यति॥ ॥लुक्तद्धित

लुकि॥ ॥तद्धितलुक्यवंत्यादीनां प्रतिषेधो वक्तव्यः। अवंती कुंती कुरुः। तद्धितलुक्यवंत्यादीनामप्रतिषेधोऽलुक्

परत्वात्। तद्धितलुक्यवंत्यादीनामप्रतिषेधः। अनर्थकः प्रतिषेधोऽप्रतिषेधः। लुक्कस्मान्न भवति। अलुक्परत्वात्

अलुग्वीप्सुच्यते। न चात्र लुकं पश्यामः। लुकीति नैषा परसप्तमी शक्या विज्ञातुं। न हि लुकः पौर्वापर्यमस्ति। का तर्हि

सत्सप्तमी। लुकि सतीति। सति सप्तमी चेत्प्राप्नोति। एवं तर्हीदमिह व्यपदेश्यं सदाचार्यो न व्यपदिशति। किं। उप

सर्जनस्येति वर्त्तते न च जातिरुपसर्जनं॥ ॥इद्गोण्याः॥ ॥इद्गोण्या इति वक्तव्यं। गोण्या नेस्यैव सिद्धं नार्थ इत्वेन। कार

पञ्चसिद्धिः। पंचगोणिः। ह्रस्वता हि विधीयते ह्रस्वत्वमत्र विधीयते। गोस्त्रियोरुपसर्जनस्येति इत्विवा वा॰ शिवः

नस्त्रीप्रत्ययो विशेष्यते। अप्रधानं चेहोप

सर्जनं गृह्यते न शास्त्रीयं असंभवात्। अवंतीत्यत्र चापत्यलक्षणो जातिः स्त्रीत्वयुक्ता प्राधान्येनाभिधीयत इत्यनर्थः। अप्रातिपदिकत्वाच्चात्र ह्र

स्वाभावः। आमलकमित्यादौ तु तद्धितांतत्वात्प्रातिपदिकसंज्ञा। लिंगविशिष्टस्यैव परस्यानाभावात्। लिंगविशिष्टपरिभाषयाऽपरस्यानाभावः। कुरु

सत्रापि उभयत आश्रयणे नांतादिवद्भावात् प्रातिपदिकत्वं॥ ॥इद्गोण्याः॥ इत्विवा वचनमिति। इतीति सप्तमी। इत्वपक्षे

पुनःप्रमाणे गौरवाभाव इति॥

गोणिरिति। यद्वा मात्रचोलुक् क्रियते तत्तदा लुक्प्रतिषिद्धे सिद्धत्येव ह्रस्वत्वं। तस्मात्प्रत्ययविधाने परिमाणग्रहणस्य प्रयोजनं तद्धितमंतरेणापि यद्वा परिमाण

शब्दः प्रमेये वर्त्तते तत्रापि प्रत्ययमायथा स्यादिति। एवं चानुपसर्जनत्वाद् भेदोपचारेण प्रमेयवृत्तित्वात् प्राप्तो ह्रस्व इति तं विधीयते। सर्वत्र तदर्थे गोण्या इत्यप्र

संगः। एवं तर्ह्युपसर्जनस्येति वर्त्तते न तु तद्धितलुकीति। तेन पञ्चस्वार्थो पसर्जनमर्थांतरं प्रत्याय्यते तत्रैव विधिः। ह्रस्वत्वं तु न स्यात् प्रातिपदिकत्वात्

अशिष्यमिति। गोस्त्रियोरित्यस्यानंतरं गोण्या इति लुग्वा पदे ह्रस्वार्थं वक्तव्यं। ननु सूच्या इति। इत्वं प्राप्नोतीति शेषः। क्वचित्तु ननु सूच्या इति पाठस्तत्रैव।

मात्रार्थे वा कृतं भवेत्। अथवा माचार्थमिदं वक्तव्यं। गोणीमात्रमिदं गोणिः। अपर आह। गोण्या इत्वं प्रकरणात्। अशिष्यं

गोण्या इत्वं। किं कारणं। प्रकरणात्। प्रकृतं ह्रस्व इति वर्त्तते। ननु सूच्याः। सूच्याद्यर्थमथापि वा। सूच्याद्यर्थमिदं द्रष्टव्यं। पं

चसूचिः। दशसूचिः। इत्रोण्या नेति वक्तव्यं ह्रस्वता हि विधीयते। इति वा वचनेनाथ वत् मात्रार्थे वा कृतं भवेत्। गोण्या इ

त्वं प्रकरणात् सूच्याद्यर्थमथापि वा॥ ॥लुपि युक्तवद्व्यक्तिवचने॥ ॥व्यक्तिवचन इति किमर्थं। शिरीषाणामदूरभ

वो ग्रामः शिरीषाः। तस्य ग्रामस्य वनं शिरीषवनं। किं च स्यात्। विभाषौषधिवनस्पतिभ्य इति णत्वं प्रसज्येत। अपर

आह। कटुकबदर्या अदूरभवो ग्रामः कटुकबदरी। षष्ठीयुक्तवद्भावेन माभूदिति। अथ व्यक्तिवचन इत्युच्य

मानेकस्मादेवात्र न भवति। षष्ठ्यपि हि वचनं। नैतत्पारिभाषिकस्य

मिष्यत इत्यस्याकारः। इक्ग्रहणे सति योगविभागो लभ्यते। गोणिरिति तु मात्रचो

लोपेन सिध्यति॥ ॥लुपि युक्तवत्॥ ॥प्रकृत्यर्थसंबंधिन्यो लिंगसंख्ये प्रत्ययार्थेऽतिदिश्यते। शिरीषा इति। वरणादित्वादणो लुप्। ग्रामवाचित्वात् तस्य

लाभावात्फलाभावः। फलीवनस्पतिर्ज्ञेय इत्ययं भेदो णत्वविधौ नाश्रित इति फलाभावेपि शिरीषस्यास्ति वनस्पतित्वं। षष्ठीति। प्रकृत्यर्थगतस्य व्यतिरे

कस्य प्रत्ययार्थेऽतिदेशात्षष्ठीप्रसंगः। षष्ठ्यपीति। वचनशब्देन ह्येकवचनादयः प्रत्यया उच्यंते। तत्र वाक्यावस्थायां षष्ठीदर्शनात्तस्या एवात्रातिदे

शः प्राप्नोति। नेदमिति। एकवचनादिसंज्ञाविधानकाले तु निष्पादी वचनशब्दोपि संज्ञात्वेन नियुक्त इति प्रत्ययः पारिभाषिकं वचनमुच्यते। अन्वर्थ

ग्रहणमिति। संख्यालक्षणे योतिदिश्यते स्यर्थः।

भा॰कै॰ षष्ठ्यपिप्युच्यत इति। संख्यातिदेशे तद्वचनेन शब्देन प्रवर्तितव्यं। षष्ठ्यपि संख्यायाः प्रतिपादिकेति भावः। षष्ठीशब्देन च षष्ठ्यर्थः संख्यालक्षणोर्थोभिधीयते। अ

१३४ थवा षष्ठ्यप्युच्यते संख्याप्रतिपादनार्थमित्यर्थः। लुपोक्तत्वादिति। लुप्सहचरितेन शब्देनोक्तत्वादित्यर्थः। अभिहितः सोर्थोन्तर्भूतः प्रातिपदिकार्थः सं

पन्न इति व्यतिरेकाभाव इत्यर्थः। आतिदेशिकीति। संख्यायामतिदिष्टायां न षष्ठीशब्दः प्रयोक्तव्यः। वाक्ये च षष्ठी दृश्यत इति तस्या एव च प्रसंगः। प्रा

गपीति। प्रत्ययार्थेन प्रकृतिर्विवाच्यं वस्तु संबंधं वा अवस्थायां वृत्तावस्थायां चेत्यर्थः। वकुश्चेति। चशब्दो भिन्नक्रमः प्राग्वृत्तेरित्यस्यानंतरं द्रष्टव्यः।

ततश्चायमर्थः। प्राग्वृत्तेर्ये लिंगसंख्ये च शब्दात् वृत्तस्य च ये। तेऽतिदेष्टुं [redacted] कामचारः। वृत्तस्येति। प्रत्यासत्तेरिति भावः। वृत्तावुपसर्जनस्या

एवमपि षष्ठी प्राप्नोति। षष्ठ्यपि ह्युच्यते। लुपोक्तत्वात्तस्यार्थस्य द्वितीयस्य प्रयोगेण न भवितव्यं। किं कारणं उक्तार्था

नामप्रयोग इति। आतिदेशिकी तर्हि प्राप्नोति। एवं तर्हि प्रागपि वृत्तेर्युक्तं वृत्तं चापीष्यावतायुक्तं। वकुश्च कामचा

10 रः प्राग्वृत्तेर्लिंगसंख्ये ये। प्रागपि वृत्तेर्युक्तं वनस्पतिभिर्नगरं। वृत्तं वापि युक्तं वनस्पतिभिर्नगरं। वृत्ते च युक्त

वद्भावो विधीयते। कामचारश्च [redacted]कुः प्रयोक्तुः प्राग्वृत्तेर्ये लिंगसंख्ये तेऽतिदेष्टुं। वृत्तस्य वा ये लिंगसंख्ये ते। या

पि कचित्संख्याविशेषावगतिर्भवति। यथा तावकीनो मामकी वता कामचारः वृत्तस्य ये लिंगसंख्ये तेऽतिदेष्टेन प्राग्वृत्तेर्ये॥ ॥

न इति आदेशात्संख्याभेदाध्यवसायः। नपेक्ष प्रत्ययार्थेऽतिदिष्टसंख्यावगमात्प्रकृत्यर्थेपि तदध्यवसायः। यथा आदेशे प्रथमा सामानाधिकरण्यदर्शना

ल्लिटि तदवगतिः। तत्र च वृत्तावुपसर्जनं प्रधानमभिधत्ते इति व्यतिरेकाभावात्संख्यामात्रप्रतिबद्धा प्रातिपदिकार्थमात्रे प्रथमैव भवति। कचि शिकः

दधिकोग्रंथः पठ्यते। अथवा प्राग्वृत्तेर्ये लिंगसंख्ये तेऽतिदिश्येते। षष्ठी कस्मान्न भवति सामान्यातिदेशे विशेषानतिदेश इति। तत्रायमर्थः। वा अव

स्थायां प्रकृत्यर्थस्य ये लिंगसंख्ये ते। ति [illegible] दिश्यते। षष्ठी तु व्यतिरेकनिबंधना। न हि चेत् प्रत्ययार्थस्य व्यतिरेकोस्ति। न च व्यतिरेकसहिता

संख्यातिदिश्यते। संख्यामात्रातिदेशे संबंधसहित संख्यातिदेशाभावात्॥ ॥श्री॥ १०

किमर्थमिति। अंतरेणाप्यतिदेशं लिंगसंख्ये सिद्धे यथा आपो दारा इत्यादाविति प्रश्नः। अत्यन्तेति। अभेदं लिंगसंख्ययोः। अयं वार्त्तिककारेण पठितं। भाष्यकार
स्तु वाचकनिबंधनभेदाव सायेन वतिना व्याचष्टे। अभिधेयवदिति। अभिधानवदिति। अभिधानशब्देनोपसर्जनमभिधीयते तेन द्विप्रधामा थो भि

किमर्थं पुनरिदमुच्यते। अन्यत्राभिधेयस्य व्यक्तिवचनभावाल्लुपि युक्तवदनुदेशः। अन्यत्र अभिधेयवल्लिंगवच
नानि भवंति। क्वान्यत्र। लुकि। लवणः सूपः। लवणा यवागूः। लवणं शाकमिति। अन्यत्राप्यभिधेयवद्व्यक्तिवचनानि
भवंति। लुकि। इहाप्यभिधेयवल्लिंगवचनानि प्राप्नुवंति इष्यंते चाभिधानवत्स्युरिति तच्चांतरेण यत्नं न सिध्य
तीति लुपि युक्तवदनुदेशः। एवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। लुपोऽदर्शनसंज्ञित्वादर्थग
तिर्नोपपद्यते। लुक्तावेयमदर्शनस्य संज्ञा क्रियते। न चाप्यदर्शनस्य लिंगसंख्येऽतिदेष्टुं लुपोऽदर्शनसंज्ञित्वा
दर्थगतिर्नोपपद्यते। न चादर्शनस्याशक्यत्वादर्थगतिः। न वा एष दोषः। किं कारणं। अदर्शनस्याशक्यत्वात्। अद
र्शनस्य लिंगसंख्येऽतिदेष्टुं [illegible] प्रतिकृत्वाऽदर्शनसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात्। योगाभा
वाच्चान्यस्य। अदर्शने च योगो नास्तीति कृत्वाऽदर्शनसहचरितो योऽर्थस्तस्य गतिर्भविष्यति साहचर्यात्। समास
उत्तरपदस्य बहुवचनस्य लुपः। समास उत्तरपदस्य बहुवचनस्य लुपः युक्तवद्भावो वक्तव्यः। मधुरा पंचालाः।
किं प्रयोजनं। नियमार्थं। समास उत्तरपदस्यैव। क्व मा भूत्।

धीयते तस्य चार्थद्वारको लिंगसंख्यायोगः। न वादर्शनस्येति। अभावरू
पत्वादिति भावः। योगाभावादिति। अदर्शनेन प्रकृत्यर्थो न युक्त इत्यर्थः। मधुरा पंचाला इति। वर्त्तिपदार्थ एकार्थोपहितपरस्परांशे धर्मदृष्टिसिद्धे
नियमः क्रियते। अत एव मधुरा गोदा इति भवति न तु मधुरा गोदा विति भवति

भा॰कै॰

विशेषणानां चाजातेः॥ ॥कथमिति। किं सामानाधिकरण्येन संबन्धः विशेषणानां युक्तवद्भावः किं वा वचनेन जातिस्तु यदा विशेष्यं तदा नेति। अथ वैयधिक
२३५ रण्येन जातेर्यानि विशेषणानि तेषां नेति। अजातेरित्यसमर्थसमासः। भवति नानञः संबन्धात्। उभयथा व्याख्यानात् प्रतिषेधस्येति प्रश्नः। आजा

विशेषणानां चाजातेः॥ कथमिदं विज्ञायते जातेर्यद्विशेषणमाहोस्विज्जातेर्यानि विशेषणानीति। किं चातः। यदि विज्ञायते जातेर्यद्विशेषणमिति। सिद्धं पंचाला जनपद इति। सुभिक्षः संपन्नपानीयः बहुमाल्यफल इति न सिध्यति। अथ विज्ञायते जातेर्यानि विशेषणानीति। सिद्धं सुभिक्षः संपन्नपानीयः बहुमाल्यफल इति। पंचाला जनपद इति न सिध्यति। एवं तर्हि नैवं विज्ञायते जातेर्यद्विशेषणमिति नापि जातेर्यानि विशेषणानीति। कथं तर्हि विशेषणानां युक्तवद्भावो भवति आजातेः। आजातिप्रयोगात्। किमर्थं पुनरिदमुच्यते। विशेषणानां वचनं जातिनिवृत्त्यर्थं। जातिनिवृत्त्यर्थोऽयमारंभः। किमुच्यते जातिनिवृत्त्यर्थ इति न पुनर्विशेषणानामपि युक्तवद्भावो यथा स्यादिति। समानाधिकरणत्वात्सिद्धं। समानाधिकरणत्वाद्विशेषणानां युक्तवद्भावो भविष्यति। एवं तार्थोऽनेन। लुपोऽन्यत्रापि जातेर्युक्तवद्भावो न भवति। क्वान्यत्र। बदरी सूक्ष्मकंटका मधुरा वृक्ष इति। किं पुनः कारणमन्यत्रापि जातेर्युक्तवद्भावो न भवति॥ शिवः

तिप्रयोगादिति। सूत्रे आङ् प्रश्लेषः न तु नञः। तत्रायमर्थः। तावद्युक्तवद्भावो भवति यावज्जातिर्न प्रक्रान्ता। यदा तु जातिः प्रक्रम्यते विशेषणत्वेन विशेष्य
त्वेन वा तदा युक्तवद्भावो न भवति। बदरी सूक्ष्मकंटकेति। मधुरादीनां विशेषणं बदर्युपनिपाते तल्लिंगसंख्यायोगः। वृक्षोपनिपाते तु वृक्षाश्रयं लिंगं ११

आविष्टलिंगेति। आविष्टं लिंगं यया साऽऽविष्टलिंगा। नियतलिंगेत्यर्थः। सर्वत्र सर्वेषां लिंगानां संज्ञा वैपि केन चिच्छब्देन किंचित् लिंगं प्रत्याय्यते
इति शब्दविशेषापेक्षयाऽऽविष्टलिंगत्वमुच्यते। उत्पत्तिप्रभृत्या विनाशादिति। जातेरुत्पत्तिविनाशयोगात् शब्दव्यवहारगतावुत्पत्तिविनाशौ गृह्येते
तेना संसारं यावच्छब्दो व्यवहारस्तावज्जातेर्नियतलिंगत्वमित्यर्थः। गुणवचनानामिति। पदसंस्कारपक्षे वाचनिकमेतत्। पदे हि पदांतरनिरपे
क्षे संस्क्रियमाणे नपुंसकं लिंगं सर्वनाम प्राप्तं। एकत्वं च वस्त्वंतरनिरपेक्षत्वात्स्यादिति तमितिमुल्लोपटाइति प्राप्ते भाविनो बहिरंगस्याश्रयस्य

आविष्टलिंगा जातिर्यल्लिंगमुपादाय प्रवर्त्तते। उत्पत्तिप्रभृत्या विनाशात्तल्लिंगं न जहाति। न तर्हीदानी
मयं योगो वक्तव्यः। वक्तव्यश्च। किं प्रयोजनं। इदं तत्र तत्रोच्यते। गुणवचनानां शब्दानामाश्रयतो
लिंगवचनानि भवंतीति तदनेन क्रियते। हरीतक्यादिषु व्यक्तिः। हरीतक्यादिषु व्यक्तिर्भवति युक्त
वद्भावेन। हरीतक्याः फलानि हरीतक्यः फलानि। खलतिकादिषु वचनं भवति युक्तवद्भावेन।
खलतिकस्याद्रूरभवानि वनानि खलतिकं वनानि। ॥श्रीः॥ ॥राम॥ ॥ ॥रामजी॥

संबंधिन्यो लिंगसंख्येऽनेन प्रतिपाद्येते। विशेषणानां गुणवचनानामित्यर्थः। युक्तवद्व्यक्तिवचने। आश्रयवल्लिंगवचने संख्ये इत्यर्थः।
यदा तु वाक्यसंस्कारस्तदायमनुवाद एव। आश्रयविशेषस्य पूर्वमेव प्रक्रमे विशेषणानामपि तल्लिंगत्वात्तद्गतयोर्लिंगसंख्ययोः
सिद्धत्वात्। यदा तु जातिर्विशेषणं तदानेन भवति युक्तवद्भावः। हरीतक्यादिष्विति। नियमार्थमेतत्। तेन वचनमभिधेयाश्रयं भवति।
खलतिकमिति। खलतिर्नाम पर्वतः तस्यादूरभवानि वनानीति लिंगमभिधेयाश्रयमेव भवति।

भा॰कै॰

२३६ मनुष्यलुपीति। विशेषणानामयं प्रतिषेधः। तेन चंचा अभिरूप इत्यभिधेयाश्रये लिंगसंख्ये भवतः। तृणमयः पुरुषश्चंचा तत्सदृशो मनुष्यश्चंचा। संज्ञा
पाणिनिविहितस्य कनो लुम्मनुष्ये इति लुप्॥ ॥तदशिष्यं संज्ञाप्रमाणत्वात्॥ ॥किं याणता इति। प्रत्यासत्तिन्यायाश्रयेण प्रश्नः। नेत्याहेति। प्रत्यासत्तेः सा
मर्थ्यं बलवत्। न हि हि पुमादि संज्ञानां प्रमाणत्वं युक्तवज्जावशास्त्रस्याशिष्यत्वे हेतुरुपपद्यते। संबंधाभावात्। संज्ञानामिति। अवगमः संप्रत्यय इत्यर्थः।
तत्र यथा आपो दाराः सिकता इत्युक्ते लिंगसंख्याविशेषावगतिरुत्पद्यते मानाप्रमाणं। एवं पंचालां वरणा इत्यादावपि। न च पंचालादयो यो

12

मनुष्यलुपि प्रतिषेधः॥ मनुष्यलुपि प्रतिषेधो वक्तव्यः। चंचा अभिरूपः। वध्रिका दर्शनीयः॥
तदशिष्यं संज्ञाप्रमाणत्वात्॥ ॥किं याणता: क्षत्रिया: वृधिपुमा[redacted]:दि संज्ञा: न त्वासामाणपादशि
ष्यं नेत्याह। संज्ञानं संज्ञा॥ ॥जात्याख्यायामेकस्मिन्बहुवचनमन्यतरस्यां॥ ॥इदमयु
क्तं वर्त्तते। किमत्रायुक्तं। बहवस्तेऽर्थास्तत्र युक्तं बहुवचनं। तद्यदेकवचने शासितव्यं ब
हुवचनं शिष्यते एतदयुक्तं। बहुष्वेकवचनमिति नाम वक्तव्यं॥

हरिः शिवः

गिकाः अपि तु जनपदादीनामेताः संज्ञाः ततो योगानवगमात्तद्धितो नोत्पद्यत इति लुबपि न वक्तव्यः। न च सर्वेषां लिंगानां सर्वत्र भावा
केनचिच्छब्देन प्रत्याय्यमानं वस्तु कस्यचिल्लिंगस्य व्यंजनं इति दारादिष्वनियतलिंगता सिद्धा। बहुत्वमप्यवयवगतं शक्तिगतं वा १२
न्यत्र समारोप्यत इति संख्यायोगोपि सिद्धः। एका सिकते साध्वपि शिष्टप्रयोगदर्शनान्नास्ति व्याप्तिः॥ ॥जात्याख्यायां॥ ॥जातिरुपलक्षणं
द्रव्यं तु शब्दार्थ इति द्रव्याश्रयेणाह। इदमयुक्तमिति। बहुष्वेकवचनमिति। अत्र पक्षे जातेरुपलक्षणत्वेनाख्या जात्याख्येय

जातिपदार्थपक्षाश्रयेणेदमारब्धम्। जात्याख्यायामिति। गार्ग्ये गार्ग्यत्वमिति। गोत्रस्यापि जातित्वाभ्युपगमादेतदुक्तं। बहुषु गर्गेषु गार्ग्यत्वस्याभिन्नस्यानेकस्याभिन्नस्याभावात्। एकस्मिंस्तु पिण्डेऽवस्थाभेदानुगताद्युत्पत्त्यादिका जाति। जात्याख्यायामिति वचनान्न गृह्यते। जातिपदार्थवादिमते

अत उत्तरं पठति। जात्याख्यायां सामान्याभिधानादेकार्थ्यं। जात्याख्यायां सामान्याभिधानादैकार्थ्यं भविष्यति। यत्तद्व्रीहौ व्रीहित्वं यवे यवत्वं गार्ग्ये गार्ग्यत्वं तदेकं। तच्च विवक्षितं। तस्यैकत्वादेकवचनं प्राप्नोति। इष्यते च बहुवचनं स्यादिति। तच्चान्तरेण यत्नं न सिध्यतीति जात्याख्यायामेकस्मिन्बहुवचनमेवमर्थमिदमुच्यते। अस्ति प्रयोजनमेतत्। किं तर्हीति। तत्रैकवचनादेश उक्तः। किमुक्तं। व्रीहिभ्य आगत इविषे ऽत्यत्र घेर्ङितीति गुणः प्राप्नोतीति। नैष दोषः। अर्थातिदेशात्सिद्धं। अर्थातिदेशोऽयं नेदं पारिभाषिकस्य वचनस्य ग्रहणं। किं तर्हि। अन्वर्थग्रहणं। उच्यते वचनं। बहूनामर्थानां वचनं बहुवचनमिति। यावद्बहु यादेकोऽर्थो बहुवद्भवतीति तावद्बहुवचनमिति॥ ॥

सर्वस्यापि जातित्वाभ्युपगमादेवमुक्तं। त्वर्थाभिधायिन इति सामर्थ्याद्भिन्नपिण्डविषया जातिराश्रीयते। बहूनामिति। बहूनामर्थानां बहुत्वमेवोच्यत इत्येकस्मिन्नप्यर्थे बहुत्वमनेनातिदिश्यत इति बहुत्वाद्बहुवचनं भवतीति नास्ति स्थान्यादेशभावः। एवं शेषपुनर्व स्वादिसत्रापि द्विवचनबहुवचनशब्दाभ्यां द्वित्वबहुत्वयोरभिधानादर्थातिदेशात्स्थान्यादेशभावः॥

संख्याप्रयोगे इति। एकस्यैव बहुत्वातिदेशः क्रियमाण एकशब्दप्रयोगेपि प्राप्नोतीति प्रतिषेध उच्यते। उभयपदार्थप्राधान्येन प्रत्याख्यातुमा

२३१

संख्याप्रयोगे प्रतिषेधः। संख्याप्रयोगे प्रतिषेधो वक्तव्यः। एको व्रीहिः संपन्नः सुभिक्षं करोति। एको यवः संपन्नः सुभिक्षं करोति। अस्मदो नामयुवप्रत्यययोश्च। अस्मदो नाम्नि युवप्रत्ययप्रयोगे च प्रतिषेधो वक्तव्यः। नामप्रयोगे। अहं देवदत्तो ब्रवीमि ब्रवीमि। अहं यज्ञदत्तो ब्रवीमि। युवप्रत्ययप्रयोगे। अहं गार्ग्यायणो ब्रवीमि। अहं वा

यत्नो ४ त्स्यो ब्रवीमि। युवग्रहणेन नार्थः। अस्मदो नामप्रत्यययोगे नेष्यते। इदमपि सिद्धं भवति। अहं गार्ग्यो ब्रवीमि। अहं वात्स्यो ब्रवीमि। अपर आह। अस्मदः सविशेषणस्य प्रयोगे नेष्यते। इदमपि सिद्धं भवति। अहं पटुर्ब्रवीमि। अहं पण्डितो ब्रवीमि। आशिष्यं वा बहुवत्पृथक्त्वाभिधानात्। आशिष्यो बहुवद्भावः किं कारणं। पृथक्त्वाभिधाना

13

त्। पृथक्त्वेन हि द्रव्याण्यभिधीयन्ते। बहवश्चार्थास्तत्र युक्तं बहुवचनं। किमुच्यते पृथक्त्वाभिधानादिति। यावता इदानीमेवोक्तं सामान्याभिधानादेकार्थ्यमिति। जातिशब्देन हि द्रव्याभिधानं। जातिशब्देन द्रव्यमभिधीयते जातिरपि। कथं पुनर्ज्ञायते जातिशब्देन द्रव्यमभिधीयत इति। एवं कश्चिन्महति गोमण्डले गोपालकमासीनं पृच्छति अस्त्यत्र कांचिद्गां पश्यसीति। स पश्यति पश्यति चायं गाः पृच्छति कांचिदत्र गां पश्यसीति। नूनमस्य द्रव्यं विवक्षितं। तद्यदा द्रव्याभिधानं तदा बहुवचनं भविष्यति। यदा सामान्याभिधानं तदैकवचनं भविष्यति॥ ॥ शिवः

ए। आशिष्यमिति। तत्र कदाचिज्जातेः प्राधान्यं कदाचिद्द्रव्यस्येति यथेष्टं प्रयोग उपपद्यते। ॥श्रीरामजी॥ ॥कृष्णजी॥ ॥राम॥ ९३

अस्मदो द्वयोश्च॥ ॥तद्यदेति। एकेन्द्रियप्रवृत्तौ चेन्द्रियाणामौदासीन्येन संविधातृत्वकर्तृत्वविवक्षेति वयं पश्याम इत्यादि सिद्धं। शरीरइवेन्द्रियेष्वहंकारोत्वात् द्वयपि समेन्द्रियाणामभिधानात् पारतंत्र्यविवक्षायां त्विन्द्रियाणामहं ब्रवीमीत्येकवचनं सिद्धं। युष्मदस्मदोश्चैकशेषेऽस्मदोश्चैकशेषेऽस्मदोऽर्थद्वयाभिधानाद्द्विवचनमिति तात्पर्यं तेन योगेन। संप्रत्ययप्रामाण्याच्च युष्मदादिगुरोः पक्षे बहुवचनं सिद्धं॥ ॥फल्गुनीप्रो

॥ [illegible]

अस्मदो द्वयोश्च॥ अयमपि योगः शक्योऽवक्तुं। कथं अहं ब्रवीमि आवां ब्रूवः वयं ब्रूम इति। इहेदानीमिन्द्रियाणि कदाचित्स्वातंत्र्येण विवक्षितानि भवंति। तद्यथा। इदं मेऽक्षि सुष्ठु पश्यति। अयं मे कर्णः सुष्ठु शृणोतीति। कदाचित्पारतंत्र्येण। अनेनाक्ष्णा सुष्ठु पश्यामि अनेन कर्णेन सुष्ठु शृणोमीति। तद्यदा स्वातंत्र्येण विवक्षा तदा बहुवचनं भविष्यति। यदा पारतंत्र्येण तदैकवचनद्विवचने भविष्यतः॥ ॥फल्गुनीप्रोष्ठपदानां च नक्षत्रे॥ अयमपि योगः शक्योऽवक्तुं। कथं उदिते पूर्वे फल्गुन्यौ उदिताः पूर्वाः फल्गुन्यः। उदिते पूर्वे प्रोष्ठपदे उदिताः पूर्वाः प्रोष्ठपदा इति। फल्गुनीसमीपगते चंद्रमसि फल्गुनीशब्दो वर्तते। बहुवत्त्वेऽर्थात्तत्र युक्तं बहुवचनं। यदा तयोरेवाभिधानं तदा द्विवचनं भविष्यति॥ ॥छन्दसि पुनर्वस्वोरेकवचनं॥ ॥विशाखयोश्च॥ ॥इमावपि योगौ शक्यावक्तुं। कथं। पुनर्वसू विशाखयोः सुपां सुलुक्पूर्वसवर्णेति

ष्ठपदानां च नक्षत्रे॥ बहुवत्त्वेऽर्थ इति। अमावास्यासमीपादिस मंडलं विस्तीर्णं घनं चंद्रेण नक्षत्राणां योगोऽस्त्येवेति तदापि बहुवचनं। अर्धर्चाः ... इति न्यायेन सिद्धं। एकस्यां तु तारायां फल्गुनीशब्देन वर्तत इत्येकवचनाभावः। सर्वत्र च लौकिकः प्रयोगः प्रामाण्येनाश्रयणीय इत्य

भा॰कै॰

तिष्यपुनर्वस्वोः॥ नक्षत्र इति किमर्थमिति। तिष्यपुनर्वसवो माणवका इत्यत्र गौणत्वान्न भविष्यतीति प्रश्नः। उत्तरवादिनस्त्वयमभिप्रायः। ति
२३८ ष्येण युक्तः कालस्तिष्यः। तिष्ये जातो माणवक इति यौगिकत्वान्नास्ति गौणत्वं। ज्योतिषि वर्त्तत इति। नन्वेकेनैव नक्षत्रग्रहणेन कालमाणवकयो
र्निवृत्तिः सिद्धा तत्र किं द्वितीयेन नक्षत्रग्रहणेन। नैतदस्ति। अंतरंगः कालः बहिरंगो माणवक इत्यंतरंगस्यैव कालस्यैकेन नक्षत्रग्रहणेन नि
वृत्तिः स्यात्। यथाऽकर्मकश्चेत्यंतरंगं ड्यंकर्म निर्दिश्यते न कालकर्मेति मासमास्यते देवदत्तेनेत्यत्रापि भावे लकारः सिद्धो भवति। द्विती

14

तिष्यपुनर्वस्वोर्नक्षत्रद्वन्द्वे बहुवचनस्य द्विवचनं नित्यं॥ ॥तिष्यपुनर्वस्वोरिति किमर्थं। कृत्तिकारोहि
ण्यः॥ नक्षत्र इति किमर्थं। तिष्यश्च माणवकः पुनर्वसुश्च माणवकौ तिष्यपुनर्वसवः॥ अथ नक्षत्र इति वर्त्त
माने पुनर्नक्षत्रग्रहणं किमर्थं। अयं तिष्यपुनर्वसुशब्दोऽस्त्येव ज्योतिषि वर्त्तते। अस्ति च कालवाची। त
द्यथा। बहवस्तिष्यपुनर्वसवोऽतिक्रांताः। कतरेण तिष्येणागत इति। तद्यो ज्योतिषि वर्त्तते तस्येदं ग्रहणं। अ
थवा नक्षत्र इति वर्त्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनं। विशेषस्यमपि तिष्यपुनर्वस्वोः कार्यं यथा स्यात्। त
तिष्यपुनर्वस्वोर्नक्षत्राणि यलोपो वक्तव्य इति नक्षत्रग्रहणं न कर्त्तव्यं भवति। अथवा ×तदपि नक्षत्रस्यैव× नक्ष
त्र इति वर्त्तमाने पुनर्नक्षत्रग्रहणस्यैतत्प्रयोजनं तिष्यपुनर्वसुपर्याय[illegible]वाचिनामपि यथा स्यात्। तिष्यपुन

शिवः

येन नक्षत्रग्रहणेन बहिरंगोऽपि माणवको निवर्त्यते। ननु नक्षत्रद्वंद्व इत्युक्तेऽपर्यां कालमाणवकयोर्निवृत्तिः सिद्धैवेत्यत आह अथवेति। तिष्यपुनर्वस्वोरि
ति योगविभागः क्रियते। नक्षत्र इति चानुवर्त्तते। तेन यावत्किंचित्तिष्यपुनर्वस्वोः कार्यं तन्नक्षत्रयोरेव भवति। विधेयः। यत्नोपेक्षणमेव न नक्षत्रग्र १४
हणमिति समभिप्रेत्याह। अथवेति। स्वरूपग्रहणप्राप्तेऽर्थग्रहणार्थं द्वितीयं नक्षत्रग्रहणं। पुनर्नक्षत्रग्रहणे सत्यर्थस्यैवायमनपेक्षितोपात्तशब्दस्यातिदेश
इति पर्यायाणामपि ग्रहणं सिद्धं।

भा॰कै॰
२३८ तिष्यपुनर्वसव उन्मुग्धा इति। केचिदाहुः पुरुषा अन्यपदार्थः नक्षत्राणां तु बहुत्वाद्द्विवचनप्रसंगः। अन्ये त्वाहुः नक्षत्रग्रहणात्तत्र समासस्याग्रहणे पुरुषाणामन्यपदार्थत्वे प्रसंग एव नास्तीत्यवयवेन विग्रहः समुदायः समासार्थ इति तिष्यादय एव विपर्यासविषया बहुत्वेनोच्यंते इत्यस्ति प्रसंगः। जातिर्द्वंद्व इति। कथमनयोर्जातिशब्दत्वं यावता जातिप्रदेशेषु भिन्नाधारा जातिरिष्यते न त्वेकस्याभेदकल्पितेभेदे कवस्त्वविषया। एवं तर्हि प्रतिमन्वंतरमन्यान्यनक्षत्राणीति दर्शने भिन्नाधारा जातिः संभवतीति न कश्चिद्दोषः। सर्वो द्वन्द्व इति। अप्राणि

अथ द्वन्द्व इति किमर्थं। यस्तिष्यस्तौ पुनर्वसू येषां त इमे तिष्यपुनर्वसव उन्मुग्धाः। बहुवचनस्येति किमर्थं। उदितं तिष्यपुनर्वस्वोः कथं [redacted] चात्रैकवचनं। जातिर्द्वन्द्व एकवद्भवतीति। अप्राणिनामिति प्रतिषेधः प्राप्नोति। एवं तर्हि सिद्धे सति यद्बहुवचनग्रहणं करोति तज्ज्ञापयत्याचार्यः सर्वो द्वन्द्वो विभाषयैकवद्भवतीति। किमेतस्य ज्ञापने प्रयोजनं। ब्राभ्रवशालंकायनं ब्राभ्रवशालंकायना इत्येतत्सिद्धं भवति। अथवा नात्र भवन्तः प्राणिनः प्राणा एवात्र भवन्तः॥ ॥इति श्रीभगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य द्वितीये पादे द्वितीयमाह्निकम्॥

जातिर्द्वंद्वो नित्यमेकवद्भवति प्राणिद्वंद्वस्तु विकल्पेन। न्यायसिद्धस्यार्थो बहुवचनग्रहणेन लिंगेन सूच्यते एकवद्भावप्रकरणं हि विषयविभागार्थमारब्धं प्राण्यंगादीनां समाहार एवेति न तु प्राण्यंगादीनामेव समाहार इति। तत्रस्तत्करणानुपात्तानां समाहारेतरेतरयोगयोर्द्वन्द्वः सिद्ध एव भवेति। न ह्येतेषु लोके प्राणित्वव्यवहारः सिद्ध इति भावः। शिवः
प्राणा एवेति। तदधीनास्थितित्वात्प्राणिनामेत एव प्राणा उच्यंते॥ ॥इत्युपाध्यायजैयटपुत्रकैयटकृते महाभाष्यप्रदीपे प्रथमस्याध्याय १५

15

भाष्ये कैय्यट द्वितीयचरण[illegible]तीयाह्निक॥



माण्डूक्ये द्वितीयाध्यायप्रारम्भः॥



1

भा·के·

१

श्रीगणेशाय नमः॥ ॥समर्थः पदविधिः॥ ॥विधिरिति कोयं शब्द इति। अर्थानिश्चयात्संदेहे सति प्रश्नः। किं भावसाधनः उत कर्मसाधनः। तत्र भा
वसाधने पदानां विधीयमानत्वात्कर्मणि षष्ठी इतरत्र शेष [redacted] षष्ठी। तत्रयेषामर्थ [redacted] भेदाच्छब्दभेद इति दर्शनं सादृश्यनिबंधनाच प्रसिद्धि
ज्ञातद्दर्शने क इति प्रश्नो विधिशब्दनिर्वचनायाये त्वर्थभेदेपि शब्दस्यैकत्वमिच्छंति तत्पक्षे ऽर्थभेदाच्छब्दभेदमारोप्य क इति प्रश्नः। विपूर्वाद्धि
ति। विधविधान इत्यस्मात् ण्यादिकेन प्रत्ययांतस्य निरत्यर्थे विपूर्वो धान इत्युक्तं। स्वरे चानयोर्भेदः। इन्प्रत्ययांतस्याद्युदात्तत्वात्किप्रत्ययांतस्यां
तोदात्तत्वात्तस्यैव प्रयोगदर्शनमन्तरेणैकः। कर्मसाधन इति। एतद्भावसाधनमिरत्यर्थमुक्तं। विधीयत इति वाक्यदर्शनं स्वरूपप्रतिपत्त्यर्थं।
किं पुनरिति। कार्यविशेषस्यैवानिर्देशात्प्रश्नः। इतरेण समासाः कार्यविशेषान्यर्थाः श्रूयंते। समास इति। अनंतरस्यापि परांगवद्भावस्यात्म

श्रीः॥ समर्थः पदविधिः॥ ॥विधिरिति कोयं शब्दः। विपूर्वाद्धानः कर्मसाधन इकारो विधीयते विधिरिति। किंपु
नर्विधीयते। समासो विभक्तिविधानं परांगवद्भावश्च। किं पुनरयमधिकार आहोस्वित्परिभाषा॥ ॥श्रीः॥ ॥

विषयत्वादनादरात्तन्निमित्तग्रहणाच्चातिप्रसंगनिरासस्य सिद्धत्वान्मुख्यप्रयोजनत्वाभावात्समासनिर्देशः कृतः। तत्र समासशब्देन सं
ज्ञा वोच्यते समुदायो वा संज्ञी। विभक्तिविधानशब्देन सामान्यविहितानां विभक्तीनां कर्मणि द्वितीयेत्यादिनायो नियमः स उच्यते एवं हि प
दविधिर्भवति। अथाप्येकवाक्यताश्रयणेन विभक्तीनां विधानं तथापि पदांतरसंबंधेन यासां विभक्तीनां विधानमंतरंगत्वेनोपयुक्त इति ति
द्विभक्तीनां नेर्विशब्द इति तदाश्रयेण पदविधित्वमस्त्येव। तथा चोक्तं। निरपि पदं विधिरपि पदमिति। तत्र विभक्त्यवच्छिन्नत्वाद्विशिष्टं विधा
नं कर्मविधानं क्रियाया भवति। यथोक्तं। सामान्यपुंभेरवयवपुष्टिः कर्मेति। कार्यविशेषाभिर्देशाद्स्य पाणमेवगत्यपराशेषु रूपद्वयं दृष्टुं
ति। किं पुनरिति। नन्वधिकारेस्मिन्पदविधिरित्यस्य ग्रहणमनर्थकं उत्तरेषां पदविधित्वाव्यभिचारात्। तस्मात्पदविधिग्रहणात्परिभाषात्वमिष्य
यानुपपत्तिः। एवं तर्हि युक्तायुक्तत्वापेक्षया प्रश्नः। तत्र यद्यधिकारपक्षस्य युक्तत्वं तदा न कर्तव्यं पदविधिग्रहणं परिभाषायां युक्तत्वेकर्तव्यं। अधि

शिवः

१

कः पुनरिति। अन्योन्यप्रश्नो विज्ञेयः। आद्येन तु तद्विषज्ञेन भवितव्यं। अन्यथा किं पुनरयमधिकार इति प्रश्नो नोपपद्यते। अधिकारः प्रतियोगमिति। स्वरू
पेण ... फलाख्यानं तद्वारेण स्वरूपावबोधार्थं। अधिक्रियमाणस्य प्रतियोगमुपस्थाने सति तदनिर्देशः फलं संपद्यते। परिभाषा पुनरिति। लिंगोपा
दानेन परिभाषा क्रियमाणा यत्र यत्र तल्लिंगोपालंभः तद्यत्नोत्थाली सर्वः प्रदेशान्तरेषु परार्थता सामान्यादधिकारपरिभाषयोरभेदेन व्यवह
रो नाव्यकारस्य अधिकारेनामत्रिः प्रकार इति। तथा द्वयोः परिभाषयोः सावकाशयोः समभवा। स्थितयोरिति। कः पुनरत्रेति। कस्मिन्नस्येपले
सलाघवं भवति कस्मिन्वा गौरवमिति प्रश्नः। स्वरयितव्यमिति। स्वरितगुणेन युक्तं समर्थग्रहणं पठितव्यमित्यर्थः। तत्र स्वरितो गुणः क्रियार

कः पुनरधिकारपरिभाषयोर्विशेषः। अधिकारः प्रतियोगं तस्यानिर्देशार्थ इति योगे योगे उपतिष्ठते। परिभाषा पुन
रेकदेशस्था सती कृत्स्नं शास्त्रमभिज्वलयति प्रदीपवत्। तद्यथा। प्रदीपः सुप्रज्वलितः एकदेशस्थः सर्वं वेश्माभि
ज्वलयति। कः पुनरत्र प्रयत्नविशेषः। अधिकारे सति स्वरयितव्यं। परिभाषायां तु सर्वमपेक्ष्यं। तदेतन्न परं हि
तं भवति। एकार्थीभावो वा सामर्थ्यं व्यपेक्षा वेति। तत्रैकार्थीभावे सामर्थ्येऽधिकारे च सति समास एकः संगृहीतो
भवति। विभक्तिविधानं परांगवद्भावश्चासंगृहीतः। व्यपेक्षायां पुनः सामर्थ्येऽधिकारे च सति विभक्तिविधा
नं परांगवद्भावश्च संगृहीतो भवति। समासस्त्वेकोऽसंगृहीतः। अन्यत्र खल्वपि समर्थग्रहणानि युक्तग्रहणा

येण स्वरयितव्यमिति निर्दिष्टः यथा श्वेतो गुणः श्वेततेति। पदविधिग्रहणं चात्र पक्षे न कर्तव्यमित्य [illegible] नि च कर्तव्यानि भवंति।
र्थादुक्तं भवति। सर्वमपेक्ष्यमिति। यावंति पदकार्याणि तानि सर्वाण्यपेक्ष्य पदविधिशब्दोपादानेन च परिभाषा कर्तव्येत्यर्थः। अन्यास्वपि परिभा
षासु यल्लिंगमुपादीयते तल्लिंगयुक्तापेक्षा क्रियते। द्वैतमिति। द्वयोर्भावो द्विता। तत्र भवं द्वैतं संशयरूपं ज्ञानमुच्यते। अपवाद्य[illegible]नितं प्रक
रणद्वयेन विरुद्धत्वाद्भिन्नाधारवर्त्तिनायुक्तं वस्तु तत्र भवं द्वैतं तदेव संशयस्थानं। एकार्थीभाव इति [illegible]
प्रधानार्थोपादानादर्थान्तराभिधायकत्व एकार्थीभावः परस्परं कांक्षारूपा व्यपेक्षा इति समास एकः इति [illegible]

द्वैतं २

2

[illegible]

भा.कै. नचेति। एकार्थीभावः सामर्थ्यमधिकार इत्येकः पक्षः। व्यपेक्षासामर्थ्यमधिकार इति द्वितीयः पक्षः। द्विविधं सामर्थ्यमधिकार इति तृतीयः। एवं परिभा-
२ षायामपि त्रयः पक्षा इति षट् पक्षाः संभवेयुः। एकार्थीभावः परिभाषा चेति निर्णयः। भिन्नतरकमिति। उभयविधे सामर्थ्ये व्याश्रीयमाणे यस्य भेदा-
स्तस्य भेदः स्यात्। भिन्ने न सामर्थ्ये न भिन्नेषु वाक्येषु उपस्थानात्। व्यपेक्षायामपि सामर्थ्ये यद्यपि स्तत्त्वमभिन्नं भवति तथाप्येकार्थीभावे
सामर्थ्ये दोषाभावात्प्रकर्षयोगात् भिन्नतरकमित्युच्यते। तत्र परशंगवद्भावे तन्निमित्तग्रहणात् दोषाभावः। विभक्तिविधानेपि कारकवि-
भक्तिषु क्रियाकारकयोर्व्यपेक्षां विना भावितादुपपदविभक्तिषु तु कर्मग्रहणसद्भावात् क्वचित् क्रियायोगस्याक्षेपादेतदनुपस्थानेऽपि न दो-

2 अपेक्षायां पुनः सामर्थ्ये परिभाषायां च सत्यां यावान् व्याकरणे पदगंधो नाम स सर्वः संगृहीतो भवति। स-
मासस्त्वेकोऽसंगृहीतः। तत्रैकार्थीभावः सामर्थ्यं परिभाषा चेत्येवं तत्त्वमभिन्नतरकं भवति। एवमपि कश्चि-
दकर्तव्यं क्रियते। कश्चिच्च कर्तव्यं न क्रियते। अकर्तव्यं तावत् क्रियते। समर्थानां प्रथमा वेति। कर्तव्यं न क्रियते। क-
र्मण्यण्। समर्थादिति। ननु च गम्यते तत्र सामर्थ्यं कुंभकारो नगरकार इति। सत्यं गम्यते। उत्पन्ने तु प्रत्यये स एव
तावत्समर्थादुत्पाद्यः॥

षः। परिभाषायां च सत्यां सुप्रभृतयः सर्वे विधयः संगृहीता भवन्ति। एकार्थीभावे चेत्याश्रिते न त्रयुक्तं ग्रहणं सम-
र्थग्रहणं च कृतं भवेतिति तत्रापि न दोषः। समर्थानामिति। घकालतनेषु कालनाम्न इत्यलुग्विधानात् क्वचिद्विभक्त्यंतानां तद्धितउत्पत्तेरिति
पदविधित्वादेतत्परिभाषोपस्थितेरसामर्थ्ये प्रत्ययाप्रसंगात्। कर्मण्यणिति। पंचकप्रातिपदिकार्थपक्षे प्रातिपदिकेनेव कर्मणउपा- शिवः
दानान्नास्ति पदविधित्वं। त्रिकादिपक्षे तु विभक्तिवाच्यत्वात्कर्मणः पदविधित्वादेतत्परिभाषोपस्थानान्नास्ति दोषः। ननु चेति। यदि कुंभकारश-
ब्दः सामर्थ्याभिधायी वा सामर्थ्याभिधायी च स्यात्ततोऽसमर्थाभिधायिप्रयोगनिरसनार्थं यत्नः कर्तव्यः स्यान्न तु तत्प्रत्ययोत्पत्त्यर्थः। स एव तावदिति। यथा २
समासादयोऽसमर्थानां मा भूवन्निति समर्थवचनं क्रियते तद्वत्प्रत्ययोऽपि समर्थग्रहणमसामर्थ्ये प्रत्ययनिवृत्त्यर्थं कर्तव्यमित्यर्थः। प्रतिविधानं तु सु-

[illegible]

अथेति। प्रधानपर्यनुयोगद्वारेणास्य सूत्रस्यैवाक्षेपः। यद्यप्यनेन सामर्थ्यं न विधीयते न हि स्वतो ऽसमर्थस्य सामर्थ्यं वचनेन कर्त्तुं पार्यते। तथापि पदद्वविधौ सामर्थ्यापेक्ष्या
नार्थत्वात् अस्य समर्थपदस्य प्राधान्यमुच्यते। समस्यत इति। यद्यपि समाससंज्ञा मात्रं विधीयते। तथाप्यबुधबोधनाय भिन्नयोः शब्दयोः संश्लेषः प्र
क्रियायां क्रियत इति समस्यत इत्युक्तं। पश्येति। असति सूत्रे द्वितीयान्तमात्रं श्रितादिभिः समस्येत। अविशेषात्। एकार्थीभावाभावेपि वचनात् समास

अथ समर्थग्रहणं किमर्थं। वक्ष्यति द्वितीया श्रिता [redacted] दिभिः समस्यते। कष्टं श्रितो नरकं श्रित इ
ति। समर्थग्रहणं किमर्थं। पश्य देवदत्त कष्टं श्रितो विश्वमित्रो गुरुकुलं। तृतीया तत्कृतार्थेन गुणवचनेन। शंकुला
खंडः किरिकाणः। समर्थग्रहणं किमर्थं। किं करिष्यसि शंकुलया खंडो सो धावत्युपलेन। चतुर्थी तदर्थार्थब
लिहितसुखरक्षितैः। गोहितं वृषभहितं। समर्थग्रहणं किमर्थं। सुखं गोभ्यो हितं देवदत्ताय। पंचमी भयेन। वृक
इतिभावः। आ[redacted]त्मनेपदसंज्ञया परस्मैपदसंज्ञाया बाधनं यथा स्यादित्येवमर्थं त्विह प्रकरणे अनयोः संज्ञयोर्विधानं। सामान्यापेक्षं च ज्ञापकमिलात्मनेपदसं
ज्ञयापि पुरुषसंज्ञानां समावेशो भवति। अन्यथा पुरुषसंज्ञाः सावकाशास्त्वस्य अनवकाशया आत्मनेपदसंज्ञया बाध्येरन्॥ ॥तिङस्त्रीणि॥ ॥तिङां षट्
त्रिकाः संज्ञास्तिस्र इति वैषम्यात् यथासंख्यं न प्राप्नोति [redacted]तिमत्वाह। प्रथमेति। आत्मनेपदग्रहणे त्वपप्रक्रियमाणे सत्त्वं परस्मैपदविषयमेव भवतीति वा
क्यभेदे एकेन वाक्येन परस्मैपदानां त्रयाणां तिस्रः संज्ञा द्वितीयेनात्मनेपदानामिति सिद्धमिष्टं॥

वैषम्यादिति। यद्यप्येकैकस्य त्रिकस्यानेक संज्ञाकरणे प्रयोजनाभावः। तथापि कस्यचित्त्रिकस्य काचित्संज्ञेत्येतावन्मात्रे तु यथाभिमतविषयविभागला
भः। आनुपूर्व्यं वचनं चेति। अन्यस्त्वेत्रिकाणामुच्चारणं नास्ति। केवलं त्रीणि त्रीणीति वा ह्यप्रतिपत्तिस्तेषां। तच्चानियमप्रसंगे नियमार्थमानुपूर्व्य[redacted]
ग्रहणं च कर्त्तव्यमित्यर्थः। एकशेषनिर्द्देशादिति। आकृत्यभिधानाश्रयेण प्रत्याख्यातं सूत्रं शास्त्रप्रक्रियासंपत्त्यर्थमेव संपद्यते। अथैतस्मिन्क्रिये(?)ऽस

अक्रियमाणे ह्यात्मनेपदग्रहणे तिस्रः संज्ञाः षट्संज्ञिनः वैषम्यात्संख्यातानुदेशो न स्यात्। क्रियमाणेऽपि चात्मनेप
दग्रहणे आनुपूर्व्यवचनं च। आनुपूर्व्यवचनं च कर्त्तव्यं। अक्रियमाणे हि कस्यचिदेव त्रिकस्य प्रथमसंज्ञा स्यात्। कस्यचि
देव मध्यमसंज्ञा [redacted] कस्यचिदेवोत्तमसंज्ञा स्यात्। न वैकशेषनिर्द्देशात्। यत्तावदुच्यते आत्मनेपदग्रहणं कर्त्तव्यं
समसंख्यामिति तन्न कर्त्तव्यं। संज्ञा अपि षडेव निर्द्दिश्यन्ते। कथं। एकशेषनिर्द्देशात्। एकशेषनिर्द्देशात्। एकशेषनि
र्द्देशोऽयं। अथैकस्मिन्नेकशेषनिर्द्देशे सति किमयं कृते केशेषाणां द्वन्द्वः प्रथमश्च प्रथमश्च प्रथमौ। मध्यमश्च मध्यमश्च
मध्यमौ। उत्तमश्चोत्तमश्चोत्तमौ। प्रथमौ च मध्यमौ चोत्तमौ च प्रथममध्यमोत्तमा इति। आहोस्वित्कृतद्वन्द्वानामेक
शेषः। प्रथमश्च मध्यमश्चोत्तमश्च प्रथममध्यमोत्तमाः। प्रथममध्यमोत्तमाश्च प्रथममध्यमोत्तमाश्च प्रथमम
ध्यमोत्तमा इति। किं चातः। यदि कृतैकशेषाणां द्वन्द्वः प्रथममध्यमयोः प्रथमसंज्ञा प्राप्नोति। उत्तमप्रथमयोः मध्यम[redacted]ः सं
ज्ञा प्राप्नोति। मध्यमोत्तमयोरुत्तमसंज्ञा प्राप्नोति। अथ कृतद्वन्द्वानामेकशेषः न दोषो भवति। यथा न दोषस्तथास्तु। किं पुनरत्र

यथासंभवात्संभवः। प्रथममध्यमयोरिति। प्रसिद्धिमात्रमित्येतदुच्यते। व्याख्यानान्निर्णय इति भला
न्याय्यं। उभयमित्याह। उभयं हि दृश्यते। तद्यथा। बहुशु
ष्कः कृतद्वन्द्वानामिति। बहुशाकं किटकमिति। एकशेषे कृते द्वन्द्वः। जातिरप्राणिनामित्येकवद्भावः। बहुशब्दश्चात्र वैपुल्यवचनस्तेनैकवचनं। समुदायस्य वैपुल्य
मवयवानां प्रचयाद्भवति। यदा तु समाहारद्वन्द्वे कृते [redacted] एकशेषः क्रियते तदा बहूनि शाककिटकानीति भवति॥ शिवः

लोकत इति। यथायं क्तिस्थयुग्मालणेषु द्वौ द्वौ ग्रहणवानयेत्युक्ते आनुपूर्व्येणानयनं भवति न तु व्युत्क्रमेण तद्वदिहापि भवतीति भावः। विहायस्येति। विह आयस्य स्तत्रसमुदाभ्यां द्वाभ्यामग्निरूपस्येय इत्युक्ते आनुपूर्व्येणाग्रहणं स्यात्तेन न तु व्युत्क्रमेण॥ ॥विभक्तिश्च॥ ॥सतिप्रयोजने स्वरितत्वप्रतिबंधश नामनुवर्तमनतुवृत्ती भवतः। लिंगदर्शनं च पक्षद्वयेप्यस्तीति संदेहात्प्रश्नः। आणित्रालीति। आत्वं न प्राप्नोतीति। न ह्यत्र न शुद्धात्परं युगपत्त्रिकम स्ति। प्रथमयोरिति। प्रत्येकं संज्ञित्वे विभक्तिसमुदायस्य विभक्तिग्रहणे नाग्रहणात् प्रथमयोरिति समुदायद्वयापेक्षानुपपत्तेः प्रत्ययोरेव द्वयो

यद्यप्युच्यते क्रियमाणे त्वात्मनेपदग्रहणे आनुपूर्व्यवचनं कर्तव्यमिति। न कर्तव्यं। लोकत एतत्सिद्धं। तद्यथा लोके विहायसः द्वाभ्यां द्वाभ्यामग्निरूपस्येय इति न चोच्यते आनुपूर्व्येणेति आनुपूर्व्येण चोपस्थाप्यत इति॥ ॥विभक्तिश्च॥ ॥आणित्राणीत्यनुवर्तते इत्तारेता। किं चातः। यद्यनुवर्तते अत्र न आविभक्तावित्यात्वं न प्राप्नोति। अथ निवृत्तं। प्रथमयोः पूर्वसवर्ण इत्यत्र प्रथमयोरेव ग्रहणं प्राप्नोति। यथेच्छसि तथास्तु। अस्तु तावदनुवर्तत इति। ननु चोक्तमत्र न आविभक्तावित्यात्वं न प्राप्नोतीति। वचनाद्भविष्यति। अथवा पुनरस्तु निवृत्तं। ननु चोक्तं प्रथमयोः पूर्वसवर्ण इति प्रथमयोरेव ग्रहणं प्राप्नोतीति। नैष दोषः। अचीत्यनुवर्तते। न चाजादी प्रथमौ प्रत्ययौ स्तः। ननु चोक्तमजादी यौ प्रथमौ अजादीनां वा यौ प्रथमाविति।

ग्रहणं प्राप्नोतीत्यर्थः। वचनादिति। त्रिकस्य युगपत्प्रयोगाभावात्सामर्थ्यात्समुदाय। वृत्तिर्विभक्तिशब्दो द्वेऽवयवे चार्तिष्यत इति भावः। न चाजादी इति। सुशब्दो शसो प्रथमो [redacted] मुख्यावजादिर्न भवतीति प्रत्यययोरजादित्वासंभवाद् अवयवशब्दस्त्रिके समुदाये उपचाराद्वर्तत इति भावः। अजादी यावि ति। अजादी विशेष्यौ प्रथमयोरिति विशेषणं तेनौजसोरेव ग्रहणमित्यर्थः। अजादीनां वेति। अचीत्यनुवर्तते। तत्र व्याख्यानात्तदादिविधिर्नि र्द्धारणं चाश्रयिष्यते अजादिषु यौ प्रथमाविति। एवमप्यौजसोरेव ग्रहणं स्यादिति बोध्यं॥

यत्तदीति। एतान्नगाः पश्येत्यत्र नत्वनिवृत्त्यर्थं तस्मादित्युच्यते। औजसोरेव ग्रहणे ऽनंतरः पूर्वसवर्णदीर्घो ऽनु नरः शसः सकारो न भवतीति किं तस्मादिति
केन। तन्क्रियमाणं त्रिकद्वयसंग्रहणस्य ज्ञापकं संपद्यते॥ ॥युष्म॥ ॥किमर्थमिति। किं लादेशविधानवाक्येनैकवाक्यत्वाद्विध्यर्थमिदं। अपविहिते
ष्वलादेशेषु नियमार्थमिदमिति प्रश्नः। तत्रैकवाक्यतापक्षे ऽनंतरेतरग्रंथपरिहारणप्रभावेनासंज्ञाप्रयितव्येति प्रतिपत्तिलाघवार्थं वाक्यभेदे
यत्नेदं तस्माच्छसो नः पुंसीत्यनुक्रांतं पूर्वसवर्णप्रतिनिर्देशति। तज्ज्ञापयत्याचार्यः विभक्तौ ग्रहणमिति। अथवा
वचनग्रहणमेव कुर्यात् औजसोः पूर्वसवर्ण इति॥ ॥युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः॥ ॥अस्म
द्युत्तमः॥ ॥शेषे प्रथमः॥ ॥किमर्थमिदमुच्यते। युष्मदस्मच्छेषवचनं नियमार्थं। नियमार्थो ऽयमारंभः। अथैतस्मि
न्नियमार्थे विज्ञायमाने किमयमुपपदनियमः युष्मदि मध्यम एव अस्मद्युत्तम एव। आहोस्वित्पुरुषनियमः युष्म

द्येव मध्यमः अस्मद्येवोत्तम इति। किं चातः। यदि पुरुषनियमः शेषग्रहणं कर्त्तव्यं शेषे प्रथम इति। किं कारणं। मध्य
मोत्तमौ युष्मदस्मदोर्नियतौ। तत्र प्रथमो ऽपि प्राप्नोति। तत्र शेषग्रहणं कर्त्तव्यं प्रथमनियमार्थं। शेष एव प्रथमो
भवति नान्यत्रेति। अथाप्युपपदनियमः एवमपि शेषग्रहणं कर्त्तव्यं। शेषे प्रथम इति। युष्मदस्मदोर्नियते मध्य
मोत्तमौ अनियतौ तौ शेषे ऽपि प्राप्नुतः। तत्र शेषग्रहणं शेषनियमार्थं। शेषे प्रथम एव भवति नान्य इति। उपपद
नियमे शेषग्रहणं शक्यमकर्तुं। कथं। युष्मदस्मदोर्नियते मध्यमोत्तमावनियतौ तौ शेषे ऽपि प्राप्नुतः। ततो वक्ष्यामि प्र

ननियमपक्षे ऽस्मिन्दर्शयितुमाह। युष्मदस्मादिति। किमयमिति। ननु प्रत्ययस्य प्राधान्यात्तन्नियम एव युक्तः। नैष दोषः। समुदायस्य संचिकीर्षितत्वात्प्रा
धान्यं। तदंगत्वात्तु प्रत्ययोपपदयोर्द्वयोरप्यप्राधान्यमुक्तमिति तु नयोरपि नियमः शक्यंते। युष्मदि मध्यम एवेति। तुल्यजातीयस्यार्थे क्ते नियमफल
त्वादुत्तमप्रथमौ निवार्येते न तज्जादयः। तज्जादिविधिसामर्थ्याद्धि नास्ति तेषां निवारणं।

यत्र प्रथमश्चेति। युष्मदि मध्यम एव अस्मद्युत्तम एवेति युष्मदस्मदोर्नियतत्वात्तयोः पुरुषांतरं न भवतीति मध्यमोत्तमयोश्च नियतत्वात्। शेषेपि तत्प्रसंगे प्रथम इ
ति सूत्रं आरभ्यमाणं मध्यमोत्तमयोर्निवारणार्थत्वं संपद्यते। प्रथम एव भवति न मध्यमोत्तमाविति। यथा समे देशे यजेतेति पाक्षिकी प्राप्तो नियमः। नत्वेति।
उभयथा नियमे इत्यर्थः। शेषत्वादिति। यत्र केवले युष्मदस्मदी उपपदे स एवाशेषस्तत्र मा भूत्प्रथमः। यत्र त्वन्यसाहित्ये तेस्तः तत्र समुदायस्य युष्मदस्मदस्म

यत्र प्रथमश्चान्यश्च प्राप्नोति तत्र प्रथम एव भवतीति। तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वात्। तत्र युष्मदस्मदन्ये
षु प्रथमस्य प्रतिषेधो वक्तव्यः। त्वं च देवदत्तश्च पचथः। अहं च देवदत्तश्च पचावः। किं कारणं। शेषत्वात्। शेषे प्रथ
म इति प्रथमः प्राप्नोति। सिद्धं तु युष्मदस्मदोः प्रतिषेधात्। सिद्धमेतत्। कथं। युष्मदस्मदोः प्रतिषेधात्। शेषे प्रथमः यु
ष्मदोर्नेति वक्तव्यं। युष्मदि मध्यमादस्मद्युत्तमो विप्रतिषेधेन। युष्मदि मध्यमादस्मद्युत्तमो विप्रतिषेधेन। युष्मदि
मध्यम इत्यस्यावकाशः। त्वं पचसि। अस्मद्युत्तम इत्यस्यावकाशः। अहं पचामि। इहोभयं प्राप्नोति। त्वं चाहं च पचावः। अ
स्मद्युत्तम इत्येतद्भवति विप्रतिषेधेन। स तर्हि विप्रतिषेधो वक्तव्यः। न वक्तव्यः। त्यदादीनां यद्यत्परं तत्तच्छिष्यत इत्येव
मदस्मदः शेषो भविष्यति। तत्रास्मद्युत्तम इत्येव सिद्धं। अनेकशेषभावार्थं तु। अनेकशेषभावार्थं तु स विप्रतिषेधो व
क्तव्यः। यदा चैकशेषो न। कदा चैकशेषो न। सहविवक्षायामेकशेषः। यदा न सहविवक्षा तदैकशेषो न॥

अग्रहणेनाग्रहणाच्चेत्यत्वमेवेति प्रथमप्रतिषेधो वक्तव्यः। स एवाह। सिद्धं त्विति। यत्र शेषे युष्मदस्मदी स्तस्तत्र शेषे प्रथमो नेति वक्तव्यमित्यर्थः। चोदक आह। स
तर्हीति। आचार्यदेशीय आह। न वक्तव्य इति। आवां पचाव इति। अस्मदः शेष इति। आवां पचाव इति। तत्रास्मद्युत्तम इति। ननु शिष्यमाणस्यास्मदो युष्मदर्थत्वाद्युष्म
समानेपि युष्मदि तदर्थगतो मध्यमविधानात्तस्याप्यत्र प्रसंग इति विप्रतिषेध एवाश्रयितव्यः। अत्राह। युष्मदर्थे सत्यपि वर्तमानस्यास्मद्रूपत्वमारोप्यते तदा
भेदाभावात् अस्मदुपपदनिमित्तः सिद्ध उत्तम एवेत्यदोषः। चोदकस्त्वाह। अनेकशेषभावार्थं त्विति। त्वं चाहं च पचाव इत्यत्र प्रयोगे।

आचार्यदेशीय आह। नवेति। सहविवक्षाया अभावे यथा युष्मदस्मदोरेकशेषाभावः एवं तदधिकरणयोरपि क्रिययोर्भेदस्याविवक्षितत्वादस्मात्तयोर
प्येकशेषाभावे पचसि पचामि चेति पृथगेव प्रयोगात् नार्थो विप्रतिषेधेनेत्यर्थः। एतदेव समर्थयितुमाह। क्रियापृथक्त्व इति। यथा क्रियापृथक्त्वे सति
द्रव्यपृथक्त्वं न तु सहविवक्षा एवं द्रव्यपृथक्त्वेऽपि क्रियापृथक्त्वेन भाव्यं। परस्परसाहचर्याव्यभिचारात्। एवं च कृत्वेति। क्रियापृथक्त्वे सति क्रियापृथ
क्त्वादित्यर्थः। इदानीमाचार्य आह। यत्तावदिति। एकशेषप्रवृत्तिः एकशेषफलत्वादेकदेशेन प्रत्युच्यते। न तु प्रपञ्चमनभ्युपगमेन त्वमाना मेकशेषो सरूपत्वादि

न वा युष्मदस्मदोः [illegible] रनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेधः। न वार्थो विप्र
तिषेधेन। किं कारणं। युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामपि युष्मदस्मदधिकरणानामपि एकशेषे
ण न भवितव्यं। त्वं चाहं च पचसि पचामि चेति। क्रियापृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभा
वस्य। क्रियापृथक्त्वे च द्रव्यपृथक्त्वं दृश्यते। तद्यथा। पचसि पचामि च त्वं चाहं चेति। तदनुमानमुत्तरयोरपि क्रि
ययोरेकशेषो न भवतीति। एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं तत्र युष्मदस्मदन्ये युष्मत्प्रतिषेधः शेषत्वादिति। त
त्राप्येवं भवितव्यं। त्वं च देवदत्तश्च पचसि पचति चेति। अहं च देवदत्तश्च पचामि पचति चेति। यत्तावदुच्यते
न वा युष्मदस्मदोरनेकशेषभावात्तदधिकरणानामप्यनेकशेषभावादविप्रतिषेध इति। इह युष्मदस्मदोरेकशेषो युष्मद
स्मदोश्चानेकशेषस्तदधिकरणानां चैकशेषः। तद्यथा। त्वं चाहं च वृत्रहन्नुभौ संप्रयुज्यावहै इति। यदप्युच्यते क्रिया
पृथक्त्वे च द्रव्यपृथक्त्वदर्शनमनुमानमुत्तरत्रानेकशेषभावस्येति। क्रियापृथक्त्वे खल्वपि द्र

तिवाचनिक एकशेषः। एवं चैकशे

षभावाभावप्रमाणेनार्थो विप्रतिषेधेन। तस्मात्कारकभेदेऽपि क्रियाभेदे यो भेदाद् एकएव धातुः प्रयुज्यते तस्माच्च परो लकार एव अनेकार्थाभिधायी विरोधाभावा
त्तत्र पुरुषद्वयप्रसंगे युक्तो विप्रतिषेधः॥ ॥श्री॥ ॥राम॥

शि॰ व॰

अस्माद् इति। एकटास्य विभागतकाः स्वदेवनाद्यानाएां सहविव सायमेकशेषः। तस्यावयवाक्रियायाः समुदाये भावेऽपाद् अंता मित्यादि बहुवचनं सामा
नाधिकरण्यं चोपपद्यते। यथाद्वयैकशेषेपि क्रियायाः प्रत्येकं व्यपपरत्वेपि क्रियैकशेषत्वमर्थः। नहि शेषस्यान्यस्येति। उपयुक्तादन्यः शेषः
युष्मदस्मदोरन्योपयुक्तयोः सत्त्वान्नास्ति शेषत्वं। इतरएतत्सामर्थ्यमविदित्वाह। नवेदिति। इतर आह। यदस्येति। तत्रास्ति यो शेषत्वाभावा

अस्माः भद्र्यंतां नक्षंलां दीव्यंताभिनि। एवं च कुत्रासोपि दोषो भवति। यदुक्तं तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वा
दिति। नैष दोषः। परिहृतमेतत्। सिद्धं तु किं सशब्दत्वादिति। किं युष्मदस्मदोः प्रतिषेधादिति। स तर्हि प्रतिषेधो वक्तव्यः।
न वक्तव्यः। शेषे प्रथमो विधीयते। नहि शेषस्यानस्य शेषग्रहणं न गृह्यते। भवेत् प्रथमो न स्यात्। मध्यमोत्तमाव
पि न प्राप्नुतः। किं कारणं। युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते। न च युष्मदस्मदी अन्यश्च युष्मदस्मद्रू
पेण गृह्येते। यदत्र युष्मद्रूपं चास्मत् तदाश्रयौ मध्यमोत्तमौ भविष्यतः। यद्येवं तर्हि यदत्र युष्मद्रूपमस्मच्च तदाश्र
यौ मध्यमोत्तमौ भवतः। एवं योऽत्र शेषस्तदाश्रयः प्रथमो भविष्यति। एवं तर्हि शेष उपपदे प्रथमो विधीयते। उपो
च्चारिपदमुपपदं। यश्चात्रोपोच्चारिनसरूपः यश्च शेषः न तदुपोच्चारि। भवेत् प्रथमो न स्यान्मध्यमोत्तमावपि न
प्राप्नुतः। किं कारणं। युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावुच्येते उपोच्चारिपदमुपपदं यच्चात्रोपोच्चारि न [redacted]
ते युष्मदस्मदी। ये च युष्मदस्मदी न तदुपोच्चारि। एवं तर्हि शेषेण सामानाधिकरण्ये प्रथमो विधीयते न चात्र शेषेण
नास्ति बंधनमेव कार्यं भवति। वसामानाधिकरण्यं। भवेत् प्रथमो न स्यान्मध्यमोत्तमावपि तु न प्राप्नुतः। किं कारणं। युष्मदस्मत्सामानाधिक
रण्ये मध्यमोत्तमावुच्येते। न
सर्वः। इतरः शेषपदार्थमविज्ञानाह। यद्येवमिति। पतद्धि चारणीयमप्युपेक्ष्योपपदार्थं वर्णयितुमाह। एवं तर्हीति। यश्चात्रे
ति। युष्मदोः श्रवणात्तद्भावेन च शेषसंज्ञा वाक्यं यश्चात्र शेष इति। इवदत्तश्चेति। न तर्हीति। नहि तस्यैव साधनत्वं। किं तर्हि युष्मदस्मदर्थयोरपि। न चात्र शेषे
णेति। किं तर्हि युष्मदर्थेनापि तत्प्रवाचा शेषत्वाभावः सर्वः॥

भा॰कै॰

एवं तर्हीति। यद्यप्यनेकशेषे दोषमुपक्रान्तस्तथाप्येकशेषे दूषणान्तरोपक्रमः। स्यादित्यपीति। अप्रयुज्यमानेऽप्युज्यमाने च शेषे प्रथमविधानात् दोषान्तरमप्याह।
त्यदादीनामिति। एतत्परिहारं मन्यमानो लब्धोच्छ्रेदो न्यदयाह। युष्मदीति। परमत्वमिति। युष्मदस्मदिति विशिष्टरूपपरिग्रहाद् स्य च शब्दान्तरत्वात्। आचार्य
देशीय आह। तदन्तविधिनेति। युष्मदस्मदो रूपपदस्य विशेषणत्वात्तदन्तविधिः। चोदको दोषमाह। इहापीति। अतित्वमिति। त्वामतिक्रान्त इति समासः। एवं तदन्त
विधावतिव्याप्तिमुक्त्वाऽव्याप्तिमाह। येनाप्येते इति। बह्वकल्प इति। ईषदसमाप्ते बहुच्कल्प इति कालान्तरप्रसिद्धगुणराहित्येन युष्मदर्थ एव बहुच्कल्पशब्देनोच्यते न तु

एवं तर्हि त्यदादीनि सर्वैर्नित्यमित्येवमत्र युष्मदस्मदोः शेषो भविष्यति। तत्र युष्मदि मध्यमोऽस्मद्युत्तम इत्येव सिद्धम्। न सिध्य
ति। स्यादित्यपीति प्रथमः प्राप्नोति। त्यदादीनां खल्वपि यद्यत्परं तच्छिष्यत इति यदा भवतः शेषस्तदाऽप्यपः प्रथमः प्राप्नोति। यु
ष्मदि मध्यमोऽस्मद्युत्तम इत्येवोच्यते तावितरेतरौ न प्राप्नुतः। परमत्वं पचसि परमाहं पचामीति। तदन्तविधिना भविष्यति। इहापि
तर्हि तदन्तविधिना प्राप्नुतः। परमत्वं अतित्वं पचति मत्यहं पचतीति। येऽप्येते समानाधिकरणवृत्तयस्तद्धितास्तत्र
अमोऽन्तमौ न प्राप्नुतः। त्वत्तरः पचसि मत्तरः पचामीति। त्वद्रूपः पचसि मद्रूपः पचामीति। त्वत्कल्पः पचसि मत्कल्पः पचामीति।
दस्म एवं तर्हि युष्मदीत्येवं भविष्यति। इहापि तर्हि प्राप्नुतः अतित्वं पचति अत्यहं पचतीति। एवं तर्हि युष्मदि साधनेऽस्मदि सा
धन इत्येवं भविष्यति। एवं च कृत्वा सोऽप्यदोषो भवति यदुक्तं तत्र युष्मदस्मदन्येषु प्रतिषेधः शेषत्वादिति। अथ वा प्रथम उत्स
र्गः करिष्यते तस्य युष्मदस्मदोरुपपदयोर्मध्यमोत्तमावपवादौ भविष्यतः। तच्च युष्मत्कं यच्चास्मत्कं यच्चास्तीति कृत्वा मध्य

तत्सदृशं पदार्थान्तरं। तदभिधाने युष्मदर्थस्य साधनत्वाभावात् मध्यमाभावात्। एवं मत्कल्प इति बोध्यं। आचार्यदेशीय आह। एवं तर्हीति। सोऽत्र त्वानिर्देशः स
मतुब्लोपो निर्भास्यते इति भावः। चोदक आह। इहापीति। आचार्य आह। एवं तर्हीति। समानाधिकरणेनेति वचनात् युष्मदर्थेन यत्र सामानाधिकरण्यं तत्र
त्र मध्यमोत्तमाभ्यां भवितव्यमिति नास्ति कश्चिद्दोषः। एवं च कृत्वेति। युष्मदर्थस्य साधनत्वात्प्रत्ययाभावः। अथवेति। प्रथम इत्येतावत्सूत्रं क्रियते अनाश्रितविशे शिवः
षविषयः प्रथमो विधीयमान उत्सर्गो भवति। तस्य विषयविशेषे विधीयमानौ मध्यमोत्तमावपवादौ भवतः। तत्रापवादनिमित्तसद्भावाभावे विषये मध्यमोत्तमा १२
वेव भविष्यतः। न तु प्रथम इत्यर्थः॥

12

अत्वं त्वमिति। प्रकृतिविकृत्योरभेदविवक्षायां च्विप्रत्ययः। तच्चाभिप्रायसाम्येन आश्रयसमेन भाव्यं अपविकृत्याश्रयेण मध्यमेन संप्रा तिप्रश्नः। अत्रोत्तरं। त्वद्भवतीति। प्रकृतेरे
वविकाररूपेण संपत्तौ कर्तृत्वमिति भावः। अभ्यमोत्तमौ कस्मादिति। यथा प्रकृतिस्त्वदर्थसमाचारात् युष्मदस्मदुपदेशं लभते तथा मध्यमोत्तमावपि प्राप्नुतः। गौणमुख्ययोरि
ति। त्वदर्थसमाचारादारोपितमत्र युष्मदर्थरूपत्वमिति भावः। शिष्टं भाष्यमोदितमत्र व्याख्यातं तत एवावधार्यतां। यदुक्तं भवतः शेषइति तत्रोत्तरमाह। युष्मदस्मद्भवतु इत्येवं
न सान्निवेशः आश्रयणीयः। किंतु भवतु युष्मदस्मदिति। ततस्त्वास्मद एव शेषो न तु भवतः। पूर्वशेषदर्शनाच्चेति वचनात्॥ ॥परः सं॥ ॥पूर्ववर्णोच्चारणानंतरमेव यद्व
र्णांतरमुच्चार्यते न तु तच्छून्यांतरालसद्भावः स परः उत्कृष्टः सन्निकर्षः प्रत्यासत्तिलक्षणः संहितासंज्ञ इति सूत्रार्थः। एवं स्थिते वाच्यते। परइति। द्रुतायामेव वर्णा
वर्णांतरेण कः परः सान्निकर्षः संभवति। न तु मध्यमायां विलंबितायां चेत्यर्थः। असंहितमिति। संहितासंज्ञाया अभावः तस्याभावेऽव्ययीभावः। अविद्यमाना वा संहिता

अयं स्वकं धर्मं भवितव्यं अत्वं त्वं संपद्यते इति त्वद्भवति मद्भवति। आहोस्वित् त्वद्भवसि मद्भवामीति। त्वद्भवति मद्भवतीत्येवं भवितव्यं। मध्य
मोत्तमौ कस्मान्न भवतः। गौणमुख्ययोः संप्रत्ययो भवति। तद्यथा। गोरनुबंध्यो अजोऽग्नीषोमीय इति। न वाहीको ऽनुबध्यते। कथं तर्हि वाही
केऽपि ध्वात्वे भवतः। गौस्तिष्ठति गामानयेति। अर्थाश्रय एतदेवं भवति। यद्धि शब्दाश्रयं शब्दमात्रे तद्भवति। शब्दाश्रयेव बह्वात्वे॥ ॥
परः सन्निकर्षः संहिता॥ ॥परः सन्निकर्षः संहिता चेद्द्रुतायामसंहितं। परः सन्निकर्षः संहिता चेद्द्रुतायां तत्तो संहितासंज्ञ
नप्राप्नोति। द्रुतायामेव परः सन्निकर्षो वर्णानां नाद्रुतायां। तुल्यः सन्निकर्षः। तुल्यः सन्निकर्षो वर्णानां द्रुतमध्यमविलंबितासु व
त्तिषु। किंकृतस्तर्हि विशेषः। वर्णकालभूयस्त्वं तु। वर्णानां तु कालभूयस्त्वं। तद्यथा। हस्तिम
शकयोस्तुल्यः सान्निकर्ष
अलिकाति बक्रुशदिः। द्रुतमध्यमविलंबितास्विति।
द्रुतायां मध्यमायां च विलंबितायां चेति इदं तु कृतं भाष्यकारवचनप्रामाण्यादुक्तः। सर्वास्वपि वृत्तिषु तुल्यः सन्निकर्षः तेरंतर्योच्चारणानंतर्यं विशेष
इति विलंबितानामिति शेषः। क्वचिद्वृत्तिविशेषइत्येव पाठः। वर्णानां विति। वर्णोपलब्धिकालभेदाद्वर्णकालभूयस्त्वमुच्यते। द्रुतायां स्वल्प उपलब्धिकालः। मध्य
मायामधिकः। विलंबितायामधिकतरः। प्राकृतवैकृतभेदाद्ध्वनय। तत्र वैकृतध्वनिवशात्तस्यैव वर्णस्य पुनःपुनरुपलब्धिर्भवतीति ध्वनिभेदाद्
भिभेदः। किंकृत इति कारणे प्रश्नः वर्णकालभूयस्त्वमिति सामर्थ्यात् कारणमेवोक्तं भवति। इति। हस्तिमशकयोरिति। हस्तिनोऽपि हस्तिनाय सन्निकर्षः मशकस्य
चमशकेन तुल्यः। परस्परापेक्षयेत्यर्थः। प्राणिभूयस्त्वमिति। हस्तिनो महांतं देशं व्याप्नुतो मशकौ तु स्वल्पं ने
रंतर्यं तु विशिष्टमित्यर्थः॥ ॥

भा॰के॰

वर्णानां व्यंजकध्वनिकृतं यथोक्तं भेदमप्रतिपद्यमानः स्वगतमेव भेदं मत्वा चोदयति। यद्येवमिति। शिष्टं भाष्यं तपरसूत्रकालस्येत्यत्र व्याख्यातं तत एवावधार्यतां। शब्दविरा

मइति। यदा प्रयोक्ता शब्दोच्चारणान्न विरमति तदा शब्दाविरामः। स च मध्यमाविलंबितयोरपि स्पर्शसन्निकर्षाभावेप्यस्तीति सिद्धा संहितासंज्ञा। शब्दाविरमे प्रतिवर्णमिति।

भिन्नप्रयत्नजनितध्वनिव्यंग्यत्वाद्वर्णानां प्रतिवर्णं प्रयत्नभेदाद् एकप्रयत्नाविच्छेदाभावात् प्रथमप्रयत्नोच्चारितवर्णानंतरं प्रयत्नांतरेण वर्णांतरोच्चारणादेकैकस्य व

र्णस्य विरामसद्भावादवसानसंज्ञा प्राप्नोति। अवसानसंज्ञामिति। वर्णांतरानुच्चारणे हस्वत्वादेः सावकाशमिति भावः। तेन सर्वथा वर्णानां यो विरामः सोऽवसान

यद्येवं द्रुतायां तपरकरणे मध्यमाविलंबितयोरुपसंख्यानं कालभेदात्। द्रुतायां तपरकरणे मध्यमविलंबितयोरुपसंख्यानं कर्तव्यं।

किं कारणं। कालभेदात्। ये द्रुतायां वृत्तौ वर्णास्त्रिभागाधिकास्ते मध्यमायां। ये मध्यमायां वृत्तौ वर्णास्त्रिभागाधिकास्ते विलंबितायां। उक्तं

वा। किमुक्तं। सिद्धं त्ववस्थिता वर्णा वक्तुश्चिराचिरवचनाद्वृत्तयो विशिष्यंत इति। अथवा शब्दाविरामः संहितेत्यनतस्त [illegible] कार

यते। शब्दाविरामे प्रतिवर्णमवसानं। शब्दाविरामे प्रतिवर्णमवसानसंज्ञा प्राप्नोति। किमिदं प्रतिवर्णमिति। वर्णं वर्णं प्रति प्रति

वर्णं। येनैव प्रयत्नेनैको वर्ण उच्चार्यते विच्छिन्ने वर्ण उपसंहृत्य तमन्यमुपादाय द्वितीयः प्रयुज्यते न तत्प्रत्ययस्तथा चतुर्थः। एवं

तर्ह्यनवकाशा संहितासंज्ञाऽवसानसंज्ञां बाधिष्यते। अथवा अवसानसंज्ञायां प्रकर्षगतिर्विज्ञास्यते साधीयो यो विराम इति। कश्चा

त्र साधीयः। यः शब्दार्थयोर्विरामः। अथवा स्पर्शाविरामः संहितेत्येतल्लक्षणं करिष्यते। स्पर्शाविरामे स्पर्शघोषसंयोगेऽसन्निधा

नात् संहितं। स्पर्शाविरामे स्पर्शानाम घोषाणां च संयोगेऽसंनिधानात् संहितासंज्ञा न प्राप्नोति। कुक्कुटः पिप्पकः

संज्ञोनतुनांतरीकः सर्पः। अपवे

ति। सर्वत्र विरामसद्भावात्पुनः स्पर्शविशेषमाम्नायते। शब्दार्थयोरिति। अन्यत्र तु सत्यपि शब्दविरामे पदार्थस्य वाक्यार्थस्य [illegible] वा। विरमात्र भव

त्यवसानसंज्ञा। स्पर्शाविरामइति। प्रयत्नविशेषजनितो वर्णविरामेऽप्यनुरणनरूपो वर्णांतरोच्चारणेऽप्यनुवर्तमानो घोषो नादइच्यते। स्पर्शघोषसंयोग

इति। वर्ग्याणां प्रथमद्वितीयानां शषसानां च संयोगे घोषाविच्छेदात्सन्निधानात्संहितासंज्ञाया अप्राप्तिरित्यर्थः। अघोषसंयोग इत्येव सिद्धत्वात्स्पर्शग्रहणम

नर्थकं। अस्पर्शानाम घोषाणां शषसानां संयोगे तुल्यन्यायत्वात्संज्ञाया अप्रसंगात्। न च स्पर्शानाम घोषाणां चेति समुच्चयः। घोषवतां स्पर्शानां संयोगे दोषा

प्रसंगात्। कुक्कुट इति। कुकुट इत्याय मितिकनालुम्मलुप्यशतेलुपिकले संज्ञायामुपमानान्मेत्याद्युदात्तत्वं शिष्टमनुदात्तं। ततः संहितायां

शिवः

२३

पचलीति। अत्रापि चकारस्याघो[illegible]षत्वादकारेणाऽऽरणे घोषविच्छेदात्स्वरितत्वाप्रसंगः। इदं देनेति। द्वयोरकारयोर्घोषवतोर्मध्ये चकारे घोषवानिवलस्य तद्रूसर्थः। आश्रयांतरगतो= पि गुण आश्रयांतरे उपलभ्यत इति दृष्टांतेन दर्शयति। द्वयोरिति। एकेनेति। अनेकस्य यः सन्निकर्षः स एकेन तुल्यः। यथैकोऽलक्तगुणोऽपि तद्गुणवस्त्रांतरसन्निधानात्तद्गुण उपलभ्यते तथाऽनेकोऽपि स्फटिकादिरित्यर्थः। अथवेति। वर्णांतरोच्चारणकालादन्येन वर्णांतरेन कालेनाव्यवहितं पौर्वापर्यं संहितेति लक्षणं क्रियते। तेन मध्यमविलंबितयोः परमसन्निकर्षाभावेऽपि संहितासंज्ञा सिध्यति। पूर्वापरभावादिति। युगपदिति

किमुच्यते संयोग इति। अथ यत्रैकः पचतीति पूर्वपरयोर्ह्रस्वेन प्रच्छाद्यते। तद्यथा। द्वयोर्वस्त्रयोर्मध्ये रक्तं वस्त्रं तद्गुणमुपलभ्यते। बदरपिटके रिक्तको लोलकः स तद्गुण उपलभ्यते। एकेन तुल्यः सन्निधिः। यथैको वर्णो ह्रस्वेन प्रच्छाद्यते एवमनेकोऽपि। अथवा पौर्वापर्यमकालव्यवेतं संहितेत्येतल्लक्षणं क्रियते ===। पौर्वापर्यमकालव्यवेतं संहिता चेत्पूर्वापराभावादसंहितं। पौर्वापर्यमकालव्यवेतं संहिता चेत्पूर्वापराभावात्संहितासंज्ञा न प्राप्नोति। न हि वर्णानां पौर्वापर्यमस्ति। किं कारणं। एकवर्णवर्तित्वाद्वाचः। उच्चरितप्रध्वंसित्वाच्च वर्णानां। एकैकवर्णवर्तिनी वाक्। न द्वौ युगपदुच्चारयति। गौरिति गकारे यावद्वाग्वर्तते नौकारे न विसर्जनीये। यावदौकारे न गकारे न विसर्जनीये। यावद्विसर्जनीये न गकारे नौकारे। उच्चरितप्रध्वंसित्वात्। उच्चरितप्रध्वंसिनः खल्वपि वर्णाः। उच्चारितः प्रध्वस्तः। अथापरः प्रयुज्यते। न वर्णो वर्णस्य सहायः। एवं तर्हि बुद्धौ कृत्वा सर्वाश्चेष्टाः कर्ता धीरस्तन्वन्नीतिः। शब्देनार्थान्वाच्यान्दृष्ट्वा बुद्धौ कुर्यात्पौर्वापर्यं। इह य एष मनुष्यः प्रेक्षापूर्वकारी भवति स पश्यति अस्मिन्नर्थेऽयं शब्दः प्रयोक्तव्यः अस्मिंस्तावच्छब्देऽयं ता

नारे शब्दरूपं पौर्वापर्यं दृष्टं। वर्णास्त्वेकैकश उपलभ्यमाना योगपद्येनास न्निधानात्कथं पौर्वापर्यमभ्युपेतं। एकवर्णवर्तित्वादिति। सामान्येनोपक्रमात्तत्प्रत्ययाभावः। उच्चरितेति। क्रमोत्पन्नानामपि वर्णानां यद्यवस्थितिः स्यात्तदा स्यात्पूर्वापर सपदेशोऽयं [illegible] निष्कम्यपदेशवत्। अनवस्थानान्नास्तिता। विकल्पः पूर्वापरभावद्रूसर्थः। [illegible] ध्वनिस्फोटभेदस्य [illegible] तदा न लोप न स्यते। न चायुगपदिति। युगपद्द्वयोरुच्चारणे स्यादेवाव्यवधानं। कालेन पौर्वापर्ये तु भावादित्यर्थः। वागिति। वागिंद्रियमित्यर्थः। एतेन युगपदनवस्थानात्सन्निकर्षोऽप्याक्षिप्त इति विज्ञेयं। एवं तर्हीति। बुद्धिप्रकल्पितः सर्वः पौर्वापर्यसन्निकर्षादिव्यवहार इत्यर्थः। धी

[illegible]

विरामः॥ ॥इदं विचार्यत इति। विचरति नानागच्छतीय(?) हलन्तविचार्यते परीक्ष्यत इत्यर्थः। अभावो वेति। केचिदभावोऽवसानमिति पठन्ति। अन्ये तु विरामोऽवसानमि

ति। तत्र युक्तायुक्तविचारः क्रियते उपरीति। वर्णोच्चारणादूर्ध्वं योऽभावः तदुपलक्षितो वर्णोऽवसानमिति वक्तव्यं प्रागभावस्योपलक्षणत्वनिवृत्त्यर्थं। रस इति। पर

वत्पूर्वस्यापेक्षणापि रेफस्याभावविषयत्वाद्विसर्जनीयप्रसंगः। विरामे विरामवचनमिति। अधिकं कर्त्तव्यमित्यर्थः। ततोऽवसानं चेति। अदर्शनमभाव इत्येक

एवार्थः। तेन पुनरभावग्रहणं न कर्त्तव्यमित्यर्थः। तत्र लोपसंज्ञायामभावः संज्ञित्वेनाश्रीयते अवसानसंज्ञायां तूपलक्षणत्वेन। तेन वर्णान्तरभावोपलक्षितो व

[illegible]

विरामोऽवसानं॥ ॥इदं विचार्यते अभावोऽवसानलक्षणं स्याद्विरामो वेति। कश्चात्र विशेषः। अभावेऽवसानलक्षणे उपर्यभाववचनं। अ

भावेऽवसानलक्षणे उपर्यभावग्रहणं कर्त्तव्यं। अ उपरि यः अभाव इति वक्तव्यं। पुरस्तादपि हि शब्दस्याभावस्तत्र मा भूदिति। किं च स्यात्।

रथः रसः स्वरवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत। अस्तु नर्हि विरामः। विरामे विरामवचनं। यस्य विरामः

विरामग्रहणं तेन कर्त्तव्यं। ननु च यस्याप्यभावस्तस्याप्यभावग्रहणं कर्त्तव्यं। परार्थं मम भविष्यति। अभावो लोपस्ततोऽवसानं

चेति मम अपि तर्हि विरामग्रहणं परार्थं भविष्यति। विरामो लोपोऽवसानं चेति। उपरि यो विराम इति वक्तव्यं। पुरस्तादपि हि शब्दस्य

विरामः तत्र मा भूदिति। किं च स्यात्। रथः रसः स्वरवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत। नैष दोषः। आरंभ एव कोमः

न विरामः। अथवा नेदमवसानलक्षणं विचार्यते किं तर्हि संज्ञी। अभावोऽवसानसंज्ञी स्याद्विरामो वेति। कश्चात्र विशेषः। अभावेऽवसानसं

ज्ञिन्युपर्यभाववचनं। अभावेऽवसानसंज्ञिन्युपर्यभावग्रहणं कर्त्तव्यं। उपरि योऽभाव इति वक्तव्यं। पुरस्तादपि हि शब्दस्याभावस्तत्र

मा भूदिति। किं च स्यात्। रथः रसः स्वरवसानयोर्विसर्जनीय इति विसर्जनीयः प्रसज्येत। अस्तु नर्हि विरामोऽवसानं। विरामे विरामवचनं। यस्य

विरामः तेन विरामग्रहणं कर्त्तव्यं। ननु च यस्याप्यभावस्तेनाप्यभावग्रहणं कर्त्तव्यं। परार्थं मम भविष्यत्यभावो लोपस्ततोऽवसानं चेति। मम अपि तर्हि विरा

सानसंज्ञ इत्यर्थः। उत्तरत्र त्वभावस्यैव लोपावसानसंज्ञे व्याख्यास्येते। अस्मिन्पक्षे स्वरवसानयोरिति विषयी। स्वरः समीपस्य रेफस्यावसानस्य च रेफस्येत्यर्थः। अथवैकापि सप्तमी वि

षयभेदाद्भिद्यते। स्वरिपरतो रेफस्य विसर्जनीयः अवसाने च रेफे स्थानिनि विसर्जनीय इत्यादेशस्य विषयत्वेन स्थानी विवक्ष्यते मम अपीति। अभावो विराम इति पर्यायत्वं मन्यते। आरं

भपूर्वक इति। निवृत्तिर्विरामः सच प्रवृत्तस्य भवतीति भावः। अवसानलक्षणमिति। अभावोपलक्षितो वर्णोऽवसानं विरामोपलक्षितो वेति एवं विचारितं। इह त्वं तु तावद्वसं

प्रिव:

[illegible]

भा॰के॰ नावश्यमिति। प्रवृत्तौ सत्यां या निवृत्तिस्तस्यामित्यर्थः। उपरतान्यस्मिन्निति। न प्रवृत्त्य निवृत्तानि किंतर्हि पूर्वमेवाप्राप्तानीत्यर्थः। अनिपतविषयत्वाच्च शब्दप्रयोगस्य शश
शविषाणमिति प्रयोगाभावः। क्वचिदुपनानीति पाठः। भावाविरामभावित्वादिति। शब्दस्य स्वसंबंधी योऽभावोऽवसानलक्षणं स्यात् शब्दांतरसंबंधी वा। न तावत्
स्वसंबंधी विरोधात्। न हि यस्य सत्ता तस्य तदानीमेवासत्ता युज्यते। नापि शब्दांतरसंबंधी। न हि घटाभावः पटस्याभावो भवति। अभावस्य सत्तया अविच्छेदेन
भवत्यवश्यमिति भावाविरामभावी शब्दः। न हि शब्दस्य भवनकाले सत्ता विच्छिद्यत इत्यर्थः। अपर आहेति। भावाविरामशब्दयोर्द्वंद्व इत्यर्थः। इदानीं लक्षणद्वयस्या

नावश्यमयं रमिः प्रवृत्तावेव वर्त्तते किं तर्हि अप्रवृत्तावपि। तद्यथा। उपरतान्यस्मिन्कुले व्रतानि। उपरतेरः स्वाध्याय इति। न च तत्र
स्वाध्यायो भूतपूर्वो भवति नापि व्रतानि। भावाविरामभावित्वाच्छब्दस्यावसानलक्षणं न। भावाविरामभावित्वाच्छब्दस्यावसा
15 नलक्षणं नोपपद्यते। किमिदं भावाविरामभावित्वादिति। भावस्याविरामः भावाविरामः। भावाविरामेण भवतीति भावाविर
मभावी। भावाविरामभाविनो भावो भावाविरामभावित्वं। अपर आह। भावभावित्वादवसानभावित्वाच्च शब्दस्यावसानलक्ष
णं नोपपद्यत इति। तत्परइति वा वर्णस्यावसानं। विरामपरो वर्णः अवसानसंज्ञो भवतीति वक्तव्यं। वर्णोऽन्त्योऽवसानं। अथवा
अंतग्रहणमेव पठितव्यं। अंत्यो वर्णोऽवसानसंज्ञो भवतीति। तत्तर्हि वक्तव्यं। न वक्तव्यं। संहितावसानयोर्लोकविदितत्वात्सिद्धं।
संहितावसानमिति लोकविदितावेतावर्थौ। एवं हि कश्चित्कंचिदधीयानमाह श्लोको देवायं संहितयाधीष्वेति स न तत्र पर
मसंनिकर्षमधीते। अपर आह। केनावस्यसीति। स आह। अकारेणेकारेणोकारेण वेति। एवमेतौ लोकविदितावर्थौ तयोर्लो
कविदितत्वात्सिद्धं। ॥ इति श्रीमद्भगवत्पतंजलिविरचिते व्याकरणमहाभाष्ये प्रथमाध्यायस्य चतुर्थे पादे चतुर्थमाह्निकं पाद शिवः
ध्यायश्च समाप्तः॥ ॥

परिकल्पित
व्यनुपपत्तिः प्रतिपाद्यते। भावेन सत्तयाऽविरामेणाविच्छेदेन भवतीत्यर्थः। उपाधिरहितस्याभावस्य प्रतीतिर्नास्ति। तत्परइति
चेति। इदानीं शब्दांतरभावपरो वर्णोऽवसानसंज्ञो भवतीति प्रतिपाद्यते। अभावेनापि बुद्धि[illegible]तं पौर्वापर्यमाश्रीयते। अथवेति। यद्यपि विरामशब्दे करणसाधने आश्री १५
यमाणेऽयमर्थो लभ्यते तथापि भावसाधनस्यापि संभवात्करणसाधनत्वं संदिग्धमिति अंतग्रहणमेव पठितव्यमित्यर्थः। संहितयाधीष्वेति। यथा पदैरंतरं तथैव संहितावद्वरस्त
यैकपदेऽपि नैरंतर्यं। अवसानशब्दोऽपि विधिप्रदेशेषु भावसाधनः करणसाधनो वा आश्रयिष्यत इति तात्पर्यः संज्ञा

२०८



भाष्यकैयटप्रथमाध्यायःसमाप्तः॥ श्रीःशुभं॥

15

॥ भाष्यकैय्यटप्रथमाध्याय ॥

॥ तृतीयचरणप्रारंभः ॥ पुस्तकमिदं वैजैनाथपाठकीयम्

॥ श्रीगणेशाय नमः ॥ पश्चाल्लिखितंशालि:

श्रीः

कि मिति वमाति गत्वा य घहा ला तरनं ते जन क्तराति
स सत्सं रोलेक भ्यामि धाया ॥ कष्टं मुरवकरद
ते द्पणो [illegible] दर्शी तो क्ष्टः पा हेर [illegible] तिसत्त जन [illegible]
[illegible] नं प्रारी श ॥१॥ [illegible] २

श्रीः॥ भ्वादयो धातवः॥ ॥कुतोयमिति। लक्षणाभावमत्वा कस्मान्निमित्ताद्वकार इति पृच्छति। यदितावदिति। यणादेशेनैकोनिवर्त्तितत्वात्। अथासंहितयेति। अभ्युपगम्यवादोयं। नत्वेकस्मिन्पदे ऽसंहितास्ति। संहितैकपदे इति वचनात्। तस्मात्सर्वथा निर्देशोयं न संभवतीत्ययं परमेतत्। भ्वादीनामिति। सूत्रोच्चारिते भूवादिशब्दे इत्यर्थो विवक्षितः। तत्र वाचकं भूवादीनां भूवादिशब्दवाच्यानां वकार इति यपादिश्यते। मंगलार्थ इति। ननु निमित्ते पृष्टे प्रयोजनकथनमप्रस्तुतं। नैष दोषः। प्रयोजनकथनेन निमित्तस्यापि कथनात्। अत एव निपातनात्

श्रीः॥ भूवादयो धातवः॥ कुतोयं वकारः। यदितावत्संहितया निर्देशः क्रियते भ्वादय इति भवितव्यं। अथासंहितया भू आदय इति भवितव्यं। अत उत्तरं पठति। भ्वादीनां वकारोयं मंगलार्थः प्रयुज्यते। मांगलिक आचार्यो महतः शास्त्रौघस्य मंगलार्थं वकारमागमं प्रयुंक्ते। मंगलादीनि मंगलमध्यानि मंगलांतानि शास्त्राणि प्रथंते वीरपुरुषाणि भवंति आयुष्मत्पुरुषाणि च अध्येतारश्च मंगलयुक्ता यथा स्युरिति। अथादिग्रहणं किमर्थं। यदितावत्प्रथंते नार्थ आदिग्रहणेन। अन्यत्रापि ह्ययं पठन्नादिग्रहणं न करोति। क्वान्यत्र। भूड मृद गुध कुष क्लिश वद वसः

शिवः

गमरूपोत्र वकारः कृतः। न चायमसाधुः। वैयाकरणनिकाये प्रसिद्धत्वात्। तस्य च मंगलं प्रयोजनमित्यनेन प्रतिपादितं भवति। अपूर्वस्य हि लाभोदय्यादेर्लोके मंगलं संपद्यते। तथैव ह्यागमो वकारो मंगलार्थः संपद्यते। [redacted] अथवा सति वकारे ऽविकृते भ २
शब्दे उच्चार्यमाणे महाव्याहृतिस्मरणं मंगलं भवतीति पारंपर्येण कारे मंगलार्थकः संपद्यते। नार्थ इति। भ्वादय इति पठित्वा ते
धातव इति वक्तव्यं यथा ते तद्ज्ञा इति॥ ॥श्रीः॥

नतरामिति। सति पाठे गतार्थत्वान्न कर्तव्यं असति तु संबंधादित्यर्थः। अत एव प्रतिषेधप्रकर्षः संबंधाभावे यत्नमेवाकरणमित्यस्यार्थस्य प्रति
पत्तये निर्दिष्टः। एवं तर्हीति। सूत्रेषु ये पठ्यंते ऽऋदादयः तान्समाप्यते धातव इति वचनेन सिद्धं सतीत्यर्थः। अस्ति च पाठ इति। अनेना
संबद्धत्वं परिहृतं। बाह्यश्चेत्यनेन गतार्थत्वं निराकृतं। पाठेनेति। ये धातुपाठे पठितास्तेषामेव धातुसंज्ञा। तेषां च पाठो नोपलक्षणार्थः। अ

अथ न पठ्यंते नतरामर्थ आदिग्रहणेन। न ह्यपठिताः शक्या आदिग्रहणेन विशेषयितुं। एवं तर्हि सिद्धे यदादिग्रहणं करोति तज्ज्ञापयत्याचार्योऽस्ति च पाठो बाह्यश्च सूत्रादिति। किमेतस्य ज्ञापने प्रयोजनं। पाठेन धातुसंज्ञेत्येतदुपपन्नं भवति। पाठेन धातुसंज्ञायां समानशब्दप्रतिषेधः। पाठेन धातुसंज्ञायां समानशब्दानां प्रतिषेधो वक्तव्यः। या इति धातुर्या इत्याबंतः। वा इति धातुर्वा इति निपातः। नु इति धातुः नु इति प्रत्ययश्च निपातश्च। दिव् इति धातुः दिवि इति प्रातिपदिकं किं च स्यात्। यद्येतेषामपि धातुसंज्ञा स्यात्। धातोरिति तव्यदादीनामुत्पत्तिः प्रसज्येत। नैष दोषः॥ ॥

पि तु इयत्ताप्रतिपादनार्थः। तत्र यदि क्रियावाची धातुरित्येतल्लक्षणं क्रियेत तत आणवयति वट्यतीत्यादीना
मपि धातुसंज्ञा स्यात्। अथ सूत्रपठितानामनंतरं ते धातव इत्युच्येत तदा तत्रापठितानां न स्यात्। तस्माद्भूवादय इत्युक्तं। तत्र सू
त्रवार्त्तिकभाष्यगणेषु ये पठ्यंते तेऽपि सूत्रकारादिप्रामाण्याद्धातुत्वेनाश्रयणीयाः। समानशब्दानामिति। समानश्रुतीनामपि
[illegible] विपरीतानामपीत्यर्थः। तव्यदादीनामिति। यथैव दिवं पश्येति बाह्यक्रियापेक्षकर्मणि द्वितीया भवति एवं तव्य
दादयोऽपि स्युरित्यर्थः॥

भा॰के॰

साधन इति। अंतरंग धातुत्वात् क्रियापेक्षे साधने तव्यदादयः स्वाव काशाः बाह्यक्रियापेक्षे साधने नोत्सर्यंते इत्यर्थः। यो विशाकयषति स्वार्थिकस्तुन् स्तोऽप्यनभिधानान्न भविष्यति। याः पश्येति। यच्छब्देन धातुरिति विभक्ति रुत्पद्यते। तस्याम वेरापि च कृते न धातुसंज्ञा

साधने तव्यदादयो विधीयंते। साधनंच क्रियायाः क्रियाभावात् साधनाभावः। साधनाभावा त्तस्यामपि धातुसंज्ञायां तव्यदादयो न भविष्यंति। इदं तर्हि याः पश्य। आतो धातोरिति लोपः प्र सज्येत। नैष दोषः। अनापद्युत्येवं सः। अस्य तर्हि वाशब्दस्य निपातस्याधातुरिति प्रातिपदिक संज्ञायाः प्रतिषेधः प्रसज्येत। अप्रातिपदिकत्वात् स्वाद्युत्पत्तिर्न स्यात्। नैष दोषः। निपातस्यान र्थकस्य प्रातिपदिकत्वंचोदितं। तत्रानर्थकग्रहणं न करिष्यते। निपातः प्रातिपदिकमित्येव। इदं तर्हि त्रस्न इति। अचि श्नुधातुभ्रुवांय्वोरियुङ्वेदेशः प्रसज्येत। नैष दोषः। आचार्यप्र वृत्तिर्ज्ञापयति न प्रत्ययस्यावयवादेशो [redacted] भवतीति। यदयं तत्र श्नुग्रहणं करोति। अस्य त र्हि दिवुशब्दस्याधातुरिति प्रातिपदिकसंज्ञायाः प्रतिषेधः प्रसज्येत। अप्रातिपदिकत्वात् स्वाद्यु त्पत्तिर्न स्यात्। नैष दोषः। आचार्यप्रवृत्तिर्ज्ञापयत्युत्पद्यंते दिवुशब्दात् स्वादय इति। यदयं दिवःसा वोत्वं शास्ति। नैतदस्ति ज्ञापकं। अस्ति ह्यन्यदेतस्य वचने प्रयोजनं। किं। दिवुशब्दो यः प्रातिपदिकं त

शिवः

2

यामातो धातोरिति लोपप्रसंगः। त्रस्न इति। ननु एणु धातुषु पठितः। नचास्य तेन सारूप्यं। नैष दोषः। प्रयोगे नुशब्द एव धातुः तेन चास्य सारूप्यमस्त्येव। यद्यपि चायं सानुबंधकस्तथापि धातुष्वननुबंधकपरिभाषा केश्चिन्नाश्रीयते। अथवोपलक्षणार्थमिदं तेन स्थाणोरेवे

2

नवेअत्रेष्यतइति। णिच्प्रयोगाभावात्। तस्माद्दिवमोदिव्यादिज्ञापकमेव। इतरोज्ञापकत्वं विघटयति। अनिषंचेति। एवंतर्हीति। धातुः सानु
बंधकइतिभावः। एवमपीति। अधातुरिति प्रातिपदिकसंज्ञानिषेधात्लिरनुबंधकात्वोरभावः। संभवः। उभयसंभवे चास्याः परिभाषायाउ
पस्थानं नान्यथा। इयानवधिरिति। अवधिमानवधिनोपलक्ष्यते। तेनविशिष्टावधिपरिच्छिन्नस्यधातुसंज्ञाविधेयस्यर्थः। भ्वेधशब्द इति।
ततभ्वभ्वेधशब्दात्लडादिप्रसंगः। अचार्यपाठः परिच्छेदकः। तस्यापाणिनीयत्वात्। अभियुक्तैरुपलक्षणतयोपात्तत्वादनेकार्थत्वदर्श

नवेअत्रेष्यते। अनिषंचप्राप्नोतीषंचनसिध्यति। एवंतर्हिनुनेबंधकग्रहणेनसानुबंध
कस्यैवमेतस्यनभविष्यति। एवमप्यनेकबंधकोदिवूशब्दोनास्तीतिकृत्वासानुबंधक
स्यग्रहणं विज्ञास्यते। परिमाणग्रहणंचापरिमाणग्रहणंचवकर्तव्यं। इयानवधिर्धातुसं
ज्ञोभवतीतिवक्तव्यं। कुतोह्येतत्। भूशब्दोधातुसंज्ञोभविष्यतिनपुनर्भ्वेधशब्दइति। यदि
पुनः क्रियावचनोधातु [redacted] रित्येतल्लक्षणंक्रियेत कापुनःक्रिया। ईहा।
कापुनरीहा। चेष्टा। कापुनश्चेष्टा। व्यापारः। सर्वथाभवान्छब्देरेवशब्दानाचष्टेनकिंचि
दर्थजातंनिदर्शयत्येवंजातीयकाक्रियेति॥

नादर्थस्यानियामकत्वाभावात्। क्रियावचनाइति। एवंसतिसमानशब्दानांप्रतिषेधोनवक्तव्यः। नापिपरिमाणग्रहणं। नहिभ्वेधश
ब्दसमुदायः क्रियावाची। कापुनरिति। द्रव्यव्यतिरेकेणास्याः सत्तामसंभावयतःप्रश्नः। ईहेति। ईहाचेष्टाशब्दयोरन्यत्रव्यापारविशे
षवचनत्वेपिइहव्यापारमात्रवचनत्वंबोध्यं। कस्यचित्केनचिच्छब्देनसोर्थःप्रसिद्धइत्यनेकपर्यायोपादानं। सर्वथेति। यावद्द्रव्य
व्यतिरेकेणक्रियासद्भावेप्रमाणंनोक्तंतावत्पर्यायोपादानमात्रेणतस्याः स्वरूपंननिश्चीयतेइत्यर्थः। अर्थजातमिति। अर्थस्व

एवं २

मा.कै. अशक्येति। आख्यातपदवाच्या पूर्वापरीभूतावयवा या साध्यमानावस्था भूतभविष्यद्वर्त्तमानसदसदनेकावयवसमूहरूपा सद्व
स्तुविषयेंद्रियग्राह्या न भवतीत्यर्थः। पिंडीभूतेति। यथा परमाणवः पिंडीभूता उपलभ्यंते न केवलाः पिंडीभावाभावात् क्रिया
न प्रत्यक्षेत्यर्थः। गर्भो निर्लुठित इति। यथा कुक्षिस्थो गर्भोऽप्रत्यक्षस्तथा क्रियेत्यर्थः। अथवा निर्लुठितो निर्गतः कुक्षेर्गर्भः प्रस
वः। नैवं क्रियेति वैधर्म्येण दृष्टांतः। सासाविति। या पूर्वमुक्ता सासावनुमानेन प्रतीयत इत्यर्थः। कोसाविति। यो भावेत्युद्दिष्टः स नपुं
सकः। अन्यत्र त्वभिधेयवशाद्नियतलिंगः। अथवा मन्यते यस्मिन्ननुमानमिति रूपं। यस्मिन्सन्निहितेऽइति। यस्मिन्वस्तुनि स
न्निहिते सति पचतीत्येतत्प्रयुज्यते नासति सा क्रिया। क्वचित्तु साधने सन्निहिते इति पाठः। तत्रायमर्थः। यस्मिन्सन्निहिते सति पच

क्रियानामेयमत्यंतापरिदृष्टा अशक्यापि पिंडीभूता निदर्शयितुं। यथा गर्भो निर्लुठितः।
3 सासावनुमानगम्या। कोसावनुमानः। इह सर्वेषु साधनेषु सन्निहितेषु कदाचित्पच
तीत्येतद्भवति कदाचिन्न भवति। यस्मिन्सन्निहिते पचतीत्येतद्भवति सा नूनं
क्रिया। अथवा यया देवदत्त इह भूत्वा पाटलिपुत्रे भवति सा नूनं क्रिया।

तीत्येतत्साधनविषये भवतीति। स्यादेतत् भ्रमगतक्रियात्मिका विषयजलज्ञानवत्पचतीत्येतदसत्यविषयमेव ज्ञानमित्याशं
क्याह। अथवेति। देशांतरप्राप्तिलक्षणेन कार्येणाऽबाधितेन क्रियारूपं कारणमनुमीयत इत्यर्थः। ननु प्रत्यक्षाप्रवृत्तौ सं शिवः
बंधग्रहणाभावात्कथं क्रियाविषयमनुमानं प्रवर्त्तते। नैष दोषः। धातुवाच्यस्य समूहस्य युगपदसन्निधानाद्प्रत्य
क्षत्वेप्येकैकस्य तु क्षणस्य प्रत्यक्षत्वे बुध्या तान्क्षणान्संकलय्य पचती ति प्रयुज्यते। यद्यप्येकस्मिन्क्षणे पचती 3
ति प्रयोगस्तथापि तत्र समूहरूपारोपणं। अथ क्षणिकत्वभावाच्चैकः क्षणो नैव धातुवाच्यः॥

किंकरोतिपचतीति। सामान्यविशेषभावेनसामानाधिकरण्यात्क्रियाविशेषवचनाःपचादयःप्रतीयंतइत्यर्थः। यदातुकिंकरोतीतिपृष्टेनकरो
त्यास्तएवकेवलमितिप्रतिवचनंतदाव्यापारमात्रस्यावश्यंभावित्वाद्विशेषविषयःप्रश्नः। प्रतिवचनंविशेषनिराकरणेनेतिबोध्य

कथंपुनर्ज्ञायतेक्रियावचनाःपचादयइति। यदेतेषांकरोतिनासामानाधिकरण्यं। किंकरो
तिपचतिकिंकरिष्यतिपक्ष्यति। किमकार्षीत्। अपाक्षीत्। इति। तत्रक्रियावचनेउपसर्ग
प्रत्ययप्रतिषेधः। क्रियावचनेधातावुपसर्गप्रत्यययोःप्रतिषेधोवक्तव्यः। पचतिप्रपच
ति। किंपुनःकारणंप्राप्नोति। संघातेनार्थगतेः। संघातेनह्यर्थोगम्यते। सप्रकृतिकेनसप्र
त्ययकेनसोपसर्गेणच। अस्तिभवतिविद्यतीनांधातुत्वं। अस्तिभवतिविधतीनांधातु
संज्ञावक्तव्या। यथाहिभवताकरोतिनापचादीनांसामानाधिकरण्यंदर्शितंनतेषामस्त्यादी
नांनिदर्श्यते। नहिभवतिकिंकरोत्यस्तीति। प्रत्ययार्थस्याव्यतिरेकात्प्रकृत्यंतरेषु। प्रत्य
यार्थस्याव्यतिरेकात्प्रकृत्यंतरेषुमन्यामहेधातुरेवक्रियामाहेति। पचतिपठति। प्रकृ
त्यर्थोऽन्यश्चान्यश्चप्रत्ययार्थःसएव। धातोश्चार्थाभेदात्प्रत्ययांतरेषु। धातोश्चार्थाभेदात्प्र
त्ययांतरेषुमन्यामहेधातुरेवक्रियामाहेति। पक्तिःपचनं

पाकइति। प्रत्ययार्थोऽन्यश्चान्यश्च
वक्ति। प्रत्ययार्थःसएव॥

यं। संघातेनेति। संघातस्यैवप्रयोगादर्थवत्त्वं। केवलानांतुधातूनामप्रयोगादानर्थक्यम्॥ ॥श्रीः॥ कसङ्गीरामजीश्रीकृष्णोजयतु॥

भा॰के॰

अतिशब्दश्चेति। यद्यप्ययं प्रत्ययसमुदायस्तथापि प्रकृतिभागावबोधपरत्वात्प्रत्ययभागपर्यालोचनेनादरादेवमुक्तं। अथवा पूर्वाचा

कथं पुनर्ज्ञायते यं प्रकृत्यर्थो यं प्रत्ययार्थ इति। अन्वयव्यतिरेकाभ्यां। अन्वयव्यतिरेकौ च कोसाव
न्वयो व्यतिरेको वा। इह पचतीत्युक्ते कश्चिच्छब्दः श्रूयते पच्छब्दश्चकारान्तः। अतिशब्दश्च प्रत्ययः।
अर्थोपि कश्चिद्गम्यते विक्लित्तिः कर्तृत्वमेकत्वं च। पठतीत्युक्ते कश्चिच्छब्दो हीयते कश्चिदुपजायते क
श्चिदन्वयी। पच्छब्दो हीयते पठ्शब्द उपजायते अतिशब्दोन्वयी। अर्थोपि कश्चिद्धीयते कश्चिदु
पजायते कश्चिदन्वयी। विक्लित्तिर्हीयते पठिक्रियोपजायते कर्तृत्वं चैकत्वं चान्वयी। ते मन्या
महे यः शब्दो हीयते तस्यासावर्थः योर्थो हीयते यः शब्द उपजायते तस्यासावर्थः योर्थ उपजाय
ते ^यः शब्दोन्वयी^ तस्यासावर्थः योर्थोन्वयी। विषम उपन्यासः। बहवो हि शब्दा एकार्था भवन्ति। तद्यथा। इन्द्रः शक्रः पु
रुहूतः कन्दुः कोष्ठः कुसूल इति। एकश्च शब्दो बह्वर्थः। तद्यथा। अक्षाः पादा माषा इति। अतः किं न सा
धीयोर्थवत्त्वा सिद्धं भवति। नापि ब्रूमोर्थवत्ता न सिध्यति। वर्णितार्थवत्तान्वयव्यतिरेकाभ्या
मेव। तत्र कुत एतदयं प्रकृत्यर्थोयं प्रत्ययार्थ इति। न पुनः प्रकृतिरेवोभावर्थौ ब्रूयात्प्रत्यय एव
वा। सामान्यशब्दा एते एवं स्युः सामान्यशब्दाश्च नान्तरेण प्रकरणं विशेषणं वा विशेषेष्ववतिष्ठन्ते। यत

शिव॰
४

यैः कैश्चिदतिप्रत्ययत्वेन कल्पित इति तदपेक्षयैतदुक्तं। किं न साधीय इति। यदा प्रकृतिश्च क्रियां साधनं चाह तदा सिद्ध एव प्रकृतेः क्रियावाचित्वं प्रत्यय एव
वेति। ततश्च प्रकृतेर्न स्यात्क्रियावाचित्वं॥

अधिरूपरिभावइति। ततश्चाधीतइत्यस्यविशिष्टार्थयुक्तानांग्रन्थानांपठनं विधिपूर्वकं वाकरोतीत्यर्थः। अध्येतीत्यत्रविशिष्टंस्मरणरूपंज्ञा

क्रियाविशेषकउपसर्गः। पचतीत्यत्र। क्रियागम्यतेतांप्रोविशिनष्टि। यद्यपितावदत्रैतच्छक्यतेवक्तुं यत्रधातुरुपसर्गंव्यभिचरति। अत्रनखलुतंव्यभिचरति अध्येति अधीतइति। यद्यप्यत्रधातु रुपसर्गंनव्यभिचरतिउपसर्गस्तुधातुंव्यभिचरतितेमन्यामहेयएवास्याधेरन्यत्रार्थःसइहा पीति। कः पुनरन्यत्राधेरर्थः। अधिरुपरिभावेवर्त्तते। इहतर्हिव्यक्तमर्थान्तरंगम्यते तिष्ठतिप्रति ष्ठतेइति। तिष्ठतीतिव्रजिक्रियायाःनिवृत्तिः प्रतिष्ठतइतिव्रजिक्रियागम्यते। तेमन्यामहेउप सर्गकृतमेतद्येनात्रव्रजिक्रियागम्यतइति। प्रायंदृष्टापचारःआदिकर्मणिवर्त्तते। नचेदंना स्तिबहूर्थाअपिधातवोभवंतीति। तद्यथा। वपिःप्राकिरणेदृष्टःप्रेरणेचापिवर्त्तते। केशश्मश्रु वपतीति। ईडिःस्तुतिचोदनायाच्ञास्वदृष्टःप्रेरणेचापिवर्त्तते। अग्निर्वाइतोवृष्टिमीट्टेमरुतोमु तश्च्यावयंतीति। करोतिरभूतप्रादुर्भावेदृष्टःनिर्मलीकरणेचापिवर्त्तते। पृष्ठंकुरुपादौकुरु उन्मृदानेतिगम्यते। निक्षेपणेचापिवर्त्तते। कटेकुरुघटेकुरु अश्मानमितःकुरुस्थापयेतिग म्यते। एवमिहापितिष्ठतिरेवव्रजिक्रियामाहतिष्ठतिरेवव्रजतिक्रियायाःनिवृत्तिंअपंतर्हिदो

तंधात्वर्थः॥ प्रायमिति। अन्यत्रापिप्रयोगात्। ततश्चान्यत्रास्ययोर्थोयोत्यःसएवेहाप्यनुमीयते। अनेकार्थत्वाद्धातूनांतिष्ठतिरेवगति

6

भा॰के॰ भाववचन इति। भावशब्दः क्रियामात्रवाची। यथाऽयस्य च भावेनेति भावे घञ् इति च। [redacted] नेन पचादीनामपि धातुसंज्ञा सिध्यति। अस्ति भवति विद्यतीनामपि भावरूपार्थाभिधायित्वात्। भवति पचतीति आत्मनेऽरणावाचो न भवति। तन्नात्मनेऽरणे विरुद्धे कार्य समवाये। पाचकत्वादिभिरविरुद्धे कार्यसमवायं। यथा शुक्लं रूपमिति। शुक्ले गुणे शुक्लत्वं रूपत्वं चास्तीति शुक्लादयो रूपवचना एवं पचादयो भाववचना इत्यर्थः। कः पुनरिति। यदि क्रियेव भावस्तदा पक्षांतरोपादानमनर्थकं प्रधानस्तदाऽव्याप्तिरिति प्रश्नः। स्वपदार्थ

यदि पुनर्भाववचनो धातुरित्येतल्लक्षणं क्रियेत। कथं पुनर्ज्ञायते भाववचनाः पचादय इति। यदेतेषां भवतिना सामानाधिकरण्यं। भवति पचति भविष्यति पक्ष्यति भवति अपाक्षीदिति। कः पुनर्भावः। भवतेः स्वपदार्थो भवनं भावः इति। यदि भवतेः स्वपदार्थो भवनं भावः। विप्रतिषिद्धं धातुसंज्ञा न प्राप्नोति। देः भेद्ये दः। अन्यो हि भावः अन्योऽभावः। आतश्चान्यो भाव अन्यो ऽभावइति। यो हि यस्य भावमिच्छति स न तस्याभावं। यस्य चाभावं न तस्य भावं। पचादीनां च धातुसंज्ञा न प्राप्नोति। यथा हि भवता क्रियावचने धातौ करोतिना पचादीनां सामानाधिकरण्यं निदर्शितं न तथा भाववचने धातौ निदर्श्यते। करोतिः पचादीन्सर्वान्कालान्सर्वाननुरूपान्सर्वाननुवर्त्तते। भवतिः पुनर्वर्त्तमानकालत्वं चैकत्वं च। कानतीयं वाचोयुक्तिः भवति पचति

इति। स्वग्रहणमुपचरितार्थनिवृत्त्यर्थं। गौणोऽपि पदार्थो भवति न तु स्वः। व्यभिचारान्तरापदग्रहणं प्रकरणाद्यनपेक्षत्वप्रतिपादनार्थं। भवनं भाव इति विग्रहः कर्तृसाधननिवृत्त्यर्थः। भेद इति। विनाशो भेदः भेदश्च घटरज्वादेः स च भावविरोधीति भावः। सर्वाननुरूपानिति। किं करोषि पचामि किं करोमि पचेत्यादौ विपरीतापि पुरुषानुवृत्तिः सर्वग्रहणेन विवक्षिता। भवतिः पुनरिति। न हि भवति भवति भविष्यति पक्ष्यति अपाक्षी

5

शिवः ५

ऐषेषेति। याएषात्वयाप्रष्टासेषावर्ण्यमानस्वरूपेत्यर्थः। पचादय इति। साध्यसाधनसंबंधः न तु सामान्यविशेषभाव इत्यर्थः। नन्वन्यत्रोक्तं तिङाभिहितो भावः क्रियया समवायं न गच्छतीति। न हि भवति पचति पच्यतीति। ततश्चतेनेन तद्विरुध्येत। तत्राहुः॥ कर्तृकर्मभावेन क्रियाभ्या स्यात् तवाच्यक्रियया संबध्यत एव। भवति पचति पच्यमानो भावतीति। करणादिभावेन तु न संबध्यते। तथाप्रयोगादर्शनात्। भवेदपि भवेदिति। एकस्याः क्रियायाः आत्मापेक्षः साध्यसाधनभावो विरुद्ध इति भावः। कालभेदादिति। स्वाभाविकमन्यत्वं कालभेदेन साधनभेदेन

भा ४

ऐषेषा वाचोयुक्तिः पचादयः क्रियाः भवतिक्रियायाः कर्त्र्यो भवंति। यद्यपि तावदत्रैतच्छक्यते वक्तुं यच्चा न्याचान्याच क्रिया। यत्र तु खलु सैव क्रिया तत्र कथं। भवेदपि भवेत् स्यादपि स्यादिति। अत्राप्यन्यत्व मस्ति। कुतः। कालभेदात्साधनभेदाच्च। एकस्यात्र भवतेर्भवतिः साधनं सर्वकालश्च प्रत्ययः अपरस्य बा ह्यं साधनं वर्तमानकालश्च प्रत्ययः। यावता त्राप्यन्यत्वमस्ति पचादयश्च क्रियाः भवतिक्रियायाः कर्त्र्यो भवंती ति अस्त्ययं कर्तृसाधनः भवतीति भाव इति। किं कृतं भवति। विप्रतिषिद्धानां धातुसंज्ञा सिद्धा भवति। भवेदिति अस्त्ययं कर्तृसाधनः भवतीति भाव इति। किं कृतं भवति। विप्रतिषिद्धानां धातुसंज्ञा सिद्धा भवति। भवेदिति प्रतिषिद्धानां धातुसंज्ञा सिद्धा स्यात्प्रातिपदिकानामपि तु प्राप्नोति लिंगसंख्ये इति। किं कारणं। एतान्यपि हि भवंति। एवं तर्हि कर्मसाधनो भविष्यति भाव्यते यः स भाव इति। क्रियाश्चैव हि भाव्यते। स्वभावसिद्धं तु द्रव्यं एवमपि भवेत्केषांचिन्न स्यात्। येत्वेते संबंधिशब्दास्तेषां प्राप्नोति माता

यच्यते। एकस्येति। अपि भवेदित्यत्र यो भवतिस्तस्यारो ज्यादिविशिष्टदेवदत्तादिकर्तृका सत्ता वर्तमानार्थः। तथा भूता हि सत्ता प्रार्थ्यत इति वर्तमानकालः प्रत्ययः। सा तु सत्ता भवेदित्यस्याः सत्तायाः कर्तृत्वेन निर्दिश्यते ति भेदोस्त्येव। अस्त्ययमिति। भवादयो भवंतीति तेषां सिध्यति धातुसंज्ञा। एतान्यपीति। सत्ताप्रातिपादिकानि वस्तूनीत्यर्थः। भा व्यते यः स भाव इति। तेन साध्यमानार्थवाचिनां धातुसंज्ञेत्यर्थः। स्वभावसिद्धमिति। शाब्दशक्त्यनुसारेणैतदुच्यते। कृतता क्रियमाणता कर्तव्यता यु क्तान्यपि द्रव्याणि सिद्धरूपाण्येव प्रातिपदिकेनाभिधीयंते। शब्दांतरेण तु तेषां भव संभा

गा: ५।१२

मा॰के॰ सर्वथेति। पाठाश्रये समानशब्दानांप्रसंगः। भकर्त्तसाधने भावशब्दे रूपादीनांप्रसंगः। कर्मसाधने मात्रादीनामित्यर्थः। इदानीं समाधानमा
ह। पठिष्यतीति। पठितानां भावभाववचनानां धातुसंज्ञा नान्येषामित्यर्थः। अस्त्वयमिति। भवतीति भूरिति कर्त्तरि क्विप्। अस्तिन तु कर्मणि। अर्थ
स्वाभिन्न एव यो हि भवति स एव भाव्यते नान्यः। नेदमिति। वृद्धिशब्दः मंगलार्थस्य प्रयुक्तता भूरास्तु का रोऽमंगलार्थो नोपयुज्यते। भुवन्तीति।

सर्वथा वयं प्रातिपदिकपर्युदासान्नमुच्यामहे। पठिष्यतिह्याचार्यः भूवादिपाठः प्रातिपदिकाणव
यत्यादिनिवृत्त्यर्थइति। यावता पठिष्यति पचादयश्चक्रियाः भवति क्रियायाः कर्त्ता भवतीति। अ
स्त्वयं कर्त्तसाधनो भवतीति भावइति। किं वक्तव्यमेतत्। नहि। कथमनुच्यमानं गंस्यते। एते
नैवाभिहितं सूत्रेण भूवादयो धातवइति। कथं। नेदमादिग्रहणं वदे रो एणादिकइन्कर्त्तसाध
नः। भुवं वदंतीति भूवादयइति। भाववचनेधातोर्न दर्थप्रतिषेधः। भाववचने धातोतदर्थ
स्य प्रतिषेधो वक्तव्यः। शिश्येइति। किं च स्यात्। अशितीत्यात्वं प्रसज्येत। तद्धि धातो र्विहितं इ
तरेतराश्रयं च प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः। इतरेतराश्रयं च न भवति। का इत
रेतराश्रयता। प्रत्यये भाववचनत्वं तस्माच्च प्रत्ययः। उत्पन्ने हि प्रत्यये भाववचनत्वं न गम्य
ते। स च तावद्भाववचनाद्युत्पाद्यः तदेतदितरेतराश्रयं ६

ज्ञायमानमर्थं येभिदधतिते धातवइत्यर्थः। भवतिरत्र जन्मवाचीग
घतेन तु सत्तावाचीति सिद्धार्थाभिधायिनां संज्ञा न भवतीति। शिश्येइति। भावार्थाभिधायित्वात्सत्यस्य धातुसंज्ञाप्रसंगादात्वं प्राप्नोति
तच्च नेमित्तिकेशितिलुप्तति षिध्यते। एकारोच्चारणं तु पदकर्त्तकर्मणोर्लकारस्तदर्थं। पाठस्तु नतावदस्य मनसि वर्त्तते। इतरेतराश्र
यं चेति। प्राकृतात्स्व व्यापारात्समुदायएव नास्ति कुतोन्वयव्यतिरेकाभ्यामर्थस्य प्रविभा

[illegible]

शिव:

सिद्धं त्विति। सर्वस्मिन्नाप एव पञ्चम्यादयः समुदायाः संस्पृष्टार्थाभिधायिनः केवलं समुत्प्रेक्ष्यो त्प्रेक्ष्य प्रक्रियायामर्थविभागः शब्दविभाग
श्चोपाक्रियते इत्यर्थः। अनाश्रित्येति। पारमार्थिकं नाश्रीयते परिकल्पितं त्वाश्रीयत एव। तत्वतो हि शब्दान्तराण्येवार्थान्तरेषु प्रयुज्य
न्ते। प्रथमभावग्रहणं चेति। तदर्थप्रत्ययपरिहारार्थं। प्राथम्यस्यापेक्षिकत्वादस्ति। कुत इति। पुत्रीयतीति। नात्र प्रथमस्तुत्व
र्यमाणः पुत्रशब्दो भावमाह। सनाद्यन्ता धातव इत्यस्य प्रत्याख्याने दोषः। सिद्धं तु इति। प्रथम आद्यो भावो ऽर्थ ये नापि कश्चिदभिधीयते
न तु द्वितीयः। शिष्यइत्यत्र तु प्राप्नोति। स्वार्थिकेन प्रत्ययेन प्रथम एव भावो ऽभिधीयते न तु द्वितीयः। अभिधानत इति। अन्येनाभिहि
सिद्धं तु नित्यशब्दत्वादनाश्रित्य भाववचनत्वं प्रत्ययः। सिद्धमेतत्। कथं। नित्याः शब्दाः नित्येषु च शब्
देषु अनाश्रित्य भाववचनत्वं प्रत्यय उत्पद्यते। प्रथमभावग्रहणं च। प्रथमभावग्रहणं च कर्तव्यं प्रथ
मं यो भावमाहेति। कुतः पुनः प्राथम्यं। किं शब्दत आहोस्विदर्थतः। किं चातः। यदि शब्दतः सनादी
नां धातुसंज्ञा न प्राप्नोति। पुत्रीयति वस्त्रीयतीति। अथार्थतः सिद्धा सनादीनां धातुसंज्ञा सए
नां धातुसंज्ञा न प्राप्नोति। पुत्रीयति वस्त्रीयतीति। एवं तर्हि नापि शब्दतो नाप्यर्थतः किं तर्ह्यभिधानत
व तु दोषः भाववचने तदर्थप्रतिषेध इति। एवं तर्हि नापि शब्दतो नाप्यर्थतः किं तर्ह्यभिधानतः
स्तु प्रथममभिधाने यः प्रथमं भावमाह॥ [illegible]
[illegible]
तं भावं य आह स धातुः। शिष्य इत्यत्र तु प्रकृत्याभिहितं भावं प्रत्यय आहेति न तस्य धातुसंज्ञाप्रवृत्तिः। यथा प्रथममयं राजानं पश्यती
ति स्वार्थो यदन्येनादृष्टं पश्यतीति तथेहापि शब्दस्य प्रथममभिधानं क्रियापेक्षमाश्रीयते अन्ये ये भावाभिधायिभ्यो यः प्रथमं भावमा
हेति। स्तु प्रथम इति। दोषाभावार्थपक्षो दुष्टत्वात्सरित्युच्यो पादीयमानं प्रथमम्भिति तिय पदिश्यते। तदेव निर्देष्टत्वाच्छोभनत्वेन विशेष्य
ते। चिकीर्षतीत्यत्रापि करोत्यर्थोपसर्जनामिच्छामन्येनाभिहितां सन्प्रत्यय आहेति प्रवर्तते धातुसंज्ञा। अत्र पक्षे यणाशिष्यइति प्रत्यय

7

इत्यति। तदर्थप्रत्ययप्रतिषेधः इतरेतराश्रयं च। प्रथमभावग्रहणं चासिद्धं तु नित्यशब्दत्वादिति च। केवलं प्रथमभावग्रहणमपनीय प्रथ
मं क्रियायग्रहणं कर्त्तव्यं [illegible] तत्रेदमिति। किं करोतीति प्रश्नेऽस्त्यादिभिः प्रतिवचनाभावाद् क्रियावचनत्वमेषामिति प्रश्नेतः। यच्चाप्युक्त
मिह सर्वेषु साधनेषु सन्निहितेषु कदाचित् पचतीत्येतद्भवति कश्चिन्नेति तत्तरस्त्यादिषु नास्ति। न ह्यस्तीति कदाचिद्भवत्यपि तु सर्व
देति पाकादिभिर्वैधर्म्यं। यथा पचतितराम् इति प्रकर्षो भवति नैवमस्तितरामिति। किं यत्तदिति। पराच्छत्त्राभ्यां कारकवैचित्र्यं
निदर्शयति। प्रवृत्तिविशेष इति। सर्वाण्यपरिणतः प्रवृत्तं संतरण्डिद्यते इत्यस्यैव सर्वस्याः क्रियात्वं। अन्यथेति। भुङ्क्ते ओदने मन्दप्रयत्नः प्रव
र्त्तते मांसोदने तु संवेगेन। यथा च भोजनक्रियाणां परस्परवैलक्षण्यात्प्रवृत्तिविशेषत्वं नैवमस्त्यादीनां। यद्येवमिति। अत्रापि प्रवृत्त्यन्तरा

इत्ययमेव भाववचनो धातोर्दोषास्तु क्रियावचनेऽपि। तत्र तत एव परिहारः। तत्रेदमपरिहृतं। अस्ति-
भवति-विद्यतीनां धातुत्वमिति। तस्य परिहारः। कां पुनः क्रियां भवान्मत्वाह अस्तिभवतिविद्यतीनां
धातुसंज्ञां न प्राप्नोतीति। किं यत्तद्भवदतः कं सपात्र्यां पाणिनौदनं भुङ्क्त इति। नह्यमः कारकाणि क्रि
येति किं तर्हि कारकाणां प्रवृत्तिविशेषः क्रिया। अन्यथा च कारकाणि शुष्कौदने प्रवर्त्तन्ते अन्यथा
मांसोदने। यद्येवं सिद्धास्तिभवतीनां धातुसंज्ञा। अन्यथा हि कारकाण्ययस्तोप्रवर्त्तन्तेऽन्यथा म्रियतो ष-
ड्भावविकारा इति हस्माह वार्ष्यायणिः। जायतेऽस्ति विपरिणम

पेक्षयास्त्येव प्रवृत्तिविशेषरूपत्वमित्यर्थः। अन्यथेति। अस्ता वास्य
मरणरूपा प्रवृत्तिः म्रियतो तत्त्यागरूपा। उत्पत्तिप्रभृत्याविनाशाच्च सत्तानुषंगादस्तीति प्रत्ययस्य सन्निहितेषु साधनेषूत्पत्तिरवश्यं
भाविनीति कादाचित्कत्वाभावः। प्रकर्षप्रत्ययोऽपि दृश्यते विद्यतेतरामिद्धान्यमिति। अत्रैव वार्ष्यायणमतमाह। षड्भावविकारा इति। भाव
स्य क्रियायाः षट्प्रकारा इत्यर्थः। तेषु चास्तिः पठित इति तस्यापि क्रियात्वमित्यर्थः। अथवा भावस्य सत्ताया एते प्रकाराः। सत्तैव ानै
कक्रियात्मिका साधनसंबंधादवसीयमानसाध्यरूपा जन्मादिरूपतया च भासते। एते च भावविकारा निरुक्ते निपुणं व्याख्याताः। ६६

शिवः ७

सर्वथेति। भावविकारपरिसंख्यानस्याव्यापकत्वमित्यर्थः॥ एवं तर्हीति। अनुमानेन क्रियात्वं प्रतिपादयति। अन्यथास्थित इत्युक्ते वृद्धिक्षयनि
वृत्तिर्न प्रतीयेत। अथवेति। क्रियांतरधर्मसमन्वयेनास्त्यादीनां प्रतिपाद्यते। घट इत्युक्ते कालविशेषावगतिर्नास्ति। अस्तिभवतिभवि

सर्वथास्थित इत्यत्र धातुसंज्ञा न प्राप्नोति। बाध्यो ह्येते भ्यस्तिष्ठतिः॥ एवं तर्हि क्रियायाः क्रि
यानिवर्त्तिका भवति द्रव्यं द्रव्यस्य निवर्त्तकं। एवं हि कश्चित्कंचित्पृच्छति किमवस्था देवदत्तस्य
व्याधिरिति। स आह वर्द्धत इति। अपर आह अपक्षीयत इति। अपर आह स्थित इति। स्थित इत्यु
क्ते वर्द्धतेश्चापक्षीयतेश्च निवृत्तिर्भवति। अथवा नानांतरेण क्रियां भूतभविष्यद्वर्त्तमानाः का
लाः व्यज्यंते। अस्त्यादिभिरपि भूतभविष्यद्वर्त्तमानकालाः व्यज्यंते। अथवा न्यत्स्वर्षेनान्यदाख्या
यंतेन भविष्यति किं करोत्यस्तीति। अथ यद्येव क्रियावचनो धातुरित्येषः अर्थो भाववचनो धातुरि
ति किमर्थमेतद्वियतां सूत्रेण आहोस्विदन्यतरस्मिन्पक्षे भूयः सूत्रं कर्त्तव्यं गतमित्याह। कथं अथमा
दिशब्दास्त्येव प्रकारायां वर्त्तते। तद्यथा देवदत्तादीन्समुपविष्टानाह देवदत्तादय आनीयंतामिति तेउत्था
प्यानीयंते। अस्ति प्रकारे वर्त्तते। तद्यथा देवदत्तादय आद्या अभिरूपा दर्शनीयाः प्रसर्वंतः देवदत्तप्रका
रा इति गम्यते। प्रत्येकं चादिशब्दः परिसमाप्यते। भ्वादय इति च वादय इति च। तद्यदा तावत्क्रियावचनो

भवतीति कालविशेषावगमात् साध्यमानस्वार्थस्य कालेन योगात्क्रियात्वावसायः॥ अथवेति। निर्ज्ञातायां सत्तायां किं करोतीति प्रश्नासंभवादस्ती
ति प्रतिवचनाभावः। न तु क्रियात्वाभावादित्यर्थः। यदा तु प्रत्यासन्नविनाशशंकया देवदत्तः किं करोतीति प्रश्नः तदास्तिता वदिति प्रतिवचनं भवत्येव
अथ यद्येवेति। परिस्पंदापरिस्पंदरूपतया क्रियाभावयोर्भे

मा०के० तदा वेत्यत्रेति। अदादीनामादौ वा गतिगंधनयोरिति पठितव्यं। अदादिगणे गणानामादौ तेन सर्वे धातुपाठसन्निविष्टा गृहीता भवंति। यदित
हीति। क्रियावचनो धातुरिति भाववचनो धातुरिति लक्षणं क्रियते नार्थः पाठेनेत्यर्थः। भूवादिपाठ इति। यथा मोर्कुं पाक इति क्रियाश्र
तुमुनादीति यणे भवंति तथा धातुसंज्ञापि स्यादिति पाकादीनां शायितव्यादीनां च पाठेनासौ निवर्त्यते। तथा दिरुकुप्पकूइत्यादीनां चक्रि

भूवादीनुभाववचनो धातुरित्येष पक्षस्तदा वेत्यत्र य आदिशब्दः स व्यवस्थायां भू इत्यत्र य आदि
शब्दः सः प्रकारे वा इत्येवमादयो भू इत्येवंप्रकारा इति। यदि तर्हि लक्षणं क्रियते नेदानीं पाठः कर्त्त
8 व्यः। कर्त्तव्यश्च। किंप्रयोजनं। भूवादिपाठः प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थः। भूवादिपाठः कर्त्तव्यः
किंप्रयोजनं। प्रातिपदिकाणवयत्यादिनिवृत्त्यर्थः। प्रातिपदिकनिवृत्त्यर्थं आणवत्यादिनिवृत्त्यर्थं
श्च। के पुनराणवयत्यादयः। आणवति। वट्टति। वड्डयति। स्वरानुबंधज्ञापनाय च। स्वरानुबंधज्ञा
पनाय च पाठः कर्त्तव्यः। स्वराननुबंधांश्च ज्ञास्यामीति। न ह्यंतरेण पाठं स्वरा अनुबंधा वा शक्या
विज्ञातुं। ये त्वेते न्याय्यविकरणा उदात्ता अननुबंधकाः पठ्यंते तेषां पाठः। शको डकुंजो। एतेषामप्या
णवयत्यादिनिवृत्त्यर्थः पाठः कर्त्तव्यः। न कर्त्तव्यः। शिष्टप्रयोगादाणवयत्यादीनां निवृत्तिर्भविष्यति। स
चावश्यं शिष्टप्रयोग उपास्यः। ये पि पठ्यंते तेषामपि विपर्यासनि। शिवः

क्रियाप्रधानानामव्ययानां। एतेषामपीति। तेषामपाठे निवृत्ति
राणवत्यादिवत्स्यात्तस्मादाणवयत्यादिष्वेषां निवृत्तिर्यथा स्यात् तन्मध्ये मा प्रविविक्षन्नित्येवमर्थस्तेषामपि पाठः कर्त्तव्य इत्यर्थः। शिष्टप्रयो ८
गादिति। प्रयुक्तानामनिदमन्त्वाख्यानं न चाणवयत्यादयः शिष्टैः प्रयुज्यंते इति नास्ति तेषां शास्त्रेणानुविधानमिति भावः। एतेनैव न्यायेन
प्रातिपदिकनिवृत्त्यर्थोपि पाठो नोपयुज्यते न हि पाकादयः शब्दाः धातुविहितप्रत्ययपरा लो

उपदेशे॥ ॥उद्देशोपदेशशब्दयोरुपसर्गमात्रभेदेपिअभिन्नार्थत्वंप्रक्रमतउपक्रमतेइत्येतयोरिवमन्यमानं [redacted] पृच्छति। उपदेशइतिकिम
र्थमिति। अत्रओँअपइति। अयंनोपदिष्टः किंतर्हिआङोऽनुनासिकश्छंदसीतिलक्षणेनांतरतमआङःस्थानेविहितः। यदित्वाङ ओँछंदसीत्य
वक्ष्यत्तदाऽभविष्यदेषोप्युपदेशोऽनुनासिकः। प्रत्यक्षमाख्यानमिति। इंद्रियगोचरार्थस्ययदाख्यानंसउपदेशइत्यर्थः। प्रसिद्धयर्भो [redacted]

उपदेशेऽजनुनासिक इत्॥ ॥उपदेशइतिकिमर्थं। अत्रओँअपः। उद्देशोयोऽनुनासिकस्तस्यमा
भूदिति। कःपुनरुद्देशोपदेशयोर्विशेषः। प्रत्यक्षमाख्यानमुपदेशः। गुणैःप्रापणमुद्देशः। प्रत्यक्षंता
वदाख्यानमुपदेशः। तद्यथा। अगोज्ञायकश्चिद्गांसक्थनिकर्णेगृहीत्वाउपदिशत्ययंगौरिति।
सप्रत्यक्षमाख्यातमाहउपदिष्टोमेगौरिति। गुणैःप्रापणमुद्देशः। तद्यथा। कश्चित्कंचिदाहदेव
दत्तंमेभवानुपदिशत्विति। सआहइहस्थःपाटलिपुत्रस्थंदेवदत्तमुपदिशति अंगदीकुंडलीकिरी
टीव्यूढोरस्कोवृत्तबाहुर्लोहिताक्षस्तुंगनासोविचित्राभरणईदृशोदेवदत्तइति। सगुणैःप्रा
प्यमाणमाहउद्दिष्टोमेदेवदत्तइति। इत्संज्ञायांसर्वप्रसंगोऽविशेषात्॥ इत्संज्ञायांसर्वप्रसंगः
सर्वस्यानुनासिकस्येत्संज्ञाप्राप्नोति। अस्यापिप्राप्नोति। अत्रओँअपः। किंकारणं। अविशेषात्। न
हिकश्चिद्विशेषउपादीयतेएवंजातीयकस्यानुनासिकस्येत्संज्ञाभवतीति। अनुपादीयमानेऽविशेषे
सर्वप्रसंगः। किमुच्यतेऽनुपादीयमानेविशेषइति
पादानेनतुयत्प्रतिपादनंसउपदेशः। प्रत्यक्षमाख्यातमितिक्वचित्पाठःतत्रा
ख्यानमाख्यातमितिभावेक्तोविज्ञेयः। ईदृशइति। एतैःशब्दैर्यादृशोबुद्ध्यावर्थःप्रतिभासतेतादृशोबाह्यइत्यर्थः। लक्षणेनेति। लक्ष्यतेऽनेनेतिलक्षणंगु
णस्तेनाप्युपदेशोभवतीत्यर्थः॥ श्रीः॥

9

भाष्ये॰ इषेत्वकमधीष्वेति। इषेत्वकमितिपूर्वेणसंबध्यते। सततस्मायाश्चष्टे इषेत्वकमिति। इषेत्वाशब्दोयस्मिन्ननुवाकेस्तिनमाचष्टेइत्यर्थः।गो
षदादिभ्योवुन्निति वुन्प्रत्ययः। किमर्थमाचष्टइत्याह। अधीष्वेति। अध्ययनार्थमाचष्टइत्यर्थः। अकार्यंलोपइति। यदितोपोपमनर्थम

१

संकीर्णावुद्देशोपदेशौ। प्रत्यक्षमप्याख्यानमुद्देशः। गुणैश्चप्रापणमुपदेशः। प्रत्यक्षंतावदाख्या
नमुद्देशः। तद्यथा। कश्चित्कंचिदाह। अनुवाकंमेभवानुपदिशत्विति। सततस्मायाचष्टे इषेत्वकमधी
ष्व[illegible]लोदेवीकेयमधीष्वेति। सप्रत्यक्षमाख्यातमाह। उद्दिष्टोमेऽनुवाकस्तमध्येष्यइति। गुणैश्चप्रा
पणमुपदेशः। तद्यथा। कश्चित्कंचिदाह। ग्रामांतरंगमिष्यामिपंथानंमेभवानुपदिशत्विति। सत
स्मायाचष्टे। अमुष्मिन्नवकाशेहस्तदक्षिणोगृहीतव्यः। अमुष्मिन्[illegible]इति। सगुणैःप्राप्यमाणमा
हउपदिष्टोमेपंथाइति। एवमेतौसंकीर्णावुद्देशोपदेशौ। एवंतर्हिकार्याभावादत्रेत्संज्ञानभविष्य
ति। ननुचलोपएवकार्यंस्यात्। अकार्यंलोपः। इहहिशास्त्रस्यद्व्यर्थउपदेशः। कार्यार्थोनवलुप
देशः। अवर्णार्थोवा। कार्यंचेन्नास्ति। कार्येचासतियदित्ववर्णंनस्यादुपदेशोऽनर्थकः। इदमस्ति
कार्यंअणअँआटितो। अनंतरलक्षणायांसत्यामित्संज्ञायामादिलश्चेत् प्रसज्येत। सिद्धंतुप
देशानेऽननुनासिकवचनात्। सिद्धमेतत्। कथं। उपदेशनेयोऽननुनासिकःसइत्संज्ञोभवतीति शिवः

विध्यदाहे[illegible]च्छंदसीत्येवांश्यदिस्यर्थः। अनंतरलक्षणायामिति। यदाअनेकांताअनुबंधास्तदाअनंतरइत्संज्ञकःकार्यस्य
विशेषकोभवतीतिधातोरादित्वादिप्रतिषेधप्रसंगः। उपदेशनइति। तेनशास्त्रेउच्चारितोऽनुनासिकःसइत्संज्ञकइतिभावः॥ ॥ २

परत्वादिति। परत्वेन बाधकत्वं लभ्यते। तेनानवकाशत्वाल्ल्युट् प्राप्नोतीत्यर्थः। हलश्चेति। अयं ल्युटो बाधको घञः प्रायवचनादिति। हलश्चेत्य
त्र संज्ञायां प्रायेणेति चानुवर्त्तते। संज्ञया च प्रायग्रहणमभिसंबध्यते। प्रायेण संज्ञायां घञ् भवति क्वचिदसंज्ञायामपीत्यर्थः। संज्ञायामेवेति।
प्रत्ययस्य विधेयत्वात् प्राधान्यात् प्रायग्रहणं प्रत्ययेनैव संबध्यते न तु गुणेन संज्ञयेत्यर्थः। उपाधिविशेषणयोश्च वाच्यत्वावाच्यत्वाभ्यां वि
शेषः। तथाहि। दृतिहरिरिति प्रत्ययेन पशुः कर्त्ताभिधीयत इति पशुरुपाधिः। गार्गिकया श्लाघत इति श्लाघायां वुञ् अभिधीयत इति विशेष

सिध्यति। सूत्रं तर्हि भिद्यते। यथान्यास मेवास्तु। ननु चोक्तमित्संज्ञायां सर्वप्रसंगोऽविशेषादिति। नैष
दोषः। उपदेश इति घञयं करणसाधनः। न सिध्यति परत्वाल्ल्युट् प्राप्नोति। नञ्श्रमोऽकर्त्तरि च कारके सं
ज्ञायामिति किं तर्हि। हलश्चेति। तत्रापि संज्ञायामिति वर्त्तते। नैषा संज्ञा। प्रायवचनादसंज्ञायामपि भ
विष्यति। प्रायवचनात्संज्ञायामेवस्याद्वा नवा। न ह्युपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणं। यदि
नोपाधेरुपाधिर्भवति विशेषणस्य वा विशेषणं। कल्याण्यादीनामिनङ् कुलटाया वा इनङ् विभाषा न
प्राप्नोति। इनङ् वात्र प्रधानं विहितः। प्रकृतः प्रत्ययश्चानुवर्त्तते। इह तर्हि वा किनादीनां कुक् च पुत्रान्तादु
न्यतरस्यामिति कुक् विभाषा न प्राप्नोति। अत्रापि कुगेव प्रधानं विहितः प्रकृतः प्रत्ययश्चानुवर्त्तते।
एवं चेदप्रकृतं भवति नोपाधेरुपाधिर्विशेषणस्य वा विशेषणमिति। न च कश्चिद्दोषो भवति॥ ॥

णमुच्यते। इनङ् विभाषेति। प्रत्ययस्य विधेयत्वात् प्राधान्यात् तादर्थ्येन प्रकृतेर्गुणत्वात् तदादेशस्येनङोऽपि गुणत्वादुपाधित्वमित्यर्थः। इनङ् वा
त्रेति। अपूर्वोपदेशत्वात्तस्यैव प्राधान्यमित्यर्थः। ढक् च स्त्रीभ्यो ढगित्येव सिद्धः। तदनुवादेनेनङ् विधीयते। कुगेवेति। उदीचां वृद्धादगोत्रादि
त्यनेन फिञ् विहितः तदनुवादेन कुको विधानात्। न चेदप्रकृतमिति। आश्रितमेवेत्यर्थः। गुणप्रधानसान्निध्ये यत्र प्रधानस्यापि विशेषणं

भा·कै· एवंचकृत्वेति। एवंस्थित्वेत्यर्थः। तेनघञेवन्यायवशात्संज्ञायांप्राप्तोऽतिष्ठतिसएवात्रनप्राप्नोतीति समानकर्तृकत्वात्क्त्वाप्रत्ययोपपद्यते।
एवंतर्हीति। बहुलग्रहणादसंज्ञायामपिघञ्भविष्यतीत्यर्थः॥ ॥हलंत्यम्॥ ॥अन्त्येऽवसानेभवमंत्यं। सर्वोहिहलितिसर्वस्यहलोऽवसानेनसं
बंधात्। अंत्यग्रहणंत्वादिनिवृत्त्यर्थंस्यात्। सिद्धंत्विति। व्यवसिताः परिछिन्नायेसमुदायाधातुप्रत्ययत्वादिनाधर्मेणतेषांयोंत्यइत्यर्थः। अ
थवास्तुसमुदायतंत्रत्वान्नांतरीयकोपदेशत्वाद्धातुत्वादिनानपरिछिन्ना[redacted]ः। तत्रप्रकर्षगतिरिति। आदिनिवृत्त्यर्थत्वादंत्यशब्दस्यकथं

एवंचकृत्वाघञ्प्राप्नोति। एवंतर्हिकृत्यल्युटोबहुलमित्येवमत्रघञ्भविष्यति॥ ॥हलंत्यम्॥ ॥हलंत्येस
र्वप्रसंगः सर्वांत्यत्वात्। हलंत्येसर्वप्रसंगः सर्वस्यहलइत्संज्ञाप्राप्नोति। किंकारणं सर्वांत्यत्वात्। सर्वोहिह
10 लंतमवधिंप्रत्यंतोभवति। सिद्धंतुव्यवसितांत्यत्वात्। सिद्धमेतत्। कथं। व्यवसितांत्यत्वात्। व्यवसितो
योहलित्संज्ञोभवतीतिवक्तव्यं। केपुनर्व्यवसिताः। धातुप्रातिपदिकप्रत्ययनिपातागमादेशाः। सिध्यति।
सूत्रंतर्हिभिद्यते। यथान्यासमेवास्तु। ननुचोक्तंहलंत्येसर्वप्रसंगः सर्वांत्यत्वादिति। नैषदोषः। आहायंह
लंत्यमित्संज्ञंभवतीतिसर्वश्चहलंतंतमवधिंप्रत्यंतोभवति। तत्रप्रकर्षगतिर्विज्ञास्यते। साधीयोयोंत्य
इति। कश्चसाधीयः। योव्यवसितांत्यः। अथवासापेक्षोयंनिर्देशः। नचान्यत्किंचिदपेक्ष्यमस्ति। तेनव्यवसि
तानेवापेक्षिष्यामहे॥ श्रीः

प्रकर्षगतिः। उच्यते। आदेरप्युच्चारणानंतरमवसानसंबंधादंत्यत्वं अनिवार्यमितिनास्तितन्निवृत्तिरि
तिसामर्थ्यात्प्रकर्षआश्रीयते व्यवसितानांयोंत्यइति। आदिमध्यानांचकाल्पनिकमंत्यत्वं। सर्वांत्यस्यतुनित्यमेवेति तस्यैवयुक्तंग्रहणं। अथवेति। शिवः
इदंसमुदायावयवसन्निधौसमुदायापेक्षमंत्यत्वमाश्रयितुंयुक्तमितिपरिहृतं। इदानींतुसमुदायार्थत्वादुपदेशस्यावयवानामसत्त्वा
तदपेक्षणंदूरोत्सारितमितिमत्वापरिह्रियते। २०

लकारस्येति। इतरेतराश्रयं मन्यते। शषसर् हल् इत्यत्र लकारस्य सत्यामित्संज्ञायां हलिति प्रत्याहारः। सति च प्रत्याहारे लण् इत्यत्र लकारस्य हल्त्वात्तस्यैव शषसर् हलित्यत्रान्ते निर्दिष्टत्वादित्संज्ञेति प्रत्याहाराश्रयाइत्संज्ञा तदाश्रयश्च प्रत्याहारः। लकारस्येति। पूर्वं लकारस्येत्संज्ञा विधेया। तेन हलिति प्रत्याहार उपपद्यते। तत्र हल् च लश्चेति समाहारद्वंद्वं कृत्वा संयोगान्तस्य लोप इति लकारो लुप्यते। हलश्चेति। हस्य लइत्येकः पवीतत्पुरुषः। द्वितीयः प्रत्याहारः। नपुंसकमनपुंसकेनेति चैकशेषे एकस्य पुल्लिंगत्वादपरस्य नपुंसकत्वात्। अथवेति। शषसर् हलित्यत्र ह

लकारस्यानुबंधाज्ञापितत्वाद्धल्ग्रहणाप्रसिद्धिः। लकारस्यानुबंधत्वेन अज्ञापितत्वाद्धल्ग्रहणस्य अप्रसिद्धिः। हलंत्यमितीत्संज्ञं भवतीत्युच्यते। लकारस्यैव तावदित्संज्ञा न प्राप्नोति। सिद्धं तु लकारनिर्देशात्। सिद्धमेतत्। कथं। लकारनिर्देशः कर्त्तव्यः। हलंत्यमित्संज्ञं भवति लकारश्चेति वक्तव्यं। एकशेषनिर्देशाद्वा। अथवा एकशेषनिर्देशोयं। हल् च हल् च हल् हलंत्यमित्संज्ञं भवतीति। अथवा लकारस्यैवेदं ग्रहणं। तस्य ग्रहणं। तच्चोपदेशेऽजनुनासिक इदिति इत्संज्ञा भविष्यति। अथवा आचार्यप्रवृत्तिर्ज्ञापयति भवति लकारस्य इत्संज्ञेति यदयं णलं लिलं करोति॥ श्रीः॥

लंत्यमित्यत्र च लकारस्यैकदेशो लपरत्वं च क्रियते। नन्वेवमपीतरेतराश्रयमेव। लकारस्य सत्यामित्संज्ञायां हलिति प्रत्याहारः। सति च प्रत्याहारे ऐऔजिति चकारस्येत्संज्ञा तस्यां सत्यामजिति प्रत्याहारः। अजिति प्रत्याहारे सति लकारस्येत्संज्ञा। एवं तर्हि लदित इति ज्ञापकात् लकारस्येत्संज्ञा कार्यं भविष्यतीति नास्तीतरेतराश्रयमिति भगवतो भाष्यकारस्याभिप्रायः। अथवेति। णलो लकारः स्वरार्थः कृतः। अससां चेत्संज्ञायां कुतः स्वरः। श्रवणार्थस्तु णलो न लकारः। हल्ङ्यादिसूत्रे हलन्तग्रहणास्यलृ व्यावृत्त्यर्थात्। तत्र द्विविभेदेति णल्याहृतसर्ये हलाद एवं कृतं। लकारस्य श्रवणे उच्चत्वाभावाल्लोपस्याप्राप्तिरिति किं हल्ग्रहणेन॥

भा॰कै॰ प्रातिपदिकप्रतिषेध इति। यदा संज्ञकादिनिवृत्त्यर्थः प्रातिपदिकानामुपदेशः कर्त्तव्य इति पक्षस्तदा प्रतिषेधः। अन्यथा उपदेशाभावात्प्राप्त्यभावा
दनर्थकः प्रतिषेधः स्यात्। कुंभकार इति। अपवादविषयपरिहारेणेत्संज्ञायाः प्रवर्त्तनात्पूर्वं प्रातिपदिकसंज्ञेति प्रातिषेधे प्राप्तेऽकृत्तद्धित इति प्र
तिषेधः क्रियते प्रत्ययग्रहणमिति। उदश्वित्शकृदिति चैतावव्युत्पन्नौ। शकृदिति शकेरृतिन् इति यद्यपि व्युत्पाद्यते तथाप्युपदेशे तकारो

प्रातिपदिकप्रतिषेधोऽकृत्तद्धिते। अकृत्तद्धितांतस्य प्रातिपदिकस्य प्रतिषेधो वक्तव्यः। उदश्वित्शकृ
दिति। अकृत्तद्धितांतस्येति किमर्थं। कुंभकारो नगरकारः औपगवः कापटव इति। इदर्थाभावात्सिद्धं।
इत्कार्याभावादत्रेत्संज्ञा न भविष्यति। इदमस्तीत्कार्यं तित्स्वरितमिति स्वरितत्वं यथा स्यात्। नैतदस्ति
प्रत्ययग्रहणं तत्र चोदयिष्यति। इदं तर्हि राजा तक्षा। ञ्नितीत्याद्युदात्तत्वं यथा स्यात्। ञ्नितीत्युच्यते
तत्र ञवर्गाभावान्न भविष्यति। इदं तर्हि स्वर्लू उपोत्तमं रितीत्येष स्वरो यथा स्यात्। स्वरितकरण
सामर्थ्यान्न भविष्यति। न्यङ्स्वरौ स्वरिताविति। इदं तर्हि अंतर्लू उत्तमशब्दः त्रिप्रभृतिषु वर्त्तते
न चात्र त्रिप्रभृतयः संति। इदं तर्हि सक्तुतर्लू उपोत्तमं रितीत्येष स्वरो यथा स्यात्। अंतोदात्तनिपातनं
करिष्यते। स निपातस्वरो रित्स्वरस्य बाधको भविष्यति।

त्यो न भवतीतीत्संज्ञा न प्रवर्त्तते। राजा तक्षेति। नन्वव्युत्पत्तिपक्षेप्यनयोरवश्यमाद्युदात्तत्वमेष्टव्यं। तत्राद्युदात्तस्याद्युदात्तत्वे किं प्रयोजनं येनेत्सं शिवः
ज्ञा स्यात्। उच्यते। आमंत्रितनिघातप्रतिषेधार्थमाद्युदात्तत्वं स्यात्। नङिसंबुद्ध्योरिति नलोपस्य प्रतिषेधो नेत्संज्ञाया इति तत्प्रातिपदिकस्वरः
स्यात्। ञ्यपवर्गाभावादिति। नित्स्वरो नास्तीति भावः। यद्यपि तु सोऽवर्यः सप्तम्यस्तदंतसप्तम्यास्तथापि निर्देशोऽयं न तु निर्दंन इति नास्ति स्वरः। अत्र ११
तु पक्षे श्रोत्रियन्निति यदा वाक्यार्थे पदवचनं तदा स्वरो न सिध्यति। यदा तु छंदसः श्रोत्रभावः घंश्च प्रत्ययस्तदा निर्दिष्टत्वात्स्वरसिद्धिः॥

तद्यथागस्त्येति। प्रत्ययस्य लुकि कृते परिशिष्टस्य कुण्डिनजादेशः तत्र प्रत्ययलक्षणेन तद्धितान्तत्वात्प्रातिपदिकत्वादित्संज्ञानिषेधः स्यात्। न चायं नकारस्तद्धितसंबंधी यतोऽकृत्तद्धित इति निषेधः स्यात्॥ ॥न विभक्तौ तुस्माः॥ ॥इत्संज्ञापरित्राणार्थमिति। इत्संज्ञायाः परित्राणमिति साधनं कृतेति पंचमीतत्पुरुषः। शेषविवक्षायां वा षष्ठीसमासः। अनेनोकारेणानुमीयते येषां प्राग्विभक्तिरिति विभक्तिसंज्ञा तेषां न वि

एतच्चात्र युक्तं यदित्कार्याभावादित्संज्ञा न स्यात्। यत्रेत्कार्यं भविष्यति। तत्रेत्संज्ञा। तद्यथा। आगस्त्यकौण्डिन्ययोरगस्तिकुण्डिनजिति॥ ॥न विभक्तौ तुस्माः॥ ॥विभक्तौ तवर्गप्रतिषेधोऽतद्धिते॥ विभक्तौ तवर्गप्रतिषेधः अतद्धित इति वक्तव्यं। इह मा भूत्। किमोऽत्। क्व प्रेप्सन्तु दीव्यसे। क्वार्ष्णा साइति। स तर्हि वक्तव्यः। न वक्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति न विभक्तौ तद्धिते प्रतिषेधो भवतीति। यदयमिदमःस्थमुरिति मकारस्येत्संज्ञापरित्राणार्थमुकारमनुबंधं करोति। यद्येतज्ज्ञाप्यते इदानीमित्यत्र प्राप्नोति। इत्कार्याभावादत्रेत्संज्ञा न भविष्यति। इदमस्तीत्कार्यं मिदचोऽन्त्यात्परइति वामन्त्यात्परो यथा स्यात्। इड्भावे कृते नास्ति विशेषः। मिदचोऽन्त्यात्पर इति वा प्रत्ययः पर इति वा। स एव तावदिड्भावो न प्राप्नोति। किं कारणं। प्राग्दिशः प्रत्यये ष्विष्युच्यते। कः पुनर्हतीड्भावं प्राग्दिशः प्रत्ययेषु वक्तुं। किं तर्हि प्राग्दिशोऽर्थे ष्विड्भावः। किं सर्वनामबहुभ्योऽद्व्यादिभ्यः

भक्ताविति। इत्संज्ञा न निषिध्यते इति। अत्रेति। इदानीमित्यत्र। अर्थे ष्विति। यथैषामवधिमत्कल्पने यस्याप्यर्थे विधिमत्त्वेनाश्रीयते। तत्रानुत्पन्न एव प्रत्यये इड्भावः। ततः प्रत्ययः। यदि तु पूर्वं प्रत्ययः स्यात्तदा मिदचोऽन्त्यात्परे दानीमि कृते तन्मध्यपतितस्य तद्ग्रहणेन ग्रहणात्सर्वादेशे इड्भावे सति दानींविधानमनर्थकमेव स्यात्॥ ॥

भा॰कै॰

तद्दोषप्ययमिति। तदोदात्तं चेति चकारेणानुकर्षणात्। ननु चेति। सप्तम्यां विभक्तावुत्पन्नायामेतत्कृते दानीमिति भावः। नद्यति। प्राग्दिशोर्थे विहितं पूर्वमभिधाना स्म सप्तम्यर्थवृत्तेः कालवाचिनो नित्यान्न ध्येदानीमाभाव्यमिति दानीमित्यस्यासिद्धिरेवेत्यर्थः। यकारान्त इति। यकारोंत्यत्वमनुभवन्मकारस्यान्त्यत्वं प्रतिबध्नाति। यकारस्य च संयोगान्तस्य लोप इति लोपः क्रियते। यद्येवं मकार एवोपदेशेऽन्त्यः श्रूयते इति प्राप्तोत्येवं मकारस्येत्संज्ञा। तेन दानीं प्र

एवं तर्हि तद्दोप्ययं वक्तव्यः। तदश्चमिदश्चोंत्यात्परत्वेन न सिध्यति। ननु चात्राप्यत्वे कृते नास्ति विशेषः। मिदश्चोन्त्या त्परइति वा प्रत्ययः परइति वा। तद्धि अत्वं न प्राप्नोति। किं कारणं। विभक्तौ विलुप्यते। एवं तर्हि यकारान्तो दानीं करिष्यते। किं यकारो न श्रूयते। लुप्तनिर्दिष्टो यकारः॥ ॥चुटू॥ ॥चुंचुपूचणपोश्चकारप्रतिषेधः। चुंचु पूचणपोश्चकारस्य प्रतिषेधो वक्तव्यः। केशचुंचुः। केशचणः। इदर्थाभावात्सिद्धं। इत्कार्याभावादत्रेत्सं ज्ञा न भविष्यति। इदमस्ती। कार्यं। चितः अंतउदात्तो भवतीति। अंतोदात्तत्वं यथा स्यात्। पित्करणमिदा नीं किमर्थं स्यात्। पित्करणं किमर्थमिति चेत्पर्यायार्थं। पित्करणं किमर्थमिति चेत्पर्यायार्थमेतत्स्या त्। एवं तर्हि यकारादी चुंचुपूचणपो। किं यकारो न श्रूयते। लुप्तनिर्दिष्टो यकारः। इरउपसंख्यानं। इर उपसंख्यानं कर्त्तव्यं। रुधिर्। अरुधत्। अरौत्सीत्॥

वेत्रासिद्धमिति मकारस्येत्संज्ञायां यलोपस्यासिद्धत्वादंत्यताभावात्॥ ॥चुटू॥ ॥लुप्त निर्दिष्ट इति। पूर्वं निर्दिष्टः पश्चाल्लुप्यत इत्यर्थः। राजदन्तादेराकृतिगणत्वाद्भाष्यकारवचनाद्वा पूर्वकालस्य परनिपातः। अथवा लुप्तोमिति प्रतिज्ञातो लुप्तनिर्दिष्टः। उपसंख्यानमिति। इरितो वेत्यत्रेरित इति समुदायानुकरणं। इर् इत् यस्य सोयमिरित्। समुदायस्य चाज्झलात्म कत्वादप्राप्ता इत्संज्ञोपसंख्याते। समुदायस्य चेत्संज्ञासंबंधेऽवयवाः पारतन्त्र्यादित्संज्ञां न लभन्ते लइती इत्वाभावान्नुमभावः। न त्वेवं सति स्व रितेत इत्यात्मनेपदं न प्राप्नोति। नैष दोषः। स्वरितत्वप्रतिज्ञानसामर्थ्यादवयवगतं स्वरिते शिवः
१२

अवयवग्रहणादिति। इरावितोयस्यस इरिदित्येवमित्संज्ञकत्वेनावयवावेयाश्रीयेतेन तुसमुदायइत्यर्थः। यदिपुनरिरिति। यस्यकुंभीस्यास्त्य
त्रिदिवं धान्यंनास्तिसकुंभीधान्यः। यद्यपिनुम्विधायकस्यन्यायस्यनिमित्तंनास्तितथापिदोषेणेवलन्यायाश्रयणमाह। नायमिति। इ
कारएवेदिति। इदितोधातुविशेष्यत्वइतितदंतविधिः। ऋकारस्येति। ऋतइद्धातोरितीत्वेरपरत्वेचक्रिमिदिरित्यादिनिर्देशः। अनंग
स्यनिपातनादित्वं। तत्रभिद्दशब्देएवमृकारस्येत्संज्ञा। ततउत्वरत्वे। इरितोवेत्यत्रापिरुरुदस्येतिसमासेऋतेनिपातनादित्वरत्वेयोःकृत

अवयवग्रहणात्सिद्धं। रेफस्यात्रलत्वमितिभविष्यति। इकारस्योपदेशेऽनुनासिकइदिति। अवयव
ग्रहणादितिचेद्दिदिदिधिप्रसंगः। अवयवग्रहणाद्दिदिधिरपिप्राप्नोति। भेत्ताछेत्ता। इदितोनुम्धातोरिति
नुम्प्राप्नोति। यदिपुनरयमिद्विधिःकुंभीधान्यन्यायेनविज्ञायेत। तद्यथा। कुंभीधान्यःश्रोत्रियइत्युच्यते। यस्यकुं
भ्यामेवधान्यंसकुंभीधान्यः। यस्यचपुनःकुंभ्यांचान्यत्रचधान्यंनासौकुंभीधान्यः। नायमिद्विधिःकुंभीधान्य
न्यायेनशक्योविज्ञातुं। इह हिदोषःस्यात्। ऊर्णुनाव। नंदिष्यतीति। एवंतर्हिनैवंविज्ञायते इकारइदस्यसोयमि
दित्तस्येदिततइति। कथंतर्हि इकारएवेत्। इदितइदिदंनस्यति। अथवाऋकारस्यैवेदमित्वंभूतस्यग्रह
णं। तस्यचोपदेशेऽनुनासिकइतीत्संज्ञाभविष्यति। अथवाआचार्यप्रवृत्तिर्ज्ञापयति। नैवंजातीयकाना
मिदिद्विधिर्भवतीति। यदयमिरितःकांश्चिन्नुमनुषक्तान्पठति। उंदिरूनिशामनेस्कंदिरूगतिशोषणयोः। अथ
वाआचार्यप्रवृत्तिर्ज्ञापयतिइरूशब्दस्येत्संज्ञा

योरिरितइतिनिर्देशः। नुमनुषक्तानिति। नुमानकारेणलस्यलेनकारयुक्तानित्यर्थः। नच
लोपाभावार्थोनकारोपदेशइतिवक्तुंशक्यं। अनकारोपदेशेपीदित्वाल्लोपस्याप्रसंगः। तस्मान्नकारोपदेशेनेरितामिदित्कार्याभावोज्ञाप्यते।
नदृशइतिक्सादेशनिषेधेनापीतोरिमित्कार्याभावोज्ञाप्यते। अन्यथाहृशेरिदित्वान्नुमिसतिइगुपधत्वाभावात्प्राप्तिरेवकस्यनास्तीतिकिंनि
षेधेन। अंतइति। गोःपादांतइत्यत्र। तेनांतेदितांधातूनांनुमागमोन

म॰ कै॰

तस्य लोपः॥ ॥तस्यग्रहणमिति। अभावो लोपः स च भावोपाधिरेव प्रतीयते नान्यथेति प्रकरणादित्संज्ञस्यैव लोपो भविष्यतीति प्रश्नः॥ विभक्तिविपरिणाम इति। सादृश्यात्तत्त्वाध्यवसायाद्वि परिणामव्यवहारः। वाक्यान्तरे लुप्तयोऽप्यविभक्त्यन्तं तं परमार्थतः। एकं नरमेव सन्ति

तस्य लोपः॥ ॥ तस्यग्रहणं किमर्थं। इत्संज्ञकः प्रतिनिर्दिश्यते। नैतदस्ति प्रयोजनं। प्रकृतमिदिति वर्त्तते क प्रकृतं। उपदेशेऽजनुनासिक इदिति। तद्वै प्रथमानिर्दिष्टं। षष्ठीनिर्दिष्टेन चेहार्थः। अर्थाद्विभक्तिविपरिणामो भविष्यति। तद्यथा। उच्चानि देवदत्तस्य गृहाणि। आमंत्रयस्वैनं। देवदत्तमिति गम्यते। देवदत्तस्य गावोऽश्वा हिरण्यं च। आढ्यो वैधवेयः। देवदत्त इति गम्यते। पुरस्तात् षष्ठीनिर्दिष्टं सदर्थाद्द्वितीयानिर्दिष्टं प्रथमानिर्दिष्टं च भवति। एवमिहापि पुरस्तात्प्रथमानिर्दिष्टं सदर्थात् षष्ठीनिर्दिष्टं भविष्यति। इदं तर्हि प्रयोजनं। ये अनेकाल इत्संज्ञास्तेषां लोपः सर्वादेशो यथा स्यात्। अथ क्रियमाणेऽपि वै तस्यग्रहणे कथमिव लोपः सर्वादेशो लभ्यः। लस्य इसारू। कुतः। वचनप्रामाण्यात्। तस्यग्रहणसामर्थ्यात्। इतो लोपे णलुक्कानिष्ठासूपसंख्यानमित्प्रतिषेधात्। इतो लोपे णलुक्कानिष्ठासूपसंख्यानं कर्त्तव्यं। णलु। अहं पपच। क्ना। देविता सेविता। निष्ठा। [illegible] शयितः शयितवान्। किं पुनः कारणं न सिध्यति। इत्प्रतिषेधात्। प्रतिषिध्यते तत्रेत्संज्ञा। णलुत्तमो णिद्वा भवति। क्रादिसेड् न किद्भवति। निष्ठा सेड् न किद्भवतीति॥ श्रीः॥ ॥ शिवः

धीयते। तस्यग्रहणसामर्थ्यादिति। अलोऽन्त्यस्येत्यन्त्यस्य लोपे प्रसक्ते तस्यग्रहणेन समुदायस्य लोपः प्रतिपाद्यते॥ श्रीः॥ ॥राम॥ १३

ग्रहणप्रतिषेधादिति। नैतेषामित्संज्ञा प्रतिषिध्यते ऽपि तु तत्प्रतिबद्धं कार्यमित्यर्थः। निर्दिष्टलोपाद्वेति। तस्येत्यनेनेत्संज्ञाप्रकरणे निर्दिष्टस्येप
रामर्षादसत्यामपीत्संज्ञायां लोपो भवतीत्यर्थः। तुस्मानामिति। यद्यसत्यामपीत्संज्ञायां लोपो भवति तदा तुस्मानामपि प्राप्नोति। तेहि हलंत्यमि

सिद्धं तु णलादीनां ग्रहणप्रतिषेधात्। सिद्धमेतत्। कथं। णलादीनां ग्रहणानि प्रतिषिध्यंते। णलुत्तमो वा णिद्ग्र कार्यमिति
हणेन गृह्यते। क्ता सेणन कित्। ग्रहणेन गृह्यते। निष्ठा सेणन कि ग्रहणेन गृह्यत इति। [redacted] निर्दिष्टलो
पाद्वा। निर्दिष्टलोपाद्वा सिद्धमेतत्। अथवा निर्दिष्टस्यायं लोपः क्रियते तस्मात् सिद्धमेतत्। तत्र तुस्माना
प्रतिषेधः। तत्र तुस्मानां प्रतिषेधो वक्तव्यः। तस्मात्। तस्मिन्। यस्मात्। यस्मिन्। वृक्षाः। प्लक्षाः। अचिनवं। अ
सुनवं। अकरवं। न वोच्चारणसामर्थ्यात्। न वा वक्तव्यः। किं कारणं। उच्चारणसामर्थ्यात्। अत्र लोपो न
भविष्यति। अनुबंधलोपे भावाभावयोर्विप्रतिषेधादप्रसिद्धिः। अनुबंधलोपे भावाभावयोर्विरोधादप्र
सिद्धिः। न ज्ञायते केनाभिप्रायेण प्रसजति केन निवृत्तिं करोतीति। सिद्धं तु उत्सर्गापवादन्यायेन। सिद्धमेत
त्। कथं। अपवादन्यायेन। किं पुनरिह तथा यथोत्सर्गापवादौ। भावो हि कार्यार्थो निर्न्यायो लोपः कार्यं क
रिष्यामीत्यनुबंध आसज्यते। कार्यादन्यत्राभाव इति लोपः॥ ॥श्री॥

सत्र निर्दिष्टः। न वेति। इत्संज्ञाप्रतिषेधादेषामित्का
र्यं नास्ति। यदि चानेन लोपः स्यादुपदेशस्तेषामनर्थकः स्यात्। अनुबंधलोप इति। यथा कश्चिद्वक्ति घटो ऽस्तीति पुनश्च वक्ति नास्तीति तथा
नुबंधानामुच्चारणं भावानुज्ञानं लोपविधानाच्चाभावानुज्ञेति विरोधादप्रामाण्यप्रसंगः। सिद्धमिति। यथा ऽणं का बाधते लपा कार्यं च रि
तार्थमुच्चारणात्प्राप्तं भावं लोपो ऽनन्यार्थो बाधते॥ ॥श्री॥

१५

मा॰कै॰

एकांतइति। एकदेशअवयवइत्यर्थः। अनेकांतस्तूपलक्षणमेवकेवलं। यथागहस्यकाकः तत्रोपलभ्यस्यरूपस्यप्रदर्शनादृक्षशाखावा
लाकयोरिवेतिप्रश्नः। एकांतस्तत्रोपलब्धेरिति। ननुपदेवसंश्रयनि ✓ प्रितंसएवकथंनिश्चयहेतुः। उच्यते। सामर्थ्यादवधारणमा
श्रीयते तत्रैवोपलब्धेरिति अवयवस्तत्रैवोपलभ्यते। अनवयवास्तु तत्र चान्यत्र च। ननुवकारस्यवनत्रणर्वृक्षादिषूपलब्धेः।

१५ अथयस्यानुबंधआसज्यते किं स तस्यैकांतोभवत्याहोस्विदनेकांतः। एकांतस्तत्रोपलब्धेः। एकां
तइत्याह। कुतः। तत्रोपलब्धेः। तत्रस्थोह्यसावुपलभ्यते। तद्यथा। वृक्षस्याशाखावृक्षैकांतादुपल
शेउ भ्यते। तत्रासरूपसर्वादेशदाप्प्रतिषेधपृथक्त्वनिर्देशाअनाकारांतत्वात्। तत्रासरूपविधौदोषोभ
वति। कर्मण्यण्। आतोऽनुपसर्गेकइति। कविषयेऽणपिप्राप्नोति। सर्वादेशेचदोषोभवति। दिव
औत्। औत्सर्वादेशःप्राप्नोति। दाप्प्रतिषेधेपृथक्त्वनिर्देशःकर्त्तव्यः। अदाप्इदापावितिवक्तव्यं। किं
पुनःकारणंनसिध्यति। अनाकारांतत्वात्। ननुचाविकृतेभविष्यति। तच्चात्वंनप्राप्नोति। किंकार
णं। अनेजंतत्वात्।

सारूप्यात् ष॰
नचासावनवयवः। नैषदोषः। भिन्नसमुदायविषयंवर्णांतरमेवतदितिशकुनिभाष्यप्रतिपादितं। त शिवः
त्रासरूपेति। अनाकारांतत्वादित्येतद्दाप्प्रतिषेधइत्यनेनैव [redacted] सामर्थ्यात्संबध्यते। कविषयइति। एकांतत्वेवैरूप्यात्स
मावेशाप्रसंगः। अनेकांतत्वे तु भावप्रकाराविति सिद्धावेशः। अनेजंतत्वादिति। यथाछौकते:ककारस्यैकांतत्वादात्वंनभ १५
स्यैवंदैपोपिनप्राप्नोति। उपदेशग्रहणंचलुक्तेपिप्रकारेनप्राप्नोति॥ ॥श्रीःराम॥

अस्तुतर्हीति। कार्यलक्षणो य केवलमनुबंधउपात्तं न तु तस्यावयवः वृत्तिविशेषइति। बहुव्रीहिर्न सिध्यति। अनेकांतत्वे
कस्य स्येति संबंधात्। अनंतर इति। यद्यप्यनंतरो बहुव्रीहिर्न भवति तत्पाप्ती र्वचनसामर्थ्याद्भवति। अवसितपाठादिति
अवसितानां विच्छिन्नानां पाठः कर्त्तव्यः। ततः पूर्वस्येवासावनंतरः न तु परस्य कालव्यवधानात्। व्याख्यानतइति।

अनेकांते वृत्तिविशेषः परि

अस्तु तर्ह्यनेकांतः। अनेकांते वृत्तिविशेषो न सिध्यति। किं तित्तितीति। कार्याणि न सिध्यंति।
किं हि सतस्तेभवति येन तत्तस्यात्। एवं तर्ह्यनंतरः। अनंतर इति चेत्पूर्वोत्तरयोरित्त्वकृतप्र
संगः। अनंतर इति चेत्पूर्वोत्तरयोरित्त्वं प्राप्नोति। वुञ्छण्। सिद्धं तु अवसितपाठात्। सि
द्धमेतत्। कथं। व्यवसितपाठः कर्त्तव्यः। वुञ्छण्। स चावश्यं कर्त्तव्यः। इतरथा ह्येकांतेपि
संदेहः। अक्रियमाणो व्यवसितपाठ एकांतेपि संदेहः स्यात्। तत्र न ज्ञायते किमयं पूर्वस्य
अवयवाहोस्वित्परस्येति। संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो
विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति पूर्वस्येति व्याख्यास्यामः। वृत्ताद्यः। वृत्ताद्यसिद्धमे
तत्। वृद्धिमंतमाद्युदात्तं वृद्धान्निदिति व्यवसेयं अन्तोदात्तं वृद्धात्किदिति पुकं पुनर्यद्वित्तिनिमित्त

कांतपक्षे एकोवयवो द्वयोर्न भवतीति संदेहे व्याख्यानान्निश्चयः। अनेकांतत्वेनानंतर्यस्याभ्यायापेक्षस्य विरोधाभावाद्व्यवसितपाठ ए
वकर्त्तव्यः। वृत्ताद्यिति। वृत्तां प्रयोगः। नन्वाचार्या भवंतु वृत्तज्ञः शिष्यास्तु कथं प्रतिपद्यंते। व्याख्यानतो पूर्वमेवैतदुक्तं वृत्तादिसनेन
किं तदेवाच्यते पूर्वपक्षः। पूर्वं हेतुरहितं व्याख्यानमुक्तं। वृत्तादिसनेन तु हेतुरुच्यते। तस्मिन्प्रतिपन्ने साध्यं स्वयमेवावैति भाष्यका
रेणावादुक्तमिदं तु वार्त्तिककारेण



मा·कै·

मेङः इति। यद्यप्यनेकांतपक्षस्यापि ज्ञापकमेतद्व्याख्यातुं युज्यते। तथापि हेतुरहितत्वादिहानेकांतपक्षो नाश्रयितव्यत्वात्। प्रदे
शांतरे त्वनेकांतपक्षेणापि संव्यवह्रियते सिद्धमनुबंधस्यानेकांतत्वादिति॥ ॥यथासंख्यं॥ ॥संख्यासंख्यानां गणनमनुद्य
ते। अनुदेशशब्दस्य संबंधिशब्दत्वादुपदेश्यापेक्षः। तेनायमर्थः। समानां समसंख्यानां मध्ये यथागणनमनुदेशिभिः सह

वृत्तिनिमित्तकएवानुबंधः। वृत्तज्ञो ह्याचार्योनुबंधानासज्जति। उभयमिदं अनुबंधेषूक्तं।

15 एकांता अनेकांताइति। किमत्र न्याय्यं। अनेकांताइत्येव न्याय्यं। कुत एतत्। अत्र हि हेतुर्व्यपदिष्टः

यच्च नाम सहेतुकं तन्न्याय्यं। ननु चोक्तं। तत्रासरूपसर्वादेशदाप्प्रतिषेधेषु पृथक्त्वनिर्देशोना

कारांतत्वादिति। असरूपविधौ तावन्न दोषः। आचार्यप्रवृत्तिर्ज्ञापयति नानुबंधकृतमस

रूप्यं भवतीति। यदयं ददातिदधात्योर्विभाषां शास्ति। यदप्युक्तं सर्वादेश इति। तत्राप्याचा

र्यप्रवृत्तिर्ज्ञापयति नानुबंधकृतमनेकाल्त्वं भवतीति। यदयं शित्सर्वस्येत्याह। यदप्युक्तं

दाप्प्रतिषेधे पृथक्त्वनिर्देशः कर्त्तव्य इति। न कर्त्तव्यः। आचार्यप्रवृत्तिर्ज्ञापयति नानुबंधकृत

मनेकांतत्वं भवतीति। यदयमुदीचां माङो व्यतिहारे इति मेङः सानुबंधकस्यात्वभूतस्य ग्रहणं

करोति॥ ॥यथासंख्यमनुदेशः समानां॥ ॥किमिहो शिव:

नुदेशिनः संबध्यंते। इको यणचीति। इक्शब्देन चत्वारः स्थानिनः प्रत्याय्यंते य
णशब्देनापि चत्वार आदेशा इत्यर्थतो स्ति संख्यासाम्यं। यस्मात्तु यद्यपीकारादिभिर्बहूनां ग्रहणं ह्रस्वं तथापि प्रथमतो स्त्येव संख्यासाम्यं ५

इदं तर्हीति। नात्र स्थानकृतमान्तर्यमस्ति नाप्यादेशप्रकृतिकालेऽर्थकृतान्तर्यं संप्रत्ययः प्रवृत्तानामादेशानां स्थान्यर्थाभिधानात्। ननु चेति। नित्यानां शब्दानां प्रयोगादर्थकृतमान्तर्यमस्त्येवेति भावः। किमर्थमिति। पाठक्रमेणैव संबंधो भविष्यतीति भावः। संज्ञासमासनिर्देशादिति। परस्मैपदानां णलतुसित्यत्र संज्ञया सर्वं युगपत्प्रत्याय्यं तेऽतिनास्ति पाठक्रमाश्रयणस्य। लोके यज्ञदत्तदेवदत्त

कृतमान्तर्यं। तालुस्थानस्य तालुस्थान ओष्ठस्थानस्योष्ठस्थानो भविष्यतीति। इदं तर्हि तस्थस्थमिपां तांतंतामः इति। ननु चैतदपि स्थानेऽन्तरतम इत्येव सिद्धं। कुतमान्तर्यं। एकार्थस्यैकार्थो द्व्यर्थस्य द्व्यर्थो बह्वर्थस्य बह्वर्थो भविष्यतीति। इदं तर्हि तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यकः इति। किमर्थमिदमुच्यते। संज्ञासमासनिर्देशात्सर्वप्रसंगोऽनुदेशस्य तत्र यथासंख्यवचनं नियमार्थं। संज्ञया समासेन वा निर्देशः क्रियते। संज्ञया तावत्। परस्मैपदानां णलतुसुस्थलथुसणल्वमा इति। समासेन। तूदीशलातुरवर्मतीकूचवाराड्ढक्छण्ढञ्यक इति। संज्ञासमासनिर्देशाद्दे तस्मात्कारणात्सर्वप्रसंगः। सर्वस्यादेशस्य सर्वोऽनुदेशः प्राप्नोति। इष्यते च समसंख्यं यथा स्यादिति तच्चान्तरेण यत्नं न सिध्यतीति तत्र यथासंख्यवचनं नियमार्थं एवमर्थमिदमुच्यते। किं पुनः कारणं संज्ञया च समासेन वा निर्देशः क्रियते। संज्ञासमासनिर्देशः पृथग्विभक्तिसंज्ञनुच्चारणार्थः संज्ञयाच समासेन वा निर्देशः क्रियते पृथग्विभ

यज्ञदत्ताविति समासनिर्देशे नास्ति क्रमनियमः स्यात्। किंपुनरिति। णलतुसोऽतुसित्यादिकस्मान्न क्रियत इति प्रश्नः॥ श्रीः रामजी
अदेनेकावयवात्मकः समुदाय एकैकेन शब्देन प्रत्याय्यत इति कुतः क्रमनियमः २

मा॰कै॰ विदोलटो वेति। पर्यायोद्देशे क्रियमाणे मसो म इत्येवानंतर्यात्संबध्येतेत्यर्थः। व्यवहितानामपि स्वरितत्वादनुवृत्तावाश्रीयमाणा
यां प्रतिपत्तिगौरवप्रसंगः। किं पुनरिति। यद्यप्यर्थे शब्दस्य गुणभावादर्थत एव साम्यं न्याय्यं तथापि शब्दधर्मेणाप्यर्थस्य व्यपदेशो दृ
श्यते। यथाम्लमरणशब्दस्य द्विरेफत्वाद्विरेफो भ्रमरः। तथा घस्मरं मांसं भक्षरमास्य। तस्माच्छब्दतोपि साम्यमत्राशंकितं। णलादय

प्रकरणे च सर्वसंप्रत्ययार्थः। प्रकरणे च सर्वेषां संप्रत्ययो यथा स्यात्। विदोलटो वेति। किं पुनः श
16 ब्दतः साम्ये संख्यातानुदेशो भवत्याहोस्विदर्थतः। कश्चात्र विशेषः। संख्यासाम्यं शब्दतश्चेत् सलाद
यः परस्मैपदानां डारौरसः प्रथमस्याय वायावएच इत्यनिर्देशः। आगमकोनिर्देशानिर्देशः पर
स्मैपदानां णलतुसुस्थलथुसणल्वमा इति णलादयः बहवः परस्मैपदानामित्येकः शब्दः वैषम्यात्सं
ख्यातानुदेशो न प्राप्नोति। डारौरसः प्रथमस्य। डारौरसो बहवः प्रथमस्येत्येकः शब्दः वैषम्यात्सं
ख्यातानुदेशो न प्राप्नोति। एचोऽयवायावः। अयवायावो बहवः एच इत्येकः शब्दः वैषम्यात्संख्या
तानुदेशो न प्राप्नोति। अस्तु तर्ह्यर्थतः॥ अर्थतश्चेल्ललुटोर्न [redacted] न्धरीकृणः सिंधुतक्षशिलादिषु दो
षः। अर्थतश्चेल्ललुटोर्न धरीकृणः सिंधुतक्ष शिलादिषु दोषो न भवति॥ ॥शमकस्मोडयतः॥

इति। परस्मैपदशब्देन प्रकृतानामेव ग्रहणं न तु शब्दैकसाहित्यमर्थतः साम्यमस्ति न तु शब्दतः। डारौरस इति। यद्यडारौरसस्थे शिवः
त्येकशेषः क्रियते तदार्थतः संख्यासाम्यमस्ति। आगमक इति। संख्यासाम्यस्यानवबोधक इत्यर्थः। ललुटोरिति। लशब्दस्य लङ्लटा
वर्थौ साम्याभावः। यद्यालं रूपसामान्यमर्थो लशब्दस्येति पक्षस्तदा स्येवसाम्यमिति दोषाभावः। नंघादिषु पव्ययवेन विग्रहः संभूता १६
विति॰ यः समासार्थ इत्याश्रीयमाणे समुदायत्रयापेक्षया प्रत्ययत्रयस्य साम्यसद्भावाद्दोषः॥

आत्मनेपदेति। नन्वात्मनेपदसंज्ञा न तङः शब्दस्य किंतु तत्प्रत्यापितानां नवानां तादीनामिति नास्मर्थतः साम्यं। नैष दोषः। तङ्रूपापन्ना
नादय आत्मनेपदशब्देन प्रत्याय्यंते तङ्स्य स्ति साम्यं। सार्वधातुकद्वियग्रहणेष्विति। कोऽर्थः एतेषु नानि द्वियग्रहणानि सार्वधातुकस्य द्वियग्र

स्यतासीललुटोः। स्यतासी द्वौ। ललुटोरित्यस्यत्रयोर्थाः वैषम्यात्संख्यातानुदेशो न प्राप्नोति। नंदिग्र
हिपचादिभ्यो ल्युणिन्यचः। नंद्यादयो बहवः। ल्युणिन्यचस्त्रयः। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। अ
रीहणादयो बहवः कुञादयः सप्तदश। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। सिंधुतक्षशिलादिभ्यो
ऽणञौ। सिंधुतक्षशिलादयो बहवः। अणञौ द्वौ। वैषम्यात्संख्यातानुदेशो न प्राप्नोति। आत्मनेपदविधि
निष्ठासार्वधातुकद्वियग्रहणेषु। आत्मनेपदविधिनिष्ठासार्वधातुकद्वियग्रहणेषु दोषो भवति। आत्म
नेपदविधिश्च न सिध्यति। अनुदात्तङित आत्मनेपदं। अनुदात्तङितौ द्वौ। आत्मनेपदमित्यस्य छाव
र्यौ तत्र संख्यानुदेशः प्राप्नोति। निष्ठा रदाभ्यां निष्ठातो नः पूर्वस्य च दः इति रफदकारौ द्वौ। निष्ठेत्यस्य
छावर्यौ तत्र संख्यानुदेशः प्राप्नोति। सार्वधातुकद्वियग्रहणेषु च दोषो भवति। श्नसोरल्लोपः। श्नस
सौ द्वौ। सार्वधातुकमित्यस्य छावर्यौ। तत्र संख्यातानुदेशः प्राप्नोति। एङः पूर्वरूपत्वे प्रतिषेधः। एङः पूर्व
रूपत्वे प्रतिषेधो वक्तव्यः। एङः पदांतादति। ङसिङसोश्च। ङसिङसौ द्वौ। एङित्यस्य छावर्यौ तत्र संख्या
तानुदेशः प्राप्नोति॥ ॥

णानीति समासः। सार्वधातुकमपितेषु गृह्यत इति तेन विशेष्यं॥ ॥रामकृष्णो जयतः॥ श्रीलक्ष्मीनृसिंहः पातु॥

भा॰ के॰ संवृतावर्णा इतिपयद्यपिशास्त्रेऽकारस्यविवृतोपदेशः कृतस्तथापिलौकिकप्रयोगापेक्षयैतदुक्तं। कितौ हा विति। किंच ऋ इ स्येकले
पिककारङकारयोर्द्विलादस्तिशब्दतःसाम्यं। उदिकूलइति। इं द्योपं आगंतुनाचेकारेणानिर्देशइतिचेद्यां ऊदीतिपंचम्याःस्या

अस्तुतर्हिशङ्कतः। ननुचोक्तं संख्यासाम्यंशङ्कतम्भेब्लादयःपरस्मैपदानांडारौरसः प्रप्पमस्यायवायावए
चइत्यनिर्देशइति। नैषदोषः। स्थानेंतरतमइत्यनेनव्यवस्थाभविष्यति। कुतआंतर्यं। एकार्थस्यैकार्थोद्व्यर्थस्यद्व्य
र्थः बह्वर्थस्यबह्वर्थस्यबह्वर्थः। संवृतावर्णास्यसंवृतावर्णाः विवृतावर्णस्यविवृतावर्णाः। अतिप्रसंगोगु
णवृद्धिप्रतिषेधेक्ङिति। अतिप्रसंगोभवतिगुणवृद्धिप्रतिषेधेक्ङिति। गुणवृद्धीद्वे क्ङितौद्वौ। तत्रसंख्यातानुदे
17 शः प्राप्नोति। नैषदोषः। गकारोप्यत्रनिर्दिश्यते। तदकारग्रहणं कर्त्तव्यं। नकर्त्तव्यं। क्रियतेन्यासएव। ककारे
गकारश्चर्त्वभूतोनिर्दिश्यतेगितिकितिङितीति। उदिकूलेरुजिवहोः। उदिकूलेद्वे। रुजिवहोद्वौ। तत्रसंख्याता
नुदेशः प्राप्नोति। नैषदोषः। नोद्दिरूपपदं किंतर्हिविशेषणं। रुजिवहोरुत्पर्वाभ्यांरुजिवहिभ्यांकूल उपपदइ
ति। तव्यत्तव्यानीयरादिषुधातुत्रियग्रहणेषु। तव्यत्तव्यानीयरादिषुधातुत्रिग्रहणेषुदोषोभवति। विदिभिदिछिदेःकुरच्। विदि
भिदिछिदिदयस्त्रयः तव्यदादयस्त्रयः। संख्यातानुदेशः प्राप्नोति। घञादिषुद्विग्रहणेषु। घञादिषुद्विग्रहणेषु
दोषोभवति। निरभ्योःपूल्वोः। निरभी द्वौ। पूल्वौ द्वौ। तत्रसंख्यातानुदेशः प्राप्नोति। नैषदोषः। इष्यतेचात्र सं
ख्यातानुदेशः। निष्पावः अभिलावइति। एवंतर्हिअकर्त्तरि शिवः
नेसप्तमीकृता। उदःपराभ्यांरुजिवहीभ्यांताभ्यामितिपरिहारः। धातु
त्रियग्रहणेषुइति। त्रीणिग्रहणानियेषांतेत्रियग्रहणाः। धातव त्रियग्रहणायेषुतव्यत्तव्यानीयरादिषुइतिपुनर्बहुव्रीहिः॥ ॥श्रीरामकृष्णोजयतः॥ १७

कर्त्तृकर्मणोः कृति। भवतेरकर्मकत्वात्कर्त्तर्य्योपपदं। करोतेस्तूपपदद्वयेऽपि ख्यापयिष्यते। अन्ये तु प्राप्त्यर्थस्य भवते रूपपदद्वये प्रत्ययमिच्छंति। छं
दो ब्राह्मणानीति। जाबलीवर्द्दन्यायेन छंदः शब्देन मंत्रब्राह्मणग्रहणं। यथा क्षुबन्धर्विति छंदसीति ब्राह्मणानां ग्रहणं निसंमंत्र इति मंत्रग्रहणात्तु छं

५४ रोपधेतोः प्राचां। अपदतद्धितयोः। रोपधे तोः प्राचां न रुरिति पाधिद्वितयोः। रोपधेतो होप धिद्वितौ तत्र संख्यातानुदेशः प्राप्नोति २४

अवेत्तृस्त्रोः। करणाधिकरणयोः। तृस्त्रौ। द्वौ करणाधिकरणे द्वे तत्र संख्यातानुदेशः प्राप्नोति। कर्त्तृकर्मणो

श्च भृकृञोः। कर्त्तृकर्मणी द्वे भृकृञौ द्वौ तत्र संख्यातानुदेशः प्राप्नोति। अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि। अवेनेऽक्लृ

प्त्यमर्षौ द्वौ किंवृत्ताकिंवृत्ते द्वे तत्र संख्यातानुदेशः प्राप्नोति। कृभ्वोः स्त्राणमुलौ। कृभ्वौ द्वौ स्त्राणमुलौ द्वौ तत्र संख्या

तानुदेशः प्राप्नोति। अधीयानविदुषोश्छंदो ब्राह्मणानि। छंदोब्राह्मणानीति द्वे अधीते वेदेति च द्वौ तत्र संख्याता

नुदेशः प्राप्नोति। तत्र भवस्तस्य व्याख्यानः। क्रतुयज्ञेभ्यश्च। तत्र भवस्तस्य व्याख्यानौ क्रतुयज्ञौ द्वौ तत्र संख्या

तानुदेशः प्राप्नोति। संघादिषु प्रभृतयः। संघादिष्वप्रभृतयः संख्यातानुदेशेन न सिध्यंति। नैष दोषः। घोषग्र

हणमपि तत्र कर्त्तव्यं। वेशोयशआदेर्भगाद्यल्खौ। वेशोयशआदी द्वौ यल्खौ द्वौ तत्र संख्यातानुदेशः प्राप्नोति।

ङसिङसोः ख्यत्यात्परस्य। ङसिङसौ द्वौ ख्यत्यौ द्वौ तत्र संख्यातानुदेशः प्राप्नोति। न वा समानयोगवचनात्।

न वा एष दोषः। किं कारणं। समानयोगवचनात्। समानयोगे संख्यातानुदेशं वक्ष्यामि। तस्य दोषो विदाल

टो वा। तस्यैतस्य लक्षणस्य दोषः विदालटो वेति संख्यातानुदेशो न प्राप्नोति। धमाधेटोः नाडीमुष्ट्योश्च। धमाधेटोः

नाडीमुष्ट्योश्च संख्यातानुदेशो न प्राप्नोति।

दोग्रहणे नैव तु ब्राह्मणानां ग्रहणे सिद्धे ब्राह्मणविशेषप्रतिपत्त्यर्थं पुनर्ब्राह्मणग्रह

णं कृतं। तेन याज्ञवल्कानि ब्राह्मणानीति तद्धितप्रत्ययो न भवति। न वेति। अनुदेशादुच्चारणं। योगांतरे लक्षणांतरस्यानुमानं न तदुच्चारणमि

त्यिन्यायप्राप्त एवायमर्थः। विदालटो वेति। अत्र तु यथासंख्यानामनुमानाद्दोषः।

18

भा०के० युष्मदस्मदोश्चेति। बहुवचनस्य वस्नसादिषु योगेषु अनुमीयमानत्वात् युष्मदस्मदोर्यथासंख्यं न प्राप्नोति। यस्मिन्पक्ष इति शब्
दः साम्यमेकयोगेव [illegible]लेषयपक्ष आश्रयितव्य इत्याहुः। दोषप्रतिविधानं तु कश्चिदानन्तर्याद्व्यवस्थां कश्चिदनभिधानाभिधानाभ्या
मिति कर्त्तव्यं। अथवेति। यत्र स्वरितत्वं प्रतिज्ञायते तत्रैव प्रवृत्तो ऽर्थतो वा साम्याश्रयणं नान्यत्र समेपि संख्यासाम्ये॥ ॥स्वरितेन॥ ॥स्व

166 स्वलगोरथादिनित्रकद्यचञ्चा संख्यातानुदेशेन प्राप्नोति। सिंध्वपकराभ्यां कनूअणञोच संख्यातानुदे
शेन प्राप्नोति। युष्मदस्मदोश्चादेशाः युष्मदस्मदोश्चादेशाः संख्यातानुदेशेन न सिध्यन्ति। तस्माद्यस्मिन्
क्षेऽल्पीयांसो दोषाः तमास्थाय प्रतिविधेयं दोषेषु। अथवेवं व्यवस्थास्ति। यथासंख्यमनुदेशः समानां स्वरि
तेनातो ऽधिकारः। अधिकारश्च भवति स्वरितेनेति। एवमपि स्वरितं दृष्ट्वा संदेहः स्यात् न ज्ञायते किं
मयं समसंख्यार्थः आहोस्विदधिकारार्थ इति। सन्देहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते
व्याख्यानतो विशेषप्रतिपत्तिर्न हि संदेहादलक्षणमिति। समसंख्यार्थ इति व्याख्यास्यामः॥ ॥स्वरिते
नाधिकारः॥ ॥किमर्थमिदमुच्यते। अधिकारः प्रतियोगं तस्यानिर्देशार्थः। अधिकारः क्रियते प्रतियोगं
तस्यानिर्देशार्थ इति। किमिदं प्रतियोगमिति। योगं योगं प्रति प्रतियोगं। योगे योगे तस्य ग्रहणं माकार्ष
मिति। किं गतमेतदियता सूत्रेण। गतमित्याह। कुतः। लोकतः। तद्यथा। लोके ऽधिकृतो ग्रामे ऽधिकृतो सौ

रितेनैतीयं [illegible]लक्षणेनतीयः। स्वरितेनाधिकारो लक्ष्यत इत्यर्थः। स्वरितत्वं सूत्रस्थानां केवलमधिकारज्ञानार्थं प्रतिज्ञायते न तु शिवः
प्रयोगसमवायि। अधिकारशब्दः भावसाधनः कर्मसाधनो वा। विनियोगः लोके ऽधिकार उच्यते स एवेह गृह्यते। किमर्थमिति। आ
कांक्षादिवशाद्धेकत स्य संबंधो लोकवद्भविष्यति [illegible] तिप्रश्नः। किंगतमिति। किम[illegible] यमर्थो ऽधिकारशब्देन परिगृहीतो यत्नेति प्रश्नः। १९

शब्देनेति। नहि परिस्पंदरूपः शब्दस्य व्यापारोस्ति। न चेति। वचनरहितात् लोकव्यवहारादेतत्साध्योऽर्थः सिद्ध इत्यर्थः। यज्ञदत्तायेति।
संप्रदानविभक्त्या सान्निध्ये हि तां गो कर्मिकाद्ददातिक्रियापेक्ष्यते। अश्रुतकल्पनायाः श्रुतापेक्षणस्य लाघवात्। घञो निवर्त्तकः स्या
दिति। ततश्चाक्रोशे वन्योर्ग्रहि इत्यादिष्वनंतरं इनुण् स्यात्। सति सूत्रे घञः स्वरितत्वा ... नान्तु ... भवति नाभिविनुणो वि

शब्देन चाप्यधिकृतेन कोन्यो व्यापारः शक्यो वगंतुं अन्यदतो योगे योग उपस्थानमानं वा निर्दिश्यमानाधिकृतत्वा
घषालोके नवाए तत्प्रयोजनमस्ति किं कारणं। निर्दिश्यमानाधिकृतत्वा यथालोके निर्दिश्यमानमधिकृतं
गम्यते। तद्यथा। देवदत्ताय गौर्दीयतां यज्ञदत्ताय विष्णुमित्रायेति गौरिति गम्यते। एवमिहापि पदरुजविशु
स्पृशो घञ् स स्थिरे ==== भावे घञिति गम्यते। अन्यनिर्देशस्तु निवर्त्तकस्तस्मात्परिभाषा। अन्यनिर्देश
देवदत्ताय
स्तु लोके निवर्त्तको भवति। तद्यथा। गौर्दीयतां विष्णुमित्राय कंबल इति कंबलो गोर्निवर्त्तको भवति। ए
वमिहापि अभिविधौ भाव इनुण् घञो निवर्त्तकः स्यात्। तस्मात्परिभाषा कर्त्तव्या। अधिकारपरिमा
णाज्ञानं तु अधिकारपरिमाणाज्ञानं तु भवति। न ज्ञायते कियंतमवधिमधिकारोनुवर्त्तत इति। अधि
कारपरिमाणज्ञानार्थं तु अधिकारपरिमाणज्ञानार्थं एवं तर्हि अयं योगो वक्तव्य अधिकारपरिमा
णं ज्ञास्यामीति। कथं पुनः स्वरितेनाधिकार इत्यनेनाधिकारपरिमाणं शक्यं विज्ञातुं। एवं वक्ष्यामि। स्वरिते
पर्यायाः अधिकारपरिमाणज्ञानं लिंगेति। यथा तोरिति किं आल्लादेशो भो नाधिकार इति। स्वरितं दृष्ट्वाधिकारो न भवतीति केनेण
षाध्यायपरिसमाप्तेः अंगाधिकारः आगभ्यासविकारेभ्यो वा सप्तमपरिसमाप्तेरिति। स्वरितं दृष्ट्वेति। भक्त. तस्याधिकारस्य निवृत्त्यर्थं शास्त्रं
तरस्स्वरितत्वं प्रतिज्ञायते। तेन विंशतिकाद्वदित्यत्र स्वरितत्वदर्शनाद्वित्रि

द्वित्रिपूर्वान्निष्कात् बिस्ताच्चेत्यनयोः १

मां॰के॰ यावतिथइति। द्वित्रिपूर्वान्निष्कादित्यत्र इकारोनुबंधः कर्त्तव्यः। तेन द्वयोर्योगयोरनुवृत्तिर्भवति। एवमन्यत्रापि वेदितव्यं। अल्पीयांस इति। के यं पुनर्भिन्नजातीयापेक्षया प्रकर्षप्रत्ययः। परमतापेक्षया। अल्पेयोगाइति चेन्नन्यसेत त्राल्पीयांसोऽलः। अथ बहवोऽल इति चेद्भूयांसो

19 नाधिकार इति चेदुक्तं। किमुक्तं। अन्यनिर्देशस्तु निवर्त्तकस्तस्मात्परिभाषेति। अधिकारार्थमेव तर्ह्ययं योगो वक्तव्यः। ननु चोक्तमधिकारपरिमाणज्ञानं लिति। यावतिथोऽलनुबंधस्तावतो योगानिति वचनोत्सि द्धं। यावतिथोऽलनुबध्यते तावतो योगानधिकारोनुवर्त्तत इति वक्तव्यं। अथेदानीं यत्राल्पीयांसोऽलः भूय स्वश्च योगा नधिकारोनुवर्त्तते कथं तत्र कर्त्तव्यं। भयसि प्राग्वचनं। भूयसि प्राग्वचनं कर्त्तव्यं। प्रागमुत इ ति वक्तव्यं। तत्तर्हि वक्तव्यं। न वक्तव्यं। संदेहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो वि शेषप्रतिपत्तिर्नहि सन्देहादलक्षणमिति प्रागमुत इति व्याख्यास्यामः। यद्येवं नार्थोनेन। केनेदानीमधिका रो न विप्यतीलोकिकोधिकारः। ननु चोक्तं नाधिकार इति चेदुक्तं किमुक्तं अन्यनिर्देशस्तु निवर्त्तकस्तस्मा त्परिभाषेति देहमात्रमेतद्भवति। सर्वसंदेहेषु चेदमुपतिष्ठते व्याख्यानतो विशेषप्रतिपत्तिर्नहि संदेहाद लक्षणमित्युक्तं इकुणघञिति संदेहघञिति व्याख्यास्यामः। न तर्हीदानीमयं योगो वक्तव्यः। वक्तव्यश्च। किंप्र योजनं। स्वरितेनाधिकारगतिर्यथा विज्ञायेत। अधिकारगतिः अधिकं कार्यं अधिकं कारः। गोस्त्रियोरुपसर्जन स्येत्यत्र गोटाङ्ग्रहणं चोदितं तन्न कर्त्तव्यं भवति। स्त्रीग्रहणं स्वरयिष्यते स्वरितेनाधिकारगतिर्भविष्यतीति स्त्रि शिवः यामित्येवं प्रकृत्य ये विहितास्तेषां ग्रहणं विज्ञास्यते। स्वरि

योगाः भयसीति। अंगस्य प्राग्धेरित्यादिवक्तं। तत्तर्हीति। यावतिथोऽलिति १९ भूयसि प्राग्वचनं चेत्यर्थः। घञिति व्याख्यास्याम इति। ननु चेकुणघञामनंतर्यात्संदेहाभावः। उच्यते। घञानुवृत्तिसामर्थ्यं दृष्टं इकुणश्चानंतर्यमिति तनि मित्तसद्भावादस्तिसंदेहः॥

सांकाश्यकाः पाटलिपुत्रकाश्च । एकत्वं प्राप्येत्यर्थः ॥

भा॰के॰ सांकाश्येभ्य इति । बुध्यासंनीहिते केवलाः प्रकर्षाश्रयेण पाटलिपुत्रका विभज्यन्ते इति मुख्यापायाभावादपादानसंज्ञा न स्यात् । ध्रुवमपाये इ
त्यत्र स्वरितत्वे प्रतिज्ञाते सति बुद्धिपरिकल्पितापायाश्रयणेनापि भवति । कृत्स्न आधारात्मेति । सर्वैरवयवैर्व्याप्त इत्यर्थः । गंगायां गा

अधिकं कार्यम् । अपादानमाचार्यः किं न्याय्यं मन्यते यत्र प्राप्यनिवृत्तिः तेनेहैव स्यात् ग्रामादागच्छति नगरा
दागच्छति । सांकाश्यकेभ्यः पाटलिपुत्रका अभिरूपतरा इत्यत्र न स्यात् । तथाऽधिकरणमाचार्यः किं न्या
य्यं मन्यते यत्र कृत्स्न आधार आत्मना व्याप्तो भवति तेनेहैव स्यात् तिलेषु तैलं दध्नि सर्पिरिति । गंगायां गावः
कूपे गर्गकुलमित्यत्र न स्यात् । स्वरितेनाधिकं कार्यं भवतीत्यत्रापि सिद्धं भवति । अधिकं कार्यम् । अधिकः का
रः पूर्वविप्रतिषेधा न पठितव्या भवन्ति । गुण × स्वरितेनाधिकं कार्यं भवतीत्यत्रापि सिद्धं भवति ×
वृद्ध्यौत्वतृज्वद्भावेभ्यो नुम् पूर्वविप्रतिषिद्धं नुमचिरतृज्वद्भावेभ्यो नुडिति । नुम्नुटौ स्वरयिष्येते । तत्र स्व
रितेनाधिकः कारो भवतीति नुम्नुटौ भविष्यतः । कथं पुनरधिकः कार इत्यनेन पूर्वविप्रतिषेधाः शक्या
न पठितुं । लोकतः । तद्यथा । लोकेऽधिकमयं कारं करोतीत्युच्यते योऽयं दुर्बलः सन्बलवद्भिः सह भारं वहति ।
एवमिहाप्यधिकमयं कारं करोतीत्युच्यते योऽयं पूर्वः सन्परं बाधते । अधिकारगतिस्त्रयोऽर्था विशेषायो
ऽधिकं कार्यम् । अन्ययोन्योऽधिकारः पूर्वविप्रतिषेधार्थः सः ॥ ॥ इति श्रीभगवत्पतंजलिविरचिते व्याकरणम शिवः

ग इति । गंगाशब्दो ह्यत्र न यामे व वर्त्तते न त्वत्र तत्समीपदेशे । तस्य हि मुख्यमेवाधारत्वमित्यप्रयोजनमेतत्स्यात् । न यास्तु तत्सामीप्यात्कौणमाधा
रत्वमिति यत्नात्सिद्धिः । पूर्व इति । विप्रतिषेधे परं कार्यमिति वचनात्सर्वो बाध्यः प्रतिज्ञाने न बाधकः संपद्यते तुल्यजातीयस्य बाधकः । न लुनि 20
सवादिपुरुषस्य ॥ ॥ इत्युपाध्यायजैय्यटपुत्रकैय्यटकृते महाभाष्यप्रदीपे प्रथमाह्निकम् ।

20

प्रयोजनान्युपसंहरति । अधिकार इति । अविशेषाय गौणमुख्ययोः ।

अदः पुस्तकं रामचंद्रपाठकस्य
पत्राणि २० विंशतिः ॥